काव्यमाला ।

दशमो गुच्छकः ।

मूल्यं सार्धो रूप्यकः ।

KÂVYAMÂLÂ.

A collection of old and rare Sanskrit Kâvyas, Nâtakas, Champûs, Bhâṇas, Prahasanas, Chhandas, Alankâras &c.

PART X.

EDITED BY

PANDIT S'IVADATTA

AND

KÂS'ÎNÂTH PÂṆDURANG PARAB.

Second Revised Edition.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OE JÂVAJÎ DÂDÂJÎ'S "NIRNAYA-SÂGAR" PRESS.

BOMBAY.

1903.

Price 1½ *Rupee.*

॥ श्रीः ॥

काव्यमाला ।

नाम

नानाविधप्राचीनकाव्यनाटकचम्पूभाणप्रहसन-
च्छन्दोलंकारादिसाहित्यग्रन्थानां
संग्रहः ।

दशमो गुच्छकः ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा शिवदत्तशर्मणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथ-
शर्मणा च संशोधितः ।

द्वितीयं संस्करणम् ।

स च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः ।

१९०३.

मूल्यं सार्धो रूप्यकः ।

अनुक्रमणिका ।

काव्यमाला।

श्रीदुर्वाससा विरचितं

श्रीललितास्तवरत्नम्[1]।

वन्दे गजेन्द्रवदनं वामाङ्कारूढवल्लभाश्लिष्टम्।
कुङ्कुमपरागशोणं कुवलयिनीजारकोरकापीडम्॥ १॥

स जयति सुवर्णशैलः सकलजगच्चक्रसंघटितमूर्तिः।
काञ्चननिकुञ्जवाटीकन्दलदमरीप्रपञ्चसंगीतः॥ २॥

हरिहयनैर्ऋतमारुतहरितामन्तेष्ववस्थितं तस्य।
विनुमः सानुत्रितयं विधिहरिगौरीशविष्टपाधारम्॥ ३॥

मध्ये पुनर्मनोहररत्नरुचिस्तबकरञ्जितदिगन्तम्।
उपरि चतुःशतयोजनमुत्तुङ्गं शृङ्गपुङ्गवमुपासे॥ ४॥

तत्र चतुःशतयोजनपरिणाहं देवशिल्पिना रचितम्।
नानासालमनोज्ञं नमाम्यहं नगरमादिविद्यायाः॥ ५॥

प्रथमं सहस्रपूर्वकषट्शतसंख्याकयोजनं परितः।
वलयीकृतस्वगात्रं वरणं शरणं व्रजाम्ययोरूपम्॥ ६॥

तस्योत्तरे समीरणयोजनदूरे तरङ्गितच्छायः।
घटयतु मुदं द्वितीयो घण्टास्वनसारनिर्मितः सालः॥ ७॥

उभयोरन्तरसीमन्युद्दामभ्रमररञ्जितोदारम्।
उपवनमुपास्महे वयमूरीकृतमन्दमारुतस्यन्दम्॥ ८॥

---

१. अस्य श्रीललितास्तवरत्नस्य पुस्तकद्वयमासादितम्. तत्रैकं क. चिह्नितं जयपुरराजगुरुश्रीभट्टश्रीनारायणपर्वणीकराणाम्, अपरं च ख-चिह्नितं चातुर्वैदिकगौडरामचन्द्रतनूजनाथूनारायणशर्मणाम्.

आलिङ्गय भद्रकालीमासीनस्तत्र हरिशिलाश्यामाम् ।
मनसि महाकालो मे विहरतु मधुपानविभ्रमन्नेत्रः ॥ ९ ॥
तार्तीयीको वरणस्तस्योत्तरसीम्नि वातयोजनतः ।
ताम्रेण रचितमूर्तिस्तनुतामाचन्द्रतारकं भद्रम् ॥ १० ॥
मध्ये तयोश्च मणिमयपल्लवशाखाप्रसूनपक्ष्मलिताम् ।
कल्पानोकहवाटीं कलये मकरन्दपङ्किलावालाम् ॥ ११ ॥
तत्र मधुमाधवश्रीतरुणीभ्यां तरलदृक्चकोराभ्याम् ।
आलिङ्गितोऽवतान्मामनिशं प्रथमर्तुरात्तपुष्पास्त्रः ॥ १२ ॥
नमत तदुत्तरभागे नाकिपथोल्लङ्घिशृङ्गसंघातम् ।
सीसाकृतिं तुरीयं सितकिरणालोकनिर्मलं सालम् ॥ १३ ॥
सालद्वयान्तराले सरलालिकपोतचाटुसुभगायाम् ।
संतानवाटिकायां सक्तं चेतोऽस्तु सततमस्माकम् ॥ १४ ॥
तत्र तपनातिरूक्षः साम्राज्ञीचरणसान्द्रितस्वान्तः ।
शुक्रशुचिश्रीसहितो ग्रीष्मर्तुर्दिशतु कीर्तिमाकल्पम् ॥ १५ ॥
उत्तरसीमनि तस्योन्नतशिखरोत्कम्पिहाटकपताकः ।
प्रकटयतु पञ्चमो नः प्राकारः कुशलमारकूटमयः ॥ १६ ॥
प्राकारयोश्च मध्ये पल्लवितान्यभृतपञ्चमोन्मेषा ।
हरिचन्दनद्रुवाटी हरतादामूलमस्मदनुतापम् ॥ १७ ॥
तत्र नभश्रीमुख्यैस्तरुणीवर्गैः समन्वितः परितः ।
वज्राट्टहासमुखरो वाञ्छापूर्तिं तनोतु वर्षर्तुः ॥ १८ ॥
मारुतयोजनदूरे महनीयस्तस्य चोत्तरे भागे ।
भद्रं कृषीष्ट षष्ठः प्राकारः पञ्चलोहधातुमयः ॥ १९ ॥
अनयोर्मध्ये संततमङ्कुरद्दिव्यकुसुमगन्धायाम् ।
मन्दारवाटिकायां मानसमङ्गीकरोतु मे विहृतिम् ॥ २० ॥
तस्यामिवोर्जलक्ष्मीतरुणीभ्यां शरदृतुः सदा सहितः ।
अभ्यर्चयन्स जीयादम्बामामोदमेदुरैः कुसुमैः ॥ २१ ॥

---

१. 'सरलानिलपीत' क.

तस्यर्षिसंख्ययोजनदूरे देदीप्यमानशृङ्गौघः ।
कलधौतकलितमूर्तिः कल्याणं दिशतु सप्तमः सालः ॥ २२ ॥
मध्ये तयोर्मरुत्पथलङ्घितविटपाग्रविरुतकलकण्ठा ।
श्रीपारिजातवाटी श्रियमनिशं दिशतु शीतलोद्देशा ॥ २३ ॥
तस्यामतिप्रियाभ्यां सह खेलन्सहसहस्यलक्ष्मीभ्याम् ।
सामन्तो झषकेतोर्हेमन्तो भवतु हेमवृद्ध्यै नः ॥ २४ ॥
उत्तरतस्तस्य महानुद्भटहुतभुक्शिखारुणमयूखः ।
तपनीयखण्डरचितस्तनुतादायुष्यमष्टमो वरणः ॥ २५ ॥
कादम्बविपिनवाटीमनयोर्मध्यभुवि कल्पितावासाम् ।
कलयामि सूनकोरककन्दलितामोदतुन्दिलसमीराम् ॥ २६ ॥
तस्यामतिशिशिराकृतिरासीनस्तपतपस्यलक्ष्मीभ्याम् ।
शिवमनिशं कुरुतान्मे शिशिरर्तुः सततशीतलदिगन्तः ॥ २७ ॥
तस्यां कदम्बवाट्यां तत्प्रसवामोदमिलितमधुगन्धम् ।
सप्तावरणमनोज्ञं शरणं समुपैमि मन्त्रिणीशरणम् ॥ २८ ॥
तत्रालये विशाले तपनीयारचिततरलसोपाने ।
माणिक्यमण्डपान्तर्महिते[1] सिंहासने मणिखचिते ॥ २९ ॥
बिन्दुत्रिपञ्चकोणद्विपनृपवसुवेददलकुरेखाढ्ये ।
चक्रे सदा निविष्टां षष्ट्यष्टत्रिंशदक्षरेशानीम् ॥ ३० ॥
तापिञ्छमेचकाभां तालीदलघटितकर्णताटङ्काम् ।
ताम्बूलपूरितमुखीं ताम्राधरबिम्बदृष्टदरहासाम् ॥ ३१ ॥
कुङ्कुमपङ्किलदेहां कुवलयजीवातुशावकवतंसाम् ।
कोकनदशोणचरणां कोकिलनिक्वाणकोमलालापाम् ॥ ३२ ॥
वामाङ्गगलित[2]चूलीं वनमाल्यकदम्बमालिकाभरणाम् ।
मुक्ताललन्तिकाञ्चितमुग्धालिकमिलितचित्रकोदाराम् ॥ ३३ ॥
करविधृतकीरशावककलनिनदव्यक्तनिखिलनिगमार्थाम् ।
वामकुचसङ्गिवीणावादनसौख्यार्धमीलिताक्षियुगाम् ॥ ३४ ॥

---

१. 'महति सुसिंहासने' क. २. 'वामांसललित' क.

आपाटलांशुकधरामादिरसोन्मेषवासितकटाक्षाम् ।
आम्नायसारगुलिकामाद्यां संगीतमातृकां वन्दे ॥ ३५ ॥

तस्य च सुवर्णसालस्योत्तरतस्तरुणकुङ्कुमच्छायः ।
शमयतु मम संतापं सालो नवमः स पुष्परागमयः ॥ ३६ ॥

अनयोरन्तरवसुधाः प्रणुमः प्रत्यग्रपुष्परागमयीः ।
सिंहासनेश्वरीमनुचिन्तननिस्तन्द्रसिद्धनीरन्ध्राः ॥ ३७ ॥

तत्सालोत्तरदेशे तरुणजपाकिरणधोरणीशोणः ।
प्रशमयतु पद्मरागप्राकारो मम पराभवं दशमः ॥ ३८ ॥

अन्तरभूकृतवासाननयोरपनीतचित्तवैमल्यान् ।
चक्रेशीपदभक्तांश्चारणवर्गानहर्निशं कलये ॥ ३९ ॥

सारङ्गवाहयोजनदूरेऽसंघटितकेतनस्तस्य ।
गोमेदकेन रचितो गोपायतु मां समुन्नतः सालः ॥ ४० ॥

वप्रद्वयान्तरोर्व्यां बटुकैर्विविधैश्च योगिनीवृन्दैः ।
सततं समर्चितायाः संकर्षिण्याः प्रणौमि चरणाब्जम् ॥ ४१ ॥

तापसयोजनदूरे तस्य समुत्तुङ्गगोपुरोपेतः ।
वाञ्छापूर्त्यै भवताद्वज्रमणीनिकरनिर्मितो वप्रः ॥ ४२ ॥

वरणद्वितयान्तरतो वासजुषो विहितमधुरसास्वादाः ।
रम्भादिविबुधवेश्या रचयन्तु महान्तमस्मदानन्दम् ॥ ४३ ॥

तत्र सदा प्रवहन्ती तटिनी वज्राभिधा चिरं जीयात् ।
चटुलोर्मिजालनृत्यत्कलहंसीकुलकलक्वणितपुष्टा ॥ ४४ ॥

रोधसि तस्या रुचिरे वज्रेशी जयति वज्रभूषाढ्या ।
वज्रप्रदानतोषितवज्रिमुखत्रिदशविनुतचारित्रा ॥ ४५ ॥

तस्योदीच्यां हरिति स्तबकितसुषमावलीढवियदन्तः ।
वैडूर्यरत्नरचितो वैमल्यं दिशतु चेतसो वरणः ॥ ४६ ॥

अधिमध्यमेतयोः पुनरम्बाचरणावलम्बितस्वान्ताम् ।
कर्कोटकादिनागान्कलयामः किं च बलिमुखान्दनुजान् ॥ ४७ ॥

गन्धवहसंख्ययोजनदूरे गगनोर्ध्वजाङ्घिकस्तस्य ।
वासवमणिप्रणीतो वरणो बहलयतु वैदुषीं विशदाम् ॥ ४८ ॥
मध्यक्षोण्यामनयोर्महेन्द्रनीलात्मकानि च सरांसि ।
शातोदरीसहायान्भूपालानपि पुनः पुनः प्रणुमः ॥ ४९ ॥
आशुगयोजनदूरे तस्योर्ध्वं कान्तिधवलितदिगन्तः ।
मुक्ताविरचितगात्रो मुहुरस्माकं मुदे भवतु वप्रः ॥ ५० ॥
आवृत्त्योरधिमध्यं पूर्वस्यां दिशि पुरंदरः श्रीमान् ।
अभ्रमुविटाधिरूढो विभ्रममस्माकमनिशमातनुतात् ॥ ५१ ॥
तत्कोणे व्यजनस्रुक्तोमरपात्रस्रुवान्नशक्तिधरः ।
स्वाहास्वधासमेतः सुखयतु मां हव्यवाहनः सुचिरम् ॥ ५२ ॥
दक्षिणदिगन्तराले दण्डधरो नीलनीरदच्छायः ।
त्रिपुरापदाब्जभक्तस्तिरयतु मम निखिलमंहसां निकरम् ॥ ५३ ॥
तस्यैव पश्चिमायां दिशि दलितेन्दीवरप्रभाश्यामः ।
खेटासियष्टिधारी खेदानपनयतु यातुधानो मे ॥ ५४ ॥
तस्या उत्तरदेशे[1] धवलाङ्गो विपुलझषवरारूढः ।
पाशायुधात्तपाणिः पाशी विदलयतु पाशजालानि ॥ ५५ ॥
वन्दे तदुत्तरहरित्कोणे वायुं चमूरुवरवाहम् ।
कोरकिततत्त्वबोधान्गोरक्षप्रमुखयोगिनोऽपि मुहुः ॥ ५६ ॥
तरुणीरिडाप्रधानास्तिस्रो वातस्य तस्य कृतवासाः ।
प्रत्यग्रकापिशायनपानपरिभ्रान्तलोचनाः कलये ॥ ५७ ॥
तल्लोकपूर्वभागे धनदं ध्यायामि शेवधिकुलेशम् ।
अपि माणिभद्रमुख्यानम्बाचरणावलम्बिनो यक्षान् ॥ ५८ ॥
तस्यैव पूर्वसीमनि तपनीयारचितगोपुरे नगरे ।
कात्यायनीसहायं कलये शीतांशुखण्डचूडालम् ॥ ५९ ॥
तत्पुरषोडशवरणस्थलभाजस्तरुणचन्द्रचूडालान् ।
रुद्राध्याये पठितान्रुद्राणीसहचरान्भजे रुद्रान् ॥ ६० ॥

---

१. 'मुत्तरभागे' क.

पवमानसंख्ययोजनदूरे बालतृणमेचकस्तस्य ।
सालो मरकतरचितः संपदमचलां श्रियं च पुष्णातु ॥ ६१ ॥
आवृतियुग्मान्तरतो हरितमणीनिवहमेचके देशे ।
हाटकतालीविपिनं हालाघटघटितविटपमाकलये ॥ ६२ ॥
तत्रैव मन्त्रिणीगृहपरिणाहं तरलकेतनं सदनम् ।
मरकतसौधमनोज्ञं दद्यादायूंषि दण्डनाथायाः ॥ ६३ ॥
सदने तत्र हरिन्मणिसंघटिते मण्डपे शतस्तम्भे ।
कार्तस्वरमयपीठे कनकमयाम्बुरुहकर्णिकामध्ये ॥ ६४ ॥
बिन्दुत्रिकोणवर्तुलषडस्रवृत्तद्वयान्विते चक्रे ।
संचारिणी दशोत्तरशतार्णमनुराजकमलकलहंसी ॥ ६५ ॥
कोलवदना कुशेशयनयना कोकारिमण्डितशिखण्डा ।
संतप्तकाञ्चनाभा संध्यारुणचैलसंवृतनितम्बा ॥ ६६ ॥
हलमुसलशङ्खचक्राङ्कुशपाशाभयवरस्फुरितहस्ता ।
कूलंकषानुकम्पा कुङ्कुमजम्बालितस्तनाभोगा ॥ ६७ ॥
धूर्तानामतिदूरा वार्ताशेषावलग्नकमनीया ।
आर्तालीशुभदात्री वार्ताली भवतु वाञ्छितार्थाय ॥ ६८ ॥
तस्याः परितो देवीः स्वप्नेश्युन्मत्तभैरवीमुख्याः ।
प्रणमत जम्भिन्याद्या भैरववर्गांश्च हेतुकप्रमुखान् ॥ ६९ ॥
पूर्वोक्तसंख्ययोजनदूरे पूयांशुपाटलस्तस्य ।
विद्रावयतु मदार्तिं विद्रुमसालो विशङ्कटद्वारः ॥ ७० ॥
आवरणयोरहर्निशमन्तरभूमौ प्रकाशशालिन्याम् ।
आसीनमम्बुजासनमभिनवसिन्दूरगौरमहमीडे ॥ ७१ ॥
वरणस्य तस्य मारुतयोजनतो विपुलगोपुरद्वारः ।
सालो नानारत्नैः संघटिताङ्गः कृषीष्ट मदभीष्टम् ॥ ७२ ॥
अन्तरकक्ष्यामनयोरविरलशोभापिचण्डिलोद्देशाम् ।
माणिक्यमण्डपाख्यां महतीमधिहृदयमनिशमाकलये ॥ ७३ ॥

---

१. 'हालामद' क. २. 'कोमलव' क.

तत्र स्थितं प्रसन्नं तरुणतमालप्रवालकिरणाभम् ।
कर्णावलम्बिकुण्डलकन्दलिताभीशुकवचितकपोलम् ॥ ७४ ॥
शोणाधरं शुचिस्मितमेणाङ्कवदनमेधमानकृपम् ।
मुग्धैणमदविशेषकमुद्रितनिटिलेन्दुरेखिकारुचिरम् ॥ ७५ ॥
नालीकदलसहोदरनयनाञ्चल[1]घटितमनसिजाकूतम् ।
कमलाकठिनपयोधरकस्तूरीघुसृणपङ्किलोरस्कम् ॥ ७६ ॥
चाम्पेयगन्धि कैश्यं शम्पासब्रह्मचारि कौशेयम् ।
श्रीवत्सकौस्तुभधरं श्रितजनरक्षाधुरीणचरणाब्जम् ॥ ७७ ॥
कम्बुसुदर्शनविलसत्करपद्मं कण्ठलोलवनमालम् ।
मुचकुन्दमोक्षफलदं मुकुन्दमानन्दकन्दमवलम्बे ॥ ७८ ॥
तद्वरणोत्तरभागे तारापतिबिम्बचुम्बिनिजशृङ्गः ।
विविधमणीगणघटितो वितरतु सालो विनिर्मलां धिषणाम् ॥ ७९ ॥
प्राकारद्वितयान्तरकक्ष्यां पृथुरत्ननिकरसंकीर्णाम् ।
नमत सहस्रस्तम्भकमण्डपनाम्नातिविश्रुतां भुवने ॥ ८० ॥
प्रणुमस्तत्र भवानीसहचरमीशानमिन्दुखण्डधरम् ।
शृङ्गारनायिकामनुशीलनभाजोऽपि भृङ्गिनन्दिमुखान् ॥ ८१ ॥
तस्यैणवाहयोजनदूरे वन्दे मनोमयं वप्रम् ।
अङ्कूरन्मणिकिरणामन्तरकक्ष्यां च निर्मलामनयोः ॥ ८२ ॥
तत्रैवामृतवापीं तरलतरङ्गावलीढतटयुग्माम् ।
मुक्तामयकलहंसीमुद्रितकनकारविन्दसंदोहाम् ॥ ८३ ॥
शक्रोपलमयभृङ्गीसंगीतोन्मेषघोषितदिगन्ताम् ।
काञ्चनमयाङ्गविलसत्कारण्डवषण्डताण्डवमनोज्ञाम् ॥ ८४ ॥
कुरुविन्दात्मकहल्लककोरकसुषमासमूहपाटलिताम् ।
वलये सुधास्वरूपां कन्दलिता[2]मन्दकैरवामोदाम् ॥ ८५ ॥
तद्वापिकान्तराले तरले मणिपोतसीम्नि विहरन्तीम् ।
सिन्दूरपाटलाङ्गीं सितकिरणाङ्कूरकल्पितवतंसाम् ॥ ८६ ॥

---

१. 'नटित' क. २. 'मोद' क.

पर्वेन्दुबिम्बवदनां पल्लवशोणाधरस्फुरितहासाम् ।
कुटिलकबरीं कुरङ्गीशिशुनयनां कुण्डलस्फुरितगण्डाम् ॥ ८७ ॥
निकटस्थपोतनिलयाः शक्तीः शयविधूतहेमशृङ्गजलैः ।
परिषिञ्चन्तीं परितस्तारां तारुण्यगर्वितां वन्दे ॥ ८८ ॥
प्रागुक्तसंख्ययोजनदूरे प्रणमामि बुद्धिमयसालम् ।
अनयोरन्तरकक्ष्यामष्टापद[1]पुष्टमेदिनीं रुचिराम् ॥ ८९ ॥
कादम्बरीनिधानां कलयाम्यानन्दवापिकां तस्याम् ।
शोणाश्मनिवहनिर्मितसोपानश्रेणिशोभमानतटीम् ॥ ९० ॥
माणिक्यतरणिनिलयां मध्ये तस्या मदारुणकपोलाम् ।
अमृतेशीत्यभिधानामन्तः कलयामि वारुणीं देवीम् ॥ ९१ ॥
सौवर्णकेनि[2]पातनहस्ताः सौन्दर्यगर्विता देव्यः ।
तत्पुरतस्थितिभाजो वितरन्त्वस्माकमायुषां वृद्धिम् ॥ ९२ ॥
तस्य पृषदश्वयोजनदूरेऽहंकारसालमतितुङ्गम् ।
वन्दे तयोश्च मध्ये कक्ष्यां वलमानमलयपवमानाम् ॥ ९३ ॥
विनुमो विमर्शवा[3]पीं सौषुम्नसुधास्वरूपिणीं तत्र ।
वेलातिलङ्घ्यवीचीकोलाहलभरितकूलवनवाटीम् ॥ ९४ ॥
तत्रैव [4]सलिलमध्ये तापिञ्छदलप्रपञ्चसुषमाभाम् ।
श्यामलकञ्चुकलसितां श्यामावि[5]टंबिम्बडम्बरहरास्याम् ॥ ९५ ॥
आभुग्नमसृणचिल्ली हसितायुग्मशरकार्मुकविलासाम् ।
मन्दस्मिताञ्चितमुखीं मणिमयताटङ्कमण्डितकपोलाम् ॥ ९६ ॥
कुरुविन्दतरणिनिलयां कुलाचलस्पर्धिकुचनमन्मध्याम् ।
कुङ्कुमविलिप्तगात्रीं कुरुकुल्लां मनसि कुर्महे सततम् ॥ ९७ ॥
तत्सालोत्तरभा[6]गे [7]भानुमयं वप्रमाश्रये दीप्रम् ।
मध्यं च विपुलमनयोर्मन्ये विश्रान्तमातपोद्गारम् ॥ ९८ ॥

---

१. 'रूप' क. २. 'निपातक' ख. ३. 'वाटी' क. ४. 'साल' ख. ५. 'विधुबिम्बडम्बरास्याम्' क. ६. देशे' क. ७. 'चित्तमयं' ख.

तत्र कुरुविन्दपीठे तामरसे कनककर्णिकाघटिते ।
आसीनमरुणवाससमम्लानप्रसवमालिकाभरणम् ॥ ९९ ॥
चक्षुष्मती प्रकाशनशक्तिच्छायासमारचितकेलिम् ।
माणिक्यमुकुटरम्यं मन्ये मार्तण्डभैरवं हृदये ॥ १०० ॥
इन्दुमयसालमीडे तस्योत्तरतस्तुषारगिरिगौरम् ।
अत्यन्तशिशिरमारुतमनयोर्मध्यं च चन्द्रिकोद्गारम् ॥ १०१ ॥
तत्र प्रकाशमानं तारानिकरैः परिष्कृतोद्देशम् ।
अमृतमयकान्तिकन्दलमन्तः कलयामि कुन्दसितमिन्दुम् ॥ १०२ ॥
शृङ्गारसालमीडे शृङ्गोल्लसितं तदुत्तरे भागे ।
मध्यस्थले तयोरपि महितां शृङ्गारपूर्विकां परिखाम् ॥ १०३ ॥
तत्र मणिनौस्थिताभिस्तपनीयाविरचिताग्निहस्ताभिः ।
शृङ्गारदेवताभिः सहितं परिखाधिपं भजे मदनम् ॥ १०४ ॥
शृङ्गारवरणवर्यस्योत्तरतः सकलविबुधसंसेव्यम् ।
चिन्तामणिगणरचितं चिन्तां दूरीकरोतु मे सदनम् ॥ १०५ ॥
मणिसदनसालयोरधिमध्यं दशतालभूमिरुहदीर्घैः ।
पर्णैः सुवर्णवर्णैर्युक्तां काण्डैश्च योजनोत्तुङ्गैः ॥ १०६ ॥
मृदुलैस्तालीपञ्चकमानैर्मिलितां च केसरकदम्बैः ।
संततगलितमरन्दस्रोतोनिर्यन्मिलिन्दसंदोहाम् ॥ १०७ ॥
पाटीरपवनबालकधाटीनिर्यत्परागपिञ्जरिताम् ।
कलहंसीकुलकलकलकूलंकषनिनदनिचयकमनीयाम् ॥ १०८ ॥
पद्माटवीं भजामः परिमलकल्लोलपक्ष्मलोपान्ताम् ।
(देव्यर्घपात्रधारी तस्याः पूर्वदिशि दशकलायुक्तः ।)
वलयितमूर्तिर्भगवान्वह्निः क्रोशोन्नतश्चिरं पायात् ॥ १०९ ॥
तत्राधारे देव्याः पात्रीरूपः प्रभाकरः श्रीमान् ।
द्वादशकलासमेतो ध्वान्तं मम बहलमान्तरं भिन्द्यात् ॥ ११० ॥

१. 'आपीन' क. २. 'परिष्कृतं सेव्यम्' क. ३. 'देशे' क. ४. 'संस्थिताभिः' क.
५. 'स्तपनीयारचितसारिहस्ताभिः' क.

तस्मिन्दिनेशपात्रे तरङ्गितामोदममृतमयमर्घ्यम् ।
चन्द्रकलात्मकममृतं सान्द्रीकुर्यादमन्दमानन्दम् ॥ १११ ॥
अमृते तस्मिन्नभितो विहरन्त्यो विविधमणितरणिभाजः ।
षोडशकलाः सुधांशोः शोकादुत्तारयन्तु मामनिशम् ॥ ११२ ॥
तत्रैव विहृतिभाजो धातृमुखानां च[1] कारणेशानाम् ।
सृष्ट्यादिरूपिकास्ताः शमयन्त्वखिलाः कलाश्च संतापम् ॥ ११३ ॥
कीनाशवरुणकिन्नरराजदिगन्तेषु रत्नगेहस्य ।
कलयामि तान्यजस्रं कलयन्त्वायुष्यमर्घ्यपात्राणि ॥ ११४ ॥
पात्रस्थलस्य पुरतः पद्मारमणविधिपार्वतीशानाम् ।
भवनानि शर्मणे नो भवन्तु[2] भासा प्रदीपितजगन्ति ॥ ११५ ॥
सदनस्यानलकोणे सततं प्रणमाणि कुण्डमाग्नेयम् ।
तत्र स्थितं च वह्निं तरलशिखाजटिलमम्बिकाजनकम् ॥ ११६ ॥
तस्यासुरदिशि तादृशरत्नपरिस्फुरितपर्वनवकाढ्यम् ।
चक्रात्मकं शताङ्गं शतयोजनमुन्नतं भजे दिव्यम् ॥ ११७ ॥
तत्रैव दिशि निषण्णं तपनीयध्वजपरम्पराश्लिष्टम् ।
रथमपरं च भवान्या रचयामो मनसि रत्नमयचूडम् ॥ ११८ ॥
भवनस्य वायुभागे परिष्कृतो विविधवैजयन्तीभिः ।
रचयतु मुदं रथेन्द्रः सचिवेशान्याः समस्तवन्द्यायाः ॥ ११९ ॥
कुर्मोऽधिहृदयमनिशं क्रोडास्यायाः शताङ्कमूर्धन्यम् ।
रुद्रदिशि रत्नधाम्नो रुचिरपलाकाप्रपञ्चकञ्चुकितम् ॥ १२० ॥
परितो देवीधाम्नः प्रणीतवासा मनुस्वरूपिण्यः ।
कुर्वन्तु रश्मिमालाकृतयः कुशलानि देवता निखिलाः ॥ १२१ ॥
प्राग्द्वारस्य भवानीधाम्नः पार्श्वद्वयारचितवासे ।
मातङ्गी किटिमुख्यौ मणिसदने मनसि भावयामि चिरम् ॥ १२२ ॥
योजनयुगलाभोगा तत्क्रोशपरिणाहयैव भित्त्या च ।
चिन्तामणिगृहभूमिर्जीयादाम्नायमयचतुर्द्वारा ॥ १२३ ॥

१. 'चकारपोशानां' ख. २. 'भवन्ति' क.

द्वारे द्वारे धाम्नः पिण्डीभूता नवीनबिम्बाभाः।
विदधतु विपुलां कीर्तिं दिव्या लौहित्यसिद्धयो देव्यः॥ १२४॥
मणिसदनस्यान्तरतो महनीये रत्नवेदिकामध्ये।
बिन्दुमयचक्रमीडे पीठानामुपरि विरचितावासम्॥ १२५॥
चक्राणां सकलानां प्रथममधःसीमफलकवास्तव्याः।
अणिमादिसिद्धयो मामवन्तु देवीप्रभास्वरूपिण्यः॥ १२६॥
अणिमादिसिद्धिफलकस्योपरि हरिणाङ्कखण्डकृतचूडाः।
भद्रं पक्ष्म लयन्तु ब्राह्मीप्रमुखाश्च मातरोऽस्माकम्॥ १२७॥
तस्योपरि मणिफलके तारुण्योत्तुङ्गपीनकुचभाराः।
संक्षोभिणीप्रधाना भ्रान्तिं विद्रावयन्तु दश मुद्राः॥ १२८॥
फलकत्रयस्वरूपे पृथुले त्रैलोक्यमोहने चक्रे।
दीव्यन्तु प्रकटाख्यास्तासां कर्त्री च भगवती त्रिपुरा॥ १२९॥
तदुपरि विपुले धिष्ण्ये तरलदृशस्तरुणकोकनदभासः।
कामाकर्षण्याद्याः कलये देवीः कलाधरशिखण्डाः॥ १३०॥
सर्वाशापरिपूरकचक्रेऽस्मिन्गुप्तयोगिनीसेव्या।
त्रिपुरेशी मम दुरितं तुद्यात्[1]कण्ठावलम्बिमणिहारा॥ १३१॥
तस्योपरि मणिपीठे ताम्राम्भोरुहदलप्रभाशोणाः।
ध्यायाम्यनङ्गकुसुमा प्रमुखा देवीश्च विधृतकूर्पासाः॥ १३२॥
संक्षोभकारकेऽस्मिंश्चक्रे श्रीत्रिपुरसुन्दरी साक्षात्।
गोप्त्री गुप्ततराख्या गोपायतु मां कृपार्द्रया दृष्ट्या॥ १३३॥
संक्षोभिणीप्रधानाः शक्तीस्तस्योर्ध्ववलयकृतवासाः।
आलोलनीलवेणीरन्तः कलयामि यौवनोन्मत्ताः॥ १३४॥
सौभाग्यदायकेऽस्मिंश्चक्रेशी त्रिपुरवासिनी जीयात्।
शक्तीश्च संप्रदायाभिधाः समस्ताः प्रमोदयन्त्वनिशम्॥ १३५॥
मणिपीठोपरि तासां महति चतुर्हस्तविस्तृते वलये।
संततविरचितवासाः शक्तीः कलयामि सर्वसिद्धिमुखाः॥ १३६॥

१. 'तृप्यतु' क.

सर्वार्थसाधकाख्ये चक्रेऽमुष्मिन्समस्तफलदात्री ।
त्रिपुरा श्रीर्मम कुशलं दिशतादुत्तीर्णयोगिनी सेव्या ॥ १३७ ॥
तासां निलयस्योपरि धिष्ण्ये कौसुम्भकञ्चुकमनोज्ञाः ।
सर्वज्ञाद्या देव्यः सकलाः संपादयन्तु मम कीर्तिम् ॥ १३८ ॥
चक्रे समस्तरक्षाकरनाम्न्यस्मिन्समस्तजनसेव्याम् ।
मनसि निगर्भासहितां मन्ये श्रीत्रिपुरमालिनीं देवीम् ॥ १३९ ॥
सर्वज्ञासदनोपरि चक्रे विपुले समाकलितगेहाः ।
वन्दे वशिनीमुख्याः शक्तीः सिन्दूररेणुरुचः ॥ १४० ॥
श्रीसर्वरोगहराख्यचक्रेऽस्मिंस्त्रिपुरपूर्विकां सिद्धाम् ।
वन्दे रहस्यनाम्ना वेद्याभिः शक्तिभिः सदा सेव्याम् ॥ १४१ ॥
वशिनीगृहोपरिष्टाद्विंशतिहस्तोन्नते महापीठे ।
शमयन्तु शत्रुवृन्दं शस्त्राण्यस्त्राणि चादिदम्पत्योः ॥ १४२ ॥
शस्त्रसदनोपरिष्टाद्वलये बलवैरिरत्नसंघटिते ।
कामेश्वरीप्रधानाः कलये देवीः समस्तजनवन्द्याः ॥ १४३ ॥
चक्रेऽत्र सर्वसिद्धिप्रदनामनि सर्वफलदात्री ।
त्रिपुराम्बावतु सततं परापररहस्ययोगिनीसेव्या ॥ १४४ ॥
कामेश्वरीगृहोपरि वलये विविधमनुसंप्रदायज्ञाः ।
चत्वारो युगनाथा जयन्तु मित्रेशपूर्वका गुरवः ॥ १४५ ॥
नाथभवनोपरिष्टान्नानारत्नचयमेदुरे पीठे ।
कामेश्याद्या नित्याः कलयन्तु मुदं तिथिस्वरूपिण्यः ॥ १४६ ॥
नित्यासदनस्योपरि निर्मलमणिनिवहविरचिते धिष्ण्ये ।
कुशलं षडङ्गदेव्यः कलयन्त्वस्माकमुत्तरलनेत्राः ॥ १४७ ॥
सदनस्योपरि तासां सर्वानन्दमयनामके बिन्दौ ।
पञ्चब्रह्माकारं मञ्चं प्रणमामि मणिगणाकीर्णम् ॥ १४८ ॥
परितो मणिमञ्चस्य प्रलम्बमाना नियन्त्रिता पाशैः ।
मायामयी जवनिका मम दुरितं हरतु मेचकच्छाया ॥ १४९ ॥

१. 'श्रीसंगरोग' क. २. 'नाद' क.

मञ्चस्योपरिलम्बन्मदन्नीपुंनागमालिकाभरितम् ।
हरिगोपमयवितानं हरतादालस्यमनिशमस्माकम् ॥ १५० ॥

पर्यङ्कस्य भजामः पादान्बिम्बाम्बुदेन्दुहेमरुचः ।
अजहरिरुद्रेशमयाननलासुरमारुतेशकोणस्थान् ॥ १५१ ॥

फलकं सदा शिवमयं प्रणौमि सिन्दूररेणुकिरणाभम् ।
आरभ्याङ्केशीनां सदनात्कलितं च रत्नसोपानम् ॥ १५२ ॥

पट्टोपधानगण्डकचतुष्टयस्फुरितपाटलास्तरणम् ।
पर्यङ्कोपरि घटितं पातु चिरं हंसतूलशयनं नः ॥ १५३ ॥

तस्योपरि निवसन्तं तारुण्यश्रीनिषेवितं सततम् ।
आवृन्तफुल्लहल्लकमरीचिकापुञ्जमञ्जुलच्छायम् ॥ १५४ ॥

सिन्दूरशोणवसनं शीतांशुस्तबकचुम्बितकिरीटम् ।
कुङ्कुमतिलकमनोहरकुटिलालिकहसितकुमुदबन्धुशिशुम् ॥ १५५॥

पूर्णेन्दुबिम्बवदनं फुल्लसरोजातलोचनत्रितयम् ।
तरलापाङ्गतरङ्गितशफराङ्कनशास्त्रसंप्रदायार्थम् ॥ १५६ ॥

मणिमयकुण्डलपुष्यन्मरीचिकल्लोलमांसलकपोलम् ।
विद्रुमसहोदराधरविसृमरस्मितकिशोरसंचारम् ॥ १५७ ॥

आमोदिकुसुमशेखरमानीलभ्रूलतायुगमनोज्ञम् ।
वीटीसौरभवीचीद्विगुणितवक्त्रारविन्दसौरभ्यम् ॥ १५८ ॥

पाशाङ्कुशेक्षुचापप्रसवशरस्फुरितकोमलकराब्जम् ।
काश्मीरपङ्किलाङ्गं कामेशं मनसि कुर्महे सततम् ॥ १५९ ॥

तस्याङ्कभुवि निषण्णां तरुणकदम्बप्रसूनकिरणाभाम् ।
शीतांशुखण्डचूडां सीमन्तन्यस्तसान्द्रसिन्दूराम् ॥ १६० ॥

कुङ्कुमललामभास्वन्निटिलां कुटिलतरचिल्लिकायुगलाम् ।
नालीकतुल्यनयनां नासाञ्चलनटितमौक्तिकाभरणाम् ॥ १६१ ॥

---

१. 'तत्तु' क. २. 'कस्तूरीतिलकमनोज्ञं कुटिलालकभरितकुमुद' क. ३. 'स्मराङ्गनाशास्त्र' क. ४. 'तमाल' क. ५. 'झिल्लिका' क. ६. 'सदृश' क.

अङ्कुरितमन्दहासामरुणाधरकान्तिविजितबिम्बाभाम्।
कस्तूरीमकरीयुतकपोलसंक्रान्तकनकताटङ्काम्॥ १६२॥
कर्पूरसान्द्रवीटीकवलितवदनारविन्दकमनीयाम्।
कम्बुसहोदरकण्ठप्रलम्बमानाच्छमौक्तिककलापाम्॥ १६३॥
कह्लारदामकोमलभुजयुगलस्फुरितरत्नकेयूराम्।
करपद्ममूलविलसत्काञ्चनमयकटकवलयसंदोहाम्॥ १६४॥
पाणिचतुष्टयविलसत्पाशाङ्कुशपुण्ड्रचापपुष्पास्त्राम्।
कूलंकषकुचशिखरां कुङ्कुमकर्दमितरत्नकूर्पासाम्॥ १६५॥
अणुदायादवलग्नामम्बुदशोभासनाभिरोमलताम्।
माणिक्यखचितकाञ्चीमरीचिकाक्रान्तमांसलनितम्बाम्॥ १६६॥
करभोरुकाण्डयुगलां जङ्घाजितकामजैत्रतूणीराम्।
प्रपदपरिभूतकूर्मां पल्लवसच्छायपदयुगमनोज्ञाम्॥ १६७॥
कमलभवकञ्जलोचनकिरीटरत्नांशुरञ्जितपदाब्जाम्।
उन्मस्तकानुकम्पामुत्तरलापाङ्गपोषितानङ्गाम्॥ १६८॥
आदिमरसावलम्बामनिदंप्रथमोक्तिवल्लरीकलिकाम्।
आब्रह्मकीटजननीमन्तः कलयामि सुन्दरीमनिशम्॥ १६९॥
कस्तु क्षितौ पटीयान्वस्तु स्तोतुं शिवाङ्कवास्तव्यम्।
अस्तु चिरंतनसुकृतैः प्रस्तुतकाम्याय तन्मम पुरस्तात्॥ १७०
प्रभुसंमितोक्तिगम्यं परमशिवोत्सङ्गतुङ्गपर्यङ्कम्।
तेजः किंचन दिव्यं पुरतो मे भवतु पुण्ड्रकोदण्डम्॥ १७१॥
मधुरिमभरितशरासं मकरन्दस्पन्दिमार्गणोदारम्।
कैरविणीविटचूडं कैवल्यायास्तु किंचन महो नः॥ १७२॥
अक्षुद्रमिक्षुचापं परोक्षमवलग्नसीमनि त्र्यक्षम्।
क्षपयतु मे क्षेमेतरमुक्षरथप्रेमपक्ष्मलं तेजः॥ १७३॥
भृङ्गरुचिसंगरकरापाङ्गं शृङ्गारतुङ्गमरुणाङ्गम्।
मङ्गलमभङ्गुरं मे घटयतु गङ्गाधराङ्कसङ्गि महः॥ १७४॥

१. 'कस्तूरिमकरिकायुत' क.

प्रपदजितकूर्ममूर्निलकरुणं भर्मरुचिनिर्मथनदेहम् ।
श्रितवर्म मर्म शंभोः किंचन नर्म मम शर्म निर्मातु ॥ १७५ ॥

कालकुरलालिकालिमकन्दलविजितालिविधृतमणिवालि ।
मिलतु हृदि पुलिनजघनं बहुलितगलगरलकेलि किमपि महः ॥१७६॥

कुङ्कुमतिलकितभाला कुरुविन्दच्छायपाटलदुकूला ।
करुणापयोधिवेला काचन चित्ते चकास्तु मे लीला ॥ १७७ ॥

पुष्पंधयरुचिवेण्यः पुलिनाभोगत्रपाकरश्रोण्यः ।
जीयासुरिक्षुपाण्यः काश्चन कामारिकेलिसाक्षिण्यः ॥ १७८ ॥

तपनीयांशुकभांसि[1] द्राक्षामाधुर्यनास्तिकवचांसि ।
कतिचन शुचं महांसि क्षपयतु (?) कपालितोषितमनांसि ॥१७९॥

असितकचमायताक्षं कुसुमशरं कूलमुद्वहत्कृपार्द्रम् ।
आदिमरसाधिदैवतमन्तः कलये हराङ्कवासि महः ॥ १८० ॥

कर्णोपान्ततरङ्गितकटाक्षनिस्पन्दिकण्ठदघ्नकृपाम् ।
कामेश्वराङ्कनिलयां कामपि विद्यां पुरातनीं कलये ॥ १८१ ॥

अरविन्दकान्त्यरुंतुदविलोचनद्वन्द्वसुन्दरमुखेन्दुः ।
छन्दः केन्दलमन्दिरमन्तःपुरमैन्दुशेखरं वन्दे[2] ॥ १८२ ॥

बिम्बिनिकुरम्बडम्बरविडम्बकच्छायमम्बरवलग्नम् ।
कम्बुगलमम्बुदकचं बिब्बोकं कमपि चुम्बतु मनो मे ॥ १८३ ॥

[3]कमपि कमनीयरूपं कलयाम्यन्तः कदम्बकुसुमाढ्यम् ।
चम्पकरुचिरसुवेषैः संपादितकान्त्यलंकृतदिगन्तम् ॥ १८४ ॥

शम्पारुचिभरगर्हा संपादककान्तिकवचितदिगन्तम् ।
सिद्धान्तं निगमानां शुद्धान्तं किमपि शूलिनः कलये ॥ १८५ ॥

उद्यद्दिनकरशोणानुत्पलबन्धुस्तनंधयापीडान् ।
करकलितपुण्ड्रचापान्कलये कानपि कपर्दिनः प्राणान् ॥ १८६ ॥

---

१. 'वांसि' ख. २. 'कुन्तल' क. ३. अयं श्लोकः ख-पुस्तके त्रुटितः.

रशनालसज्जघनया रसना जीवातु चापभासुरया।
घ्राणायुष्करशरया घ्रातं चित्तं कयापि वासनया॥ १८७॥
सरसिजसहयुध्वदृशा शम्पालतिकासनाभिविग्रहया।
भासा कयापि चेतो नासामणिशोभिवदनया भरितम्॥ १८८॥
[1]नवयावकाभसिचयान्वितया गजयानया दयापरया।
धृतयामिनीशकलया धिया कयापि क्षता मया हि वयम्॥१८९॥
अलमलमकुसुमबाणैरबिम्बशोणैरपुण्ड्रकोदण्डैः।
अकुमुदबान्धवचूडैरन्यैरिह जगति दैवतंमन्यैः॥ १९०॥
कुवलयसदृक्षनयनैः कुलगिरिकूटस्थबन्धुकुचभारैः।
करुणास्पन्दिकटाक्षैः कवचितचित्तोऽस्मि कतिपयैः कुतुकैः॥१९१
नतजनसुलभाय नमो नालीकसनाभिलोचनाय नमः।
नन्दितगिरिशाय नमो महसे नवनी[2]पपाटलाय नमः॥ १९२॥
कादम्बकुसुमधाम्ने कायच्छायाकणापितार्यम्णे।
सीम्ने चिरंतनगिरां भूम्ने कस्मैचिदाददे प्रणतिम्॥ १९३॥
कुटिलकबरीभरेभ्यः कुङ्कुमसब्रह्मचारिकिरणेभ्यः।
कूलंकषस्तनेभ्यः कुर्मः प्रणतिं कुलाद्रिकुतुकेभ्यः॥ १९४॥
कोकनदशोणचरणात्कोमलकुरलालिविजितशैवालात्।
उत्पलसुगन्धिनयनादुररीकुर्मो न देवतामन्याम्॥ १९५॥
आपाटलाधराणामानीलस्निग्धबर्बरकचानाम्।
आम्नायजीवनानामाकूतानां हरस्य दासोऽस्मि॥ १९६॥
पुञ्जितविलासहासस्फुरितासु पुराहिताङ्कनिलयासु।
मग्नं मनो मदीयं कास्वपि कायारिजीवनाडीषु॥ १९७॥
ललिता पातु शिरो मे ललाटमम्बा च मधुमतीरूपा।
भ्रूयुग्मं च भवानी पुष्पशरा पातु लोचनद्वन्द्वम्॥ १९८॥
पायान्नासां बाला सुभगा दन्तांश्च सुन्दरी जिह्वाम्।
अधरोष्ठमादिशक्तिश्चक्रेशी पातु मे चिरं चिबुकम्॥ १९९॥

---

१. अयं श्लोकः क-पुस्तके नास्ति. २. 'नीत' क.

कामेश्वरी च कर्णौ कामाक्षी पातु गण्डयोर्युगलम् ।
शृङ्गारनायिकाव्याद्वदनं सिंहासनेश्वरी च गलम् ॥ २०० ॥
स्कन्दप्रसूश्च पातु स्कन्धौ बाहू च पाटलाङ्गी मे ।
पाणी च पद्मनिलया पायादनिशं नखावलीर्विजया ॥ २०१ ॥
कोदण्डिनी च वक्षः कुक्षिं चाव्यात्कुलाचलतनूजा ।
कल्याणी च वलग्नं कटिं च पायात्कलाधरशिखण्डा ॥ २०२ ॥
ऊरुद्वयं च पायादुमा मृडानी च जानुनी रक्षेत् ।
जङ्घे च षोडशी मे पायात्पादौ च पाशसृणिहस्ता ॥ २०३ ॥
प्रातः पातु परा मां मध्याह्ने पातु मणिगृहाधीशा ।
शर्वाण्यवतु च सायं पायाद्रात्रौ च भैरवी साक्षात् ॥ २०४ ॥
भार्यां रक्षतु गौरी पायात्पुत्रांश्च बिन्दुगृहपीठा[1] ।
श्रीविद्या च यशो मे शीलं चाव्याच्चिरं महाराज्ञी ॥ २०५ ॥
पवनमयि पावकमयि क्षोणीमयि गगनमयि कृपीटमयि ।
रविमयि शशिमयि दिङ्मयि समयमयि प्राणमयि शिवे पाहि २०६
कालि कपालिनि शूलिनि भैरवि मातङ्गि पञ्चमि त्रिपुरे ।
वाग्देवि विन्ध्यवासिनि बाले भुवनेशि पालय चिरं माम् ॥ २०७॥
अभिनवसिन्दूराभामम्ब त्वां चिन्तयन्ति ये हृदये ।
उपरि निपतन्ति तेषामुत्पलनयनाकटाक्षकल्लोलाः ॥ २०८ ॥
वर्गाष्टकमिलिताभिर्वशिनीमुख्याभिरावृतां भवतीम् ।
चिन्तयतां सितवर्णां वाचो निर्यान्त्ययत्नतो वदनात् ॥ २०९ ॥
कनकशलाकागौरीं कर्णव्यालोलकुण्डलद्वितयाम् ।
प्रहसितमुखीं च भवतीं ध्यायन्तो ये त एव भूधनदाः ॥ २१०
शीर्षाम्भोरुहमध्ये शीतलपीयूषवर्षिणीं भवतीम् ।
अनुदिनमनुचिन्तयतामायुष्यं भवति पुष्कलमवन्याम् ॥ २११ ॥
मधुरस्मितां मदारुणनयनां मातङ्गकुम्भवक्षोजाम् ।
चन्द्रावतंसिनीं त्वां सविधे पश्यन्ति सुकृतिनः केचित् ॥ २१२ ॥

१. 'बन्धुगृह' क.

ललितायाः स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः ।
प्रतिदिनमवनौ पठतां फलानि वक्तुं प्रगल्भते सैव ॥ २१३ ॥

इति श्रीभगवता दुर्वाससा विरचितं ललितास्तवरत्नं समाप्तम् ।

श्रीरामभद्रदीक्षितविरचितो[1]

रामाष्टप्रासः ।

सेतुशास्त्रिविरचितविषमपदटीकया समेतः ।

पारावारपयोविशोषणकलापारीणकालानल-
ज्वालाजालविहारहारिविशिखव्यापारघोरक्रमः ।
सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती
धर्मो विग्रहवानधर्मविरतिं धन्वी स तन्वीत नः ॥

रामचन्द्रं नमस्कृत्य क्रियते सेतुशास्त्रिणा ।
टीका काठिन्ययुक्तानां पदानामर्थबोधिका ॥

अव्यादर्ककुलाब्धिकौस्तुभमणिर्दिव्यारविन्देक्षणो
भव्याविष्कृतिलम्पटेषुपटलीलव्याशराधीश्वरः ।
रव्यासादितदोःप्रतापतुलनो हव्याशभूसुन्दरः
सव्यासव्यकरात्तचापविशिखः क्रव्याशवैरी विभुः ॥ १ ॥

अव्यात् रक्षतात् । अवधातुः रक्षणाद्यर्थः । भव्यं मङ्गलम् । 'भावुकं भवुकं भव्यम्' इ-

---

१. "श्रीमद्दाशरथिस्तवरूपोऽयं ग्रन्थः कविकुलसार्वभौमेन श्रीमद्रामभद्रदीक्षितेन विरचितः । सोऽयं मध्यार्जुनक्षेत्रनिकटवर्तिनि सहजिराजपुरेऽवात्सीदिति प्रसिद्धिः । अस्य जन्मभूमिस्तु कण्डरमाणिक्यमिति कश्चन ग्रामप्रवर इत्येतद्विरचिताच्छृङ्गारतिलकाभिधानाद्भाणतः प्रतीयते । अनेन निर्मिता ग्रन्था बहवः । तेष्वत्र प्रथितास्त्वेते—(१) अष्टप्रासश्लोकाः, (२) जानकीपरिणयनाटकम्, (३) तूणीरस्तवः, (४) पतञ्जलिविजयकाव्यम्, (५) पर्यायोक्तिनिष्यन्दः, (६) बाणस्तवः, (७) शृङ्गारतिलकभाणः. अस्य पुस्तकस्यादर्शपुस्तकानीततः संपाद्य त्रिशिरःपुरवर्ति हिंदु हैस्कूल् (Hindu High School) पाठशालासंस्कृतपंडितैरचिरोपरतैर्मज्जनयितृभिः श्रीमद्भिः सेतुशास्त्रिभिः कठिनपदप्रकाशिका काचन व्याख्या निरमायि । तां च व्याख्यां समूलं विलिख्य तत्रभवत्सकाशं प्रहिणोमि । काव्यमालायाममुं ग्रन्थं सटीकमङ्कयितव्यं तत्रभवद्भिर्भवद्भिरिति विहितप्रार्थनः"—टीकाकारसेतुशास्त्रितनूजः त्रिशीर्षनगर (Trichinopoly)वासी **ज. से. नटेशशास्त्री ।**

त्यमरः । तस्य आविष्कृतिः उत्पादनं तत्र लम्पटा समर्था इषुपटली वाणसमूहः तया लव्यः छेद्यः आशराधीश्वरः रावणः यस्य स तथोक्तः । रविणा सूर्येण आसादिता दोःप्रताप-तुलना बाहुप्रतापसाम्यं यस्य सः । हव्यं अश्नातीति हव्याशः अग्निः तद्भवः सुब्रह्मण्यः स इव सुन्दरः सौन्दर्यवान् । क्रव्यमश्नन्तीति क्रव्याशाः राक्षसाः तेषां वैरी शत्रुः ॥

अम्बा कोसलनन्दना दशरथो लम्बालकान्तं पिता
यं बालं समवेक्ष्य कैरवसुहृद्बिम्बाननं नन्दिनौ ।
शम्बामर्शसमाङ्गवानरचमूसंबाधबद्धाम्बुधिं
तं बाणाहतरावणं शरणमालम्बामहे राघवम् ॥ २ ॥

अलकाः चूर्णकुन्तलाः तेषां अन्तानि अग्राणि । लम्बानि अलकान्तानि यस्य सः । कैरवसुहृत् चन्द्रः तस्य बिम्बं मण्डलम् । 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः । तदिव आननं मुखं यस्य सः । शम्बामर्शः वज्रस्पर्शः । तं राघवं रघोः गोत्रापत्यं रामं शरण रक्षकं आलम्बामहे । वयमिति शेषः ॥

अम्भोदद्युतिमर्कवंशतिलकं कुम्भोरु लङ्कापुरी-
रम्भोरूकुचबाष्पपूरपतनारंभोपयुक्ताहवम् ।
शंभोरायुधचापशैलदलने दम्भोलिकेलीजुषं
तं भो मास्तु गिरां ममेति कलये तं भोगमोक्षप्रदम् ॥ ३ ॥

कुम्भाविव उरु कुचयोः विशेषणम् । महान्तावित्यर्थः । रम्भे इव ऊरू यासां ताः रम्भोर्वः । लङ्कापुर्यां विद्यमानाः रम्भोर्वः राक्षस्यः तासां कुचौ तयोः बाष्पपूरः नेत्राश्रुप्रवाहः ॥

अंसासक्तनिषङ्गमाशरचमूहिंसानपेतायुधं
संसारामयभेषजाह्वयपदं हंसान्वयालंकृतिम् ।
पुंसामुत्तममात्तचापविशिखं तं साधुसंसेवितं
शंसामीप्सितदायकं यदि न किं किं साधयेयं फलम् ॥ ४ ॥

अंसयोः बाहुमूलयोः आसक्तौ निषङ्गौ शरधी यस्य तम् । आशरचम्वाः हिंसायाः अनपेतं आयुधं यस्य तम् । हंसः सूर्यः । 'भानुर्हंसः सहस्रांशुः' इत्यमरः । तं तादृशं यदि न शंसामि न स्तौमि यदि किं फलं साधयेयम् । न किंचिदपीत्यर्थः ॥

अत्यन्तं विषयास्तुदन्ति हृदयं सत्यं मृषा न त्विदं
नित्यं तेन मलीमसं भवति मे कृत्यं ततो भावि किम् ।
इत्यन्तः परितप्यते रघुपते गत्यन्तरं नास्ति मे
सत्यन्तावसरे त्वमेत्य सहसा भृत्यं तदा पाहि माम् ॥ ५ ॥

तुदन्ति । 'तुद व्यथने' । न मृषा न मिथ्या । तेन कारणेन मलीमसं मलिनं भवति ततः भावि भविष्यत्किं कृत्यं न किमपि । इत्यन्तः मनः । अन्तावसरे सति मरणकाले ।

अस्तूपस्थितमम्बुवृत्तिरिति यो वस्तूति नापेक्षते
कस्तूरीप्रभृतीनि तस्य विषयाः स्युस्तूलवन्निष्फलाः ।
यस्तूरीकुरुतेऽथ तान्मुरहरो मस्तूनि दध्नो यथा
द्युस्तूरभ्रजयीज्य तस्य कृपयैनस्तूर्व मे राघव ॥ ६ ॥

अम्बुवृत्तिः अब्भक्षणम् । उपस्थितं अनायासलभ्यम् । मस्तूनि मण्डानीव । द्युस्तूरभ्रजयीज्य द्युस् आकाशः तत्र तूर् शब्दायमानं यदभ्रं तं जयतीति जयिनी ज्या मौर्वी यस्य संबोधनम् । 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः । तस्य मे विषयाभिभूतस्य एनः पापं तूर्व नाशय । 'कलुषं वृजिनैनोऽघम्' इत्यमरः ॥

अन्ये संसृतिसागरस्य हिमवत्कन्येशमुत्तारकं
मन्येरंस्तमहं तु वेद्मि ननु यो मुन्येकगम्यात्मकः ।
धन्ये जन्म गृहीतवान्रघुकुले जन्ये विभिन्नार्यसृ-
ग्धुन्येषत्करपाटलिम्नि परमा निन्ये नुतिर्ब्रह्मणा ॥ ७ ॥

अहं तं यः रघुकुले जन्म गृहीतवान् उत्तारकं वेद्मि । युद्धे असृग्धुन्या रक्तानद्या ईषत्करपाटलिम्नि । यस्मिन् रामे इत्यध्याहार्यम् । ब्रह्मणा विधिना नुतिः निन्ये कृता । रावणवधानन्तरं ब्रह्मागत्य राममस्तौषीदिति रामायणकथात्रानुसंधेया ॥

आरोहव्यपनीतमेखलमपास्तोरोजहारं रिपु-
स्त्रीरोदं विरचय्य येन विजयश्रीरोचमानौजसा ।
आरोपाद्विरतं शरस्य धनुषि स्फारोद्यत्कीर्तिना
धीरोदात्तमिमं भजे रघुपतिं नीरोगतावाप्तये ॥ ८ ॥

येन रामेण धनुषि शरस्य आरोपात् विरतम् । उपरतमित्यर्थः । रिपुस्त्रीरोदमित्यस्य विशेषणद्वयमेतत् । आरोहव्यपनीतमेखलं अपास्तोरोजहारं पुंसामाश्रमचतुष्टयवत् स्त्रीणामाश्रमत्रये अन्त्याश्रमस्य वैधव्यस्यारोहात् व्यपनीतमेखलमित्यर्थः । नीरोगतावाप्तये रोगनिवृत्तये इत्यर्थः ॥

आशापूरणमाकलय्य भजतां क्लेशापहं सर्वदा
नाशाय द्विषतामुपासत दिशामीशाय मुक्त्या विधेः ।
कीशाकारधरैः सुरैश्च रुरुधे नैशाचरीं यः पुरी-
मीशानायुधभञ्जनाय करुणाकोशाय तस्मै नमः ॥ ९ ॥

उपासत क्रियापदम् । 'आस उपवेशने'। आङ् पूर्वः लङि प्रथमपुरुषबहुवचनमात्मनेपदि। विधेः ब्रह्मणः। करुणाकोशाय दयानिलयाय । कीशाकारधरैः वानररूपिभिः ॥

आयामस्फुरदक्षिपद्ममभितो जायानुजाभ्यां युतं
ध्येयाकारमुदारयोगिमनसां कायानुकार्यम्बुदम् ।
मायामानुषमर्कसंततिभुवो दायादमुर्वीपतेः
भूयासं प्रणतः प्रणम्य च शुभप्रायामुपेयां गतिम् ॥ १० ॥

स्ववीक्षणेन सर्वोऽपि वर्धत इति । अभितः आयामेन वैशाल्येन स्फुरत् प्रकाशमानं अक्षिपद्मयुगलं यस्य तम् । जाया सीता अनुजः लक्ष्मणः ताभ्यां युतम् । ध्येयः ध्यातुं योग्यः आकारः स्वरूपं यस्य तम् । उदारं निर्मलम् । कायानुसार्यम्बुदं कायं शरीरं अनुकरोतीति कायानुकारी अम्बुदः मेघः यस्य तम् ॥

आसन्नक्षितिकन्यकाकुचतटव्यासङ्गिहारावलि-
श्रीसंक्रान्तसविभ्रमाक्षिवलनो हासं वितन्वन्मृदु ।
वासन्तीस्रगलंकृतो मलयजोल्लासं वहन्वक्षसं
दासं रक्षतु मामसौ रघुपतिस्त्रासं निरस्याखिलम् ॥ ११ ॥

आसन्ना समीपस्था या क्षितिकन्यका जानकी तस्याः कुचतटं तत्र व्यासङ्गिनी लम्बमाना या हरावली मौक्तिकहारपङ्क्तिः तस्याः श्रीः शोभा तस्यां संक्रान्तं संनिबद्धं अक्षिवलनं अक्षिसंचारः यस्य सः । वासन्तीस्रक् मल्लिकामाला तया अलंकृतः । मलयजोल्लासं मलयचन्दनम् । मम अखिलं त्रासं निरस्य मां रक्षतु ॥

आदेहच्युति दुर्जयेन्द्रियतया स्यादेव चेत्पातकं
भूदेवाभिजनेऽपि तद्भवतु नः सीदेम किं तावता ।
वेदेषु स्फुटवैभवं दशमुखच्छेदेन दीप्तौजसं
वैदेहीरमणं प्रणम्य तु वयं मोदेमहि ज्ञायताम् ॥ १२ ॥

देहस्य च्युतिः मरणं तदभिव्याप्य आदेहच्युति मरणपर्यन्तम् । दुर्जयानि इन्द्रियाणि यस्य सः । तस्य भावः तत्ता तया । भूदेवाभिजनेऽपि ब्राह्मणरूपे उत्तमजन्मन्यपि पातकं भवतु तावता वयं सीदेम किम् । षद्धातुः विशरणाद्यर्थः । विधिलिङि उत्तमपुरुषबहुवचनम् ॥

आसीनः कनकासने निजपुरोवासीभवन्मारुति-
र्या सीतेति कृताभिधा भुवि तया श्रीसीममूर्त्या युतः ।
नासीरार्पितहारसाञ्जलिसमीपासीददर्कात्मजो
दासीभूतसुरः सकोसलमहीशासी शरण्योऽस्तु मे ॥ १३ ॥

निजस्य स्वस्य पुरोवासीभवन्मारुतिः यस्य तस्य स तथोक्तः । पुरःस्थितहनुमानित्यर्थः श्रीसीममूर्त्या अधिकसौन्दर्यवल्या । नासीरं सेनामुखम् । प्रकृते सभायाम् । अर्पितः दत्त हारः मुक्ताहारः यस्मै सः ॥

आदित्वं दधदप्यशेषजगतां यो दित्यपत्यान्तकृ-
द्व्यादिष्टो विबुधैर्भवान्रिपुहरः स्यादित्यवन्यामभूत् ।
नेदिष्ठं तपसां फलं नवसुधास्वाद्विष्टमन्तः सता-
मादित्यान्वयदीपमाश्रयति तं मे दिक्षु कीर्णं मनः ॥ १४ ॥

यः अशेषजगतां समस्तजगतां आदित्वं आदिकारणं अदिकारणत्वं दधदपि दित्यप त्यान्तकृत् दितेः अपत्यानि असुराः तेषामन्तकृत् नाशकृत् । व्यादिष्टः प्रार्थितः । नेदि अन्तिकतमं नवसुधा अभिनवामृतं तदिव स्वादु रुच्युत्पादनं इष्टं सतां महताम् । अन्त मनसि । दीपं प्रकाशकम् । कीर्णं व्याप्तम् ॥

आखावाहितविग्रहो जगति यः शैखावतो यत्कर-
स्तौ खाटप्रवरौ यदीयमनुना मौखानुबन्धोज्ज्वलौ ।
साखादोद्यतकुम्भकर्णजयिनी शाखामृगानीकिनी
रे खामध्यगतावतात्प्रणिपतल्लेखावलिर्देवता ॥ १५ ॥

आखौ मूषिके । 'खर्वाखुर्बालमूषिका' इति दुर्गः । आहितं न्यस्तं विग्रहं शरीरं यस्य सः विघ्नेश्वर इत्यर्थः । यत्करः यस्य शिवस्य करः शैखावतः अग्निमान् तौ खाटप्रवरौ खे अट न्तीति खाटाः तेषां प्रवरौ श्रेष्ठौ शिवविघ्नेश्वरौ । यदीयमनुना यस्य रामस्य मनुना मन्त्रेण मौखानुबन्धोज्ज्वलौ मुखालंकारसहितौ । एतद्रामतापनीयाख्ये ग्रन्थे प्रसिद्धम् ॥

इच्छां मे शृणु राम कामपि विभो कच्छातिरूढातसी-
गुच्छाङ्गप्रभ मर्दितुं मम समागच्छान्तरं हस्ततः ।
पृच्छां मा कुरु मृद्यतां कथमिति स्वच्छांशुकीर्ते भवा-
नच्छानत्त्वरितं किमद्रिसदृशं तच्छाम्भवं कार्मुकम् ॥ १६ ॥

कच्छः जलसमीपवृत्तिदेशः । 'कच्छमनूपे' इति वोपालितः । तत्राधिरूढा उत्पन्ना अतसी पुष्पविशेषः तस्याः गुच्छं मञ्जरी तदिव अङ्गप्रभा यस्य तस्य संबोधनम् । मम अन्तरं चञ्चलचित्तं समागच्छ विश । अणुत्वात्कथं मर्दनं संभवतीति पृच्छां मा कुरु । अद्रिसदृशं तत् सीतापरिणयपणभूतं शाम्भवं कार्मुकं धनुः भवान् नाच्छानत्किं न च्छिन्नवान् किम् । खण्डितवानेवेत्यर्थः । 'छो छेदने' श्यनि लुङ्रूपम् । अणु यत्नात् मर्दय अनवयवित्वादेव च्छेदो न प्रार्थितः किंतु मर्दनमेव ॥

ऊहन्ते नियमेन यं नियमिनो गेहं विशन्तो गुहां
यो हंसाकृतिरस्ति देहिषु चतुर्व्यूहं च गृह्णाति यः ।
देहं चेन्द्रियमण्डलं च पृथगेवाहं पदार्थाद्विद-
न्सोऽहं भावनया भजे तमधुना मोहं विना राघवम् ॥ १७ ॥

यं रामं गुहां गेहं विशन्तः । गुहावासिन इत्यर्थः । नियमिनः योगिनः नियमेन चित्तचाञ्चल्यराहित्येन ऊहन्ते तर्कयन्ति । यः देहिषु प्राणिषु हंसाकृतिः परमात्मरूपी अस्ति । चतुर्व्यूहं केशवादिव्यूहं संकर्षणादिव्यूहं वा गृह्णाति स्वीकरोति ॥

ऊरूपर्युपवेशितप्रियतमं मेरूपमानं श्रिया
चारूपस्थितमग्रतो हनुमताध्यारूढसिंहासनम् ।
गीरूढं कविमण्डलस्य चरणस्त्रीरूपितैकोपलं
दारूपाहितराज्यसंमदमिमं धीरूहते मामिका ॥ १८ ॥

ऊरूपर्युपवेशिता अङ्कस्था प्रियतमा यस्य तम् । गीरूढं गीर्षु रूढं कविमण्डलस्तुत्यर्थः। चरणेन पादेन स्त्रीरूपं प्राप्ता एकोपला यस्य तम् । दारुणि पादुकाभ्यां उपाहिता विन्यस्ता राज्यसंपदः येन तम् ॥

एत्याभीक्ष्णमनादिकर्मपटलीं वात्यामिवैष भ्रम-
न्यात्यायाति परत्र चेह च मुहुर्भीत्या च संयुज्यते ।
भीत्यागाय ततश्च भूतकरुणाचैत्यायमानेक्षणं
कात्यायन्यधिनाथकार्मुकमिदं दैत्यारिमालम्बते ॥ १९ ॥

एषः जीवः अनादिः आदिशून्या या कर्मपटली कर्मसमूहं ताम् अभीक्ष्णं पुनः पुनः एति प्राप्नोति। पूर्वकर्मानुगुण्येन जन्म लभत इत्यर्थः । वात्यां वातसमूहम् भीत्यागाय भयविसर्जनायेत्यर्थः । संबोधनम् । ततः तस्मात् कारणात् भूतेषु करुणा तस्याः चैत्यायमाने ईक्षणे यस्य तम् । चैत्याः रथ्याकोणस्थिताभिज्ञानवृक्षः ॥

एके माधवमिन्दुमौलिमपरे नाकेशमन्ये नमो-
वाकेनानुसरन्तु न त्वहमपि स्तोकेन तानाश्रये ।
साकेतेशमुपैमि किंतु शरणं या केकसी विश्रव-
स्तोकेनाजनि भीरपास्य खलु तां लोके भजन्तं यशः ॥ २० ॥

एके केचिज्जनाः माधवं विष्णुम्, अपरे इन्दुमौलिं शङ्करम्, अन्ये नाकेशमिन्द्रम्, नमोवाकेन नमःशब्देन अनुसरन्तु नमस्कारं कुर्वन्तु । अहं तु तान् पूर्वोक्तान् स्तोकेनापि किंचिदपि नाश्रये । या भीतिः विश्रवस्तोकेन रावणेन अजनि उत्पन्ना तां भीतिं अपास्य दूरीकृत्य ॥

एकं साधु करोति यः प्रपतनं साकं धियानन्यया
लोकं तं भुवने नयन्तमभयं पाकं रघूणामपि ।
शोकं मोपगमं कृतान्तविकटभ्रूकम्पवाक्यैरिति
क्ष्माकन्याचिरसंभृतव्रतपरीपाकं तमेवाश्रये ॥ २१ ॥

यः अनन्यया अव्यभिचारिण्या प्रपतनं नमस्कारं साधु सम्यक् करोति तनोति तं न-मस्कारिणं लोकं जनम् । 'लोकस्तु भुवने जने' इत्यमरः । भुवने जगति अभयं निर्भयं न-यन्तं कुर्वाणम् । पाकं परिपक्वफलरूपं डिम्भं वा कृतान्तस्य यमस्य विकटे विस्तृते भ्रुवौ वाक्यानि च तैः शोकं दुःखं मोपगमं इति तमेव राममेव आश्रये ॥

एषा मेऽञ्जलियन्त्रणास्तु पदयोर्भूषायितैः पांसुभिः
पाषाणं कलभाषिणीं कृतवते दोषानपाकुर्वते ।
शेषाकारकरात्तभीमधनुषे दोषाचरेशद्विषे
रोषावेशविशोषिताब्धिपयसे पूषान्वयश्रेयसे ॥ २२ ॥

पदयोः चरणयो । भूषायितैः पांसुभिः पाषाणं शिलां कलभाषिणीं अहल्याम् । अपाकुर्वते तिरस्कुर्वते । दोषाचरेशः रावणः तस्य द्विषे शत्रवे । पूषा सूर्यः । अञ्जलियन्त्रणा अञ्ज-लिबन्धः ॥

कल्पापायघनारवस्मयभिदा शिल्पाकरेणादिश-
ञ्जल्पाकेन रणे जयस्य धनुषानल्पामरीणां व्यथाम् ।
कल्पागो भजतां स पातु करुणाकल्पावलोकोंऽशुम-
त्कल्पानेकशरः पुरा रघुपतिस्तल्पायिताहीश्वरः ॥ २३ ॥

कल्पापायः प्रलयकालः तत्र विद्यमानः यः घनारवः मेघध्वनिः तस्य स्मयः गर्वः तं भिनत्तीति भिद् तेन शिल्पाकरेण चित्राणि कर्माणि कुर्वता रणे जयं जल्पता आदिशन् कुर्वन् भजन् । भजतां कल्पागः देवदारुः करुणाकल्पावलोकः कृपालंकृतवीक्षणः पुरा अवता-रात्पूर्वं विष्णुत्वे तल्पायिताहीश्वरः । शेषशायीत्यर्थः ॥

कर्ता कंजभवात्मना त्रिजगतां भर्ता मुकुन्दात्मना
हर्ता यश्च हरात्मनाघमखिलं स्मर्ता च यस्योज्झति ।
धर्तारं धनुषः शरैः सह तमादर्तारमार्तान्वयं
सर्तारोऽप्यपथे श्रिता रघुपतिं वर्तामहे निर्भयाः ॥ २४ ॥

कंजभवात्मना ब्रह्मरूपेण कर्ता स्रष्टा । मुकुन्दात्मना विष्णुरूपेण भर्ता पालकः हरात्मना शंकरात्मना हर्ता संहारकः । यस्य स्मर्ता । कर्मणि षष्ठी । एवमन्यत्रापि । यत्स्मर्ता उज्झति

त्यजति अपथे दुर्मार्गे सतोरोऽपि वर्तमाना अपि आर्तान्वयं दीनसमूहं आदतारं रक्षितारं रघुपतिं श्रिताः आश्रिताः ॥

कन्तुर्हन्ति मनो विधेयविरहान्मन्तुः क्रमाद्बधते
किंतु स्मर्यत एव नाङ्घ्रिकमलं हन्तुः पुरां वा मधोः ।
गन्तुर्मे विषयाध्वसीम्नि धनिनां नन्तुश्च कुक्षिंभरेः
सन्तु श्रीरघुवीरपादभजनात्संतुष्यतोऽनेहसः ॥ २५ ॥

कन्तुः इच्छा विधेयविरहात् मनसा यदीप्सितं कार्यं तत्कर्तुमशक्यत्वात् मनः चित्तं हन्ति बाधते। मन्तुः अपराधः पुरां हन्तुः ईश्वरस्य मधोर्हन्तुः विष्णोः एतयोः अङ्घ्रिकमलं चरणारविन्दं न स्मर्यत एव। धनिनां नन्तुः। कर्मणि षष्ठी। धनिकान्सेवमानस्येत्यर्थः। रघुवीरपादभजनात् संतुष्यतः संतुष्टस्य मे मम अनेहसः दिनानि सन्तु। रघुवीरपादभजनेनैव दिनानि गच्छन्त्विति निष्कृष्टोऽर्थः ॥

कङ्कालाभरणीयचापदलनाटंकारभिन्नाम्बरं
शङ्काकृष्टकुठारभृन्मदशिलाटंकायमानौजसम् ।
लङ्कानायकवाहिनीचरमहातङ्कावहज्यास्वनं
तं कालाम्बुदमेचकं रघुकुलालंकारदीपं भजे ॥ २६ ॥

कङ्कालाभरणः शिवः तत्संबन्धी यः चापः तस्य दलना खण्डनं तस्य टंकारः तेन भिन्नं अम्बरं यस्य तम्। शङ्कया आकृष्टः समीपमागतः यः कुठारभृत् परशुरामः तस्य मदः गर्वः स एव शिला पाषाणं तस्याः टंका शिलाभेदी कश्चन आयुधविशेषः सैव ओजः यस्य तम्। आतङ्कं वहतीति आतङ्कावहः ज्यायाः मौर्व्याः स्वनः शब्दः यस्य तं प्रकाशकम् ॥

कङ्कालैर्द्विषदां नवैः सुखितवान्कङ्कावलिं कैतव-
न्यङ्कावर्पितशासनो घनघटाशङ्कावहस्तेजसा ।
अङ्कारोपितमैथिलीकुचतटालंकारकस्तूरिका-
पङ्कालेपनकौतुकी दिशतु मे लङ्कारिपुर्मङ्गलम् ॥ २७ ॥

द्विषदां शत्रूणां कङ्कालैः अस्थिभिः कङ्कावलिं गृध्रसमूहं सुखितवान् सुखिनं कृतवान्। कैतवन्यङ्कौ मायामृगे मारीचे अर्पितं शासनं शिक्षा येन सः। घनघटा मेघसमूहः। अङ्कं उत्सङ्गं आरोपिता प्रापिता या मैथिली तस्याः कुचतटालंकारकस्तूरिकापङ्कालेपने मकरिकापत्रादिनिर्माणे कौतुकी ॥

का शङ्का मम कार्तिकेयवपुषाप्याशंसनीयद्युता-
वैशं कार्मुकमाशुदारितवति क्ष्माशंकरे विक्रमैः ।

क्लेशं हन्तुमुपस्थिते रघुपतौ दाशं सखायं गते
कीशं चापि विदेहराजदुहितुः साशं मनः कुर्वति ॥ २८ ॥

कार्तिकेयवपुषापि सुब्रह्मण्यशरीरेणापि आशंसनीया प्रार्थ्यमाना द्युतिर्यस्य सः। ऐशं शैवं कार्मुकं धनुः। क्ष्माशंकरे क्ष्मा भूमिः तस्याः शंकरे मङ्गलकरे उपस्थिते सति समुपस्थिते सति। दाशं गुहं कीशं सुग्रीवमपि सखायं मित्रम्। साशं आशासहितम्॥

कामीहे गतिमित्युदञ्चितभयग्रामीणलङ्कापुरी-
सामीचीन्यहरेषुपावकदलद्वामीमुखाग्निस्मयः।
आमीलत्कमलोपमाञ्जलिसुरुश्चामीकरालंकृतः
स्वामी नः शरणं स एव भुवने भूमीसुतावल्लभः ॥ २९ ॥

उदञ्चितं उत्पन्नं भयं येषां ते ग्रामीणाः लङ्कावासिनः। उदञ्चितभयाः ग्रामीणाः यस्याः सा तादृशी या लङ्कापुरी तस्याः सामीचीन्यं सुखस्थितिः तां हरतीति हरः यः इषुः बाणः तस्य पावकेन अग्निना दलत् निरस्तः वामीमुखाग्निः वडवाग्निः तस्य स्मयः अहंकारः यस्य सः॥

कारागारसमानसंसृतिनिराकाराय सच्चिन्मयं
धीरा यं शरणं व्रजन्ति भुवने नीरागमोहस्मयाः।
तारादेवरमुख्यवानरपरीवाराय नीराकर-
स्फाराटोपहराय रावणजिते वीराय तस्मै नमः ॥ ३० ॥

कारागारं बन्धागृहं तस्य समाना या संसृतिः संसारः तस्य निराकाराय निवर्तकाय। सच्चिन्मयं सच्चिद्रूपं यं धीराः तीव्रभक्तिमन्तः। नीरागमोहस्मयाः रागमोहगर्वरहिताः। तारादेवरः सुग्रीवः। नीराकरः समुद्रः॥

किं देवैरितरैः प्रपन्नहरणे संदेहकृद्भिर्नृणां
विन्देयं यदि तान्विमूढ इति मां निन्देयुरार्या न किम्।
किं देयं किमदेयमित्यविदुषं तं देहिनामिष्टदं
वन्दे कंचन वञ्चनामृगरिपुं मन्देतरश्रेयसे॥ ३१ ॥

प्रपन्नहरणे शरणागतसंरक्षणे संदेहकृद्भिः इतरैर्देवैः किम्। तान् पूर्वोक्तान् विन्देयं यदि शरणं गतो यदि आर्याः पूज्याः मां विमूढ इति न निन्देयुः किम्। निन्देयुरेवेत्यर्थः। किं देयं दातुं योग्यं किं अदेयं इत्यस्मिन्विषये अविदुषं अविद्वांसम्। सकलेष्टदातारमित्यर्थः। वञ्चनामृगः तस्य रिपुम्॥

कीर्तिर्यस्य निरस्य कुन्दकुटजस्फूर्तिस्मयं रोदसी-

पूर्तिव्यञ्जितवैभवाञ्चति तुलां कार्तिक्युदारेन्दुना ।

मूर्तिश्रीजितवार्मुचा रघुवरेणार्तिर्ह्रियेतामुना

मार्तिक्याः स्फुरणं मतेः प्रदिशता मार्तिप्रसूतिर्मम ॥ ३२ ॥

यस्य रामस्य कीर्तिः यशः कुन्दकुटजस्फूर्तिस्मयं कुन्दस्य कुटजस्य तदाख्यपुष्पविशेषस्य च स्फूर्तिः शोभा तस्याः स्मयं गर्वं रोदसीपूर्तिव्यञ्जितवैभवा सती रोदसी द्यावापृथिव्यौ तत्र व्यञ्जितः वैभवः यस्याः सा तथा सती । सर्वत्र व्याप्ता सतीति तात्पर्यार्थः । कार्तिक्युदारेन्दुना शरच्चन्द्रेण तुलां सादृश्यं अञ्चति प्राप्नोति । मूर्तिश्रीजितवार्मुचा स्वदेहकान्तिजितमेघेन अमुना श्रीरामेण मार्तिक्याः मृत्संबन्धिन्याः । मन्दाया इत्यर्थः । मतेः बुद्धेः स्फुरणं उपर्युपरि स्फुरणं प्रदिशता । ददतेत्यर्थः । अमुनेत्यस्य विशेषणमेतत् । मार्तिप्रसूतिः मृतिः मरणं प्रसूतिः जननम् । जननमरणकारिणीत्यर्थः । आर्तिः पीडा ह्रियेत ॥

कुम्भीरप्रमुखाम्बुसत्वनिचितं गम्भीरमुन्मोचना-

रम्भी बाणशतस्य यः खलु पयोधिं भीतिमन्तर्न्यधात् ।

कुम्भीभूस्तुतमाश्रयामि मरुतां तं भीहरं सन्मनः-

कुम्भीशानिशबद्धगारुडमणिस्तम्भीभवन्तं प्रभुम् ॥ ३३ ॥

बाणशतस्य अनेकबाणस्य उन्मोचनारम्भी यः रामं कुम्भीरप्रमुखाम्बुसत्वनिचितं कुम्भीरः नक्रः । 'नक्रस्तु कुम्भीरः' इत्यमरः । सः प्रमुखः आदिः येषां तानि अम्बुसत्वानि तैः निचितं व्याप्तं गम्भीरमगाधं पयोधिं समुद्रं भीतिं भयं अन्तः न्यधात् आदधान । कुम्भीभूः अगस्त्यः सन्मनांस्येव कुम्भीशाः गजश्रेष्ठाः तैरनिशं बद्धो यः गारुडमणिः स इव भवतीति स्तम्भीभवन्तम् । मरुतां देवानाम् ॥

गल्लालम्बितरत्नकुण्डयुगामुल्लासिहारस्तनीं

फुल्लाशोकदलाधरां हृदयभूभल्लानुकल्पेक्षणाम् ।

संल्लापै रमयन्प्रभुः स जगतामल्लामवन्याः सुतां

चिल्लाभाय ममार्य चित्तखुरलीमल्लायमानो भवेत् ॥ ३४ ॥

गल्लयोः गण्डयोः आलम्बितं रत्नकुण्डलयुगं यस्यास्ताम् । हृदयभूः मन्मथः तस्य भल्लौ बाणौ तयोः अनुकल्पे सदृशे ईक्षणे तस्याः ताम् । अल्लामम्बां अवन्याः सुतां जानकीं रमयन् संतोषयन् चिल्लाभाय ज्ञानलाभाय चित्तखुरली चित्तमेव खुरली बालक्रीडास्थानं तत्र मल्लायमानः वीरो भवेत् ॥

गङ्गीयन्नृपवंशमौक्तिकधनुः शृङ्गीशकल्पं वह-

न्भङ्गीभिस्तिसृभिः समुज्ज्वलतनौ भृङ्गीकुलश्रीमुषि ।

तुङ्गीभूतमुदां दशाननवधात्त्वं गीयमानां मया
संगीतानि निवृत्य दिव्यसुदृशामङ्गीकुरुष्व स्तुतिम् ॥ ३५ ॥

गङ्गीयन्नृपः गङ्गामात्मन इच्छतीति गङ्गीयन् नृपः भगीरथः स चासौ नृपश्च गङ्गीयन्नृपः तस्य वंशः तस्य मौक्तिकं मुक्ताफलम् । संबोधनमेतत् । शृङ्गिणः पार्वताः तेषां ईशः मेरुः तस्य कल्पं सदृशं धनुः तिसृभिः भङ्गीभिः समुज्ज्वलतनौ भृङ्गीकुलश्रीमुषि भ्रमरकुलवत् श्यामे । एतत्तनाविति अस्य विशेषणम् । वहन्धारयन् । दशाननवधात् तुङ्गीभूतमुदां दिव्यसुदृशां देवस्त्रीणां संगीतानि निवृत्य मया गीयमानां स्तुतिम् ॥

गात्रेषु श्रममग्निमान्द्यमुदरे नेत्रे जडत्वं सह
श्रोत्रेणादिशती जरा विशति चेत्कोऽत्रेरयेन्मास्त्विति ।
दात्रे यत्तु नमोऽधुनापि कलये स्तोत्रेण वित्ताशया
मैत्रे जन्मजुषे कुले कृतनतिर्नेत्रे तदुज्झाम्यहम् ॥ ३६ ॥

गात्रेषु अवयवेषु श्रमम्, उदरे अग्निमान्द्यं अजीर्णताम्, नेत्रे श्रोत्रेण सह जडत्वं बधिरत्वं चादिशती कुर्वाणा जरा वृद्धत्वं विशति चेत् । अत्रास्मिन्विषये मास्त्विति जरा मा विशत्विति कः ईरयेद्वदेत् । अधुनापि वार्धकेऽपि दात्रे यत्किंचिद्दानकर्त्रे वित्ताशया स्तोत्रेण यन्नमः कलये करोमि तत् नमः । कर्म । मैत्रे कुले जन्मजुषे जाताय तुभ्यं कृतनतिः कृतनमस्कारः नेत्रे जगन्नायकाय उज्झामि त्यजामि ॥

गेया यस्य गुणाः पुनन्ति मनुजान्मायामनुष्यात्मनो
यो यातूनि रणे जघान तरुणीस्तेयानि धीरः शरैः ।
दायादं रघुभूभुजां यमृषयोऽपायार्थिनो जन्मनां
कायानास्तिकृते स्मरन्ति भुवि नः पायादयं राघवः ॥ ३७ ॥

मायामनुष्यात्मनः मायया रामरूपं प्राप्तस्य यस्य गेयाः गुणाः मनुजान् पुनन्ति । धीरः यः तरुणीस्तेयानि स्त्र्यपहर्तॄणि यातूनि रक्षांसि रणे शरैः जघान । रघुभूभुजां रघुवंश्यराजानां दायादं पुत्रं यं रामं जन्मनां अपायार्थिनः जन्मनिवृत्तिकामाः ऋषयः वसिष्ठाद्याः कायानास्तिकृते जन्मनिवृत्तये भुवि स्मरन्ति । अयं राघवः ॥

ग्रासावस्थितविश्वराक्षसपतिप्रासावलोकोत्थित-
त्रासाधिक्यवशातिनिःसृतगुरुश्वासामरप्रार्थितः ।
व्यासाभिष्टुतवैभवो हरिरिलामासाद्य जातः कुले
भासामीशितुरेव यः स कुशलं मे साधयेद्राघवः ॥ ३८ ॥

ग्रासावस्थिताः लोकभक्षकाः विश्वे अखिलाः राक्षसाः तेषां पतिः रावणः; तस्य प्रास-

आयुधविशेषः तस्यावलोकः दर्शनम् तेन उत्थितः त्रासः तस्य आधिक्यं तस्य वशाः अतएव अतिनिःसृतः अत्यन्तमुत्पन्नः गुरुश्वासः दीर्घनिःश्वासः येषां ते तैरमरैः प्रार्थितः । व्यासाभिष्टुतवैभवः व्यासेन मुनिना अभिष्टुतं वैभवं यस्य सः तादृशः हरिः इलां भूमिम् । 'इरा भूवाक्सुराप्सु' इत्यमरः । रलयोरभेदः । आसाद्य प्राप्य भासामीशितुः सूर्यस्य कुले सः राघव एव मे कुशलं साधयेत् ॥

चर्या यस्य खराहवादिरमरीपर्यायगीता भृशं
धुर्या गायकलोकदुस्त्यजविपन्निर्यापणे केवलम् ।
पुर्या किं मरुतां परिक्षयजुषां धुर्यावहन्त्येत्यहं
कुर्यामुत्तरणं त्वमुष्य कथया तर्या भवाम्भोनिधेः ॥ ३९ ॥

यस्य भृशं अमरीपर्यायगीता गायकलोकदुस्त्यजविपन्निर्यापणे गायकलोकस्य गन्धर्वलोकस्य दुस्त्यजा अनिवर्तनीया विपत् तस्याः निर्यापणे निवृत्तौ केवलं मुख्यतया धुर्या धुरंधराः खराहवादिः खरयुद्धादिः चर्या चरित्रम् । विराजते इति शेषः । परिक्षयजुषां क्षयवतां मरुतां देवानां धुर्यावहन्त्या धुर्या भारः तां वहतीति धुर्यावहन्ती तया । देवान्वहन्त्येत्यर्थः । पुर्या पुरेण किम् । न किमपि प्रयोजनम् । इत्यस्मात्कारणात् अमुष्य रामस्य भवाम्भोनिधेः संसारसागरस्य तर्या नावा उत्तरणं कुर्याम् ॥

चूलीभूतजटाकलापमिषुधिव्यालीढवामांसकं
कालीयाधिकभीमकार्मुकधरं नालीकरम्येक्षणम् ।
कालीरङ्गरणस्थरावणशिरस्तालीफलभ्रंशना-
केलीतर्पितकंकवायसशिवापालीकमेकं भजे ॥ ४० ॥

चूलीभूतः शिरोलंकारभूतः जटाकलापः जटासमूहः यस्य तम् । इषुध्या तूणेन । 'तूणेषुधी उपासङ्गः' इति रत्नकोशः । व्यालीढः संयुक्तं वामांसः यस्य तम् । कालीयात् सर्पविशेषात् अधिकभीमं अधिकभयंकरं यत् कार्मुकं तस्य धरं तम् । नालीके इव पङ्कजे इव रम्ये मनोज्ञे ईक्षणे नेत्रे यस्य तम् । काल्याः रणकाल्याः रङ्गं आवासस्थानं यद्रणं तत्र तिष्ठति इति रणस्थः यः रावणः तस्य शिरांस्येव तालीफलानि तालफलानि तेषां भ्रंशनाक्रान्तमेव केली तया तर्पिता संतर्पिता कंकवायसशिवाः गृध्रकाकजम्बुकाः तेषां पाली पङ्क्तिः यस्य तमेकं मुख्यम् ॥

जन्याभावितभानुसंततिरिलाकन्यामवाप्तुं प्रियां
धुन्याकल्पशिरःशरासदलनो वन्याविहारप्रियः ।
मुन्याकाङ्क्षितकर्मकृन्निजशरोदन्याकृताम्भोनिधिः
जन्याविद्धदशाननो रघुपतिस्तन्यादभीष्टं मम ॥ ४१ ॥

जन्या जन्म तेन भाविता संभाविता भानुसंततिः सूर्यसंततिर्येन सः इलाकन्यां भूसुतां प्रियां पत्नीं अवाप्तुम् । धुनी गङ्गा आकल्पः आभरणं यस्य तत् धुन्याकल्पं शिरः यस्य सः धुन्याकल्पशिराः तस्य शरासनं धनुः तत् दलयति खण्डयति इति दलनः । वन्या वनं तत्र विहारप्रियः । मुनिभिः आकाङ्क्षितानि प्रार्थितानि यानि कर्माणि रावणवधादीनि तानि करोतीति कृत् निजशरैः उदन्याकृतः अल्पसरः तदिव कृतः अम्भोनिधिः समुद्रः यस्य सः । जन्यं युद्धम् । 'युद्धमायोधनं जन्यम्' इत्यमरः । तत्र आविद्धः दशाननः येन सः ॥

जातो यो मिहिरान्वये नियमिना नीतो मखं रक्षितुं
शातोदर्यपि येन गौतममुनेः पूतोपलत्वं जहौ ।
छातोमापतिकार्मुकं सदसि यं सीतोपलेभे पतिं
नातो राघवतोऽपरं शरणमित्यातोद्यमाघोषये ॥ ४२ ॥

मिहिरान्वये सूर्यवंशे । 'मिहिरारुणपूषणः' इत्यमरः । नियमिना विश्वामित्रेण । गौतममुनेः शातोदर्यपि वनिता अहल्यापि येन रामेण पूता सती चरणविन्यसनेन उपलत्वं शिलात्वं जहौ । छातं च्छिन्नं उमापतिकार्मुकं शिवधनुः येन तम् । अतः राघवतः अस्माद्रामात् अपरमितरं न शरणं इति आतोद्यं भेरीवाद्यं सर्वेषां श्रवणार्थमाघोषये ॥

जाने न त्वदुपासनं धरणिभूजाने जपं वा मनो-
र्दीनेनापि कृतो जनेन कुरुते योऽनेनसं तं तव ।
स्थाने किं तदितं विधीन्यदविधायानेहसो यापनं
हे नेतर्जगतामवाद्य शुभधीदानेन मां केवलम् ॥ ४३ ॥

हे धरणीभूजाने सीतापते । यः रामषडक्षरी मन्त्रजपः दीनेनापि अशुद्धेनापि जनेन कृतश्चेत् तं जपितारं अनेनसं कुरुते तं तव मनोः मन्त्रस्य जपं वा त्वदुपासनं वा न जाने । न जानामीत्यर्थः । विधीन् धर्मशास्त्रोक्तविधीन् तदुक्तकर्माणि अविधाय अननुष्ठाय अनेहसः दिनस्य यापनं प्रापणमिति यत् तत्स्थाने किम् । योग्यं किम् । अनर्हमित्यर्थः । हे नेतः हे जगन्नायक, शुभधीदानेन मां केवलं मुख्यतया अव रक्ष ॥

जम्भारिप्रमुखामरेन्द्रमुकुटीसंभाव्यमानाङ्घ्रये
कुम्भाभक्षितिकन्यकाकुचपरीरम्भाधिकाहंयवे ।
दम्भाविष्कृतिदक्षराक्षसरणारम्भातिविक्रान्तदो-
स्तम्भायास्तु ममैष कोसलसुताडिम्भाय सेवाञ्जलिः ॥ ४४ ॥

जम्भारिप्रमुखाः इन्द्रादयः ये अमरेन्द्राः तेषां मुकुट्यः ताभिः संभाव्यमाने पूजिते अङ्घ्री यस्य तस्मै । क्षितिकन्यकाकुचौ सीताकुचौ कुम्भस्याभेव कान्तिरिव आभा ययोः

१ 'अपहाय' इति पाठान्तरम्.

तौ तयोः परीरम्भे आलिङ्गने अधिकं अहंयुः अधिकास्थः । 'अहंकारवानहंयुः' इत्यमरः । तस्मै दम्भः गर्वः तस्याविष्कृतिः प्रकाशनं तत्र दक्षाः समर्थाः ये राक्षसाः तैः सह रणारम्भः तत्र अतिविक्रान्तौ अतिविक्रमयुक्तौ दोस्तम्भौ यस्य कोसलसुताडिम्भाय ॥

जैत्रायासुमतां पुलस्त्ययमिनः पौत्राय दत्ताहवो
धात्रा चन्द्रकलाभृता च गमितः स्तोत्रावलीपात्रताम् ।
गात्राणि प्रयतर्षिचित्तकरिणां तोत्रायितान्युद्वह-
न्भ्रात्रा च प्रियया च मे रघुपतिर्यात्रासु संनह्यतु ॥ ४५ ॥

असुमतां प्राणिनां जैत्राय जयिने पुलस्त्ययमिनः पुलस्त्यर्षेः पौत्राय रावणाय दत्ताहवः दत्तसमरः धात्रा ब्रह्मणा चन्द्रकलाभृता च ईश्वरेण च स्तोत्रावलीपात्रतां स्तुत्यतां गमितः प्रापितः प्रयतर्षिचित्तकरिणां परिशुद्धर्षिमनसां तोत्रायितानि गजबन्धनस्तम्भायमानानि गात्राणि उद्वहन् दधानः स रघुपतिः ॥

तन्द्रावर्जितनृत्तगीतमतिभागिन्द्रावरोधाङ्गना-
मन्द्रारब्धविपञ्चिकास्वरझरीसान्द्रावदत्तस्तवम् ।
चन्द्रालिप्तभुजान्तरं स्मरणतोऽघं द्रावयन्तं नृणां
चन्द्रापीडशरासभङ्गचतुरं तं द्रागुपास्ते मनः ॥ ४६ ॥

तन्द्र्या आलस्येन । 'तन्द्री प्रमीला' इत्यमरः । वर्जिते रहिते ये नृत्तगीते तयोः मतिभाजः अत्यासक्ताः याः इन्द्रावरोधाङ्गनाः इन्द्रान्तःपुरस्त्रियः । 'भूभुजामन्तःपुरं स्यादवरोधनम्' इत्यमरः । रम्भाद्याः मन्द्रारब्धः मन्द्रेण स्वरविशेषेण आरब्धः यः विपञ्चिकास्वरः वीणास्वरः । 'वीणा तु वल्लकी । विपञ्ची' इत्यमरः । तस्य झर्या प्रवाहेण सान्द्रावदत्तः अधिकतया कृतः स्तवः स्तोत्रं यस्य तम् । चन्द्रालिप्तभुजान्तरं चन्द्रेण कर्पूरादिविशेषेण । 'चन्द्रः कर्पूरकाम्पिल्लसुधांशुस्वर्णवारिषु' इति मेदिनी । आलिप्तं भुजान्तरं वक्षः यस्य तम् । स्मरणतः स्मृत्या नृणां मनुष्याणां अघं पापम् । 'एनोऽघमंहः' इत्यमरः । द्रावयन्तं निवर्तयन्तम् । चन्द्रापीडशरासभङ्गचतुरं शिवधनुःखण्डनपण्डितं मनः द्राक् झटिति उपास्ते । ममेति शेषः ॥

तं दातारमभीप्सितस्य सहसा वन्दारवे देहिने
भिन्दानं स्मरतामघानि करुणासंदानितालोकनम् ।
मन्दारब्धमहीसुतादृगलिनीवृन्दानुबन्धस्फुर-
त्कुन्दालीमधुरस्मितास्यकमलं वन्दामहे राघवम् ॥ ४७ ॥

अभीप्सितस्य प्रार्थितस्य वन्दारवे स्तोत्रे । 'वन्दारुरभिवादके' इत्यमरः । देहिने प्राणिने सहसा अविलम्बेन दातारम् । स्मरतां अघानि पापानि भिन्दानं भेत्तारम् । करुणासंदा-

नितालोकनं करुणापूरभरितालोकनाम् । मन्दारब्धमहीसुतादृगलिनीवृन्दानुबन्धस्फुरत्कुन्दालीमधुरस्मितास्यकमलं मन्दारब्धाः मन्दप्रवृत्ता भूसुता तस्याः दृश एव अलिन्यः भ्रमराङ्गनाः तासां वृन्दं समूहः तस्य अनुबन्धः संबन्धः तेन स्फुरन्त्यः प्रकाशमानाः कुन्दाल्यः लक्षणया कुन्दपुष्पसदृशदन्तावल्यः ताभिः मधुरं स्मितं प्रसन्नं आस्यकमलं यस्य तं राघवं वन्दामहे ॥

तारुण्येन महीसुताकुचतटे चारुण्युदीतस्पृहो
दारुण्यङ्घ्रिसमाश्रिते विभवकृत्कारुण्यवान्पातु नः ।
आरुद्रादवलोकितो दिवि सुरैर्भीरुद्रवद्राक्षसो
भीरुद्रावणयौवतो युधि घनश्रीरुद्रवज्ज्यो विभुः ॥ ४८ ॥

तारुण्येन यौवनेन चारुणि मनोज्ञे महीसुताकुचतटे सीताकुचतटे उदीतस्पृहः उदिता उत्पन्ना स्पृहा यस्य सः । अङ्घ्रिसमाश्रिते दारुणि पादुकायां विभवकृत् महदैश्वर्यकृत् आरुद्रात् रुद्रमभिव्याप्य दिव्याकाशे सुरैः देवैः अवलोकितः वीक्षितः भीरुद्रवद्राक्षसः भीरवः भीताः द्रवन्तः धावमानाः राक्षसाः यस्मात्सः । भीरुद्रावणयौवतः भिया रोदितीति भीरुत् युवतीनां समूहः यौवतं भीरुत् रावणयौवतं यस्य सः । घनश्रीः घनस्य श्रीः शोभेव श्रीर्यस्य सः युधि उद्रवज्ज्यः उत् रवती अधिकशब्दायमाना ज्या मौर्वी यस्य सः ॥

तुल्या यस्य न सन्ति चापकुशलावल्यामिलामण्डले
कल्यासङ्गमुषा यदङ्घ्रिरजसाहल्या पवित्रीकृता ।
कुल्यावज्जलधिं बबन्ध किल यो बल्याशरच्छित्तये
कल्याणाय स मेऽस्तु साशुगधनुर्वल्ल्या विराजत्करः ॥ ४९ ॥

इलामण्डले भूमण्डले । चापकुशलावल्यां धानुष्कसंघे तुल्याः यस्य न सन्ति । कल्यासङ्गमुषा कल्यं पापं तस्य आसङ्गः संबन्धः तं मुष्णातीति मुषा यदङ्घ्रिरजसा यच्चरणपांसुना अहल्या पवित्रीकृता परिशुद्धीकृता । यः रामः बल्याशरच्छित्तये बलिनः बलिष्ठाः ये आशराः राक्षसाः तेषां च्छित्तिः छेदः तस्मै जलधिं समुद्रं कुल्यावत् अल्पसरिद्वत् बबन्ध । साशुगधनुर्वल्ल्या सबाणधनुर्लतया विराजत्करः विराजितहस्तः सः रामः मे कल्याणाय अस्तु ॥

त्रस्तोपागतलोकरक्षणविधावस्तोकमुद्यत्कृपो
निस्तोयीकरणे च यो जलनिधेरस्तोपमस्तेजसा ।
शस्तोऽपि स्तुतिकृत्सु पारयति यं न स्तोतुमस्मिन्मया
हस्तोपात्तधनुः शरे भगवति न्यस्तोऽखिलोऽयं भरः ॥ ५० ॥

त्रस्तः भीतः उपागतः समीपं प्राप्तः यः लोकः तस्य रक्षणविधौ अस्तोकं अधिकं उद्य-

त्कृपः उत्पन्नदयावान् यः । जलनिधेः निस्तोयीकरणे जलशून्यताकरणे तेजसा पराक्रमेण अस्तोपमः उपमानहीनः । स्तुतिकृत्सु स्तुतिकारकेषु शस्तोऽपि समर्थोऽपि यं रामं स्तोतुं न पारयति न समर्थो भवति । हस्तोपात्तधनुःशरे हस्तधृतचापबाणे अस्मिन् भगवति रामे समस्तः भरः भारः न्यस्तः निक्षिप्तः ॥

तृष्णा यद्विषयेषु धीविकलतां पुष्णाति धैर्यं च य-
न्मुष्णाति श्रुतिदर्शिते पथि पदं कृष्णामिवान्तं न वा ।
उष्णाभीशुकुलाधिपस्य भजने वृष्णापि वन्द्यौजसो
निष्णातस्तु भवन्क्षिपाम्यघगणान्कृष्णानिवाब्दान्मरुत् ॥ ५१ ॥

विषयेषु स्रक्चन्दनवनितादिषु तृष्णा आशा धीविकलतां धीशून्यतां पुष्णाति उत्पादयति आशां धैर्यं च मुष्णाति अपहरतीति यत् तस्मात् श्रुतिदर्शिते वेदोक्ते पथि पदं स्थानं कृष्णामिवान्तं करोमि न वा । 'कृष निष्कर्षे' कादिः धातुः । तथापि वृष्णापि इन्द्रेणापि वन्द्यौजसः उष्णाभीशुकुलाधिपस्य सूर्यकुलाधिपस्य रामस्य भजने निष्णातः समर्थः भवन् मरुत् वायुः अब्दानिव मेघानिव अघगणान् पापनिवहान् क्षिपामि प्रेरयामि । 'क्षिप प्रेरणे' शविकरणः ॥

त्रातारं कमुपैमि कस्य भुवने भूतानुकम्पेति च
ध्यातासु त्रिदशावलीषु न भवत्येतादृगेकोऽपि यत् ।
वातापत्यनिवेशितप्रणयिनी दूताधिकारं ततः
सीताविभ्रमदेशिकं मृगयते जातादरं मे मनः ॥ ५२ ॥

भुवने भूमौ कं त्रातारं रक्षितारं उपैमि गच्छामि । कस्य भूतानुकम्पा भूतेषु प्राणिषु अनुकम्पा दया । 'कृपा दयानुकम्पा' इत्यमरः । इति त्रिदशावलीषु त्रिदशानां देवानां आवलीषु समूहेषु ध्यातासु सतीषु एतादृक् एष इव एषः रामः स इव एकोऽपि यन्न भवति ततः वातापत्यनिवेशितप्रणयिनी दूताधिकारं सीताविभ्रमदेशिकं रामं मे मनः जातादरं सन्मृगयते अन्वेषति ॥

स्तैमित्यस्पृशि यः स्मृतो हृदि सतां चामित्रषट्कोज्झिते
भूमित्राणकरः शशीव जनितो यो मित्रवंशाब्धिना ।
ओमित्याप वनं नियोक्तरि गुरौ सौमित्रिणा सीतया
यो मिथ्यावचनत्वदोषनुदि तं नौमि त्रिलोकीपतिम् ॥ ५३ ॥

यः रामः अमित्रषट्कोज्झिते कामक्रोधादिषट्शत्रुरहिते स्तैमित्यस्पृशि स्तिमितस्य भावः स्तैमित्यं निश्चलता तद्वति । निश्चले इत्यर्थः । सतां हृदि स्मृतः भूमित्राणकरः शशीव यः मित्रवंशाब्धिना सूर्यवंशसमुद्रेण जनितः । यः मिथ्यावचनत्वदोषनुदि असत्यभीरौ गुरौ पितरि नियोक्तरि सति वनं गच्छेति प्रेरके सति ओं इति । 'ओमित्यङ्गीकारे' ।

अस्खिवति वनं सौमित्रिणा सुमित्रायाः अपत्येन लक्ष्मणेन सीतया च सह आप प्राप । तं त्रिलोकीपतिं रामं नौमि नमामि ॥

दत्तातङ्कमुदन्वतेऽस्त्रशिखिना वित्ताधिराजानुजं
कृत्तायस्ततनुं विधाय मरुतां हृत्तापनिर्वापकम् ।
मत्तानेकपचङ्क्रमं प्रणमदायत्तानुकम्पारसं
चित्ताकर्षमृषिव्रजस्य कलये तत्तादृशं राघवम् ॥ ५४ ॥

उदन्वते समुद्राय अस्त्रशिखिना बाणाग्निना दत्तातङ्कं दत्तः कृतः आतङ्कः संतापः येन तम् । वित्ताधिराजानुजं कुबेरानुजं रावणं कृत्तायस्ततनुं खण्डितविस्तृतशरीरं विधाय । रावणं हत्वेत्यर्थः । मरुतां देवानां हृत्तापनिर्वापकं हृत्संतापनिवर्तकं मत्तानेकपचङ्क्रमं अनेकपः गजः । 'हस्ती द्विरदोऽनेकपो द्विपः' इत्यमरः । मत्तगजतुल्यगमनं प्रणमदायत्तानुकम्पारसं नमत्सु कृपावन्तम् । ऋषिव्रजस्य चित्ताकर्षं मुनिहृदयाकर्षकं तत्तादृशं सः स इव अनन्यसदृशं राघवं कलये भजामि ॥

दानीयो रचितः श्रियामपि रिपोरानीय येनानुजः
पानीयाकरमेव योऽस्त्रशिखिनातानीदपोढस्मयम् ।
जानीते विभवं च यस्य स वसन्मौनी वटद्रोस्तले
यानीमं शरणं मनोविहरणस्थानीकृतं सीतया ॥ ५५ ॥

येन रामेण रिपोः रावणस्य अनुजोऽपि विभीषणोऽपि आनीय स्वनिकटं प्रापय्य श्रियां लङ्काराज्यश्रियां दानार्हः दानीयः रचितः कृतः । पानीयाकरं समुद्रं यः अस्त्रशिखिना अपोढस्मयं वीतगर्वं अतानीत् । यस्य विभवं माहात्म्यं वटद्रोस्तले वसन् मौनी दक्षिणामूर्तिधरः सः शिवः जानीते । सीतया जानक्या मनोविहरणस्थानीकृतं इमं शरणं यानि गच्छानि ॥

दूरादुज्झितसद्विधीनपि जनानाराधने स्वे परा-
न्धीरासाद्यपदं नयन्तमवनीभारापनोदक्षमम् ।
धारावाहिकवित्वहेतुभजनं राराज्यमानं श्रिया
श्रीरामायणनायकं सुकृतिनी धीराविशत्येव मे ॥ ५६ ॥

दूरात् उज्झितसद्विधीनपि कर्मभ्रष्टानपि आराधने भगवदाराधने तत्परान् उद्युक्तान् धीरासाद्यपदं धीरैः जीवन्मुक्तैः आसाद्यं प्राप्यं यत्पदं तन्नयन्तं अवनीभारापनोदक्षमं धारावाहिकवित्वहेतुभजनं श्रिया राराज्यमानं श्रीरामायणनामकं राममेव मे सुकृतिनी धीः आविशति ॥

नाहं पुत्रकलत्रमित्रविषये स्नेहं विहातुं क्षमः
साहंकारमिदं मनश्च न कृतोत्साहं गुरूपासने ।

देहं नश्वरमन्तकस्य न दया हा हन्त तेनोज्झितुं
मोहं नौमि रुचा विडम्बितपयोवाहं रघूणां पतिम् ॥ ५७ ॥

अहं पुत्रकलत्रमित्रविषये स्नेहं विहातुं न क्षमः । इदं नश्व साहंकारं सगर्वम्, गुरूपासनेन कृतोत्साहं च देहं नश्वरं अन्तकस्य दया न । तेन मोहं उज्झितुं त्यक्तुं रुचा कान्त्या विडम्बितपयोवाहं तिरस्कृतमेघं रघूणां पतिं रामं नौमि ॥

न श्वानो भुवने भवन्ति सकृदप्यश्वायमाना यथा
विश्वा निर्जरयातयोऽपि च तथा न श्वायिता राघवात् ।
पश्चादिद्रुहिणान्तसर्गरसिके विश्वाधिवासे ततो
विश्वामित्रमखारिवैरिणि वयं विश्वासिनः केवलम् ॥ ५८ ॥

भुवने श्वानः कुक्कुराः सकृदपि एकदापि अश्वायमानाः अश्व इव आचरन्तीति तथोक्ताः यथा न भवन्ति तथा विश्वाः समस्ताः निर्जरजातयोऽपि देवाः राघवात् न श्वायिताः न वृद्धियुक्ताः । श्विधातुः वृद्ध्यर्थकः । ततः पश्चादिद्रुहिणान्तसर्गरसिके विश्वाधिवासे विश्वेषां समस्तानां अधिवासे वासनिलये विश्वामित्रमखारिवैरिणि वयं केवलं विश्वासिनः ॥

निर्वाणं गमिते शरै रणभुवि स्वर्वायुधारिव्रजे
सर्वासामजनिष्ट यः स्तुतिपदं स्वर्वारवामभ्रुवाम् ।
गुर्वादेशगृहीतकाननगतिर्दुर्वारयादोधिभू-
गुर्वापोहनसाहसी स दुरितं निर्वासयेन्मे विभुः ॥ ५९ ॥

यः रामं रणभुवि स्वर्वायुधारिव्रजे स्वरः । 'वज्रं शतकोटिः स्वरुः' इत्यमरः । स्वर्वायुधः इन्द्रः तस्यारयः असुराः तेषां व्रजे समूहे निर्वाणं क्षयं शरैः गमिते प्रापिते सति सर्वासां स्वर्वारवामभ्रुवां रम्भादीनां स्तुतिपदं अजनिष्ट । गुर्वादेशगृहीतकाननगतिः पितृशासनप्राप्तारण्यः दुर्वारयादोधिभूगर्वापोहनसाहसी अतिदुःसहसमुद्रगर्वभङ्गसाहसी सः विभुः श्रीरामः मे दुरितं निर्वासयेत् निवर्तयेत् । प्रार्थनायां लिङ् ॥

नीलाम्भोदनिभं युगान्तविहरत्कालान्तकभ्रूलता-
लीलाश्चद्धनुरीरितेषुदलितस्थूलाङ्गलङ्काधिपम् ।
फालान्तश्रमशीकरं युधि चलद्वालाञ्चलोद्धोषक्ष-
द्धोलाङ्गूलयुतं भजामि विजयश्रीलाञ्छितं राघवम् ॥ ६० ॥

नीलाम्भोदनिभं युगान्तविहरत्कालान्तकभ्रूलतालीलाश्चद्धनुरीरितेषुदलितस्थूलाङ्गलङ्काधिपं युगान्ते प्रलयकाले विहरन् यः फालान्तकः शिवः तस्य भ्रूलता तस्य लीला यस्य धनुषः तेनेरिताः इषवः तैः दलितः स्थूलाङ्गलङ्काधिपः यस्य तम् । युधि फलान्तश्रम-

शीकरं चलद्वालाञ्चलोद्घोषकृत्। गोलाङ्गूलयुतं चलन्ति वालाञ्चलानि अग्राणि येषां ते उ-द्घोषं कुर्वन्तीति उद्घोषकृतः एवंभूतैः गोलाङ्गूलैः वानरविशेषैः युतं विजयश्रीलाञ्छितं विजयश्रिया राजलक्ष्म्या लाञ्छितं चिह्नितं राघवं भजामि॥

नैल्यं यद्वपुषः पयोदरुचिभिस्तौल्यं समालम्बते
मूल्यं यस्य कथा करोति कलुषं माल्यं नदीवैश्वरम्।
लौल्यं मे विषयं निवार्य करुणाशाल्यन्तरङ्गो नृणां
पाल्यं मामपि पश्यतु प्रणमतां वाल्यन्तको यः प्रभुः॥ ६१॥

यद्वपुषः नैल्यं नीलिमा पयोदरुचिभिः मेघकान्तिभिः तौल्यं सादृश्यं समालम्बते आ-श्रयति। यस्य कथा कलुषं पापं ऐश्वरं माल्यं नदीव मूल्यं मूलेन बध्यं मूल्यम्। 'नौवयो-धर्म–' इत्यादिना मूलशव्दाद्यत्प्रत्ययः। मे लौल्यम्। स्वार्थे ष्यङ्प्रत्ययः। विषयं विषया-काङ्क्षिणं चक्षुरादि निवार्य प्रणमतां नृणां नृविषये। विषयत्वं षष्ठ्यर्थः। करुणाशाल्यन्तरङ्गः दयालुः यः वाल्यन्तकः वालिरिपुः सः प्रभुः मामपि पाल्यं पालितुं योग्यं पाल्यं रक्षणीयं पश्यतु। दर्शधातोः लोट्। प्रथमपुरुषैकवचनं प्रार्थनायामर्थे॥

पश्यालीकशरासभञ्जनदशावश्याभिनन्द्यौजसं
पश्यामच्छलभक्तितस्तनुभृतामश्यानपुण्यात्मनाम्।
शश्याभाननमण्डलां धृतिजितावश्यायशैलां कदा
पश्यामि क्षितिजाकटाक्षपटलीदृश्याकृतिं देवताम्॥ ६२॥

पश्यति लोकानिति पश्यं अलीकं ललाटं तत्रस्थं चक्षुरविताऽस्थ्यात् अलीकं पश्यम-लीकं यस्य सः ललाटाक्षः शिवः तस्य शरासं धनुः तस्य भञ्जनं खण्डनं तस्य दशा तया अवश्यं अभिनन्द्यं ओजः तेजः। 'ओजो दीप्तिप्रकाशयोः। अवष्टम्भो वले धातुतेजसि' इति हैमः। यस्य ताम्। आश्यानपुण्यात्मनां अक्षय्यपुण्यशालिनां तनुभृतां अच्छलभक्तितः निष्कपटभक्त्या पश्यां दर्शनीयां शश्याभाननमण्डलां चन्द्रकान्तिसमानमुखमण्डलां धृति-जितावश्यायशैलां धैर्यजितहिमवत्पर्वतां क्षितिजाकटाक्षपटलीदृश्याकृतिं सीतावीक्षणवी-क्षणीयमूर्तिं तां देवतां कदा पश्यामि॥

पाकोऽभूदजनन्दनस्य भुवि यः काकोदरेशेशयो
लोकोपद्रवशान्तये दिविषदामेको जगन्नायकः।
स्तोकोदञ्चितहासरश्मिविलसद्राकोडुराजाननं
शोकोपक्षतये भजामि तमहं श्रीकोशलाधीश्वरम्॥ ६३॥

काकोदरेशेशयः फणीशेशयः। 'काकोदरः फणी' इत्यमरः। शेषशायी एकः मुख्यः जगन्नायकः यः विष्णुः दिविषदां देवानां उपद्रवशान्तये अजनन्दनस्य दशरथस्य पाकः

वालः । 'पोतः पाकोऽर्भकः' इत्यमरः । भुवि अभूत् । स्तोकोदञ्चितहासरश्मिविलसद्राको-डुराजाननं किंचिदुत्पन्नहासकान्तिराजमानपूर्णचन्द्रसदृशमुखं तं कोशलाधीश्वरं रामं अहं शोकोपक्षतये दुःखनिवृत्तये भजामि ॥

पूर्वास्तव्यवधूदृगुत्पलवनीचार्वाकृतीन्दूदयं
वार्वाहध्वनिदायिनं च धनुषे शार्वाय भङ्गक्षणे ।
गीर्वाणारिचमूदधेरतितरामौर्वायमाणं रणे
पूर्वाराधितमाश्रये रघुपतिं दूर्वादलश्यामलम् ॥ ६४ ॥

पूर्वास्तव्यवधूदृगुत्पलवनीचार्वाकृतीन्दूदयं पौरनारीनेत्रोत्पलवनसंतोषकरातिमनोज्ञच-न्द्रसदृशं भङ्गक्षणे शार्वाय शांकराय धनुषे वार्वाहध्वनिदायिनं वार्वाहः मेघः रणे गीर्वा-णारिचमूदधेः राक्षससैन्यसमुद्रस्य और्वायमाणं और्वः वडवाग्निः । 'और्वस्तु वाडवो वड-वानलः' इत्यमरः । पूर्वाराधितं दूर्वादलश्यामलम् । 'दूर्वा तु शतपर्विका' इत्यमरः । दूर्वायाः दल इव श्यामलं रघुपतिमाश्रये ॥

पेटी विक्रममौक्तिकस्य सुमनोवाटी मुनीन्द्रालिनां
शाटीभावितवल्कला धृतजटाजूटीभवत्कुन्तला ।
चेटीभूतजगद्दशाननशिरःपाटीषुरुर्वीसुता-
पाटीराङ्कभुजान्तरा मम मनस्याटीकते भावना ॥ ६५ ॥

विक्रममौक्तिकस्य पेटी । स्थानमित्यर्थः । मुनीन्द्रालिनां ऋषिश्रेष्ठभ्रमराणां सुमनोवाटी उद्यानम् । 'वाटी वास्तौ गृहोद्यानकट्योः' इति हैमः । शाटीभावितवल्कलधारिणीं धृतज-टाजूटीभवत्कुन्तला जटाधारिणी चेटीभूतजगद्दशाननशिरःपाटीषुः चेटीभूतं भृत्यभूतं जगत् यस्य सः तादृशदशाननस्य रावणस्य शिरःपाटिनः इषवः वाणाः यस्य सः उर्वीसुता-पाटीराङ्कभुजान्तरा सीताचन्दनचर्चितवक्षाः तादृशी भावना रामविषयभावना मम मनसि आटीकते आगच्छति ॥

प्रालेयांशुनिभाननं सुरतरोर्मूले स्थितं सानुजं
शीलेयं हृदि जानकीसहचरं काले यदि त्वन्तिमे ।
फालेषु भ्रमितभ्रुवो यमभटाः कौलेयकैर्दारुणै-
रालेह्यापि न शक्नुयुर्जनयितुं भीलेशमप्येव मे ॥ ६६ ॥

प्रालेयांशुनिभाननं चन्द्रनिभाननं सुरतरोः कल्पवृक्षस्य मूले स्थितं सानुजं जानकी-सहचरं अन्तिमे काले मरणकाले हृदि शीलेयं यदि फालेषु भ्रमितभ्रुवः यमभटाः दारुणैः कौलेयकैः श्वभिः । 'कौलेयकः सारमेय' इत्यमरः । आलेह्यापि [जिह्वाभिः] मे भीलेश-मपि जनयितुं न शक्नुयुः । न समर्था इत्यर्थः ॥

६

प्रासाय प्रयतेत चेद्गिरि तदा का सारवत्ता कवे-
हासायैव तु सा भवेन्मतिमतामासादिता चेत्पुरः।
त्रासादेव विना तथा विरचिता मे साहितिः प्रासभा-
ग्भासा निर्जितमेघ राघव कृपामासारयास्याः श्रुतौ ॥ ६७ ॥

प्रासाय प्रयतेत चेत् यत्नः कृतः चेत् तदा कवेः गिरि वाचि का सारवत्ता सारता। नास्तीत्यर्थः। किं च प्रासबद्धसाहितिः मतिमतां पुरः आसादिता प्राप्ता चेत् भृशं हासायैव भवेत्। त्रासादेव विना भयं विना तथा मे साहितिः प्रासभाक् प्रासबद्धा विरचिता भासा निर्जितमेघ हे राघव, अस्याः श्रुतौ श्रवणकाले कृपां आसारय वर्षय ॥

प्राजापत्यचरुप्रक्लृप्तजननः क्ष्माजामवाप्य प्रिया-
माजावुत्कमपि क्षणेन विदधे यो जामदग्न्यं जितम्।
आजान्वायतबाहुरन्तिकमहीभाजानुजेनावृतः
पूजाकर्मफलं सतां मनसि मे राजा रघूणां वसेत् ॥ ६८ ॥

यः प्राजापत्यचरुप्रक्लृप्तजननः ब्रह्मप्रेषितदिव्यपायससंभूतः क्ष्माजां सीतां प्रियां पत्नीं प्राप्य आजौ युद्धे उत्कं सोत्कण्ठं अपि जामदग्न्यं परशुरामं जितं विदधे। आजान्वायतबाहुः अतिदीर्घबाहुः अन्तिकमहीभाजा समीपस्थितेन अनुजेन लक्ष्मणेन आवृतः सतां पूजाकर्मफलं रघूणां राजा स रामः मे मनसि वसेत् ॥

बन्धा सेतुपथस्य सैन्यगतये सिन्धावुदारोर्मिभी
रुन्धाने शरचापशोभितकरः स्कन्धावसक्तेषुधिः।
गन्धानेकपचङ्क्रमो भुवि कृतां संधामवन्ध्यां वह-
न्निन्धामात्मनि सोऽवतीर्य सुचिरं तं धारयत्वेष मे ॥ ६९ ॥

उदारोर्मिभिः रुन्धाने। गतिमिति शेषः। सिन्धौ सैन्यगतये सेतुपथस्य सेतुमार्गस्य बन्धा निर्माता शरचापशोभितकरः स्कन्धावसक्तेषुधिः गन्धानेकपचङ्क्रमः मत्तगजगमनः भुवि कृतां संधां प्रतिज्ञां अवन्ध्यां सफलां वहन् स रामः मे आत्मनि मनसि अवतीर्य इन्धां दीप्यताम्। 'ञि इन्धी दीप्तौ'। एषः आत्मा तं धारयतु ॥

बालोऽप्यध्वरगुप्तये निशिचरानालोप्य यश्चित्रकृ-
ल्लीलोऽभ्यर्णगतानृषीन्निजतनुश्रीलोभिचित्तान्व्यधात्।
कालोद्यत्कमलेक्षणो भवदवज्वालोत्थसंतापहृ-
त्रैलोक्यप्रभुरेष पूषकुलभूरालोक्यते मे हृदि ॥ ७० ॥

यः बालोऽपि अध्वरगुप्तये विश्वामित्रयागत्राणार्थं निशिचरान् मारीचसुबाहुप्रमुखान्

आलोप्य नाशयित्वा चित्रकल्लीलः सन् अभ्यर्णगतान् समीपस्थान् ऋषीन् निजतनुश्रीलोभिचित्तान् व्यधात् । कालोद्यत्कमलेक्षणः प्रातःकालविकसितारविन्दनेत्रः भवदवज्ज्वालोत्थसंतापहृत् त्रैलोक्यप्रभुः पूषकुलभूः सूर्यवंशोत्पन्नः एषः रामः मे हृदि आलोक्यते ॥

भक्तं कन्दफलादिरत्नमकुटीरिक्तं जटालं शिरः
शक्तं नाम विशुद्धये शरधनुर्युक्तं च पाणिद्वयम् ।
रक्तं नेत्रयुगाञ्चलं निखिलमप्युक्तं त्विदं लक्षणं
व्यक्तं मत्कुलदैवतस्य भुवने नक्तंचरद्रोहिणः ॥ ७१ ॥

मत्कुलदैवतस्य रामस्य नक्तंचरद्रोहिणः भक्तं अन्नं कन्दफलादिरत्नमकुटीरिक्तं शिरः जटालं जटाभरितं नाम अभिधा विशुद्धये [स्मर्तॄणां] विशुद्धये शक्तं पाणिद्वयं च शरधनुर्युक्तं नेत्रयुगाञ्चलं रक्तं निखिलं इदं उक्तं लक्षणं भुवने व्यक्तम् ॥

भिन्तामन्तरिदं निरन्तरमियं चिन्ता वृथा चेतसः
संतापं च तनोतु मुञ्चतु मुदं किं तावता मे मनः ।
संतानद्रुममीप्सितार्थघटने यन्तारमम्भोनिधे-
र्हन्तारं दशकन्धरस्य भजते तं ताटकारिं यतः ॥ ७२ ॥

अन्तः अन्तःकरणं भिन्तां भेदयतु इयं चिन्ता निरन्तरं सर्वदा । वृथा चेतसः संतापं च तनोतु । मे मनः मुदं मुञ्चतु तावता किम् । न किमपीत्यर्थः । यतः ईप्सितार्थघटने संतानद्रुमं अम्भोनिधेः यन्तारं दशकन्धरस्य हन्तारं तं ताटकारिं भजते ॥

मित्रं यस्य च चित्रभानुतनयः पत्रं च शत्रुंजयं
पुत्रं चाह जनः कुशं लवमपि क्षत्रं च जात्यञ्चितम्[1] ।
सत्रं त्राणपदं च कस्यचिद्द्विषेश्छत्रं तदेकं सितं
चित्रं धन्व च दापितं जितवता वृत्रं स पातु प्रभुः ॥ ७३ ॥

यस्य चित्रभानुतनयः सुग्रीवः मित्रम् । पत्रं च वाहनं च शत्रुंजयं गरुडः । 'पत्रं तु वाहने पर्णे पक्षे च शरपक्षिणोः' इति विश्वः । पुत्रं कुशं लवमिति आह (लोके) क्षत्रं जात्यञ्चितम् । कस्यचिद्द्विषेः विश्वामित्रस्य सत्रं यागः त्राणपदं छत्रं तत् एकं प्रसिद्धं सितं यस्मै वृत्रं तदाख्यमसुरं जितवता इन्द्रेण । चित्रं शत्रुसंहारक्षमं धन्व च धनुश्च दापितं दत्तं सः प्रभुः पातु ॥

यद्रागस्य पदं विदेहतनया रुद्रायुधध्वंसना-
दुद्रावं विरचय्य येन पिदधे छिद्राणि या रोदसोः ।
भद्रायास्त्वरुणान्वयार्णवतमोनुद्रावणे सा रणे
निद्रामक्षयिणीं समर्पितवती मुद्रा खरद्रोहिणी ॥ ७४ ॥

---

१. 'जात्याञ्चितम्' इति पाठः.

येन उद्रावेण अधिकशब्देन या रोदसोः द्यावापृथिव्योः छिद्राणि पिदधे तादृशं उद्रावं रुद्रायुधध्वंसनात् हरचापभञ्जनात् विरचय्य या मुद्रा रोदसोः द्यावापृथिव्योः छिद्राणि पिदधे यद्रागस्य विदेहतनया पदं अरुणान्वयार्णवतमोनुत् तमोनुत् चन्द्रः रणे रावणे अक्षयिणीं निद्रां दीर्घनिद्रां समर्पितवती खरद्रोहिणी सा मुद्रा भद्राय अस्तु ॥

यन्मातुर्जठरेऽन्वभावि नरके यन्मानवैर्दुःसहे-
ऽप्युन्मादादिव मौढ्यभाजि न सकृत्तन्मानसे चिन्त्यते ।
जन्मासुव्यजनोदितं व्यसनितां सन्मानितोक्त्या विदं-
स्त्वन्माहात्म्यमवेत्य राम दुरितच्छिन्मादृशां त्वां भजे ॥ ७५॥

मानवैः दुःसहे नरके नरकप्राये मातुः जठरे यद्दुःखं अन्वभावि अनुभूतं [मया] तद्दुःखं उन्मादादिव वैचित्र्यादिव मौढ्यभाजि मानसे सकृत्तच्चिन्त्यते जन्मात्यन्तसुदुःसहां जन्मनि अत्यन्तसुदुःसहां व्यसनितां सन्मानितोक्त्या विदन् सद्भिर्मानिताः सन्मानिताः महान्तः तेषां उक्त्या जानन् मादृशां त्वन्माहात्म्यं दुरितच्छित् दुरितनिवर्तकं इति अवेत्य त्वां भजे ॥

यास्तेजःक्वथिताब्धयो दिनकरश्रीस्तेयकेलीभृत-
स्त्रीस्तेपुः किल रक्षसामसुषु चापास्तेषु लङ्कारणे ।
आस्तेनापि रथेन दुर्लभजवाः प्राप्तेः प्रियस्य द्विष-
स्तास्ते तावदिषू रघूद्वह ममोपास्ते मनः श्रेयसे ॥ ७६ ॥

याः इषवः तेजःक्वथिताब्धयः दिनकरश्रीस्तेयकेलीभृतः लङ्कारणे रक्षसां असुषु अपास्तेषु स्त्रीः रक्षस्त्रीः तेपुः तासां तापं अकुर्वन् आः इत्याश्चर्ये तेनापि प्रसिद्धवेगशालिनापि रथेन गरुडेन दुर्लभजवाः प्राप्तेः प्रियस्य प्राप्तिरिति कंसभार्या तस्याः प्रियस्य कंसस्य ते तव ताः पूर्वोक्तविशेषेण विशिष्टाः इषूः तावत्प्रथमतः मम मनः श्रेयसे उपास्ते ॥

ये वेदैर्विदुरस्थिराणि भुवनान्यावेधसो विष्टपा-
त्ते वेगेन तरन्ति यस्य कथया नावेव सिन्धुं भवम् ।
धावेयुर्युधि यस्य कार्मुकगुणारावेण दूरेऽरयो
भावेनालघुभक्तिना रघुभुवां सेवे तमेवेश्वरम् ॥ ७७ ॥

ये वेदैः आवेधसः विष्टपात् आब्रह्मलोकभुवनानि अस्थिराणीति विदुः ते वेगेन यस्य कथया सिन्धुं समुद्रं नावेव भवं संसारं तरन्ति । यस्य कार्मुकगुणारावेणारवेण अरयः युधि धावेयुः त रघुभुवां राघवाणां ईश्वरं अलघुभक्तिना भावेन सेवे ॥

योऽघानि स्मरतामघानि युधि येनाघानि लङ्केश्वर-
श्लाघातत्परतां नयन्ति यशसामोघा यदीया जगत् ।

मोघादन्यमिषुं कृतार्णवमदव्याघातमाबिभ्रतं
मेघाभं तमहं भजे परिवृढं वैखानसानां प्रियम् ॥ ७८ ॥

यः स्मरतां अघानि पापानि अघानि हतवान् । युधि येन लङ्केश्वरः अघानि हतः । यदीयाः यशसां ओघाः जगत् श्लाघातत्परतां नयन्ति । कृतार्णवमदव्याघातं कृतसमुद्रमदभङ्गं मोघादन्यं अमोघं इषुं आबिभ्रतं मेघाभं वैखानसानां प्रियं परिवृढं प्रभुं भजे ॥

रक्षत्वक्षयमङ्गलप्रदपदस्त्र्यक्षप्रसादोन्मिष-
द्रक्षःश्रीवृतपङ्क्तिकंधरभुजावृक्षच्छिदापण्डितः ।
अक्षय्यप्रबलप्रतापसचिवानृक्षप्लवंगानयन्
नक्षत्रेशसदृक्षचारुवदनः स क्षत्रियग्रामणीः ॥ ७९ ॥

अक्षयमङ्गलप्रदपदः अक्षयमङ्गलं मोक्षः । तथाक्षप्रसादोन्मिषद्रक्षःश्रीवृतपङ्क्तिकंधरभुजावृक्षच्छिदापण्डितः त्र्यक्षः परमेश्वर तस्य प्रसादेन अनुग्रहेण उन्मिषन्ती वृद्धिमती या रक्षःश्रीः तया परिवृतः पङ्क्तिकंधरः रावणः तस्य भुजा एव वृक्षाः तेषां छिदा छेदः । भुजाच्छिदाशब्दौ आकारान्तौ । तस्मिन् पण्डितः समर्थः । नक्षत्रेशसदृक्षचारुवदनः अक्षय्यप्रबलप्रतापसचिवान् ऋक्षप्लवंगानयन् क्षत्रियग्रामणीः स रामः रक्षतु ॥

रथ्यायां निलये सतां सदसि वा मिथ्यावचो यद्ब्रुवे
तथ्यालापमपि त्यजामि कुशले वर्थ्यावहेद्यो गतिम् ।
कथ्या तन्मम दुर्गतिर्भवति योन्मथ्यावहातुं च तां
कथ्यादित्यकुले कृतोदयमिनं तिथ्यां नवम्यां भजे ॥ ८० ॥

रथ्यायां निलये गृहे सतां सदसि वा यत्कारणात् मिथ्यावचः अनृतं ब्रुवे ब्रवीमि । यः कुशले पथि गतिं आवहेत् । तं तथ्यालापमपि त्यजामि । तत्तस्मात्कारणात् कथ्या दुःसह्या या मम दुर्गतिः भवति तां उन्मथ्यावहातुं नवम्यां तिथ्यां कथ्यं श्लाघ्यं यदादित्यकुलं तस्मिन् कृतोदयं कृतावतारं इनं प्रभुं भजे । 'इनः सूर्ये प्रभौ' इत्यमरः ॥

राकानाथनिभाननं वसुमतीतोकाभिरामाकृतिं
पाकारातिपुरःसरामरसदःशोकापनोदक्षमम् ।
कोकानन्दनवंशजव्रतपरीपाकावकृष्टोदयं
केकावन्नवपिच्छनीलवपुषं लोकामहे चेतसि ॥ ८१ ॥

राकानाथनिभाननं वसुमतीतोकाभिरामाकृतिं वसुमतीतोकः सीता । पाकारातिपुरःसरामरसदः शोकापनोदक्षमं पाकारातिः इन्द्रः । कोकानन्दनः सूर्यः तस्य वंशजव्रतपरीपाकावकृष्टः उत्पन्नः उदयः यस्य तम् । केकावन्नवपिच्छनीलवपुषं केकावन्तः मयूराः तेषां नवपिच्छानि नूतनबर्हाणि तद्वत् नीलशरीरं चेतसि चित्ते लोकामहे ॥

राकेन्दुप्रतिमाननस्य महिमा हा केन वा वर्ण्यते
लोके यत्र दयारसोऽजनि महान्काकेऽपि सान्द्रागसि ।
एकेनैव शरेण येन समरे नाकेशसूनुर्हतः
शोकेनाकुलचेतसां भुवि नृणां नाकेतवासी गतिः ॥ ८२ ॥

राकेन्दुप्रतिमाननस्य महिमा लोके केन वा वर्ण्यते । न केनापीत्यर्थः । हा यत्र रामे सान्द्रागसि सीताविषयमहदपराधवति काकेऽपि काकरूपधरे जयन्तेऽपि महान् दयारसः अजनि । येन समरे नाकेशसूनुः वाली एकेनैव शरेण हतः भुवि शोकेनाकुलचेतसां नृणां साकेतवासी गतिः ॥

रूपं यस्य वदन्ति दत्तमदनक्षेपं दुरापं परै-
श्चापं राक्षसमण्डलक्षयकरं कोपं च याद‍ृच्छिकम् ।
शापं कोकवधूवियोगजननं व्यापन्नरक्षापरं
भूपं तं बलभग्नभार्गवमहाटोपं नमस्कुर्महे ॥ ८३ ॥

यस्य रूपं दत्तमदनक्षेपं कृतमन्मथनिन्दम् । परैर्दुरापं चापं याद‍ृच्छिकं कोपं च राक्षसमण्डलक्षयकरमिति वदन्ति । यस्य शापं पत्निवधक्रुद्धभृगुशापं कोकवधूवियोगजननं कोकवधूश्चासौ विश्व विः पक्षी तं योजयति पुरुषेण संयोजयतीति कोकवधूवियोगः सूर्यः तद्वंशेऽपि सः तस्मिन् जननं जनयतीति जननं जन्मोत्पादकमिति [जनाः] वदन्ति । व्यापन्नरक्षापरं शरणागतसंरक्षणधुरंधरं बलभग्नभार्गवमहाटोपं स्वबलजितपरशुराममहागर्वं तं भूपं नमस्कुर्महे ॥

रोषान्धस्य दशाननस्य शिरसां दोषां च यस्त्रिंशतं
पूषां च द्युतिनाशुगेन हृतवान्घोषाङ्किते संगरे ।
एषाङ्गीक्रियतां ममाञ्जलिपुटी दोषान्निमार्ष्टिकृता
शेषाङ्गे शयितस्य तत्रभवतो वेषान्तरेणामुना ॥ ८४ ॥

यः रोषान्धस्य दशाननस्य शिरसां दोषां च । बाहूनामित्यर्थः । त्रिंशतं शिरांसि दश बाहवः विंशतिः आहत्य त्रिंशतं घोषाङ्किते गर्जनायुक्ते संगरे युद्धे पूषां च द्युतिना सूर्यसद‍ृशकान्तिना आशुगेन बाणेन हृतवान् । दोषान् निमार्ष्टिकृता निवृत्तकेन शेषाङ्गे शयितस्य तत्रभवतः महाविष्णोः वेषान्तरेणामुना रामेण एषा ममाञ्जलिपुटी अङ्गीक्रियताम् । प्रार्थनायां लोट् ॥

लीलादारितमन्मथारिधनुषे सालावलीलाविने
शीलावर्जिततापसाय विशिखज्वालावलीढाब्धये ।

नीलादिप्लवगार्चिताङ्घ्रियुगलीमूलाय लङ्कापतेः
कालायाकलयामि भूमितनयाहेलासखायाञ्जलिम् ॥ ८५ ॥

लीलादारितमन्मथारिधनुषे अनायासखण्डितशैवचापाय सालावलीलाविने छेदिने शीलं सद्भावः तेनावर्जिताः तापसाः यस्य तस्मै विशिखज्वालावलीढाब्धये अवलीढः पीतः । नीलादिप्लवगार्चिताङ्घ्रियुगलीमूलाय लङ्कापतेः कालाय । भूमितनया सीता । हेलासखाय क्रीडासुहृदे । अञ्जलिं आकलयामि ॥

वाचावारितमप्यभीक्ष्णमहह प्राचामृषीणां मता-
नाचारानपहाय धावति मनो नीचावतीर्णे पथि ।
हा चापल्यहतस्य तन्नियमने का चातुरी मे ततो
याचाम्यानय मे वशं त्विदमिति त्वा चापपाणे विभो ॥ ८६ ॥

मे मनः वाचावारितमपि प्राचां ऋषीणां मतानाचारान् अपहाय त्यक्त्वा नीचावतीर्णे पथि नीचगम्ये पथि अभीक्ष्णं पुनः धावति गच्छति । अहह आश्चर्यम् । चापल्यहतस्य मम तन्नियमने तस्य मनसः नियमने स्थिरीकरणे का चातुरी । सामर्थ्यं नास्तीत्यर्थः । हा इति खेदे । ततः तस्मात् कारणात् हे चापपाणे विभो इदं पूर्वोक्तं मनः मे वशं नय इति त्वा त्वां याचामि प्रार्थयामि ॥

वाक्यानामुचितं पदं हृदय वाल्मीक्याननान्निर्यतां
कोक्यानन्दकृदन्वयं भज नमोवाक्या सुरेन्द्रानुजम् ।
केक्यारूढसुराभिरूपवपुषं पाक्याब्धिमस्त्रौजसा
नाक्याराध्यपदं च जीवपरयोरैक्यावबोधाप्तये ॥ ८७ ॥

हे हृदय । संबोधनम् । वाल्मीक्याननात् वाल्मीकिमुखात् निर्यतां निर्गच्छतां वाक्यानां पदानां उचितं योग्यं पदं स्थानं कोकानन्दकृदन्वयं सूर्यवंशं सुरेन्द्रानुजं उपेन्द्रं केक्यारूढः सुब्रह्मण्यः तस्य इव आभिरूपवपुषं अस्त्रौजसा आग्नेयास्त्रतेजसा पाक्याब्धिं शोषितसमुद्रं नाकिनः देवाः तैः आराध्यपदं रामं जीवपरयोः जीवात्मपरमात्मनोः ऐक्यावबोधः अद्वैतज्ञानं तस्याप्तये प्राप्तये नमोवाक्या भज ।

वासेनातिजुगुप्सितेषु नगरेष्वासेतुवाराणसि
ग्रासे बद्धरुचिर्न चैव कृतवानासेवनं ते विभो ।
त्रासे सत्यधुनातिघोरनरकादासेदुषस्त्वां मम
व्यासेधस्तव किं क्षमो रघुपते दासेषु कर्तुं कृपाम् ॥ ८८ ॥

आसेतुवाराणसि काशीरामेश्वरपर्यन्तेषु अतिजुगुप्सितेषु अतिनिन्दितेषु । नगरवासस्य निषिद्धत्वादिति भावः । [नगरेषु वासेन सहित इति शेषः ।] ग्रासे भक्षणे बद्धरुचिः

बद्धादरः सन् अहं हे विभो ते आसेवनं न चैव कृतवान् । अधुनातिघोरनरकात् त्रासे सति हे रघुपते त्वां आसेदुषः प्रपन्नस्य मम दासेषु कर्तुं व्यासेधः निषेधः क्षमः किम् ॥

विद्धा यः कुहनामृगं विरहितं बध्वा निरीक्ष्योटजं
बुद्धा पक्षिमुखात्प्रियां रिपुहृतां बद्धालिमम्भोनिधौ ।
रुद्धा शत्रुपुरीं प्लवंगमभटैः क्रुद्धा रणायागता-
न्युद्धारीनजयत्स मे रघुपतिर्विध्वाकृतिः स्याद्गतिः ॥ ८९ ॥

यः कुहनामृगं मारीचं विद्धा वध्वा सीतया विरहितं उटजं निरीक्ष्य पक्षिमुखात् जटायुषो मुखात् प्रियां रिपुहृतां रावणहृतां बुद्धा ज्ञात्वा अम्भोनिधौ आलिं सेतुं बद्धा शत्रुपुरीं लङ्कां प्लवंगमभटैः रुद्धा रणाय आगतान् अरीन् क्रुद्धा युद्धा अजयत् सः विध्वाकृतिः विष्णुरूपी । 'विधुः श्रीवत्सलाञ्छनः' इत्यमरः । रघुपतिः गतिः स्यात् ॥

विध्वादित्यविलोचनः समिति यो विद्धा बलात्कैटभं
मध्वाघातमपि प्रकल्प्य जलधौ दध्वान शङ्खं वहन् ।
लब्ध्वा जन्म रघोः कुले निहतवान्व्यध्वावतीर्णस्थितिं
वध्वामोषकमाशरं हरतु मे स ध्वान्तमन्तर्गतम् ॥ ९० ॥

विध्वादित्यविलोचनः चन्द्रसूर्यलोचनः यः समिति बलात् कैटभं विद्धा हत्वा मध्वाघातमपि तदाख्यासुरवधमपि प्रकल्प्य जलधौ शङ्खं वहन् दध्मौ । रघोः कुले जन्म लब्ध्वा सन् व्यध्वावतीर्णस्थितिं दुर्मार्गगामिनं वध्वामोषकं सीतापहर्तारं आशरं रावणं निहतवान् जघान सः मेऽन्तर्गतं ध्वान्तं पापं हरतु प्रार्थनायां लोट् ॥

वीरेऽप्यर्पितशासनो नृपरिपौ यो रेणुकासंभवे
यो रेजे दशकंधरस्सयहरं तारेशमप्यर्दयन् ।
पारेसिन्धु निशाचराः समिदलंकारेण येनाहता
नौरेतस्य कथा भवाब्धितरणे सारेति मोदामहे ॥ ९१ ॥

यः नृपरिपौ रेणुकासंभवे वीरेऽपि परशुरामेऽपि अर्पितशासनः । यः दशकंधरस्सयहरं तारेशमपि वालिनमपि अर्दयन् पीडयन् । येन पारेसिन्धु निशाचराः रावणादयः समिदलंकारेण युद्धवीरेण । येनेत्यस्य विशेषणमेतत् । एतस्य रामस्य कथा भवाब्धितरणे सारा दृढा नौ इति मोदामहे ॥

वेदान्ते हृदि यद्व्रजन्ति मुनयो नादान्तवेद्यात्मकं
खेदान्ताय कृतस्तवं शतमखश्रीदान्तकाम्भोधिपैः ।
वेदाङ्गोपममैथिलीकुचतटस्वेदाम्बुलेशाङ्कितं
मोदाम्भोधिविहारदं मनसि तत्पादाम्बुजं पातु माम् ॥ ९२ ॥

मुनयः वेदान्ते ब्रह्मशास्त्रे नादान्तवेद्यं बिन्दुस्वरूपेण वेद्यः आत्मा यस्य तथोक्तं यत्पादाम्बुजं खेदान्ताय जन्मखेदनिवृत्तये हृदि भजन्ति शतमखः इन्द्रः श्रीदान्तः विष्णुः कः ब्रह्मा । 'को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे। मयूरेऽग्नौ च पुंसि स्यात्' इति मेदिनी । अम्भोधिपः समुद्रः एतैः कृतस्तवं वेदाङ्गोपमैमैथिलीकुचतटस्वेदाम्बुलेशाङ्कितं मनसि मोदाम्भोधिविहारदं तत्पादाम्बुजं मां पातु ॥

व्यग्रा मन्मथवह्निना मनसिजोदग्राकृतिं प्राप्य यं
विग्रा शूर्पणखा कृता निजवपुष्युग्रा सुमित्राभुवा ।
स ग्रावर्षिवधूकृदङ्घ्रिरजसा सग्राहकूर्माण्डजं
न्यग्राशिं पयसां प्रतप्य कृतवान्नृग्रामणीः पातु नः ॥ ९३ ॥

मनसिजोदग्राकृतिं मन्मथवद्रूपिणं यं निजवपुषि उग्रा । क्रूरशरीरेत्यर्थः । शूर्पणखा राक्षसी प्राप्य मन्मथवह्निना व्यग्रा सती पीडिता सती सुमित्राभुवा लक्ष्मणेन विग्रा विगतनासिका । 'वेर्ग्रो वक्तव्यः' इति नासिकाशब्दस्य ग्रा इत्यादेशः । कृताङ्घ्रिरजसा ग्रावर्षिवधूकृत् ग्रावाणं ऋषिवधूकरोतीति ग्रावर्षिवधूकृत् अहल्याशापनिवृत्तिकर्ता सग्राहकूर्माण्डजं पयसां पतिं न्यग्राशिं अल्पसरितं कृतवान् सः नृग्रामणीः नृश्रेष्ठः पातु नः ॥

व्याजानाकलितानि योगिहृदयाम्भोजानि यस्यास्पदं
पूजा यस्य जनाय यच्छति तपोभाजामलभ्यं पदम् ।
यो जानात्युदधिं विशोषयितुमप्योजायमानैः शरै
राजानं तमहं भजे त्रिजगतां श्रीजानकीनायकम् ॥ ९४ ॥

यस्य व्याजानाकलितानि निष्कपटानि योगिहृदयाम्भोजानि आस्पदम् । यस्य पूजा जनाय तपोभाजां तपस्विनां अलभ्यं पदं यच्छति । यः उदधिं ओजायमानैः तीक्ष्णैः शरैः विशोषयितुं जानाति । त्रिजगतां राजानं श्रीजानकीनायकं सीतापतिं तं रामं अहं भजे ॥

शम्बालंकृतपाणिवर्णितशरस्तम्बाय पाथोनिधे-
र्जम्बालीकरणेषवे जनकजाबिम्बाधरास्वादिने ।
अम्बानाथजुषाब्जजेन मरुतां संबाध उक्तात्मने
कुम्बाकारकपिव्रजाय करुणालम्बाय तस्मै नमः ॥ ९५ ॥

शम्बालंकृतपाणिः इन्द्रः तेन वर्णितः शरस्तम्बः शरसमूहः यस्य । पाथोनिधेः समुद्रस्य जम्बालीकरणेषवे जम्बालीकरणं पङ्कीकरणम् । जनकजाबिम्बाधरास्वादिने मरुतां देवानां संबाधे संमर्दे अम्बानाथजुषा सशिवेन अब्जजेन ब्रह्मणा उक्तात्मने उक्तः परमात्मस्वरूपं यस्य । रावणवधानन्तरं ब्रह्मा रामं अस्तौषीदिति रामायणकथा । कुम्बाकारकपिव्रजाय अतिनिबिडवानरसेनासमावृताय । 'कुम्बा सुगहना वृतिः' इत्यमरः । करुणालम्बाय तस्मै नमः ॥

शारीरद्युतिरेखया रुचिरया दूरीकृताम्भोधरं
वारीशस्मयभञ्जनं घनकृपाशारीविहारद्रुमम् ।
गौरीनाथधनुर्द्रुहं पदरजोनारीकृतप्रस्तरं
मारीचद्विषमार्तरक्षणकलापारीणमीडे विभुम् ॥ ९६ ॥

रुचिरया शारीरद्युतिरेखया शरीरस्येयं शारीरा शरीरसंबन्धिनी या द्युतिः कान्तिः तस्याः रेखया दूरीकृताम्भोधरं वारीशस्मयभञ्जनं घनकृपाशारीविहारद्रुमं शारी पक्षिविशेषः । गौरीनाथधनुर्द्रुहम् । पदरजोनारीकृतप्रस्तरम् । शैलीभूतां अहल्यां पादधूल्या परिशुद्धामकार्षीदित्यर्थः । मारीचद्विषम् । आर्तरक्षणकलापारीणं विभुं ईडे स्तौमि । 'ईड स्तुतौ' ॥

शीलालंकृतये हरीशसखये सालागजालच्छिदे
कालायाधिशराय शक्रतनये शैलाकृषा सेनया ।
हेलानद्धजलाकराय कलये नीलाङ्गकायाञ्जलीं-
ल्लीलाकृत्तनिशाटनायकशिरःकीलालधाराकिरे ॥ ९७ ॥

शीलालंकृतये शीलं सच्चरितं अलंकृतिरलंकारः यस्य तस्मै । हरीशसखये वानरेशस्य सुग्रीवस्य मित्राय । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिः' इत्यमरः ॥ सालागजालच्छिदे सप्तसालप्रभेत्त्रे शक्रतनये वालिनि कालाय अधिशराय शैलाकृषा शिलाहारिण्या सेनया हेलानद्धजलाकराय नीलाङ्गकाय लीलाकृत्तनिशाटनायकशिरःकीलालधाराकिरे लीलया अनायासेन कृत्तानि च्छिन्नानि निशाटनायकशिरांसि रावणशिरांसि तान्येव कीलालानि जलानि तेषां धाराः ताः किरतीति तथोक्ताय ॥

श्रीपादन्यसनेन यो मुनिवधूशापापनोदं व्यधा-
त्सोपानं त्रिदिवस्य सेतुमकृताकूपारगर्भे च यः ।
कोपादस्त्रमुचं रणे दशमुखं व्यापादयामास य-
श्चापालंकरणः स मेऽस्तु शरणं भूपालचूडामणिः ॥ ९८ ॥

यः श्रीपादन्यसनेन दिव्यचरणस्पर्शेन मुनिवधूशापापनोदं अहल्याशापनिवृत्तिं व्यधात् चकार । यः अकूपारगर्भे समुद्रमध्ये त्रिदिवस्य स्वर्गस्य सोपानं तत्प्रापकं सेतुं अकृत । यः रणे कोपात् अस्त्रमुचं दशमुखं व्यापादयामास चापालंकरणः सः भूपालचूडामणिः मे शरणं अस्तु॥

श्रीहीनं व्यथयन्ति ये धनमदादेहीति याहीति ता-
न्वाहीकानिव न स्मराम्यपि पतीन्दोहीयसीनां गवाम् ।
देहीतीरितमन्तरेण ददते यो ह्रीहितं देहिनां
पाहीति ब्रुवतो रघूद्वह दयावाही स सेव्योऽसि मे ॥ ९९ ॥

ये नराः धनमदात् श्रीहीनं दरिद्रं एहि आगच्छ याहि गच्छ इति व्यथयन्ति पीडयन्ति तान् दोहीयसीनां पयस्विनीनां गवां अधिपतीनपि । इदमुपलक्षणम् । अतिसंपन्नानपि वाहीकानिव वेदबाह्यानिव न स्मरामि । यः रामः देहीति ईरितमन्तरेण याच्ञां विनैव देहिनां प्राणिनां ईहितं अभीष्टं ददते ददाति । 'दद दाने' । लडेकवचनम् । हे रघूद्वह पाहीति ब्रुवतः मे दयावाही दयालुः त्वं सेव्योऽसि ॥

श्रुत्वा वेदशिरांसि तन्निगदितं मत्वा यथावन्नरः
स्मृत्वाभीक्ष्णमिदं लभेत विशयं हित्वात्मसाक्षात्कृतिम् ।
यत्त्वाह क्रममित्थमागमशिरस्तत्त्वावबोधोदये
सत्त्वाकार तदेव राम सुलभं न त्वामनत्वा नृणाम् ॥ १०० ॥

नरः वेदशिरांसि वेदान्तानि श्रुत्वा गुरुमुखात् श्रवणं कृत्वा यथावत् साकल्येन अभीक्ष्णं पुनः पुनः स्मृत्वा मननं कृत्वा विशयं संशयं हित्वा आत्मसाक्षात्कृतिं मोक्षं लभेत इति निगमः वेदः इत्थमेव क्रममाह तत्त्वाववोधोदये जगन्मिथ्या ब्रह्म सत्यमिति ज्ञानोत्पत्तौ सत्त्वाकार सद्रूपेण प्रकाशितरूप हे राम, पूर्वोक्तमोक्षप्राप्तिरपि त्वामनत्वाप्रणम्य । न त्वदुपासनां विना कदाचिदपि अन्योपायेन मोक्षप्रसक्तिर्नास्तीत्यभिप्रायः ॥

संन्यासे नियतात्मभिः स्ववगमं वन्याविहारप्रियं
मुन्याराधनतत्परं वसुमतीकन्यासहायं भजे ।
तन्यादेष शुभान्यनन्यसदृशंमन्याशरेन्द्रादृता-
पन्यायक्षितिलोकरक्षणकलाधन्यायमानो विभुः ॥ १०१ ॥

संन्यासे वैराग्ये नियतात्मभिः निश्चलचित्तैः अवगमं अवगन्तुं योग्यं वन्या वनसमूहः तत्र विहारप्रियं मुन्याराधनतत्परं वसुमतीकन्यासहायं भजे । अनन्यसदृशंमन्याः अहंकारवन्तः ये आशरेन्द्राः राक्षसा रावणादयः तैः आदृतः आदरेण कृतः अपन्यायः यस्मिन् तस्य क्षितिलोकस्य भूलोकस्य रक्षणकलाधन्यायमानः रक्षणविद्याप्रवीणः एषः विभुः शुभानि तन्यात् कुर्यात् ॥

सत्राणार्थमजात्मजस्य नृपतेः पुत्रायमाणो हरिः
सत्रासान्विधुरान्न केवलमसावत्रावनीमण्डले ।
सुत्रामप्रमुखैर्मरुद्भिरखिलैः सत्रा जवादेयिवा-
न्यत्रासन्नरकाश्च नारकिजनास्तत्रापि नस्त्रायताम् ॥ १०१ ॥

सत्राणार्थं सत्परित्राणार्थं अजात्मजस्य नृपतेः दशरथस्य पुत्रायमाणो पुत्रवदाचरमाणः असौ हरिः सत्रासान् भयसहितान् अत एव विधुरान् दुःखितान् अत्रावनीमण्डले केवलं

न त्रायतां किंतु सुत्रामप्रमुखैः मरुद्भिः इन्द्रादिदेवैः सत्रा साकं जवात् एयिवान् आगतः सन् यत्र यस्मिन् लोके नरकाः निरयाः नारकिजनाः तत्रापि नः त्रायताम् ॥

संजातं सवितुः कुलादुपनिषत्कुञ्जाधिवासिद्विपं
मञ्जानं वपुषा नवाम्बुदमहःपुञ्जावलेपं भजे ।
मञ्जावर्पितहस्तमस्ततटिताशिञ्जारुचा कार्मुके
कंजानुक्रियमाणलोचनरुचिं तं जानकीवल्लभम् ॥ १०३ ॥

सवितुः सूर्यस्य कुलात् संजातं उपनिषत्कुञ्जाधिवासिद्विपं उपनिषद्रहस्यवासिनं वपुषा शरीरेण नवाम्बुदमहःपुञ्जावलेपं नीलाम्बुदकान्तिपुञ्जगर्वं भञ्जानं तिरस्कुर्वन्तं अस्ततटिता तटितोऽपि अधिककान्त्या शिञ्जारुचा ज्याकान्त्या मञ्जौ मनोज्ञे कार्मुके धनुषि अर्पितहस्तं कंजानुक्रियमाणलोचनरुचिं कंजं पद्मं तं जानकीवल्लभं रामं भजे ॥

संजज्ञे शुभधीः सकृद्दिविषदां भञ्जन्रिपूनायुधं
गुञ्जच्छिञ्जिनि संहितेषु च वहन्कंजच्छदाक्षो हि यः ।
संजल्प्यं निगमैः शिरीषसुमनःकिञ्जल्करेणुद्युतिं
तं जप्याख्यमुमाधवेन करुणापुञ्जस्वरूपं भजे ॥ १०४ ॥

शुभधीः शुभं जगतां कर्तुं धीः यस्य तथोक्तः । दिविषदां देवानां रिपून् भञ्जन् गुञ्जच्छिञ्जिनि ज्याशब्दयुते धनुषीत्यध्याहर्तव्यम् । संहितेषु बाणं आयुधं चापादि च वहन् कंजच्छदाक्षः पद्मपत्राक्षः यः संजज्ञे निगमैः संजल्प्यं शिरीषसुमनःकिञ्जल्करेणुद्युतिं उमाधवेन जप्या आख्या यस्य तं करुणापुञ्जस्वरूपं दयाराशिरूपं भजे ॥

साधारण्यलसत्कृपो नतिकरे साधावसाधावपि
क्रोधाकृष्टधनुश्च्युतास्त्रशिखिनामेधायमानाम्बुधिः ।
आधारो यशसामवाप्तसरयूरोधामखानां विधौ
मेधामेधयतु स्तुतो रघुपतिर्मे धातृमुख्यैः सुरैः ॥ १०५ ॥

नतिकरे नम्रे साधौ असाधावपि साधारण्यलसत्कृपः साधारण्येन सामान्येन । निर्विशेषेणेति यावत् । लसन्ती कृपा यस्य स तथोक्तः क्रोधाकृष्टधनुश्च्युतास्त्रशिखिनां क्रोधेन कोपेन आकृष्टं यत् धनुः तस्मात् च्युतस्य अस्त्रस्य आग्नेयास्त्रस्य शिखिनां एधायमानाम्बुधिः एधायमानः काष्ठवत् आचरितं अवाप्तसरयूरोधामखानां सरय्वाः रोधा तटं तत्र मखा यागाः । 'सप्ततन्तुर्मखः क्रतुः' इत्यमरः । अवाप्ताः सरयूरोधामखाः यैस्ते । दीक्षितानामित्यर्थः । विधौ करणविषये आधारः धातृमुख्यैः ब्रह्मादिभिः सुरैः स्तुतः रघुपतिः रामः मे मेधां प्रज्ञां एधयतु वर्धयतु ॥

सुप्रज्ञातबलोऽर्कजेन कपिनाप्यप्रत्ययध्वंसना-
त्स्वप्रस्थानपथार्पणाय जलधौ क्षिप्रप्रकीर्णाशुगः ।
विप्रत्राणपरो विरोधिनगरीवप्रच्छिदाकृच्छरः
स प्रष्ठो रघुवंशलब्धजनुषां त्वप्रक्षयायास्तु नः ॥ १०६ ॥

अप्रत्ययध्वंसनात् दुन्दुभिकलेवरक्षेपसप्तसालप्रभेदना अनिश्चयनिवारणेन अर्कजेन कपिनापि सुग्रीवेणापि प्रज्ञातबलः स्वप्रस्थानपथार्पणाय स्वसेनागमनाय जलधौ समुद्रे क्षिप्रकीर्णाशुगः । विप्रत्राणपरः विरोधिनगरीवप्रच्छिदाकृच्छरः शत्रुनगरसालभिद्बाणः रघुवंशलब्धजनुषां रघुवंश्यनृपाणां । प्रष्ठः अग्रगामी । 'प्रष्ठोऽग्रगामिनि' इति निपातः । स रामः नः त्वप्रक्षयाय पापक्षयाय अस्तु ॥

सुत्रामप्रमुखैर्दशाननचमूवित्रासितैरर्थितः
पुत्रायेष्टिकृतोऽभवद्दशरथान्मित्राभिजातान्वये ।
पित्रानृण्यविधित्सया दयितया सत्रानुजेनापि यः
सत्रावासमवापितः किमितरैः स त्रातुमस्मानलम् ॥ १०७ ॥

यः दशाननचमूवित्रासितैः रावणसैन्यवित्रस्तैः सुत्रामप्रमुखैः इन्द्रादिभिः अर्थितः पुत्राय पुत्रं प्राप्तुं इष्टिकृतः दशरथात् मित्राभिजाताः सूर्यवंश्याः रघवः तेषां अन्वये वंशे अभवत् । पित्रानृण्यविधित्सया पितृऋणनिवृत्त्यर्थं दयितया सीतया अनुजेन लक्ष्मणेन सत्रा साकं सत्रावासं सत्राणां यागानां आवासं स्थानीभूतं अवापितः प्राप्तः । इतरैः विष्ण्वादिभिः किम् । सः रामः अस्मान् त्रातुं अलं पर्याप्तम् ॥

सेतुर्येन समस्तपापदलनाहेतुर्निबद्धोऽर्णवे
जेतुर्यस्य रणे रिपूपशमने चातुर्यमन्यादृशम् ।
धातुर्यत्प्रकृतिर्गिरा प्रकटिता यातुप्रभौ पातिते
जातु द्रष्टुममुं लभेय किमहं हा तुद्यते मे मनः ॥ १०८ ॥

येन समस्तपापदलनाहेतुः समस्तपापनिवृत्तिहेतुः सेतुः अर्णवे समुद्रे निबद्धः । जेतुर्जयशीलस्य यस्य रणे रिपूपशमने शत्रुहननविषये चातुर्यं सामर्थ्यं अन्यादृशमदृष्टचरम् । यातुप्रभौ राक्षसप्रभौ पातिते सति यत्प्रकृतिः यस्य रामस्य प्रकृतिः यथातथ्यं धातुः ब्रह्मणः गिरा प्रकटिता । इमं रामं जातु कदाचित् द्रष्टुमहं लभेय किं इति मे मनः तुद्यते दुःखितं भवति । हा इति खेदे ॥

सेवित्वा कपयोऽपि यं मुमुचिरे त्रैविध्यबोधं विना
यो विष्णोस्तनुभेद एव धरणावाविर्बभूव स्वयम् ।

सावित्रान्वयजं तमाशरचमूलाविल्वरावच्छरं
देवि त्वं भज धारणे हरधनुर्द्वैविध्यविद्यागुरुम् ॥ १०९ ॥

कपयोऽपि यं रामं सेवित्वा त्रैविध्यबोधं विना श्रवणमननादिश्रमं विना मुमुचिरे मुक्ता अभवन्। विष्णोः हरेः तनुभेद एव यः धरणौ स्वयं रामरूपेण आविर्बभूव। सावित्रान्वयजं आशरचमूलाविलरावच्छरं राक्षससैन्यनाशे अतिवेगयुक्तबाणं हरधनुर्द्वैविध्यविद्यागुरुं शिवचापभञ्जनप्रवीणं तं रामं हे देवि मते, भज ॥

सोमेनोपमितानने दशमुखक्षेमेतरप्रापके
भूमेरात्मजयानुजेन च गुणारामेण संसेविते।
वामे धन्व करे शरं तदपरे रामे दधाने घन-
श्यामे जाग्रति रक्षणार्थमितरा का मे गतिः क्ष्मातले ॥११०॥

सोमेन चन्द्रेण उपमितानने। दशमुखक्षेमेतरप्रापके दशमुखस्य रावणस्य क्षेमेतरं नाशः तत्प्रापके। भूमेरात्मजया सीतया गुणारामेण गुणशालिना अनुजेन च लक्ष्मणेन च संसेविते वामे करे धनुः तदपरे अवामे पाणौ शरं दधाने घनश्यामे रामे रक्षणार्थं जाग्रति सति क्ष्मातले भूतले मे इतरा रामाभिन्ना का गतिः। न कापि इत्यर्थः। राम एव मां रक्षेदित्यर्थः ॥

स्वर्वीणाधरवन्दितेन रणभूदर्वीकरेणेषुणा
निर्वीरां कृतवान्निशाचरपतेर्गुर्वीडनीयां पुरीम्।
खर्वीभावितसर्ववैरिविभवां कुर्वीत मे संपदं
गुर्वीमेधितमित्रबान्धवजनामुर्वीकुमारीपतिः ॥ १११ ॥

स्वर्वीणाधरवन्दितेन नारदवन्दितेन रणभूदर्वीकरेणेषुणा रणभूमिदर्वीकरवत् अतिघोरः इषुः तेन बाणेन निशाचरपतेः रावणस्य गुर्वीडनीयां गुरुणा बृहस्पतिना ईडनीयां स्तुत्यां पुरीं लङ्कां निर्वीरां वीररहितां कृतवान्। उर्वीकुमारीपतिः सीतापतिः श्रीरामः खर्वीभावितसर्ववैरिविभवां खर्वीभावितः अल्पीकृतः सर्ववैरिविभवः यया गुर्वीं एधितमित्रबान्धवजनां संपदं मे कुर्वीत ॥

स्वर्भेजेऽरिचमूर्यदाशुगहताविर्भेरिके संयुगे
नुर्भेतव्यकरी च येन भवरुङ्भिर्भेषजाप्यस्यते।
दर्भेणास्त्रयुजामुना खगतनावर्भे मघोनो वयं
गर्भेणाजसुतस्य सुन्दरमणीनिर्भेदिना सेश्वराः ॥ ११२ ॥

आविर्भवन्तः शब्दायमानाः भेर्यः यस्मिन् तस्मिन् आविर्भेरिके संयुगे युद्धे यदाशुग-

हता यस्य रामस्य आशुगहता बाणहता अरिचमूः शत्रुसैन्यम् । स्वरिति अव्ययम् । स्वर्गं भेजे जगाम । नुः मनुष्यस्य भेतव्यकरी भयंकरी भवरुक् संसारव्याधिः निर्भेषजा चिकित्सारहिता येन रामेण अस्यते निरस्यते । 'असु क्षेपणे' । कर्मणि लट् । प्रथमपुरुषैकवचनम् । खगतनौ वायसरूपिणि मघोनः इन्द्रस्य अर्भे अर्भके जयन्ते दर्भेण कुशेन अस्त्रयुजा अस्त्रकार्यं कुर्वता सुन्दरमणीनिर्भेदिना ताटकाघातिना अमुना अजसुतस्य दशरथस्य गर्भेण वयं सेश्वराः सनाथाः ॥

स्तोमाय त्रिदिवौकसामुपहृतक्षेमाय हत्वा रिपू-
न्रामाय प्रथमानसुन्दरगुणग्रामाय तस्मै नमः ।
श्यामाय त्रिपुरारिचापदलनोद्दामाय लङ्कापुरी-
भीमाय क्षितिकन्यकारमणिनः कामाय कोदण्डिने ॥ ११३ ॥

रिपून् हत्वा त्रिदिवौकसां देवानां स्तोमाय संघाय उपहृतक्षेमाय उपहृतः क्षेमः येन तस्मै । प्रथमानसुन्दरगुणग्रामाय श्यामाय त्रिपुरारिचापदलनोद्दामाय लङ्कापुरीभीमाय क्षितिकन्यकारमणिनः सीतायाः कामाय कामरूपाय कोदण्डिने रामाय तस्मै नमः ॥

हर्यक्षेभरतक्षुखड्गचमरीकिर्यच्छभल्लाकुलं
निर्यद्भोगि वनं गिरा पितुरगाद्धुर्यः स्वधर्मस्य यः ।
निर्यत्नं खरदूषणत्रिशिरसः स्वर्यद्धता लेभिरे
पर्यस्यत्वहिमांशुवंशजनुषां वर्यः स पापानि नः ॥ ११४ ॥

स्वधर्मस्य धुर्यः निर्वाहकः यः पितुः गिरा हर्यक्षेभतरक्षुखड्गचमरीकिर्यच्छभल्लाकुलं सिंहगजव्याघ्रचमरीवन्यवराहाच्छभल्लाकुलं निर्यद्भोगि निर्यन्तः संचरन्तः भोगिनः सर्पाः यस्मिन् तत् वनं अगात् । निर्यत्नं प्रयत्नं विना यद्धताः येन रामेण हताः खरदूषणत्रिशिरसः स्वः स्वर्गं लेभिरे प्राप्ताः । अहिमांशुवंशजनुषां सूर्यवंश्यानां वर्यः सः नः पापानि पर्यस्यतु निवर्तयतु ॥

हन्तुं प्राक्तनदुष्कृतानि जगतां मन्तुं भृशानित्यतां
कन्तुं जेतुममुत्र चेह समुपारन्तुं फलेष्वादरात् ।
यन्तुश्चेन्द्रियजातमागमशिरो गन्तुं च वक्राद्गुरो-
स्तन्तुं चण्डकरान्वयस्य कलये तं तुङ्गचापं प्रभुम् ॥ ११५ ॥

प्राक्तनदुष्कृतानि प्राग्जन्मार्जितपापानि हन्तुं जगतां भृशानित्यतां मन्तुं अवगन्तुं कन्तुं विषयासक्तिं जेतुं अमुत्र परलोके इह फलेषु आदरात् समुपारन्तुं इन्द्रियजातं यन्तुं वशीकर्तुं गुरोः आचार्यस्य वक्रात् आगमशिरः तत्त्वशास्त्रं गन्तुं तुङ्गचापं चण्डकरान्वयस्य तन्तुं प्रभुं कलये ध्यायामि ॥

क्षोणिस्थस्य यदर्चया किल पदश्रेणिर्भवेन्नाकिनां
गाणिक्येन सदोचिता गणयितुं माणिक्यमालानिभा ।
प्राणिश्रोत्रसुखावहा सुरनदीवेणीस्मयोत्सारिणी
पाणिश्लिष्टधनुः स मेऽस्तु शरणं तूणीभृतांसो विभुः ॥११६॥

इति श्रीरामभद्रदीक्षितविरचितो रामविषयिकाष्टप्रासः समाप्तः ।

यदर्चया यस्य रामस्य अर्चया पूजया नाकिनां देवानां गाणिक्येन गणिकासमूहेन सदा गणयितुं उचिता माणिक्यमालानिभा माणिक्यरत्नप्रोतमालासदृशा प्राणिश्रोत्रसुखावहा श्रोतृजनश्रोत्रसंतोषकारिणी सुरनदीवेणीस्मयोत्सारिणी गङ्गाप्रवाहगर्वभञ्जिनी अखिलपदप्राप्तिः सुप्तिङ्ङन्ताद्यखिलपदप्राप्तिः । कवनशक्तिरिति यावत् । यद्वा अखिलपदप्राप्तिः अखिलानां ब्रह्मादिदेवानां वा पदप्राप्तिः सत्यलोकादिपुण्यलोकप्राप्तिः वा भवेत् पाणिश्लिष्टधनुः सशरचापहस्तः तूणीभृतांसः सः विभुः रामः मे शरणं अस्तु ॥ एतद्ग्रन्थे शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥

श्रीमल्लक्ष्मणजानकीसहचर श्रीरामचन्द्रप्रभो
मद्वाञ्छां शृणु मन्मनोऽभिरमतां त्वत्पादपङ्केरुहे ।
नीडामङ्गलवासिने नम इदं तुभ्यं दयाम्भोनिधे
संतानाख्यजुषे दयार्द्रमनसे पापौघविद्वेषिणे ॥

त्रिशिरनगरवर्ये काचिदभ्यासशाला द्रविडसहितनामा वर्तते ज्ञप्तिपालैः ।
उशनधिषणसाम्यैः सद्भिराचार्यमुख्यैर्नटननृपतिजाता नन्दनीया सुधीभिः ॥

तत्रस्थेन पण्डितेन सेतुशास्त्रिणा टीकेयं कृता ।

वासुदेवकविरचितं[1]

वासुदेवविजयम् ।

स्वकृतपदचन्द्रिकाख्यव्याख्यासमेतम्

प्रथमः सर्गः ।

विघ्नेशभारतीव्यासगुरुशाब्दिकमूर्तये ।
नमोऽस्तु पत्यै भूतानां सदानन्दचिदात्मने ॥
मत्स्यकच्छपभूदारनृसिंहवटुविग्रहम् ।
नौमि रामत्रयीकृष्णकल्किरूपमधोक्षजम् ॥

---

१. अयं च वासुदेवकविः केरलदेशे पुरुवनग्रामे प्रादुरभूदिति धातुकाव्यप्रारम्भश्लोकव्याख्यातः प्रतीयते. कालस्तु न निश्चितः. एतद्ग्रन्थरचनेनास्य महावैयाकरणत्वं प्रतीयते, यतः सर्गत्रयात्मकेनैवानेन सकलाष्टाध्यायी कृतार्थीकृता.

कुन्दसूनमनोहारिमन्दहासविराजितम् ।
नन्दगोपकुलोत्तंसमिन्दिरारमणं भजे ॥
काव्यं मया वासुदेवविजयाख्यमकारि यत् ।
व्याख्यापि तस्य तन्वीयं क्रियते पदचन्द्रिका ॥

कृतार्थता यस्य पदाम्बुजं सदा निषेवमाणं वृणुतेऽचिरात्स्वयम् ।
हृदा दधत्तं वसुदेवनन्दनं पुने गिरस्तच्चरितामृतोर्मिभिः ॥ १ ॥

अहं तं वसुदेवनन्दनं हृदा दधत् तच्चरितामृतोर्मिभिः गिरः पुने शोधयामि । यस्य पदाम्बुजं सदा निषेवमाणं पुरुषं कृतार्थता अचिरात् स्वयं वृणुते ॥

समस्तवित्तामधिजग्मुषः स्वतो यतः प्रजेशाः श्रुतिमध्यगीषत ।
तितिक्षमाणापि समं क्षमाप तं नृपीभवद्दैत्यभरार्दिता विधिम् ॥ २ ॥

क्षमा तं विधिं ब्रह्माणमाप आश्रयत् । समं सर्वं तितिक्षमाणापि सहमानापि नृपीभवद्दैत्यभरार्दिता अनृपा नृपा भवन्तीति नृपीभवन्तस्ते दैत्या एव भरस्तेन पीडिता । यतः प्रजेशाः श्रुतिं अध्यगीषत अधीतवन्तः । स्वतः स्वभावेन अथवा सर्वात्मभूतादन्तर्यामिणः समस्तवित्तां सर्वज्ञत्वं अधिजग्मुषः प्राप्तवतः ॥—इह पाणिनीयसूत्रे चत्वारो भागाः परिकल्पिताः । प्रथमद्वितीया[ध्याया]त्मक आद्यः । तृतीयाध्यायात्मको द्वितीयः । चतुर्थपञ्चमाध्यायात्मकस्तृतीयः । अवशिष्टाध्यायात्मकश्चतुर्थः । तत्र युगपदधिक्रियन्ते—अध्यगीषतेति । 'इङ् अध्ययने' । इङिकावधिपूर्वावेव प्रयुज्येते । लुङि 'च्लि लुङि' इति च्लिः । 'च्लेः सिच्' 'विभाषा लुङ्लृङोः' इति गाङादेशे, 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सिचो ङित्त्वे 'घुमास्थागा–'[आदि]मेत्वं 'आदेशप्रत्यययोः' इति षत्वम् । तितिक्षमाणेति । 'तिज निशातने' । 'गुप्तिज्किद्भ्यः सन्' इति सन्प्रत्ययः । स च 'निन्दाक्षमाव्याधिप्रतिकारेषु सन्निष्यते' इति क्षमायाम् । पञ्चमाध्यायान्तं वक्ष्यमाणानां प्रकृत्युपपदोपाधिविकारागमवर्जं प्रत्ययसंज्ञा । स च 'प्रत्ययः' 'परश्च' इति धातोः प्रातिपदिकाद्वा परः स्यात् । 'सनाद्यन्ता धातवः' इति धातुसंज्ञा । 'सन्यङोः' इति सनन्तस्य द्विर्वचनम् । लटः शानच् । कृदन्तत्वात्प्रातिपदिकत्वम् । स्त्रीत्वविवक्षायां स्त्रियाम् 'अजाद्यतष्टाप्' इति टाप् । तदन्तत्वात् 'ङ्याप्प्रातिपदिकात्' इत्यधिकृत्य 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इति सुप् । अधिजग्मुष इति । 'गम्लृ गतौ' अधिपूर्वः । लिटः क्वसुः 'गमहन–'आदिना उपधालोपः । 'लिटि धातोरनभ्यासस्य' इति द्विर्वचनम् । तच्च हलादीनां धातूनां 'एकाचो द्वे प्रथमस्य' इति प्रथमस्यैकाचः स्यात् । 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञा । 'कुहोश्चुः' इत्यभ्यासस्य चुत्वम् । समस्तविदिति । 'सत्सूद्विष–' इति क्विप् । 'दित्यदित्यादित्य–' इति ण्यः । ['तद्धितेष्वचामू–' इति] आदिवृद्धिः । 'वृद्धिरादैच्' इति वृद्धिसंज्ञा ॥

मीमांसमानं निगमार्थवर्तनीरनुद्विजित्री समितेः शुचाथ सा ।
कार्श्यं दधत्यार्तिभरात्प्रणत्य तं जगद्धिते जाग्रतमार्चिचद्गिरा ॥ ३ ॥

अथ सा तं प्रणत्य गिरा आर्चिचत् स्तुतवती । निगमार्थवर्तनीः वेदार्थमार्गान् मीमांसमानं जगद्धिते जाग्रतं तात्पर्यवन्तं शुचा हेतुना समितेः सभायाः अनुद्विजित्री भयं अगमयन्ती आर्तिभरात् पीडातिशयेन हेतुना कार्श्यं दधती ॥—अनुद्विजित्रीति । 'ओ विजी भयचलनयोः' । ततस्तृच् । इडागमः । 'विज इट्' इति इडादेस्तृचो ङित्त्वात् 'क्ङिति च' इति गुणाभावः । 'अदेङ्गुणः' इति गुणसंज्ञा । 'ऋन्नेभ्यो ङीप्' इति ङीप् । मीमांसमानमिति । 'मान पूजायाम्' । 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' इति मानेर्जिज्ञासायां सनभ्यासस्येकारस्य दीर्घश्च । दधतीति । 'डुधाञ् दानधारणयोः' । लट् । 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लुः । 'प्रत्ययस्य लुक्श्लुलुपः' इति श्लुसंज्ञा । 'श्लौ' इति द्विर्वचनम् । 'उगितश्च' इति ङीप् । 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायाम् 'नाभ्यस्ताच्छतुः' इति नुमभावः । आर्चिचत् । 'अर्च पूजायाम्' । चुरादि । लुङि चङ् । 'चङि' इति द्विर्वचनम् । तच्च 'अजादेर्द्वितीयस्य' इति द्वितीयस्यैकाचः स्यात् । तत्र 'नन्द्राः संयोगादयः' इति रेफस्य न भवति । हलोऽनन्तराः संयोगः' [इति संयोगसंज्ञा ।] जाग्रतमिति । 'जागृ निद्राक्षये' । लटः शता 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञायां नुमभावः ॥

रजोगुणेनोर्णविता निजं महो धियं दधद्विश्वसतत्त्वदृश्वरीम् ।
सिसृक्षितं संतनुषे त्वमीक्षया विभो कथं नूर्णुवितासि मे शुचम् ॥४॥

हे विभो, त्वं सिसृक्षितं स्रष्टुमिष्टं विश्वं ईक्षया ईक्षणेन संकल्पमात्रेण संतनुषे करोषि तथा सति मे शुचं कथं नु ऊर्णुवितासि छादयितासि । रजोगुणेन निजं महः तेजः ऊर्णविता छादयिता विश्वसतत्त्वदृश्वरीं विश्वस्य सतत्त्वं पारमार्थिकं रूपं द्रष्ट्रीं धियं दधत् ॥—ऊर्णवितेति । 'ऊर्णुञ् छादने' । 'विभाषोर्णोः' इतीडादेः प्रत्ययस्य वा ङित्वम् । ङित्वे उवङ् । अङित्वे गुणः । संतनुषे [इति] । 'थासः से' 'सार्वधातुकमपित्' इति ङित्वे विकरणस्य गुणाभावः । सिसृक्षितमिति । 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इति सन् । सतत्त्वदृश्वरीमिति । 'दृशेः क्वनिप्' 'वनो र च' इति ङीपि रेफादेशः । परमेश्वरस्य जगत्सिसृक्षात्मिका मायावस्था ईक्षणकामतपोवि··········कीर्षादिशब्दैरधीयते 'स ऐक्षत' इत्यादयः श्रुतयः ॥

बहून्युदित्वा खलु या बभूव युद्दिवीह ये चक्रभृता निजघ्निरे ।
मयि द्विषस्ते जनिमेत्य तन्वते तनुं वृषस्य द्विपदीमनङ्घ्रिकाम् ॥ ५ ॥

बहूनि वक्तव्यानि उदित्वा उक्त्वा खलु या युत् युद्धं तारकामयाख्यं दिवि बभूव इह युधि ये चक्रभृता निजघ्निरे ते द्विषः असुराः मयि लोकरूपिण्यां जनिं जन्म एत्य वृ

षस्य धर्मस्य द्विपदीं पादद्वययुतां तनुं अनङ्घ्रिकां पादरहितां तन्वते । धर्ममशेषं नाशयन्ति । द्वापरे युगेऽपि धर्मो द्विपात् ॥—निजघ्निरे इति । 'असंयोगाल्लिट्कित्' इति किद्वद्भावात् 'गमहनजन–' इत्युपधालोपः । बभूवेति । 'इन्धिभवतिभ्यां च' इति लिटः कीद्वद्भावाद्गुणाभावः । उदित्वेति । 'वद व्यक्तायां वाचि' अस्मात् क्त्वा । 'मृडमृदगुधकुषक्लिशवदवसः क्त्वा' इति कित्त्वे 'वचिस्वपियजादीनां किति' इति यजादित्वात्संप्रसारणम् । 'इग्यणः संप्रसारणम्' 'क्त्वातोसुन्कसुनः' इत्यव्ययसंज्ञा । द्विपदीमिति । द्वौ पादावस्य इति बहुव्रीहिः । 'संख्यासुपूर्वस्य' इत्यकारलोपः समासान्तः । 'पादोऽन्यतरस्याम्' इति वा ङीपि 'पादः पत्' ॥

सुधाभुजोऽपि न्यजिघृक्षदोजसा यः कालनेमिः स हि कंसतामयन् ।
जिगीषया संकुटितापथा तिसृष्वाक्रीडते संप्रति लोकसीमसु ॥ ६ ॥

स हि कालनेमिः संप्रति कंसतामयन् प्राप्नुवन् जिगीषया जेतुमिच्छया तिसृषु लोकसीमसु लोकानामन्तेषु अपि आक्रीडते यः सुधाभुजो देवान् अपि ओजसा न्यजिघृक्षत् निगृहीतुमैच्छत् । अपथा अमार्गेण संकुटिता कौटिल्येन गन्ता । 'कुट कौटिल्ये' ॥—न्यजिघृक्षदिति । 'ग्रह उपादाने' । 'धातोः कर्मणः–' इति सन् । 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्च' इति सनः कित्त्वम् । 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इति संप्रसारणम् । 'संप्रसारणाच्च' इति पूर्वरूपत्वम् । जिगीषयेति । 'इको झल्' इति सनः कित्त्वात् गुणाभावः । 'अज्झन[गमां सनि]' इति दीर्घः । तिसृष्विति । 'न षट्स्वस्रादिभ्यः' इति ङीप्प्रतिषेधः । सीमस्विति । 'मनः' इति ङीप्प्रतिषेधः ॥

न कोऽप्यशस्त्रीयदितः पुरा पुमान्न चायशस्काम्यदुवाह नो मुदम् ।
न धैर्यलक्ष्म्या समगंस्त स प्रतानसावचिच्छित्सत यस्य वैभवम् ॥ ७॥

असौ कंसः यस्य पुंसः वैभवं अचिच्छित्सत छेत्तुमैच्छत् स तादृशः पुमान् कोऽपि कश्चिदपि इतः पुरा वर्तमानकालात् प्राक् न अशस्त्रीयत् आत्मनः शस्त्रमैच्छत् । न च अयशस्काम्यत् आत्मनः यशः ऐच्छत् । मुदं न उवाह । धैर्यलक्ष्म्या न समगंस्त संगतवान् । प्रतान् प्रकर्षेण ताम्यन् ॥—अचिच्छित्सतेति । 'हलन्ताच्च' इति सनः कित्त्वम् । समगंस्तेति । 'गम्लृ गतौ' । 'वा गमः' इति सिचः कित्त्वविकल्पः । कित्त्वाभावपक्षे अनुनासिकलोपाभावः । अशस्त्रीयदिति । 'सुप आत्मनः क्यच्' इतीच्छायां क्यच् । अयशस्काम्यदिति । 'काम्यच्च' इतीच्छायां सुपः काम्यच् । 'पाशकल्पककाम्येषु' इति सकारः । उवाहेति । 'वह प्रापणे' । 'लिट्यभ्यासस्योभयेषाम्' इति यजादित्वात्संप्रसारणम् ॥

अनुग्रहं मय्यपशर्मणि प्रभो कृषीष्ट भित्सीष्ट ममापदं भवान् ।
असूषुपत्कस्त्वदृते परः सुखं निजौरसीयन्कृपणं तदार्तिहृत् ॥ ८ ॥

हे प्रभो, भवान् मयि अनुग्रहं कृषीष्ट कुरुतात्। अपशर्मणि अपगतं शर्म यस्याः। मम आपदं दुर्जनभरणलक्षणं भित्सीष्ट अपनयतात्। त्वद्दते परः अन्यः कः पुरुषः कृपणं दीनं जनं निजौरसीयन् निजं औरसं पुत्रमिवाचरन् तदार्तिहृत् तस्य पीडां हरन् सुखं असूषुपत् स्वापितवान्। आर्त्यतिशये हि स्वापो दुर्लभः॥–भित्सीष्टेति। 'लिङ्सिचावात्मनेपदेषु' इति लिङः कित्त्वाद्गुणाभावः। कृषीष्टेति। 'उश्च' इति कित्त्वाद्गुणाभावः। निजौरसीयन्निति। 'उपमानादाचारे' इति कर्मणः परः क्यच्। अपशर्मणीति। 'अनो बहुव्रीहेः' इति ङीष्प्रतिषेधः। असूषुपदिति। 'ञिष्वप् शये'। 'हेतुमण्ण्यन्तः चङ्'। 'स्वापेश्चङि' इति संप्रसारणम्। लघूपधगुणः। उपधाह्रस्वः। द्विर्वचनम्। 'दीर्घो लघोः'॥

पयायमानामपि तापदायिनीं भृशायितार्तिग्लपितां गिरं भुवः।
कृपायमाणोऽथ निशम्य चिन्तया क्षणं स तूष्णीमकृतासिकां विभुः॥९॥

अथ स विभुः भुवः गिरं निशम्य चिन्तया हेतुना तूष्णीं आसिकां अकृत कृतवान्। पयायमानां पय इवाचरति पयायते तादृशीमपि तापदायिनीं भृशायितार्तिग्लपितां अभृशा भृशा भूता भृशायिता। कृपायमाणः कृपावान्॥—अकृतेति। 'उश्च' इति सिचः कित्त्वम्। पयायमानामिति। 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्। 'पयसस्तु विभाषया' इति सलोपविकल्पः। 'पयस्यमानाम्' इति वा पाठः। भृशायितेति। 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' इत्यर्थे क्यङ्। कृपायमाण इति। 'लोहितादिडाज्भ्यः क्यष्' इत्यत्यर्थ्यर्थे (?) क्यप्॥

निश्चित्य सोऽर्थं सहपार्वतीपतिः सुरैस्तथाधार्मिकराजया भुवा।
कष्टायमानस्य जनस्य शासितुस्तपस्यतां पत्युरगात्पदं हरेः॥ १०॥

स ब्रह्मा अर्थं कर्तव्यं वस्तु निश्चित्य हरेः पदं क्षीराब्धिमगात्। सहपार्वतीपतिः सुरैस्तथा अधार्मिकराजया भुवा च सह। अधार्मिकाः अधर्मं चरन्तो राजानो यस्याः। कष्टायमानस्य पापं कर्तुं यतमानस्य जनस्य शासितुः तपस्यतां तपश्चरतां पत्युः॥—कष्टायमानस्येति। 'कष्टाय क्रमणे' इति क्यङ्। तपस्यतामिति। 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ्। '[त]पसः परस्मैपदं च'। अधार्मिकराजयेति। 'अधर्माच्चेति वक्तव्यम्' इति ठक्। 'डाबुभाभ्यामन्यतरस्याम्' इत्यन्नन्तात् बहुव्रीहेर्डाप्। पार्वतीपतीति। 'तप् पर्वमरुद्भ्यां' इति मत्वर्थीयस्तप्। तस्यापत्यं पार्वती। 'अनुपसर्जनाद्' इत्यधिकृत्य 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' इति ङीप्॥

स्वान्याहत स्त्रैणमुरांसि यद्द्विषां नित्यं न चोदायत यत्परो जनः।
सोषुप्यमाणं स तमेकजागृविं वावश्यमानो जगतां शमस्तवीत्॥११॥

स तं हरिं अस्तवीत् स्तुतवान्। यद्द्विषां यस्य शत्रूणां स्त्रैणं स्त्रीसमूहः स्वानि उरांसि आहत अताडयत्। यत्परो यद्भक्तो जनो नित्यं न उदायत परदोषान्नासूचयच्च। सोषुप्यमाणं पुनः पुनः स्वपन्तं एकजागृविं प्रधानजागरूकम्। जगतां शं सुखं वावश्य-

मानः भृशमिच्छन् ॥—आहतेति । 'आङो यमहनः', 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' इति तङ् । 'हनः सिच्' इति सिचः कित्त्वात् अनुनासिकलोपः । उदायतेति । 'यमो गन्धने' इति सिचः कित्त्वादनुनासिकलोपः । गन्धनं सूचनम् । सोषुप्यमाणमिति । स्वपेर्यङ् । 'स्वपिस्यमिव्येञां यङि' इति संप्रसारणम् । वावश्यमान इति । 'वश कान्तौ' । कान्तिरिच्छा । यङि 'न वशः' इति संप्रसारणाभावः । जागृविमिति । 'जॄशॄस्तॄजागृभ्यः क्विन्' औणादिकः ॥

पापठ्यमानस्य ऋचश्चतुष्पदाश्चेकीयमानस्य विधेरथात्मनि ।
वैरायमाणेषु विकाषिणा मधोरूष्मायमाणेन वचोऽन्वगृह्यत ॥ १२ ॥

अथ मधोः विकाषिणा हिंसकेन मधुसूदनेन विधेः ब्रह्मणः आत्मनि बुद्धौ वचो अन्वगृह्यत अनुगृहीतम् । चतुष्पदाः पादचतुष्टययुक्ता ऋचः पापठ्यमानस्य पौनःपुन्येन पठतः । चेकीयमानस्य भृशं पूजयतः । वैरायमाणेषु वैरं कुर्वाणेषु । ऊष्मायमाणेन ऊष्माणमुद्वमता ॥—'बाष्पोष्मभ्यामुद्वमने' इति क्यङ् । 'अट्कुप्वाङ्–' इत्यादिना णत्वम् । वैरायमाणेष्विति । 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इति क्यङ् । चतुष्पदा इति । 'संख्यासुपूर्वस्य' इत्यकारलोपः । 'टावृचि' पादान्तादृचि वाच्यायां टाप् । चेकीयमानस्येति । 'चायृ पूजानिशामनयोः' । यङि 'चायः की'[1] इति कीआदेशः । विकाषिणेति । 'कष हिंसायाम्' । 'वौ कष–' इति घिनुण् ॥

स्फीतां दधत्प्रीतिमुपायतावनिं य एव पाथोधिकुमारिकामिव ।
वाचं तदीयामथ सोऽदितात्मभूर्यथासुखायिष्टतरां त्रिविष्टपीम् ॥१३॥

अथ स आत्मभूः ब्रह्मा तदीयां विष्णुसंबन्धिनीं वाचं अदित उक्तवान् य एव पाथोधिकुमारिकामिव लक्ष्मीमिव अवनिं उपायत परिणीतवान् । स्फीतां प्रवृद्धां प्रीतिं दधत् । यया वाचा त्रिविष्टपीं त्रिभुवनं असुखायिष्टतरां अतिशयेन सुखमन्वभूत् ॥—उपायतेति । 'उपाद्यमः स्वकरणे' इति तङ् । 'विभाषोपयमने' इति सिचः कित्त्वम् । अदितेति । 'दाधा घ्वदाप्' इति घुसंज्ञा । 'स्थाघ्वोरिच्च' इति कित्वमित्वं च । असुखायिष्टतरामिति । 'सुखादिभ्यः कर्तृवेदनायाम्' इति क्यङ् । 'अकृत्सार्वधातुकयोः–' इति दीर्घः । कुमारिकामिति । 'वयसि प्रथमे', 'वयस्यचरम इति वक्तव्यम्' इति ङीप् । 'केऽणः' इति ह्रस्वः । त्रिविष्टपीमिति । समाहारे द्विगुः । 'द्विगोः' इति ङीप् । स्फीतामिति । 'स्फायी ओप्यायी वृद्धौ' क्तः । 'स्फायः स्फी निष्ठायाम्' इति स्फीआदेशः । 'क्तक्तवतू निष्ठा' ॥

क्षेत्रस्य भक्तीः सुधियां शतर्षभा द्राक्कोटिकाण्डाश्च हरन्त्यहंयवः ।
ये जागरित्वापथि भूरवेहि तान्प्रस्तीमपापानसुरान्प्रमापितान् ॥ १४ ॥

हे भूः, तान् असुरान् प्रमापितान् हतान् अवेहि । ये अपथि अमार्गे जागरित्वा जागरूका भूत्वा सुधियां क्षेत्रस्य भक्तीः भागान् द्राक् झटिति हरन्ति । शतर्षभाः शतेन

[1] 'कीत' इति पाठः.

ऋषभैः क्रीताः कोटिकाण्डाः काण्डकोटिप्रमाणाः । काण्डः प्रमाणविशेषः मानदण्डः । अहंयवः अहंकारिणः प्रस्तीमं घनीभूतं पापं येषाम् ॥—जागरित्वेति । 'न क्त्वा सेट्' इति कित्त्वाभावाद्गुणः । शतर्षभा इति । 'तेन क्रीतम्' इति ठक् । तस्य 'अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम्' इति लुकि 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' [इति] न ङीप् । अभावे टाप् । कोटिकाण्डा इति । 'प्रमाणे द्वयसज्–' इति विहितस्य 'प्रमाणे लो द्विगोर्नित्यम्' इति लुकि कृते 'काण्डान्तात्क्षेत्रे' इति ङीप्प्रतिषेधः । प्रस्तीमेति । 'स्त्यै ष्ट्यै शब्दसंघातयोः' । क्तः । 'स्त्यः प्रपूर्वस्य' इति संप्रसारणम् । 'प्रस्त्योऽन्यतरस्याम्' इति पक्षे मकारः । अहंयव इति । 'अहंशुभमोर्युस्' मत्वर्थीयः । भूरिति । 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञाभावाद्ध्रस्वाभावः । [प्रमापितानिति ।] 'हन्त्यर्थाश्च' इति चुरादिणिच् । 'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्वे पुक् ॥

आप्यानशीतांशुरुचौ नमस्यतः सुरक्षिताहौ शयितोऽपि पीनदोः ।
हव्यं सुरैरादयिता श्रृतं हुतं जनिष्यते स त्वयि विष्टरश्रवाः ॥ १५॥

स विष्टरश्रवास्त्वयि भूलोके जनिष्यते । अहौ अनन्ते शयितः सुप्तोऽपि नमस्यतो नमस्कुर्वतो जनान् सुरक्षिता । आप्यानशीतांशुरुचौ । आप्यानः प्रवृद्धः । रुचिः शोभा । पीनदो पीवरबाहुः । श्रृतं हुतं हव्यं सुरैरादयिता उपयोजयिता ॥—शयित इति । 'शीङ् स्वप्ने'। क्तः । 'निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः' इति किन्त्वाभावे गुणः । नमस्यत इति । 'नमोवरिवश्चित्रङः क्यच्', 'नमसः पूजायाम्' इति क्यच् । शीतेति । 'श्यैङ् गतौ' । क्तः । 'द्रवमूर्तिस्पर्शयोः श्यः' इति संप्रसारणम् । श्रृतमिति । 'श्रा पाके' । क्तः । 'श्रृतं पाके' इति व्यवस्थितविभाषा । धातोः श्रृआदेशः । क्षीरहविषोर्नित्यम्, अन्यत्र न स्यात् । आप्यानेति । 'स्फायी ओप्यायी वृद्धौ' क्तः । 'प्यायः पी' इति व्यवस्थितविभाषया पी आदेशः । अनुपसर्गस्य नित्यं सोपसर्गस्य न स्यात् । सुरैरिति । 'गतिबुद्धी–' इत्यत्र 'अत्ति खाद्योः प्रतिषेधो वक्तव्यः' इत्यणिकर्तुः कर्मत्वाभावः । विष्टरश्रवा इति । विष्टरो वृक्षोऽश्वत्थस्तद्रूपत्वेन श्रूयते इति । 'अश्वत्थश्चास्मि वृक्षाणाम्' इति भारते । 'वृक्षासनयोर्विष्टरः' इति मूर्धन्यः ॥

माहा द्विदाम्नीर्बलतः पयोभराद्द्व्यूध्नीरिवोत्पुच्छयमानतर्णकाः ।
जातः शुभंयोर्वसुदेवतः प्रभुस्त्राता घटोध्नीर्व्रजसीम्नि वर्त्स्यति ॥ १६ ॥

प्रभुर्वसुदेवतो जातो माहा गास्त्राता व्रजसीम्नि वर्त्स्यति वर्धिष्यते । बलतः बलेन हेतुना द्विदाम्नीः द्वे दामनी यासां पयोभरात् क्षीरातिशयाद्धेतोः द्व्यूध्नीरिव द्वे ऊधसी आपीने यासाम् । उत्पुच्छयमानतर्णकाः पुच्छमुदस्यन्तस्तर्णका यासाम् । घटोध्नीः घट इव ऊधो यासाम् । शुभंयोःशुभान्वितान् ॥—उत्पुच्छयमानेति । 'पुच्छभाण्डचीवराण्णिङ्',

---

१. 'गौः सौरभेयी माहेयी माहा सुरभिरर्जुनी' इति हैमः. २. 'नाम्नीः' इति पाठः.

'पुच्छादुदसने पर्यसने वा' इति णिङ् । द्विदाम्नीरिति । 'दामहायनान्ताच्च' इति संख्यादेर्ङीप् । घटोघ्नीरिति । 'ऊधसोऽनङ्' समासान्तः । 'बहुव्रीहेरूधसो ङीष्' द्व्यूध्नीरिति । 'संख्याव्ययादेर्ङीप्' इति संख्यादित्वाद् ङीप् ॥

विमिश्रयन्विश्वमिदं यशोभरैः पेपीयमानैर्भगवान्भुजंगराट् ।
अमर्षितस्यापदि नो मधुद्विषस्तस्याग्रियत्वेन जनुर्ग्रहीष्यते ॥ १७ ॥

भुजंगराट् अनन्तो भगवान् तस्य मधुद्विषो अग्रियत्वेन अग्रजत्वेन जनुर्जन्म ग्रहीष्यते । पेपीयमानैः क्रियासमभिहारेण वर्धमानैर्यशोभरैरतिशयितैर्यशोभिः इदं विश्वं विमिश्रयन् मिश्रं कुर्वन् नोऽस्माकमापदि अमर्षितस्य अक्षान्तस्य । विमिश्रयन्निति । 'मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्' इति करणे णिच् । पेपीयमानैरिति । 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः । 'लिङ्यङोश्च' इति धातोः पीआदेशः । 'मृषस्तितिक्षायाम्' इति सेटो निष्ठाया[मि]ः । किन्त्वाभावात् गुणः । अग्रियेति । 'घच्छौ च' इत्यग्रशब्दाद्भावे घः ॥

चङ्क्रम्यमाणानसदध्वनौजसा शोशूयमानान्समरे जिघांसतः ।
तान्दन्दशूकान्सहकृत्वरी हरेर्मायाग्र्यधाम्न्येष्यति नन्दतो जनिम् ॥१८॥

माया हरेः सहकृत्वरी सहकारिणी सती नन्दतो नन्दगोपात् जनिं जन्म एष्यति । दन्दशूकान् हिंस्रान् असुरान् समरे जिघांसतः असदध्वना दुर्मार्गेण चङ्क्रम्यमाणान् कौटिल्येन गच्छतः ओजसा शोशूयमानान् भृशं वर्धमानान् अग्र्यधाम्नि अग्र्यं श्रेष्ठं धाम प्रभावो यस्याः ॥—चङ्क्रम्यमाणानिति । 'क्रमु पादविक्षेपे' । 'नित्यं कौटिल्ये गतौ' इति गत्यर्थात् कौटिल्य एव यङ् । 'नुगतोऽनुनासिकान्तस्य' इत्यभ्यासस्य नुक् । दन्दशूकानिति । 'दंश दंशने' । 'लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्' इति धात्वर्थगर्हायामेव यङ् । 'यजजपदशां यङः' इत्यूकः । अग्र्यधाम्नीति । 'अग्राद्यत्' 'तत्र भवः' इत्यर्थे 'अन उपधालोपिनोऽन्यतरस्याम्' इति वा ङीप् । 'अल्लोपोऽनः', 'अलोऽन्त्यात्पूर्व उपधा', 'अदर्शनं लोपः' । शोशूयमानानिति । 'विभाषा श्वेः' इति लिङ्यङोर्वा संप्रसारणम् । 'शेश्वीयमानान्' इति वा पाठः ॥

उद्द्योतितं येन विपत्तमःसु वः प्रागप्यतिप्रद्युतितस्य शार्ङ्गिणः ।
तस्याद्य नः पालयितुं व्रजेत गां साहायकेनैधयितुं मुदं सुराः ॥ १९ ॥

हे सुराः, यूयं साहायकेन सहायेन व्यापारेण तस्य शार्ङ्गिणः मुदं एधयितुं वर्धयितुं गां भुवं व्रजेत गच्छेत । येन शार्ङ्गिणा वः विपत्तमःसु विपत्स्वेव तमःसु प्रागपि उद्द्योतितं प्रज्वलितं अत्यन्ततेजस्विना भूतं अद्य नः पालयितुं अतिप्रद्युतितस्य अतिशयेन प्रद्योतितुमारब्धस्य ॥—उद्द्योतितमिति । 'द्युती दीप्तौ' । भावे क्तः । 'उदुपधाद्भावादिकर्मणोरन्यतरस्याम्' इति सेटो निष्ठायाः पक्षे कित्त्वाभावः । प्रद्युतितस्येत्यादिकर्मणि कित्त्वपक्षः । पालयितुमिति । 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' इति

चुरादिभ्यः स्वार्थे णिच्। एधयितुमिति। 'हेतुमति च' इति स्वतन्त्रस्य कर्तुः प्रेरकः, तद्व्यापारे प्रेषणादौ वाच्ये णिच्। साहायकेनेति। 'सहायाद्वा' इति वुञ्॥

महीयमानस्य महीं व्रजेज्जगद्गोपायितुं कामयितुर्मनुष्यताम्।
ऋतीयमानस्य धृतिं सपर्यया देवस्य शिश्वाययिषद्द्युयौवनम्॥ २०॥

द्युयौवनं स्वर्गयुवतिसमूहः देवस्य सपर्यया पूजया धृतिं मुदं शिश्वाययिषत् वर्धयितुमिच्छत् महीं व्रजेत गच्छतु। जगत् गोपायितुं रक्षितुं मनुष्यतां कामयितुरेषणशीलस्य॥—महीयमानस्येति। 'महीङ् पूजायाम्'। 'कण्ड्वादिभ्यो यक्'। गोपायितुमिति। 'गुपूधूपविच्छिपणिपनिभ्य आयः'। ऋतीयमानस्येति। ऋति सौत्रो धातुः। घृणायां वर्तते। 'ऋतेरीयङ्'। कामयितुरिति। 'कमेर्णिङ्'। शिश्वाययिषदिति। श्वेर्णिजन्तात् सनि शतृ 'णौ च संश्चङोः' इति संप्रसारणे विकल्पः। यौवनेति। युवतिशब्दात् भिक्षादयणि विषये पुंवद्भावात्तिप्रत्ययनिवृत्तिः। 'अन्' इति प्रकृतिभावात् 'नस्तद्धिते' इति टिलोपाभावः॥

पादाब्जधूल्या पवितां विधाय गां यशो गुफित्वा विभवेऽपि भूयसि।
अजोऽतृषित्वासुरभारजा रुजो भुवो लुचित्वाशु पदं स्वमेष्यति॥२१॥

अजो विष्णुरेवं कृत्वा आशु स्वं पदमेष्यति प्राप्स्यति। किं कृत्वा। पादाब्जधूल्या श्रीपादारविन्दपरागेण गां भूमिं पवितां विधाय यशो गुफित्वा ग्रथितं कृत्वा भूयसि बहुतरेऽपि विभवे अतृषित्वा स्पृहामकृत्वा भुवः असुरभारजाः [रुजः] पीडाः लुचित्वा अपनीय॥—पवितामिति। क्तः। 'पूङश्च' इति वेट्। 'पूङः क्त्वा च' इति कित्त्वाभावः। गुफित्वा इति। 'गुफ गुम्फ ग्रन्थे'। 'नोपधात्थफान्ताद्वा' इति पाक्षिकः कित्त्वाभावः। लुचित्वेति। 'लुन्चु अपनयने'। क्त्वा। 'वञ्चिलुञ्च्यृतश्च' इति वा कित्त्वप्रतिषेधः। अतृषित्वा इति। 'ञितृष पिपासायाम्'। 'तृषिमृषिकृषेः काश्यपस्य' इति सेटः क्त्वाप्रत्ययस्य वा कित्त्वम्। एष्यति। 'स्यतासी लृलुटोः' इति लृटि स्यः॥

कृत्वेति दिद्योतिषु निर्मनोरुजं हृदिस्पृशा सार्वगिराविचाचलिः।
गोप्ता सतां तत्स सदस्ततोऽश्वयीदतिद्यु वेधा निजधाम चित्रगुः॥२२॥

स वेधाः तत् सदः तां सभामिति सार्वगिरा सर्वस्मै हितया गिरा निर्मनोरुजं मनोरुजाया मनःपीडायाः निर्गतं कृत्वा ततः तस्मात् स्थानात् निजधाम अश्वयीत् गतवान्। सतां स्वधर्मनिरतानां गोप्ता। अविचाचलिः स्थिरबुद्धिः। चित्रगुः चित्राः गावो यस्य। दिद्योतिषु द्योतितुमिच्छु। हृदिस्पृशा मनोहरया हृदि स्पृशतीति। अतिद्यु द्यामतिक्रान्तम्॥—दिद्योतिष्विति। 'रलो व्युपधाद्धलादेः संश्च' इति सेटः सनः पाक्षिके कित्त्वाभावे गुणः। सार्वगिरेति। [सर्वस्मै हिता। 'सर्वपुरुषाभ्यां णढञौ' इति णप्रत्यय आदिवृद्धिः।] 'गॄ शब्दे'। संपदादित्वात् क्विप्। 'अपृक्त एकाल्प्रत्ययः' इत्यपृक्तसंज्ञा। 'वेरपृक्तस्य' इति वेर्लोपः। 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति कर्मधारयसंज्ञा। 'पुंवत्कर्मधारय—'

इति पूर्वपदस्य पुंवद्भावः । निजधामेति । विशेषणसमासः । 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युपसर्जनसंज्ञा । 'उपसर्जनं पूर्वम्' इति निजशब्दस्य पूर्वनिपातः । निर्मनोरुजमिति । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासः । 'एकविभक्ति चापूर्वनिपाते' इति मनोरुजाशब्दस्योपसर्जनसंज्ञा । 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः । 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां सुप् । वेधा इति । 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रातिपदिकसंज्ञा । चित्रगुरिति । 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः । अतिद्यु । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वम् । 'एच [इग्घ्रस्वादेशे'] इति ह्रस्वादेशे 'स्थानेऽन्तरतमः' 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' । गोप्ता इति । 'आयादय आर्धधातुके वा' इति तृचि पाक्षिक आयः । हृदिस्पृशेति । 'हृद्युभ्यां ङेरुपसंख्यानम्' इत्यलुक् । अविचाचलिरिति । चलेर्यङ् । 'सहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ' ॥

ऐन्द्रीं पुरीमाजुहुवे चकासती या शूरसेनेषु विभाति नीवृति ।
गुण्येषु पुण्या मधुरेति पूरभूत्तत्रोग्रसेनः किल पार्थिवाग्रणीः ॥ २३ ॥

मधुरा इति प्रसिद्धा या पूरैन्द्रीं पुरीमाजुहुवे स्पर्धया आहूतवती । तत्र उग्रसेनः पार्थिवाग्रणीः राजश्रेष्ठः अभूत् किल । शूरसेनेषु नीवृति जनपदे चकासती शोभमाना विभाति (दीव्यमाने) । गुण्येषु गुणवत्सु पुण्या शुद्धकरी ॥—शूरसेनेष्विति । शूरसेनानां राज्ञां निवास इति विगृह्य 'तस्य निवासः' इत्यण् । तस्य 'जनपदे लुप्' । 'लुपि युक्तवद्व्यक्तिवचने' इति प्रकृत्यर्थवदेव लिङ्गसंख्ये । गुण्येष्विति । यप्प्रकरणे 'अन्येभ्योऽपि दृश्यते' इति यप्प्रत्ययः । यानि विशेषणानि तेषां युक्तवद्भावाभावः(?) । पार्थिवाग्रणीरिति । 'सर्वभूमिपृथिवीभ्यामणञौ' इत्यण् । 'तस्येश्वरः' इत्यर्थे । 'अग्रग्रामाभ्यां नयतेर्णो वक्तव्यः' इति णत्वम् । नीवृतीति संपदादित्वाद्वृतेः क्विप् । 'नहिवृति–' इति नेर्दीर्घः । आजुहुवे इति । 'ह्वेञ् स्पर्धायामाह्वाने' । 'अभ्यस्तस्य च' इति द्विर्वचनात् पूर्वं संप्रसारणम् ॥

ऊवुस्तथान्ये न नृपा वृषापि नो ववौ यथोवाय यशःपटं गुणैः ।
सोऽविद्धचेता विषयेण तेन वा निजेव पत्नी पतिवत्न्यभून्मही ॥२४॥

स उग्रसेनो गुणैरुरागाभिगाभिकैः सांग्रामिकैश्च यशःपटं यश एव पटं यथा उवाय वयति स्म, तथा अन्ये नृपाः न ऊवुः उतवन्तः । वृषा इन्द्रः तथा नो ववौ न उतवान् । विषयेण विषयैः शब्दादिभिरविद्धचेताः अनभिभूतचित्तः । तेन निजा पत्नीव मही पतिवत्नी सभर्तृका अभूत् ॥—विषयेणेति । 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इति जात्यर्थस्य वा बहुवद्भावः । विद्धेति । 'न संप्रसारणे संप्रसारणम्' इति पूर्वं परस्य संप्रसारणे कृते पूर्वस्य प्रसक्तं प्रतिषिध्यते । उवायेति । 'वेञ् तन्तुसंताने' । 'वेञो वयिः' इति 'लिटि वयो यः' इति यकारस्य संप्रसारणं प्रतिषिध्यते । ऊवुरिति । 'वश्चास्यान्यतरस्यां किति' इति यकारस्य वा वकारः । ववाविति । 'वेञः' इति संप्रसारणद्वयं प्रतिषि-

ध्यते । पतिवत्नीति । पतिशब्दान्मतुप् । 'अन्तर्वत्पतिवतोर्नुक्' । नान्तत्वादुगित्वान्ङीप् । पत्नीति । 'पत्युर्नो यज्ञसंयोगे' इति पतिशब्दस्य नकारः, नान्तत्वान्ङीप् ॥

प्रवाय कीर्तिं सिचयं दिशोऽमुना प्रवाय सम्यक्परिवीय वा दिवम् ।
बभूव राजन्सहजोऽस्य देवकः प्रज्याय सन्तं सुजनं निषेविता ॥२५॥

अस्य उग्रसेनस्य सहजो देवको बभूव । कीर्तिं सिचयं वस्त्रं प्रवाय अमुना सिचयेन दिशः प्रवाय आच्छाद्य दिवं च सम्यक् परिवीय परिवीतां कृत्वा राजन् दीव्यमानः प्रज्याय सन्तं जरद्भूय वर्तमानं सुजनं निषेविता वृद्धसेवकः ॥—प्रवायेति । 'ल्यपि च' इति वेञः संप्रसारणाभावः । प्रज्यायेति । 'ज्या वयोहानौ' । 'ज्यश्च' इति ल्यपि संप्रसारणप्रतिषेधः । प्रवायेति । वेञः संप्रसारणे 'व्यश्च' इति ल्यपि संप्रसारणाभावः । परिवीयेति । 'विभाषा परेः' इति वेञो ल्यपि संप्रसारणम् । 'हलः' इति दीर्घत्वेन तुग् बाध्यते ॥

पूतक्रतायीं च मनुं च मानवीं वृषाकपायीं च करिष्यती तिरः ।
उल्लालसामास गुणैरकृत्रिमै रतेः सपत्नीव सुतास्य देवकी ॥ २६ ॥

अस्य देवकस्य देवकी नाम सुता उल्लालसामास भृशं शुशुभे । अकृत्रिमैः स्वाभाविकैर्गुणैरेतास्तिरःकरिष्यती तिरःकर्तुमारब्धा । पूतक्रतायीं पूतक्रतोरिन्द्रस्य स्त्रियं शचीं मनुं मनोः स्त्रियं शतरूपां च, मानवीं मनोः स्त्र्यपत्यं देवहूतिम्, वृषाकपायीं वृषाकपेः स्त्रियं च श्रियं गौरीं वा । रतेः सपत्नीव तया सदृशी ॥—उल्लालसामासेति । लसः (?) । 'कास्प्रत्ययादाममन्त्रे लिटि' इति लिटि आम्प्रत्ययः । 'कास्यनेकाच इति वक्तव्यम्' । 'चुलुम्पादयर्थः' । सपत्नीति । 'नित्यं सपत्न्यादिषु' इति निपात्यते । समानः पतिरस्या इति विग्रहः । पतिशब्दस्य नकारः । समानस्य सत्वं ङीप् । पूतक्रतायीमिति । 'पूतक्रतोरै च' इति ङीप् । ऐकारादेशश्च । वृषाकपायीमिति । 'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' इति ङीवैकारादेशौ । 'हरविष्णू वृषाकपी' । मनुमिति । 'मनोरौ वा' इति ङीप्सहितयोरौकारैकारयोरभावे पाक्षिके रूपम् । मानवीमिति । मनोरपत्यमित्यण् । देवकीमिति । देवकस्यापत्यं देवकी । 'अत इञ्', 'संज्ञापूर्वको विधिरनित्यः' इति वृद्ध्यभावः । 'इतो मनुष्यजातेः' इति ङीप् । देवकी ॥

गार्गीव विज्ञानचणा यशश्चयैः श्येनीः कटाक्षोष्ठमृदुस्मितैर्दिशः ।
गौरीगरिष्ठा शबलीर्वितन्वती सैधांबभूवाद्भुतकामनीयका ॥ २७ ॥

सा देवकी एधांबभूव ववृधे । गार्गी गर्गस्य गोत्रस्त्र्यपत्यमिव विज्ञानचणा ज्योतिषादिज्ञानेन प्रसिद्धा । यशश्चयैः दिशः श्येनीः श्वेतवर्णा वितन्वती । कटाक्षोष्ठमृदुस्मितैः दिशः शबलीः चित्रवर्णा वितन्वती । गौरीगरिष्ठा गौरीव गुरुतरा । अद्भुतकामनीयका । कामनीयकं कमनीयत्वम् ॥—एधांबभूवेति । 'इजादेश्च गुरुमतोऽनृच्छः' इति आम् । आमो मित्वमदन्तत्वात् 'आमः' इति लुक् । कृत्संज्ञायां प्रातिपदिकत्वे सु, तस्य 'अव्य-

यादाप्सुपः' इति सुपो लुक् । 'स्वरादिनिपातमव्ययम्' इत्यव्ययसंज्ञा । अमूआमिति स्व रादिषु पठ्यते । गार्गीति । 'गर्गादिभ्यो यञ्', 'यञश्च' इति ङीप् । श्येनीरिति । श्येतो गुणोऽस्यास्तीति श्येतः । 'गुणवचनेभ्यो मतुपो लुग्वक्तव्यः' । 'वर्णादनुदात्तात्तोपधात्तो नः' इति वा ङीप् । तकारस्य नकारः । (शबलीरिति) अन्यतो ङीष् । गौरीति । 'षिद्गौरादिभ्यश्च' इति ङीष् । कामनीयका इति । 'योपधाद्गुरूपोत्तमाद्वुञ्' । भावकर्मणोः ॥

स्वःस्त्रैणसौस्त्राभिमतिं सतीतरा विव्याय तत्रे कुलधर्मसंपदम् ।
सा जागरामास निषेवणे हरेरासांबभूवात्मसु पुण्यशालिनाम् ॥ २८ ॥

सा स्वःस्त्रैणसौस्त्राभिमतिं स्वर्गस्त्रीसमूहस्य सुस्त्रीत्वाभिमानं विव्याय संवृतं चकार । सतीतरा अतिशयेन साध्वी कुलधर्मसंपदं स्वकुलधर्मसमृद्धिं तत्रे ररक्ष । हरेर्निषेवणे जागरामास तत्परा बभूव । पुण्यशालिनां आत्मसु आसांबभूव उपविवेश ॥—जागरामासेति । 'उषविदजागृभ्योऽन्यतरस्याम्' इत्याम् । तत्र इति । 'आदेच उपदेशेऽशिति' इत्यात्वम् । लिटः कित्त्वे आतो लोपः । 'द्विर्वचनेऽचि' इति स्थानिवद्भावाद् द्विर्वचने पुनरप्याल्लोपः । विव्यायेति । 'न व्यो लिटि' इत्यात्त्वाभावः । 'लिट्यभ्यासस्यो [भयेषाम्]' इति संप्रसारणम् । णलि 'अचो ञ्णिति' इति वृद्धिः । [सौस्त्रमिति ।] सुस्त्रीशब्दाद्युवादित्वादण् भावे ॥

विदांकुरु श्रीमति पुत्रि नो गिरः स्फारादरेति प्रतिपित्सुरागमान् ।
गुरोः सदाध्यापयतोऽनुशासनं नम्रेण मूर्ध्ना बिभरांचकार सा ॥ २९ ॥

सा गुरोः इति अनुशासनं नम्रेण मूर्ध्ना सदा बिभरांचकार धृतवती । हे पुत्रि, नः गिरः विदांकुरु जानीहि । इति स्फारादरा स्फारः प्रचुरः । प्रतिपित्सुः ज्ञातुमिच्छुः । आगमानध्यापयतः नः ॥—न इति । 'अस्मदो द्वयोश्च' इति वा बहुत्वम् । बिभरांचकारेति । 'डुभृञ् धारणपोषणयोः' । 'भीह्रीभृहुवां श्लुवच्च' इति वा आम् । श्लुवद्भावाद्द्विर्वचनम् । 'कृञ्चानुप्रयुज्यते लिटि' इति लिडन्ताः कृभ्वस्तय आम्प्रत्ययस्य पश्चात्प्रयुज्यन्ते । विदांकुर्विति । 'विद ज्ञाने' । 'विदांकुर्वन्त्वित्यन्यतरस्याम्' इति निपातनम् । लोट्याम्प्रत्ययः । गुणाभावः । लोटो लुक् । 'कृञो लोट्परस्यानुप्रयोगश्च न केवलं प्रथमपुरुषबहुवचनान्तः । 'सर्वाण्येव लोड्वचनान्यत्र प्रयुज्यन्ते' इति वृत्तौ । स्फारेति । 'स्फुरतिस्फुलत्योर्घञि' इति एच आकारः । अध्यापयत इति । 'क्रीङ्जीनां णौ' इति एचः स्थाने आकारः ॥

गुणैर्यदीयैरतृपन्दिवौकसो व्यध्रुक्षदुच्चैर्न च पुण्यकर्म यः ।
अमूमुपायंस्त यदोः स जन्मना विभूषयन्नानकदुन्दुभिः कुलम् ॥ ३० ॥

स आनकदुन्दुभिरमूं देवकीमुपायंस्त परिणीतवान् । यदीयैर्गुणैर्दिवौकसोऽप्यतृपन् जहृषुः । यश्च उच्चैर्महदन्तःकरणशुद्धिद्वारकमुक्तिप्रदं पुण्यकर्म न व्यध्रुक्षत् अर्थकामफलन-

---

१. 'कृन्मेजन्तः' इत्यव्ययसंज्ञा इति तत्त्वम्.

तया लघूकृतवान् । 'ये स्वधर्मं दह्यन्ति धीराः कामार्थहेतवे' इति भागवते । जन्मना यदोः कुलं विभूषयन् यदुकुलालंकारभूतः ॥—दिवौकस इति । देवानां बहूनां प्रत्यर्थशब्दनिवेशे 'सरूपाणामेकशेष एकविभक्तौ' इति एक एव शिष्यते अन्येषां निवृत्तिः । उपायंस्तेति । 'च्लि लुङि' 'च्लेः सिच्' । सिचः कित्वाभावपक्षे अनुनासिकालोपाभावः । अतृपन्निति । 'स्पृशमृशकृशतृपदृपां च्लेः सिज्वा वक्तव्यः' इति सिजभावपक्षे च्लेरङ् । अधुक्षदिति । 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशः । 'दादेर्धातोर्घः' इति हस्य घः । 'एकाचो बशो भष्–' इत्यादिना घस्य चर्त्वम् ॥

गर्गेण निर्व्यूढविवाहसंस्कृती तौ चक्रवाकाविव वत्सलौ मिथः ।
वात्स्यादि गार्ग्याविव दंपती गतौ वाडव्यमाश्लिक्षदुदश्रु हर्षुलम् ॥३१॥

तौ दंपती वात्स्यादि वाडव्यं ब्राह्मणसमूहः यथोचितमाश्लिक्षत् आलिलिङ्ग । वात्सी च वात्स्यायनश्च वात्स्यौ । गार्ग्याविव । गार्गी च गार्गायणश्च गार्ग्यौ । गर्गेण कुलगुरुणा निर्व्यूढविवाहसंस्कृती कृतविवाहसंस्कारौ । चक्रवाकाविव । जन्मान्तरवासनया वत्सलौ स्निग्धौ । चक्रवाकश्च चक्रवाकी च चक्रवाकौ । उदश्रु स्नेहात् उद्गतबाष्पं हर्षुलं हर्षयुक्तम् ॥—गार्ग्याविति । 'वृद्धो यूना तल्लक्षणश्चेदेव विशेषः' इति वृद्धः शिष्यते । 'अपत्यं पौत्रप्रभृति गोत्रम्' । अपत्यमन्तर्हितं वृद्धम् । वात्स्येति । 'स्त्री पुंवच्च' इति यूना सहवचने वृद्धा स्त्री शिष्यते । तस्याः पुमर्थवद्भावश्च । चक्रवाकाविति । 'पुमान् स्त्रिया' इति पुमान् शिष्यते । हर्षुलमिति । 'हर्षेरुलच्' औणादिकः । आश्लिक्षदिति । 'श्लिष आलिङ्गने' इति क्सः ॥

अतूतुषत्तां कबरीधृतस्रजं कंसः कनिष्ठामुपलाल्य देवकीम् ।
अदर्शतां सादरमानुकूलिकौ पुत्रौ दधानौ पितरौ कृतार्थताम् ॥३२॥

कंसः कनिष्ठां तां [देवकीं] उपलाल्य अतूतुषत् तोषयति स्म । कबरीधृतस्रजं [कबरी] केशरचना । पितरौ माता पिता च । आनुकूलिकौ अनुकूलं वर्तमानौ । पुत्रं दुहितरं च पुत्रौ सादरमदर्शताम् अपश्यतां कृतार्थतां दधानौ ॥—पुत्राविति । 'भ्रातृपुत्रौ स्वसृदुहितृभ्याम्' इति पुत्रः शिष्यते । दुहिता निवर्तते । पितराविति । 'पिता मात्रा' इति पितावशिष्यते । अदर्शतामिति । 'न दृशः' इति क्साभावे 'इरितो वा' इत्यङ् । 'ऋदृशोऽङि गुणः' । 'उरण् रपरः' । अतूतुषदिति । 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङ् । 'णौ चङ्युपधाया ह्रस्वः' । 'चङि' इति द्विर्वचनम् । कबरीति । 'जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु' इति ङीष् ॥

बाष्पायमाणौ श्वशुरौ प्रणम्य तौ शौरिर्वियोगात्युपदातृचेतसौ ।
वस्त्यात्तदीयादथ साधितार्थया जन्यान्वितो बन्धुतया निरैयत ॥३३॥

अथ शौरिः जन्यया भार्यया सह तौ श्वशुरौ श्वशुरं श्वश्रूं च प्रणम्य तदीयात् वस्त्यात् गृहात् निरैयत निर्गतवान् । बाष्पायमाणौ बाष्पमुद्वमन्तौ वियोगार्त्युपदातृचेतसौ । उपदातृ क्षयं गन्तृ । साधितार्थया बन्धुतया बन्धुसमूहेन अन्वितः । अर्थो विवाहः ॥— श्वशुराविति । 'श्वशुरः श्वश्र्वा' इति श्वशुरः शिष्यते । 'श्वशुरस्योकाराकारयोर्लोपश्च वक्तव्यम्' इति ऊङि श्वश्रूः । साधितेति । 'सिध्यतेरपारलौकिके' इत्यात्वम् । उपदातृ इति । 'दीङ् क्षये । 'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्वम् । बन्धुतयेति । 'ग्राम-जनबन्धुसहायेभ्यस्तल्' ॥

शोणीर्बहूर्गा धवलाश्च बर्करान्पट्टूश्च दासीर्गुणशालि हास्तिकम् ।
पुत्र्यै पिता यौतकमुन्मनीभवन्नदिक्षदश्वान्रथकट्यया सह ॥ ३४ ॥

पिता पुत्र्यै यौतकं स्त्रीधनं अदिक्षत् दत्तवान् । किं तत् । शोणीः धवलाश्च बहूः गाः वृषभांश्च । बर्करान् तरुणान् पशून् तरूणीश्च । पट्टूः दासीश्च । गुणशालि हास्तिकं हस्तिनां हस्तिनीनां च समूहम् । अश्वान् अश्वाश्च । रथकट्यया रथसमूहेन सह । उन्म-नीभवन् उत्कीभवन् ॥—[गा इति ।] 'ग्राम्यपशुसंघेष्वतरुणेषु स्त्री' इति स्त्री शिष्यते । तत्तुबर्करानिति(?) । अश्वानिति । 'अनेकशफेष्विति वक्तव्यम्' इति पुमान् शिष्यते । शोणीरिति । 'शोणात्प्राचाम्' इति वा ङीष् । पट्टूरिति । 'वोतो गुणवचनात्' इति वा ङीष् । हास्तिकमिति । 'अचित्तहस्तिधेनोष्ठक्' समूहे हस्तिनी । प्रातिपदिकात्तु 'भस्याढे तद्धिते पुंवद्भावो वक्तव्यः' । रथकट्ययेति । इनित्रकट्यचश्च' इति रथात् क-ट्यच् । पुत्र्यै इति । गौरादिः । केचिच्छार्ङ्गरवादिपाठात् ङीनिति । अन्यस्त्वाह—पुत्रा-द्वेति पुत्रा पुत्रीति ॥

व्यतिप्रभानो विविधस्तदोच्चकैस्तत्रैधते माङ्गलिकः स निस्वनः ।
रथेन कंसप्रगृहीतरश्मिना जायापतीभ्यामथ निर्ययै शनैः ॥ ३५ ॥

तदा तत्र माङ्गलिकः मङ्गलार्थो विविधो निस्वनः उच्चकैः एधते स्म । व्यतिप्रभानः अन्योन्यविनिमयेन प्रकर्षेण शोभमानः अथ जायापतीभ्यां रथेन शनैः निर्ययै निष्का-न्तम् । कंसप्रगृहीतरश्मिना कंसः सारथ्यमकरोत् ॥—एधते इति । 'एध वृद्धौ' । 'भूवा-दयो धातवः' इति धातुसंज्ञा । 'उपदेशेऽजनुनासिक इत्' इति अकारस्येत्संज्ञायाम् 'तस्य लोपः' इति लोपः । 'अनुदात्तङित आत्मनेपदम्' । निर्ययै इति । 'भावकर्मणोः' इत्यात्मनेपदम् । व्यतिप्रभानः । 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम् ॥

शस्त्रापगोरं चलतां पदोद्धतं रजो भटानामदधत्प्रभां रवेः ।
क्ष्वेला च वादित्रनिनादमांसला घनाघनानां निनदं निरास्थत ॥ ३६ ॥

भटानां पदोद्धतं रजः रवेः प्रभां अदधत् अपिबत् । शस्त्रापगोरं शस्त्राण्युद्यम्य च-लतां गच्छतां क्ष्वेला सिंहनादः च घनाघनानां वर्षाकालमेघानां निनदं निरास्थत निर-

स्यति स्म । वादित्रनिनादमांसला ॥—अदधदिति । 'धेट् पाने' । 'विभाषा धेट्श्व्योः' इति चङ् । 'चुटू' इति चकारस्येत्संज्ञा । निरास्थतेति । 'असु क्षेपणे' । 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति तङ् । 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङ् । 'अस्यतेस्थुक्' । शत्रापगोरमिति । 'द्वितीयायां च' इति णमुल् । 'अपगुरो णमुलि' इति वा आत्वम् । 'शत्रापगोरम्' इति वा पाठः । रज इति । 'रजकरजनरजस्सूपसंख्यानम्' इति रञ्जेर्नलोपः ॥

पद्वाः सलीलं व्यतिजग्मुरुत्सुकाः परस्परं व्यत्यभवंश्च वेगिनः ।
अन्योन्यमुच्चैर्व्यतिदध्वनुः पथि न्यविक्षतान्तः परमोत्सवो नृणाम् ॥३७॥

पद्वाः पद्भ्यां गच्छन्तः पदातयः पथि सलीलं व्यतिजग्मुः क्रियाविनिमयेन गतवन्तः। परस्परं व्यतिभवंश्च क्रियाविनिमयेनाभवंश्च । अन्योन्यमुच्चैर्व्यतिदध्वनुः शब्दं चक्रुश्च। उत्सुकाः वेगिनः । परमोत्सवः नृणां अन्तः अन्तःकरणं न्यविक्षत ॥—व्यतिजग्मुरिति। 'न गतिहिंसार्थेभ्यः' इति तङभावः । 'इतरेतरान्योन्योपपदाच्च' इति तङभावः। व्यत्यभवन्निति । 'परस्परोपपदाच्चेति वक्तव्यम्' इति तङभावः । न्यविक्षतेति । 'नेर्विशः' इति तङ् । पद्वा इति । इति हलन्त्यपक्षः (सूत्रप्राप्तायाः) । 'न विभक्तौ तुस्माः' इति जसः सकारस्येत्संज्ञाया अभावः ॥

विस्मापयित्री जनमुग्रसेनजं द्राग्भापयित्री भृशमस्य पञ्चताम् ।
निश्चापयन्ती निकटे तदा वियत्युच्चैरुदस्थादशरीरिणीति गीः ॥ ३८ ॥

तदा वियति वक्ष्यमाणप्रकारा उच्चैः अशरीरिणी गीः निकटे उदस्थात् जनं विस्मापयित्री उग्रसेनजं कंसं भृशं भापयित्री भीतिं कर्त्रीं अस्य पञ्चतां निश्चापयन्ती निश्चितां कुर्वती ॥—'चिञ् चयने' । 'चिस्फुरोर्णौ' इति वा आत्वम् । भापयित्रीति । 'ञिभी भये'। 'आदिर्ञिटुडवः' इति ञेरित्संज्ञा । 'बिभेतेर्हेतुभये' इति वा आत्वम् । विस्मापयित्रीति। 'नित्यं स्मयतेः' इत्यात्वम् ॥

द्राप्सीः स्म मा शीर्ष्णि हि कंस तेऽर्पितः स्रष्ट्रान्तकस्त्वाममतिर्विजेष्ट मा।
अस्या भवानीसदृशोऽष्टमः सुतो विक्रेष्यते ते स्वबलेन जीवितम् ॥३९॥

हे कंस, त्वं मा द्राप्सीः मा हृषः । स्रष्ट्रा ईश्वरेण अन्तकः ते शीर्ष्णि मूर्धनि अर्पितः हि एव अमतिः अज्ञानं त्वां [मा] विजेष्ट परिभूत् । अस्याः अष्टमः सुतः ते जीवितं स्वबलेन विक्रेष्यते विक्रीतं करिष्यति । भवानीसदृशः पार्वतीतुल्यायाः ॥—विक्रेष्यते इति । 'परिव्यवेभ्यः क्रियः' इति तङ् । भवानीति । 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' इति ङीषानुकौ । स्रष्ट्रेति । 'सृजिदृशोर्झल्यमकिति' इत्यमागमः । 'मिदचोऽन्त्यात्परः' । द्राप्सीरिति । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति वा अमागमः । 'रधादिभ्यश्च' इति इड्विकल्पः । [शीर्ष्णीति] । 'शीर्षश्छन्दसि' ॥

संश्रृण्वतस्तामवृधद्गिरं हृदि क्रुदारदक्षिद्वयमाशु रक्तिमा ।
घर्माम्बु कंसस्य तदासिचत्तरां स्रुतोऽङ्गरागोऽलिपताखिलं वपुः ॥४०॥

तदा तां गिरं संश्रृण्वतः कंसस्य हृदि क्रुत् क्रोधः अवृधत् ववृधे । अक्षिद्वयं रक्तिमा रक्तत्वं आशु आरत् प्राप्तः । घर्माम्बु अखिलं वपुः असिचत्तरां अतिशयेन सिक्तमकरोत् । स्रुतः अङ्गरागः अलिपत लिप्तमकरोत् ॥—असिचत्तरामिति । 'लिपिसिचिह्वश्च' इत्यङ् । अलिपतेति । 'आत्मनेपदेष्वन्यतरस्याम्' इत्यङ् । अवृधदिति । 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यङ् । आरदिति । 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङ् ॥

रजोविलिप्तीं तनुमुद्वहन्बलक्रीतीं विधास्यन्निजजीवितस्थितिम् ।
स शङ्खभिन्नीर्नृपतिर्द्विषां तनूः कर्तारमुग्रं करवालमाददे ॥ ४१ ॥

स नृपतिः उग्रं करवालं आददे । रजोविलिप्तीं अल्पेन रजसा विलिप्तां तनुं उद्वहन् । निजजीवितस्थितिं बलक्रीतीं बलेन क्रीतां विधास्यन् । द्विषां तनूः शङ्खभिन्नीः कर्तारम् ॥ आददे इति 'डु दाञ् दाने' । 'आङो दोऽनास्यविहरणे' इति तङ् । बलक्रीतीमिति । 'क्रीतात्करणपूर्वात्' इति ङीष् । रजोविलिप्तीमिति । 'क्तादल्पाख्यायाम्' इति ङीष् । शङ्खभिन्नीरिति । 'बहुव्रीहेश्चान्तोदात्तात्' इति ङीष् ॥

मनोज्ञगात्री मधुरारुणाधरा शातोदरी चन्द्रमुखी पृथुस्तना ।
नृपेण दोष्णा सहजा जिघांसुना शीर्षण्यबालेषु हठादगृह्यत ॥ ४२ ॥

शातं कृशम् । चन्द्रमुखीति । 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति वा ङीष् । मनोज्ञगात्रीति । 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' इति वा ङीष् । शातोदरीति । 'नासिकोदरौष्ठजङ्घादन्तकर्णश्रृङ्गाच्च' इति वा ङीष् । मधुरारुणाधरेति । 'न क्रोडादिबह्वचः' इति ङीष् । प्रतिषेधे टाप् । शीर्षण्येति । 'शरीरावयवाद्यत्' इति शिरश्शब्दाद्यत् । 'ये च तद्धिते' 'वा केशेषु [शिरसः शीर्षन्नादेशो वक्तव्यः'] इति शीर्षन्नादेशः । 'ये चाभावकर्मणोः' इति प्रकृतिभावः । दोष्णेति । 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' इति दोषन्नादेशः ॥

अनासिका शूर्पणखा कृता न किं रामेण नो वा किमहानि ताटका ।
खले ब्रुवत्येवमवाङ्मुखी सती तस्मिन्नशेषा जनताथ सारुदत् ॥ ४३ ॥

तस्मिन् एवं ब्रुवति अशेषा सा जनता अवाङ्मुखी सती अरुदत् । रामेण शूर्पणखा अनासिका किं न कृता । ताटका नो वा किमहानि इति खले ॥—अरुददिति । 'रुदिर् अश्रुविमोचने' । 'इरितो वा' इत्यङ् । अनासिकेति । 'सहनञ्विद्यमानपूर्वाच्च' इति ङीष्प्रतिषेधः । शूर्पणखेति । 'नखमुखात्संज्ञायाम्' इति ङीष्प्रतिषेधः । अवाङ्मुखीति । 'दिक्पूर्वपदान्ङीप्' इति ङीप् ॥

---

१. 'अधानि' इति युक्तम्.

उपस्थिते पाणिगृहीत्युपप्लवे भयं समाश्वद्धृदि पत्युरुच्चकैः।
महान्विमर्शोऽप्युदपादि रोषणं ततः स विद्वानिति कंसमाख्यत॥४४॥

पाणिगृहीत्युपप्लवे पत्नीविनाशे उपस्थिते पत्युः हृदि भयं उच्चकैः समाश्वत् ववृधे। महान् विमर्शो उदपादि उपपन्नो विततः कंसमिति आख्यत रोषणं विद्वान्॥—समाश्वदिति। 'जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यः' इति वा अङ्। उदपादि 'चिण् ते पदः' इति च्लेश्चिणादेशः। पाणिगृहीतीति पाणिर्गृहीतोऽस्या इति 'पाणिगृहीत्यादीनामर्थविशेषे ङीष्वक्तव्यः'॥

उत्तिष्ठसे कर्मणि किं जुगुप्सिते संदिह्य धर्मे त्वयि तिष्ठते जनः।
संक्रीडतां कीर्तिरदूषितैव ते का वा त्वरैषा ह्यवतिष्ठते वशे॥४५॥

त्वं जुगुप्सिते निन्दिते कर्मणि किं उत्तिष्ठसे ईहसे। जनः धर्मे संदिह्य त्वयि तिष्ठते निर्णयहेतुत्वेनाश्रयति। ते कीर्तिः अदूषितैव संक्रीडताम्। का वा त्वरा एषा। वशे अधीने अवतिष्ठते हि॥—संक्रीडतामिति। 'क्रीडोऽनुसंपरिभ्यश्च' इति तङ्। अवतिष्ठते इति। 'समवप्रविभ्यः स्थः' इति तङ्। तिष्ठते इति। 'प्रकाशनस्थेयाख्ययोश्च' इति तङ्। उत्तिष्ठस इति। 'उदोऽनूर्ध्वकर्मणि' 'उद ईहायामिति वक्तव्यम्' इति तङ्॥

अदीपि कोपः कुत एष नह्यसौ न स्यादशिश्वीत्यधुनास्ति निर्णयः।
प्रसोष्यते चेदपि ते जगज्जितः कलो भवेच्चिन्तयितुं महीपते॥४६॥

हे महीपते, ते कुतः कस्माद्धेतोः एष कोपः अदीपि दीप्तोऽभूत्। असौ अशिश्वी शिशुना विनाभूता न स्यादिति अधुनापि न हि निर्णयोऽस्ति। प्रसोष्यते चेदपि ते चिन्तयितुं कलो भवेत्। जगज्जितः॥—अदीपीति। 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति च्लेस्ते चिण्। [अशिश्वीति।] 'सख्यशिश्वीति भाषायाम्' इति निपातनम्। 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपः। प्रसोष्यत इति। 'षूङ् प्राणिप्रसवे'। 'धात्वादेः षः सः'। निर्णय इति। 'णीञ् प्रापणे'। 'णो नः' 'उपसर्गादसमासेऽपि' इति णत्वम्। भवेदिति। 'अतो येयः'। 'लोपो व्योर्वलि' इति यलोपः। जगज्जित इति क्विप्। 'वेरपृक्तस्य' इति वेर्लोपः। महीपते इति। 'एङ्ह्रस्वात्संबुद्धेः' इति हल्लोपः॥

अस्या वधात्पुण्यमहीरुहो रुषा च्छायां भवानच्छिदुरां स्म मा च्छिदत्।
कीर्तिं मनस्तापहृतं विसृत्वरीं ह्रीच्छेन्न को दुर्यशसामलीमसः॥४७॥

भवान् अस्या वधात् कीर्तिं मा स्म च्छिदत् छिन्नां कुरु। पुण्यमहीरुहः छायाम्। अच्छिदुरां च्छेदनशीला छिदुरा। मनस्तापहृतं विसृत्वरीं विसरणशीलां स्वतः। अमलीमसः को दुर्यशसा न ह्रीच्छेत् लज्जेत। दुर्यशसा मलीमस इति वा॥—विसृत्वरीमिति। 'इण्नश्जिसर्तिभ्यः क्वरप्' इति क्वरपि 'ह्रस्वस्य पिति कृति तुक्' इति तुगा-

गमः । 'आद्यन्तौ टकितौ' । अच्छिदुरामिति । 'संहितायाम्' इत्यधिकृत्य 'छे च' इति तुक् । मा च्छिददिति । 'आङ्माङोश्च' इति नित्यं तुक् । ह्रीच्छेदिति । 'ह्रीच्छ लज्जायाम्' । 'दीर्घात्' इति तुक् । रुषा च्छायामिति । 'पदान्ताद्वा' इति तुक् ॥

न्यस्याशु पाणावसिमुज्ज्वलं रथे गव्याद्विजस्त्रीजनरक्षणदक्षिणम् ।
अक्रय्यमक्षय्यमुपेयुषा यशो रक्ष्ये हि भाव्यं प्रभुणा दयालुना ॥ ४८ ॥

पाणौ उज्ज्वलं असिमाशु रथे न्यस्य (लोट्) स्थापय । गव्याद्विजस्त्रीजनरक्षणदक्षिणम् । गव्या गोसमूहः । रक्षणो रक्षणम् । प्रभुणा रक्ष्ये जने विषये दयालुना भाव्यं अवश्यं भवितव्यम् हि अक्षय्यं क्षेतुमशक्यं अक्रय्यं क्रयार्थरहितं यशः उपेयुषा ॥—न्यस्येति । 'इको यणचि' इति इकारस्य यकारः । पाणौ असिमिति । 'एचोऽयवायावः' इति औकारस्यावादेशः । गव्येति । 'खलगोरथात्' इति यप्रत्यये 'वान्तो यि प्रत्यये' इति ओकारस्यावादेशः । भाव्यमिति । 'ओरावश्यके' इति ण्यति वृद्धौ 'धातोस्तन्निमित्तस्यैव' इत्यावादेशः । क्षय्येति । 'क्षय्यजय्यौ शक्यार्थे' इत्ययादेशो निपात्यते । अक्रय्यमिति । क्रय्यस्तदर्थे' इत्ययादेशो निपात्यते । रथ इति । 'एकः पूर्वपरयोः' इत्यधिकृत्य 'आद्गुणः' इति एकादेशः । तस्य 'अन्तादिवच्च' इति सुप् आदिवद्भावः । पदसंज्ञा ॥

नारीवधान्न न्यवृतत्स तद्गिरः कद्रूजहिंस्रः श्रुतवानपीदृशीः ।
तां संहितोरूं युवतिं सरोरुदां शौरीर्व्यमार्क्षीत्कुररीमिवेक्षिता ॥ ४९ ॥

सः कंसः ईदृशीः तद्गिरः श्रुतवानपि नारीवधात् न न्यवृतत् निवृत्तः । शौरीः कुररीमिव सरोरुदां भृशायमानरोदनसहितां युवतिं ईक्षिता व्यमार्क्षीत् विमर्शं कृतवान् । संहितोरूमिति । संहितावूरू यस्याः । कद्रूजहिंस्रः सर्पवद्धिंसाशीलः ॥—कुररीमिति । 'जातेरस्त्रीविषयादयोपधात्' इति ङीष् । संहितोरूमिति । 'संहितशफलक्षणवामादेश्च' इत्यूङ् । कद्रू इति 'संज्ञायाम्' इति कद्रूशब्दादूङ् । नारीति 'शार्ङ्गरवाद्यञो ङीन्' 'नृनरयोर्वृद्धिश्च' इति ङीन् । युवतिमिति । 'तद्धिताः' इत्यापञ्चमाध्यायमधिकृत्य 'यूनस्तिः' इति स्त्रियां तिः ['सर्वतोऽक्तिन्नर्थादित्येके' इति ङीष् ।] रोरुदेति । यङन्तादप्रत्यये यलोपः ॥

यः साधु मन्त्रैरुपतिष्ठते हरिं तद्भावपूतानपि वोपतिष्ठते ।
चित्ते तदीये ह्युपतिष्ठते क्षमा सैतादृशस्योत्तपते कथं पुनः ॥ ५० ॥

यो मन्त्रैः करणैः हरिं साधु उपतिष्ठते पूजयति अपि वा तद्भावपूतान् विष्णुभक्त्या शुद्धात्मनः उपतिष्ठते तैर्मैत्रीं करोति । तदीये चित्ते हि क्षमा उपतिष्ठते संनिधत्ते । सा क्षमा एतादृशस्य दुष्टस्य चित्ते कथं पुनरुत्तपते प्रकाशते॥—हरिमुपतिष्ठत इति । 'उपान्मन्त्रकरणे' । उपतिष्ठते । 'उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वक्तव्यम्' इति तङ् । उदतिष्ठत इति 'अकर्मकाच्च' इति तङ् । उत्तपत इति 'उद्विभ्यां तपः' इति तङ् ॥

प्राज्ञान्कचित्संश्रृणुते न खल्वसौ संपश्यतेऽक्ष्णा बत नान्तरेण वा ।
नो वा सतः संह्वयते तितंसितं संदृप्य किंत्वाह्वयते परं सुरान् ॥५१॥

असौ क्वचिदप्यवस्थायां प्राज्ञान् न खलु संश्रृणुते । अन्तरेण अक्ष्णा मनसा वा न संपश्यते वीक्षते बत । आत्मनः तितंसितं चिकीर्षितं सतः सज्जनान् न वा संह्वयते । किंतु संदृप्य दृप्तो भूत्वा परं केवलं सुरानाह्वयते स्पर्धया आह्वानं कुरुते ॥—संशृणुत इति । 'समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः' इति कर्माविवक्षायामात्मनेपदम् । संपश्यत इति । 'दृशेश्चेति वक्तव्यम्' इति तङ् । 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' संह्वयत इति 'निसमुपविभ्यो ह्वः' इति तङ्। आह्वयते इति । 'स्पर्धायामाङः' इति तङ् ॥

असै ततोऽस्या वितरीतुमात्मजानुग्रामुपेत्याप्यधुनैष संविदम् ।
मृत्योरुपेतात्परिपालये सतीमेतां वराकीमथ सोऽभ्युपैतु वा ॥ ५२ ॥

ततः तस्मात् एषोऽहं अस्याः आत्मजान् अस्मै वितरीतुं दातुमुग्रां संविदं प्रतिज्ञामुपेत्यापि एतां अधुना उपेतात् आसन्नात् मृत्योः परिपालये । स मृत्युः अथ कालान्तरे अभ्युपैतु वा । सतीं वराकीं मन्दाम् ॥—उपेत्येति । 'षत्वतुकोरसिद्धः' इत्येकादेशस्यासिद्धत्वात् तुक् । अधुनैष इति 'वृद्धिरेचि' इति वृद्धिः । अभ्युपैतु इति । 'एत्येधत्यूठ्सु' इति वृद्धिः । वराकीमिति । 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' 'षः प्रत्ययस्य' इतीत्संज्ञा ॥

कृतस्मितेनौजसिकोऽथ शारुकः क्षितीश्वरः साहसिकोऽथ शौरिणा ।
अनाहतामौद्यत गां विपद्यहो न कुण्ठभावं मतिमानुपार्च्छति ॥५३॥

अथ कृतस्मितेन शौरिणा स क्षितीश्वरः गां वाचं औद्यत उक्तः । औजसिकः ओजसा वर्तमानः । साहसिकः सहसा वर्तमानः । शारुको हिंसाशीलः । अनाहतां सत्यार्थाम् । मतिमान् विपद्यपि कुण्ठभावं न उपार्च्छति प्राप्नोति । अहो ॥—औद्यत इति । वदेर्यकि संप्रसारणम् । 'आटश्च' इति वृद्धिः । उपार्च्छतीति 'उपसर्गादृति धातौ' इति वृद्धिः । गामिति । 'औतोऽम्शसोः' इत्याकारादेशः औजसिकः साहसिकः । 'ओजःसहोम्भसा वर्तते' इति ठक् ॥

अकारि यस्य प्रकरः स्वयं द्विषामदुग्ध कामानपि गौरियं समान् ।
जगत्यवारुद्ध च तादृशस्य ते सुहृज्जनोऽयं नृवरानुतप्त मा ॥ ५४ ॥

हे नृवर, यस्य द्विषां प्रकरः समूहः स्वयं अकारि हिंस्यते स्म । इयं गौः भूमिः यस्य समान् कामान् स्वयं अदुग्ध दुग्धे स्म । यस्य जगती अवारुद्ध अवरुध्यते स्म । वशीक्रियते स्म तादृशस्य ते सुहृत् अयं जनः मा अनुतप्त पश्चात्तापं प्राप्नोतु ॥—अकारीति 'अचः कर्मकर्तरि' इति ते च्लेर्वा चिण् । अदुग्धेति । ['दुहश्च'] इति तशब्दे च्लेश्चिण्विकल्पः । अवारुद्धेति । 'न रुधः' इति चिण्प्रतिषेधः । अनुतप्तेति । 'तपोऽनुतापे च' इति चिण्प्रतिषेधः ॥

अपत्यमस्या भवते समस्तमप्यदायि राजन्ननुगृह्यतामियम् ।
भवाव्यथी दीव्य पुरीह दी[1]व्यता जनेन मा क्राम्य यथार्थसाधने ॥५५॥

हे राजन् अस्याः समस्तमप्यपत्यं भवते अदायि दत्तम् । इयमनुगृह्यताम् । त्वं अव्यथी अव्यथनशीलः भव । इह पुरि मधुरायां दीव्यता दिवीवाचरता जनेन सह दीव्य शोभस्व । मा क्राम्य । अर्थसाधने यस यत्नं कुरु ॥—अदायीति । 'चिण् भावकर्मणोः' इति तशब्दे च्लेश्चिण् । अनुगृह्यतामिति । 'सार्वधातुके यक्' इति यक् । भवेति । 'कर्तरि शप्' इति शप् । दीव्येति । 'दिवादिभ्यः श्यन्' । क्राम्यति । 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इति श्यन् । यसेति 'यसु प्रयत्ने' यसोऽनुपसर्गात्' इति श्यन्विकल्पः । दीव्यतेति । 'अधिकरणाच्चेति वक्तव्यम्' इति आचारे क्यच् ॥

संयस्यतः साधुहिते भियं निजामाधुन्वतीमानकदुन्दुभेर्गिरम् ।
शृण्वन्नृपस्तत्क्षणमक्ष्णुवन्मदः सोऽमित्यवक्प्रोज्झितजामिधिप्सकः॥५६॥

आनकदुन्दुभेः गिरं शृण्वन् स नृपः तत्क्षणं अविलम्बेन ओं तथास्तु इत्यवक् उक्तवान् । साधुहिते संयस्यतः यतमानस्य । निजां भियं आधुन्वतीं कम्पयन्तीम् । अक्ष्णुवन्मदः व्याप्नुवन्मदो यस्य । प्रोज्झितजामिधिप्सकः प्रोज्झिता जाम्याः स्वसुः धिप्सा हिंसेच्छा येन ॥—संयस्यत इति 'संयसश्च' इति वा श्यन् । आधुन्वतीमिति । 'धुञ् कम्पने' 'स्वादिभ्यः श्नुः' शृण्वन्निति । 'श्रुवः शृ च' इति श्नुः शृ इत्यादेशश्च । अक्ष्णुवन्मद इति । 'अक्षू व्याप्तौ' । 'अक्षोऽन्यतरस्याम्' इति श्नुः । सोऽमिति । 'सोऽचि लोपे चेत्पादपूरणम्' इति सुलोपः । 'ओमाङोश्च' इति पररूपत्वम् । साधुहित इति । 'हित योगे चतुर्थी वक्तव्या' । 'चतुर्थी तदर्था–' इति समासः । 'जामिः स्वसृकुलस्त्रियोः' ॥

भिन्द्युर्गिरीनप्यधिकुर्वते च ये जगन्ति रुन्धन्त्यपि मण्डलं दिशाम् ।
दर्पं बलारेरपि तक्ष्णुवन्त्यलं प्रकुर्वते यान्सदराः सुरा अपि ॥ ५७ ॥
धिन्वन्ति ये बन्धुजनं तुदन्ति ये शोच्यान्कथं भव्यदृशो भवादृशः ।
स्तुत्वेति कंसं व्यतनोदथो मतिं गन्तुं सुषामानकदुन्दुभिर्गृहान्॥५८॥

द्वयोरन्वयः । अथो आनकदुन्दुभिः कंसं इति स्तुत्वा गृहान् गन्तुं मतिं व्यतनोत् । सुषामा शोभनं सान्त्ववचनं यस्य । कथं स्तुत्वा । ये गिरीनपि भिन्द्युः, ये च जगन्ति अधिकुर्वते अभिभवन्ति, दिशां मण्डलमपि रुन्धन्ति, बलारेरपि दर्पं अलं तक्ष्णुवन्ति तनूकुर्वन्ति यान् सुराः सदराः सभयाः प्रकुर्वते सेवन्ते, बन्धुजनं धिन्वन्ति प्रीणयन्ति, ते भवादृशः त्वादृशः कथं शोच्यान् अस्मादृशान् तुदन्ति व्यथयन्ति । भव्यदृशः कुशलमेव पश्यन्तः ॥—प्रकुर्वत इति । 'गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः' इति सेवने तङ् । अधिकुर्वत इति । 'अधेः प्रसहने' इति अभिभवे तङ् । प्रसह-

---

१. 'दीव्यतीति दीर्घस्तु प्राचः प्रामादिकः' इति नामधातुप्रक्रियायां सिद्धान्तकौमुदी.

नमभिभवः पराजयो वा। तक्ष्णुवन्तीति । 'तनूकरणे तक्षः' इति वा श्नुः । अनेकार्था धातवः। तुदन्तीति । 'तुदादिभ्यः शः' 'अतो गुणे' इति पररूपत्वम् । रुन्धन्तीति । 'रुधादिभ्यः श्नम्' । व्यतनोदिति । 'तनादिकृञ्भ्य उः' । धिन्वन्तीति । [हिवि] [धिवि] [जिवि] प्रीणनार्थाः । 'धिन्विकृण्व्योर च' इति उप्रत्ययः । अकारश्चान्तादेशः । अतो लोपस्य स्थानिवद्भावाद्गुणाभावः । भिन्द्युरिति 'भिद्या उस्' 'उस्यपदान्तात्' इति पररूपत्वम् । [सुषामादिषु च] इति षत्वम् ॥

मित्रैश्चटच्चटदिति त्रुटितोरुहारैः संमर्दतः स निजधाम विवेश रूपम् ।
केलीसमीकरतखाङ्गिकखव्यमानचर्मावली पटपटायितपाटिताशम् ॥५९

स मित्रैः स[ह] निजधाम विवेश । रूपं प्रशस्तं विवेश । संमर्दतः हेतोः चटच्चटदिति त्रुटितोरुहारैः। केलीति समीकं युधं(?) खाङ्गिकाः खङ्गायुधाः.................। क्रियाविशेषणम् ॥—चटच्चटदिति । 'नित्यवीप्सयोः' इति द्विर्वचनम् । 'तस्य परमाम्रेडितम्' । 'नाम्रेडितस्यान्तस्य तु वा' इत्यच्छब्दस्य इतेरिकारस्य च पररूपैकादेशाभावः । तकारेकारयोः पररूपविकल्पः । पटपटायितेति । पट इत्यस्य 'डाचि बहुलं द्वे भवत इति वक्तव्यम्' इति टिलोपात् पूर्वं द्विर्वचनम् । 'नित्यमाम्रेडिते डाचीति वक्तव्यम्' इति पूर्वान्त्यतकारस्योत्तरादिपकारस्य च पररूपमेकादेशः । निजधामेति । 'गाहिरुहिविशां कर्म'(?) इत्यधिकरणस्य कर्मसंज्ञा ॥

स्वस्त्रीजनांश्चात्मरुचा क्षिपन्तीं हस्तौ लसन्माङ्गलिकौ दधानाम् ।
ह्रीणां नवोढां जगतोऽभिनन्द्यां तां पर्यगृह्णन्मुदिताः पुरंध्र्यः ॥ ६० ॥

पतिपुत्रवत्यः स्त्रियो मुदिताः तां नवोढां पर्यगृह्णन् । आत्मरुचा स्वस्त्रीजनानपि क्षिपन्तीम्, लसन्माङ्गलिकौ हस्तौ दधानाम्, लसन्ति माङ्गलिकानि दर्पणादीनि ययोः । ह्रीणां लज्जिताम् । जगतः अभिनन्द्याम् ॥—पर्यगृह्णन्निति । 'क्र्यादिभ्यः श्ना' 'श्नाभ्यस्तयोरातः' इत्यालोपः । च आत्मेति । 'अकः सवर्णे दीर्घः' इति द्वयोरेकादेशो दीर्घः । 'तुल्यास्यप्रयत्नं सवर्णम्' । जनानिति । जन अस् । 'प्रथमयोः पूर्वसवर्णः' इति द्वयोः पूर्वसवर्णदीर्घ एकादेशः । 'तस्माच्छसो नः पुंसि' इति सकारस्य नकारः । हस्ताविति । 'नादिचि' । पूर्वसवर्णदीर्घप्रतिषेधः । पुरंध्र्य इति । पुरं गृहं धरतीति ....
पूर्वरूपैकादेशः । ऊढेति । वहेर्निष्ठायां संप्रसारणम् । 'संप्रसारणाच्च' इति पूर्वरूपम् । जगतोऽभीति । 'एङः पदान्तादति' इति पूर्वरूपत्वम् ॥

आचार्याण्यो मातुलान्यश्च दाक्ष्यो गार्गायण्यो ब्रह्मबध्वो गणक्यः ।
रम्भोर्वश्च क्षत्रियाण्यस्तरुण्यः शूद्र्यः शूद्रा मोमुदामासुरुच्चैः ॥ ६१ ॥

एताः स्त्रियः उच्चैः मोमुदामासुः पुनः पुनर्मुमुदिरे । आचार्याण्यः आचार्याणां स्त्रियः। मातुलान्यः मातुलानां स्त्रियः । दाक्ष्यः दक्षस्य ह्यपत्यानि । गार्गायण्यः गर्गगोत्रसंभूताः । गणक्यः गणकानां स्त्रियः । क्षत्रियाण्यः क्षत्रियकुलजाः । शूद्र्यः शूद्राणां भार्याः ।

शूद्राः शूद्रजात्युत्पन्नाः । रम्भोर्वः रम्भोपमा ऊरवो यासाम् । तरुण्यः यौवनवत्यश्च ॥
—आचार्याण्य इति। 'इन्द्रवरुण–'इत्यादिना ङीषानुकौ। मातुलान्य इति । 'पितृव्यमातुलमातामहपितामहाः' इति मातृशब्दात् भ्रातरि डुलच् निपात्यते । 'उपाध्यायमातुलाभ्यां वा' इति पक्षे ङीषानुकौ । दाक्ष्य इति । अत इञ् 'अपत्यार्थे, 'इतो मनुष्यजातेः' इति ङीष् । गार्ग्यायण्य इति 'गार्गादिभ्यो यञ्' इति गोत्रे यञ् । 'यञश्च' 'प्राचां ष्फ तद्धितः' इति वा ष्फः । षित्वात् ङीष् । ब्रह्मबध्व इति । 'ऊङुतः' इत्यूङ् । गणक्य इति । 'पुंयोगादाख्यायाम्' इति ङीष् । शूद्रा इति । जातिविवक्षायाम् 'शूद्रा चामहत्पूर्वा' इति टाप् ॥

ततो विसृज्याश्वपतादि शौरिर्दैत्यारिपादाब्जविलातृचेताः ।
गर्गं च गार्ग्यं च ननाम दाक्षिं गार्ग्यायणादींश्च मुनींस्त्रिवेदान् ॥६२॥

ततः शौरिः आश्वपतादि जनजातं विसृज्य मुनीन्ननाम । अश्वपतीनां समूहः आश्वपतम् । गर्गं च गार्ग्यं च । गर्गस्य गोत्रापत्यम् । दाक्षिं दक्षस्यापत्यम् । गार्ग्यायणादीन् । गर्गस्य युवापत्यं गार्ग्यायणः । त्रिवेदान् त्रीन् वेदान् अधीतवन्तः । दैत्यारीति । विलातृ विलयनशीलम् ॥—आश्वपतमिति । 'समर्थानां प्रथमाद्वा' इति स्वार्थिकेभ्यः प्राक्तनानां प्रत्ययानां सूत्रेषु प्रथमानिर्दिष्टः शब्दः प्रकृतित्वेनाधिक्रियते । 'प्राग्दीव्यतोऽण्' इत्यपवादविषयं परिहृत्याण् भवतीति परिभाष्यते । संख्याकालाविहाविवक्षितौ । 'तस्य समूहः' इत्यण् । 'अश्वपत्यादिभ्यश्च' इत्यण्। पत्युत्तरपदाण्ण्यस्य बाधकम् । दैत्येति । 'तस्यापत्यम्' इत्यर्थे 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' । त्रिवेदानिति । 'तदधीते तद्वेद' इत्यण् । तस्य 'द्विगोर्लुगनपत्ये' इति लुक् । गार्ग्यमिति । 'तस्यापत्यम्' इत्यधिकृत्य 'गर्गादिभ्यो यञ्' । इति गोत्रापत्ये यञ् । 'एको गोत्रे' इति गर्गशब्द एव प्रकृतिः । 'अपत्यं पौत्रप्रभृति गोत्रम्' । गार्ग्यायणेति । 'यञिञोश्च' इति युवापत्ये फक् । 'गोत्राद्यून्यस्त्रियाम्' इति युवप्रत्ययस्य गोत्रप्रत्ययान्तं पदं प्रकृतिर्नियम्यते । 'जीवति तु वंश्ये युवा' इति चतुर्थापत्यादेर्युवसंज्ञा । दाक्षिमिति । अपत्यार्थे 'अत इञ्' विलातृ इति । 'लीङ् श्लेषणे' । 'विभाषा लीयतेः' इति वा आत्वम् । 'विलेतृ' इति वा पाठः ॥

गार्गीयास्ते साधु गार्गायमाणाश्चाजीगर्तिश्चाथ दाक्षायणाश्च ।
वैश्वामित्रात्रेयकौषीतकेया मार्कण्डेयः सोऽपि मैत्रेयनामा ॥ ६३ ॥
नाडायनोबादरिकश्च तस्मै व्यासश्च कानीनमुनिर्गरीयान् ।
माण्डूकिरेषां तनयाश्च पौत्रा महाशिषोऽनाष्टमिका वितेरुः ॥ ६४ ॥

द्वयोरन्वयः ते तस्मै साधु महाशिषः वितेरुर्दत्तवन्तः । गार्गीयाः गर्गयुवापत्यभूतगार्ग्यायणशिष्याः । गर्गस्य कुत्सितयुवापत्यं चापि । आजीगर्तिरजीगर्तस्यापत्यम् । अथेति समुच्चये । [दाक्षायणा इति ।] दाक्षस्य पूजितं गोत्रापत्यं च । वैश्वामित्रात्रेयकौषीतकेयाः । विश्वामित्रस्यापत्यम् । आत्रेयः अत्रेरपत्यम् । कौषीतकेयः कुषीतकस्यापत्यम् । मार्काण्डेयः मृकण्डोरपत्यम् । मैत्रेयनामा सोऽपि । मित्रयोरपत्यं मैत्रेयः । नाडायनः नडस्य

गोत्रापत्यम्। बादरिकः बदरिकानु(राण्यु)ञ्छन् व्यासश्च कानीनमुनिः। कन्याया अपत्यं ऋषिः गरीयान् गुरुतरः। माण्डूकिः मण्डूकापत्यम्। एषां तनयाश्च पौत्राः पुत्राणां पुत्राश्च अनाष्टमिकाः। आष्टमिकः अष्टम्यां अधीतवान्॥—गार्गीया इति। गार्ग्यायणशब्दात् 'वृद्धाच्छः' इति शेषिते छप्रत्यये विवक्षिते 'फक्फिञोरन्यतरस्याम्' इति युवप्रत्ययस्य फक्रो लुक्। 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति वृद्धसंज्ञा। 'वृद्धाच्छः' शैषिकः। यूनश्च कुत्सायां [गोत्रसंज्ञेति वाच्यम्] इति युवसंज्ञा। आजीगर्तिरिति बाह्वादिभ्यश्च' इतीञ्। दाक्षायणः। 'वृद्धस्य च पूजायाम्' इति वा युवसंज्ञायाम् 'यञिञोश्च' इति यूनि फक्। वैश्वामित्रेति। 'मित्रे चर्षौ' इति पूर्वपदस्य दीर्घे विश्वामित्रः। तस्मात् 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण्। आत्रेयेति। 'इतश्चानिञः' इति ढक्। कौषीतकेयेति 'विकर्णकुषीतकात्काश्यपे' इति ढक्। मार्काण्डेय इति। 'शुभ्रादिभ्यश्च' इति ढक्। 'ढे लोपोऽकद्र्वाः' इति उकारलोपः। मैत्रेयेति। 'गृष्ट्यादिभ्यश्च' इति ढञ्। 'केकयमित्रयुप्रलयानां यादेरियः' नाडायन इति। 'नडादिभ्यः फक्' गोत्रापत्ये। व्यास इति। 'असु क्षेपणे'। व्याङावुपसर्गौ। पचाद्यच्। वि वेदान् विभज्य आ समन्तात् शिष्येषु अस्यति इति। अथवा अस्मादेव धातोर्विपूर्वात् करणे घञ्। कानीनेति। 'कन्यायाः कनीन च' इत्यण्। कनीनादेशश्च। माण्डूकिरिति। 'ढक्च मण्डूकात्' इति ढक्। पौत्रा इति। 'अनृष्यानन्तर्ये विदादिभ्योऽञ्' इति अस्य अनृषित्वादनन्तरापत्ये पुत्रशब्दादञ्। बादरिक इति 'उञ्छति' इति ठक्। अनाष्टमिका इति 'अध्यायिन्यदेशकालात्' इति इति ठक्॥

द्वैमातुरादिसुरसंघतनोरसोढुर्दैतेयदुर्विलसितानि गवेश्वरस्य।
चेतो हरेर्विदधती पदयोर्गुणैः स्वैः पत्युर्मनोऽहरदथो अतुलैर्वधूः सा ६५

अथो सा वधूः स्वैर्गुणैः पत्युः मनः अहरत्। अतुलैः। चेतः हरेः पदयोः विदधति। द्वैमातुरादिसुरसंघतनोः। द्वैमातुरो गणपतिः। दैतेयदुर्विलासितानि असोढुः। गवेश्वरस्य गवामीश्वरस्य॥—द्वैमातुरेति। द्वयोर्मात्रोरपत्यमित्यर्थे 'मातुरुत्संख्यासंभद्रपूर्वायाः' इत्यण्। उत्वं च। दैतेयेति। 'कृदिकारादक्तिनः' इति वा ङीषि 'स्त्रीभ्यो ढक्' इति ढक्। तनोरिति। 'ङसिङसोश्च' इति पूर्वरूपत्वम् असोढुरिति। 'ऋत उत्' इति द्वयोरेक उकारो रपरः। 'रात्सस्य' [इति सलोपः]। पत्युरिति। 'ख्यत्यात्परस्य' इति ङसोऽकारस्य उकारः। मनोऽहरदिति। 'ससजुषो रुः' 'अतो रोरप्लुतादप्लुते' इति रोरुकारः। चेतो हरेरिति। 'हशि च' इति रोरुकारः। गवेश्वरस्येति। 'अवङ् स्फोटायनस्य' इति गोरवङादेशः। 'ङिच्च' इत्यन्तस्य। अथो अतुलैरिति। 'ओत्' इति प्रगृह्यसंज्ञायाम् 'प्लुतप्रगृह्या अचि' इति प्रकृतिभावः॥

आनर्च यो महऋषीन्गुणसंपदा स्वं पर्यष्करोच्च विदधे च मतिं गवेन्द्रे।
स्कुन्वन्द्युलोकमपि कीर्तिभरेण सैष तामन्वरुध्यत कथं सदृशीं न शौरिः ६६

स एष शौरिः सदृशीं तां कथं न अन्वरुध्यत अनुवर्तते स। यः महऋषीन् महत

ऋषीन् आनर्च । गुणसंपदा स्वं पर्यष्करोत् अलंकृतवांश्च । गवेन्द्रे गवामिन्द्रे कृष्णे मतिं विदधे च । कीर्तिभरेण द्युलोकमपि स्कुन्वन् आवृण्वन् ॥—[स्कुन्वन्निति।] 'स्कुञ् आवरणे' । 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च' इति श्नुः । गवेन्द्र इति । 'इन्द्रे च नित्यम्' इत्यवङादेशः । महाऋषीन् इति । 'आन्महतः–'इत्यात्वे 'ऋत्यकः' इति प्रकृतिवद्भावो ह्रस्वश्च । द्युलोकमिति । 'दिव उत्' इति वस्य उकारः । एष तामिति । 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' इति सुलोपः । सैष इति । 'सोऽचि–' इति सुलोपः । पर्यष्करोदिति । 'सुट् कात्पूर्वः' इत्यधिकृत्य 'संपर्युपेभ्यः करोतौ भूषणे' 'अड्भ्यासव्यवायेऽपि' इति सुट् । 'सिवादीनाम्–' इति वा षत्वम्(?) । अन्वरुध्यतेति । 'अनो रुध कामे' इति रुधेर्दिवादित्वमात्मनेपदित्वं च ॥

पैतृष्वस्रीयाश्च मातृष्वसेयाः कुल्याः स्वस्रीयाश्च काल्याणिनेयाः ।
ये भ्रातृव्या ये श्वशुर्याः कुलीनाः कौ[र]व्या ये चापि माहाकुलीनाः ६७
ये वा गर्गा ये च दासेरदेश्यास्ताक्षण्याद्या ये पुनर्दौष्कुलेयाः ।
सर्वाञ्छौरिर्वृत्तसर्वागमस्तानार्चीदुच्चैर्दैष्टिकोऽनुप्रधानम् ॥ ६८ ॥

द्वयोरन्वयः । शौरिस्तान् सर्वान् अनुप्रधानं प्रधानानुपूर्व्येण उच्चैः आर्चीत्पूजितवान् । ये कुल्याः कुलापत्यानि । पैतृष्वस्रीयाः पितुः स्वसुरपत्यानि । कुलशब्देन भेदात् कुल्य उच्यते । मातृष्वसेयाः मातृष्वसुरपत्यानि । स्वस्रीयाश्च स्वसुरपत्यानि च । काल्याणिनेयाः कल्याणीनामपत्यानि च । भ्रातृव्या भ्रातॄणामपत्यानि च । ये च कुलीनाः कुलापत्यानि च श्वशुर्याः श्वशुरापत्यानि । ये च महाकुलीनाः महाकुलापत्यानि च कौरव्याः ये वा गर्गाः कुत्सितानि गर्गापत्यानि । ये च दासेरदेश्याः दासीपुत्रप्रायाः । ये पुनः दौष्कुलेयाः दुष्कुलापत्यानि । ताक्षण्याद्याः तक्षापत्यप्रभृतयः । तान् । वृत्तसर्वागमः । वृत्तमधीतम् । दैष्टिको दिष्टमस्तीति मत्या युक्तः ॥—पैतृष्वस्रीया इति । 'पितृष्वसुश्छण्' । इत्यपत्यार्थे छण् प्रत्ययः । मातृष्वसेयाः । 'मातृष्वसुश्च' इति । 'ढकि लोपः' । ढकि लोपोऽयम् । कुल्या इति । 'अपूर्वपदादन्यतरस्यां यड्ढकञौ' इति यत् । स्वस्रीया इति । 'श्वसुश्छः' । काल्याणिनेया इति । 'कल्याणादीनामिनङ्' इति ढक् । इनङादेशश्च । भ्रातृव्या इति । 'भ्रातुर्व्यच्च' । श्वशुर्या इति । 'राजश्वशुराद्यत्' कुलीना इति । 'कुलात्खः' । कौरव्येति । 'कुर्वादिभ्यो ण्यः' इति ण्यः । ('कुरुनादिभ्यो ण्यः')इति ण्यप्रत्ययोऽन्योऽपि तद्राजसंज्ञोऽस्ति । तस्य बहुषु लुक् । अयं तु श्रूयत एव । महाकुलीना इति । 'महाकुलादञ्खञौ' । गर्गा इति । 'गोत्रस्त्रियाः कुत्सने ण च' । गोत्राभिधायिनः शब्दाण्णढकौ । दासेरेति । 'क्षुद्राभ्यो वा' इति ढ्रक् । ताक्षण्येति । 'सेनान्तलक्षणकारिभ्यश्च' इति ण्यः । कारिणः कारवः । दौष्कुलेया इति । 'दुष्कुलाड्ढक्' । वृत्तेति । 'णेरध्ययने वृत्तम्' । दैष्टिकेति । 'अस्तिनास्ति दिष्टं मतिः' । अनुप्रधानमिति आनुपूर्व्येऽव्ययीभावः ॥

पुषाण धर्मं न तपांसि तप्था मा वत्स चेतश्च विधेहि कृष्णे ।
य ईदृगस्मै नमते स्वयं द्रागभीष्टमुक्त्वैवमहास्त गर्गः ॥ ६९ ॥

गर्ग एवमुक्त्वा अहाय गतवान्—'हे वत्स, त्वं धर्मं पुषाण वर्धय । तपांसि न [मा] तप्थाः आर्जय । अपि तु आर्जय एव । चेतः च कृष्णे विधेहि । यः पुरुषः ईदृग्भवति अस्मै अभीष्टं द्राक् स्वयं नमते ॥—पुषाणेति । 'पुष पुष्टौ' । 'क्र्यादिभ्यः श्ना' 'हलः श्नः शानज्झौ' इति श्नाप्रत्ययस्य शानच् । तप्था इति । तप संतापे' । 'तपस्तपःकर्मकस्यैव' इति कर्तुः कर्मवद्भावः । नमते इति । 'कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मवद्भावे 'न दुहस्नुनमां यक्चिणौ' इति यगभावः ॥

[१]अथ चेदयश्च कुरवश्च भृशमपचिता विचक्रिरे आत्तकुतुकम् ।
अपरे च ततो निरगुर्व्यकुर्वत च शब्दमुच्चकैः ॥ ७० ॥

अथ चेदयः चेदिराजाः, कुरवः कुरुकुलजातनृपाः, तथा अपरे च आत्तकुतुकं विचक्रिरे विविधमचेष्टन्त । भृशं अपचिताः पूजिताः ते ततो निरगुश्च । उच्चकैः शब्दं व्यकुर्वत विविधमकुर्वत च ॥—[व्यकुर्वतेति ।] 'वेः शब्दकर्मणः' इति तङ् । विचक्रिरे इति । 'अकर्मकाच्च' इति तङ् । चेदय इति । 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' इति 'जनपदशब्दात्क्षत्रियादञ्' इत्यञोऽपवाद इदन्तत्वात् ञ्यङ्प्रत्यये 'ते तद्राजाः' इति तद्राजसंज्ञायाम् 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति लुक् । कुरव इति । 'कुरुनादिभ्यो ण्यः' इति ण्यप्रत्ययोऽपत्यार्थे । बहुषु लुक् । क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्' ॥

ब्रह्मण्यबुद्धिरथ विश्वजनीनशीलः शौवस्तिकेषु मतिमादधदातिथेयः ।
उच्चैस्तरर्द्धि निजधाम तया स शौरिस्तत्पारिषद्यचरितः सुखमध्युवास ७१

अथ स शौरिः तया सह तत् निजधाम स्वगृहं सुखं अध्युवास । ब्रह्मण्यबुद्धिः ब्राह्मणेभ्यो हिता बुद्धिर्यस्य । विश्वजनीनं विश्वजनहितं शीलं यस्य । शौवस्तिकेषु भवेषु कार्येषु मतिमादधत् आतिथेयः अतिथिषु साधुः । पारिषद्यचरितः परिषदि साधु चरितं यस्य । उच्चैस्तरर्द्धि उच्चैस्तरा ऋद्धिर्यत्र ॥—ब्रह्मण्येति । 'खलयवमाषतिलवृषब्रह्मणश्च' इति हितार्थे यत् । विश्वजनीनेति । 'आत्मन्विश्वजनभोगोत्तरपदात् खः' । शौवस्तिकेषु । 'श्वसस्तुट् च' इति वा ठञ् तुडागमश्च । आतिथेय इति । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' 'तत्र साधुः' इत्यर्थे । पारिषद्येति । 'परिषदो ण्यः' । उच्चैस्तरेति । 'अद्रव्यप्रकर्षे' इत्युक्त्वा अमुप्रत्ययाभावः ॥

इति वासुदेवकृतौ वासुदेवविजयकाव्ये पदचन्द्रिकाख्यया व्याख्यया समेतः प्रथमः सर्गः ।

द्वितीयः सर्गः ।

कृष्णाङ्घ्रिभक्तेरुपचस्करेऽथो भिक्षूंश्च काषायपटानभक्त ।
कर्तव्यमात्रे पटिमानमाटीत्सा देवकी लाक्षिकपाणिपादा ॥ १ ॥

---

१. अस्मिन्वृत्ते छन्दो न ज्ञायते. टीकायामपि मूलतोऽन्यूनानतिरिक्तानि पदानि दृश्यन्ते.

अथो सा देवकी कृष्णाङ्घ्रिभक्तेः उपचस्करे स्वतः सतीं तां सातिशयामकरोत् । काषायपटान् भिक्षून् अभक्तासेवत च कषायेण रक्तं काषायम् । कर्तव्यमात्रे कर्तव्ये कृत्स्ने पटिमानं वैदग्ध्यम् । आटीत् प्राप्ता । लाक्षिकपाणिपादा लाक्षया रक्तं पाणिपादं यस्याः तत्सदृशं वा । उपमानाद्भविष्यतीति व्युक्तम् (?) ॥—उपचस्करे इति । प्रतियत्ने तङ् । 'उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु' इति सुट् । सतो गुणान्तराधानं प्रतियत्नः । 'ऋतश्च संयोगादेर्गुणः' इत्यत्र 'संयोगोपधग्रहणं कृञर्थम्' इति गुणः । 'कृञः प्रतियत्ने' इति कर्मणि षष्ठी । कर्तव्येति । 'धातोः' इत्या तृतीयाध्यायसमाप्तेरधिकारः । 'तत्रोपपदं सप्तमीस्थम्' इति सप्तम्यन्तस्योपपदसंज्ञा । 'कृदतिङ्' इति तिङ्व्यतिरिक्तानां प्रत्ययानां कृत्संज्ञा । 'वासरूपोऽस्त्रियाम्' इति स्त्र्यधिकारविहितप्रत्ययवर्जमसमानरूपस्यापवादप्रत्ययस्य वोत्सर्गबाधकत्वम् । 'कृत्याः प्राङ्ण्वुलः' इति कृत्यसंज्ञा । 'डुकृञ् करणे' । 'तव्यत्तव्यानीयरः' इति तव्यत् । तव्यो वा स्वरे भेदः । काषायेति । 'तेन रक्तं रागात्' इत्यण् । शुक्लस्य वर्णान्तरापादानमिह रञ्जेरर्थः । लाक्षिकेति । 'लाक्षारोचनाशकलकर्दमाट्ठक्' ॥

व्यनेष्ट लोभं विभवं विनिन्ये प्रत्यष्किरन्नो मनसापि किंचित् ।
सापन्नसत्त्वा च बभूव काले महोपसर्येव विशेषदृश्या ॥ २ ॥

सा लोभं व्यनेष्ट विशमितवती । विभवं धनं विनिन्ये । धर्माद्यर्थं विनियुक्तवती किंचित्प्राणिजातं मनसापि नो प्रत्यष्किरत् हिंसितवती । उचिते काले आपन्नसत्त्वा गर्भिणी च बभूव । उपसर्या प्रथमगर्भग्रहणे प्राप्तकाला महागौरिव विशेषदृश्या विशेषदर्शनीया ॥—विनिन्ये इति । 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इति व्यये आत्मनेपदम् । व्यनेष्टेति । 'कर्तृस्थे चाशरीरे कर्मणि' इति तङ् । उपसर्येति । 'उपसर्या काल्या प्रजने' इति निपातनाद्यत् । दृश्येति । 'ऋदुपधाच्चाक्लृपिचृतेः' इति क्यप् । प्रत्यष्किरदिति । 'कॄ विक्षेपे' । 'हिंसायां प्रतेश्च' इति सुट् ॥

पश्यन्पतिस्तामनुमेयगर्भामर्यो बुधानामनवद्यचर्यः ।
प्रजा न लभ्येति निजां प्रतिज्ञां स्मरन्नसावार्तिमगादसह्याम् ॥ ३ ॥

अनुमेयगर्भां तां पश्यन् असौ पतिः वसुदेवः प्रजा न लभ्या इति असह्यां आर्तिं अगात् । निजां प्रतिज्ञां स्मरन् । बुधानां अर्यः प्रधानभूतः । अनवद्यचर्यः । अवद्यं दोषः । चर्या व्यापारः ॥—अनुमेयेति । 'अचो यत्' । लभ्येति । 'पोरदुपधात्' इति यत् । असह्यामिति । 'शकिसहोश्च' इति यत् । चर्येति । 'गदमदचरयमश्चानुपसर्गे' इति यत् । अवद्येति । 'अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु' इति यन्निपात्यते । अर्य इति । 'अर्यः स्वामिवैश्ययोः' इति यन्निपात्यते ॥

वह्नं शुचामाकलयन्नथ स्वं धर्म्ये पुरोपक्रमते स मार्गे ।
अचायदप्याक्रममाणमर्कमक्रंस्त कृष्णापचितौ विशिष्य ॥ ४ ॥

अथ स धर्म्ये धर्मादनपेते मार्गे उपक्रमते पुरा अप्रतिबन्धेनावर्तत । आक्रममाणं उ-द्यन्तं अर्कं अचायत् पूजितवांश्च । 'आदित्यस्य सदा पूजाम्' इति स्मृतिः । कृष्णाप-चितौ विष्णुपूजायां विशिष्य अक्रंस्त उत्सेहे । स्वं आत्मानं शुचां वह्यं वहनकरणभूतं आकलयन् निश्चिन्वन् ॥—अक्रंस्त इति । 'वृत्तिसर्गतायनेषु क्रमः' इति सर्गे तङ्। सर्ग उत्साहः । उपक्रमते इति । 'उपपराभ्याम्' इति वृत्तौ तङ् । वृत्तिरप्रतिबन्धः। आक्रममाणमिति । 'आङ उद्गमने' इति तङ् । 'ज्योतिरुद्गमन इति वक्तव्यम्' । वह्य-मिति । 'वह्यं करणम्' इति यत् ॥

प्रच्छायकारस्करमस्कराढ्ये मेध्ये कृतापस्किरणैररण्ये ।
सुखास्पदे शुम्भति विष्किरौघैरगोस्पदे संस्वदबोधि गर्गः ॥ ५ ॥

अरण्ये सन् वर्तमानः गर्गः तत् गर्भोत्पत्तिलक्षणं वस्तु अबोधि ज्ञातवान् । प्रच्छाय-कारस्करमस्कराढ्ये प्रकृष्टच्छायैः कारस्करैः मस्करैः वेणुभिश्च समृद्धे । मेध्ये शुद्धे। कृतापस्किरणैः विष्किरौघैः पक्षिसमूहैः शुम्भति शोभमाने । सुखास्पदे सुखस्य स्थान-भूते । अगोस्पदे महत्त्वात् गवामत्यन्तासंभवविशिष्टे ॥—कृतापस्किरणैरिति । 'कॄ विक्षेपे', 'अपाच्चतुष्पाच्छकुनिष्वालेखने' । 'हर्षजीविकाकुलायकरणेष्विति वक्तव्यम्' इति जीवि-कार्थे सुट् । गोष्पदमिति । 'गोष्पदं सेवितासेवितप्रमाणेषु' इति असेविते सुट् । सुखा-स्पदमिति । 'आस्पदं प्रतिष्ठायाम्' इति सुट् । विष्किरेति । 'विष्किरः शकुनिर्विकिरो वा' इति विपूर्वात् किरतेः 'इगुपध [ज्ञाप्रीकिरः कः]' इति कप्रत्यये सुट् निपात्यते। मस्करेति । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' इति सुट् । कारस्करेति । 'कारस्करो वृक्षः' इति सुट् । अबोधीति । 'दीपजन–' इत्यादिना कर्तरि चिण् ॥

कयापुभीयादिमसूक्तविद्याविचक्षणक्ष्मासुरतः पदात्स्वात् ।[1]
परस्पराशस्यसुशस्यमार्गाद्द्वारेण निर्याय ह माधुरेण ॥ ६ ॥
सक्षौद्रकुस्तुम्बुरुयावकादीनाश्चर्यविश्वान्क्रयिकान्सरम्भान् ।
विच्छायतो वीवधिकानगच्छत्सार्थान्विचायन्नपरस्परान्सः ॥ ७ ॥

सः स्वात् पदात् माधुरेण मधुरामभिनिष्क्रमता द्वारेण निर्याय अपरस्परान् विच्छा-यतः संततमविच्छेदेन [ग]च्छतः सार्थान् विचायन् पश्यन् स [अ]गच्छत् ह । कयापुभीयादिमसूक्तविद्याविचक्षणक्ष्मासुरतः । कयापुभीयं आदिमं आदौ भवं येषां तानि सूक्तानि एव विद्या तस्यां विचक्षणाः क्ष्मासुरा यस्मिन् । परस्पराशस्यसुशस्य-मार्गात् परस्परं अशस्यं अहिंसनीयं अहिंसकं वा सुशस्यं सुतरां प्रशंसनीयं मार्गं मृगस-मूहो यत्र । सक्षौद्रकुस्तुम्बुरुयावकादीन् क्षौद्रं मधु, कुस्तुम्बुरु धान्यकम् । आश्चर्यवि-श्वान् विश्वो गमनम् । क्रयिकान् क्रयेण जीवतः । सरम्भान् रम्भो वैणवो दण्डः । वीवधिकान् वीवधेन पर्याहारेण जीवतः ॥—शस्येति । 'शसु हिंसायाम्' । '[त]वि

1. कयाशुभीयेति पुस्तकस्थपाठः काशिकानुसारेण कयापुभीयः कृतः.

शसिचतियतिजनीनामुपसंख्यानम्' इति यत् । सुशस्येति । 'शंसिदुहिगुहिभ्यो वा इति वक्तव्यम्' इति क्यप् । 'अनिदितां-' इति नलोपः । कुस्तुम्बुरु इति । 'कुस्तुम्बुरूणि जातिः' इति सुट् । अपरस्परानिति । 'अपरस्पराः क्रियासातत्ये' इति सुट् । आश्चर्येति । 'चरेराङि चागुरौ' इति यप्रत्यये 'आचर्यः' । 'आश्चर्यमनित्ये' इति सुट् निपात्यते । कयाप्रुभीयमिति । 'मतौ छः सूक्तसाम्नोः' इति मत्वर्थे छः । आदिमेति 'आदेश्चेति वक्तव्यम्' इति मः । माधुरेणेति । मधुरा[मभिनिष्क्रामति] 'अभिनिष्क्रामति द्वारम्' इत्यण् । मधुरामभिनिष्क्रामतीत्यत्र द्वारं करणं स्वातन्त्र्येण विवक्ष्यते । क्षौद्रेति । क्षुद्राभ्रमरवटरपादपादञ्' तेन कृते संज्ञायाम् । वीवधिकानिति । विभाषा विवधवीवधात्' इति ष्ठन् । तेन जीवतीत्यर्थे । विश्नेति । 'यजयाचयतविच्छप्रच्छरक्षो नङ्' इति नङि । 'च्छ्वोः शूड्-' इति शः । 'शात्' इति चुत्वाभावः । क्रयिकानिति । 'वस्नक्रयविक्रयाट्ठन्' तेन जीवतीत्यर्थे । राम्भेति । रम्भशब्देन वंशो बोध्यते ततोऽण् । विचक्षणेति । 'चक्षिङः ख्याञ्' । इत्यत्र 'असनयोश्च प्रतिषेधो वक्तव्यः' इति ख्याञभावः ॥

दर्पोल्लसद्विक्रममाणवाहां स्वपस्कराकाक्षसुरथ्यरथ्याम् ।
व्यवस्करामेत्य पुरीमवोचच्छौरिं हरिश्चन्द्रसदक्षमेवम् ॥ ८ ॥

स गर्गः पुरीं मथुरामेत्य शौरिं वसुदेवं एवं अवोचत् । दर्पोल्लसद्विक्रममाणवाहां विक्रममाणाश्चरन्तो वाहा अश्वा [यस्याम्] स्वपस्कराकाक्षसुरथ्यरथ्याम् स्वपस्करा शोभमानरथाङ्गयुक्ता अकाक्षा कुत्सिताक्षरहिता सुरथ्या शोभनै रथ्यै रथं वहद्भिरश्वैर्युक्ता रथ्या रथसमूहो यस्याम् । व्यवस्करां पुरीषाद्यमेध्यरहिताम् । हरिश्चन्द्रसदक्षम् ॥—विक्रममाणेति 'वेः पादविहरणे' इति तङ् । व्यवस्करेति । 'वर्चस्केऽवस्करः' इति सुट् । स्वपस्करेति । 'अपस्करो रथाङ्गम्' इति सुट् । हरिश्चन्द्रेति । 'प्रस्कण्वहरिश्चन्द्रावृषी' इति सुट् । काक्षेति । 'का पथ्यक्षयोः' इति कोः कादेशः ॥

बृहस्पतौ वत्स धियोप यस्त्वं कृत्ये स नोपक्रमसे किमर्थम् ।
पुष्योऽद्य नः पुंसवनस्य कालः प्राप्तश्च पौषेऽहनि तद्विधेयम् ॥ ९ ॥

हे वत्स, यः धिया बृहस्पतौ उप सुराचार्यादधिकः स त्वं किमर्थं कृत्ये वस्तुनि विषये न उपक्रमसे आरभसे । अद्य पुष्यः नः पुंसवनस्य कालः प्राप्तश्च । तत् पौषे पुष्ययुक्तचन्द्रयुक्ते अहनि तत् विधेयम् ॥—उपक्रमस इति । 'प्रोपाभ्यां समर्थाभ्याम्' इति तङ् । पुष्ये इति । 'पुष्यसिद्धौ नक्षत्रे' इति क्यप् । 'नक्षत्रेण युक्तः कालः' इत्यण् । 'यस्येति च' इत्यलोपः । 'पुष्यतिष्ययोर्नक्षत्राणि' यकारलोपो वक्तव्यः । पुष्य इति । 'लुबविशेषे' इत्यणो लुप् । 'लुपि युक्तवद्व्यक्तिवचने' । कृत्ये इति । 'विभाषा कृवृषोः' इति क्यप् । बृहस्पताविति । 'पारस्करप्रभृतीनि च संज्ञायाम्' 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' । बृहन्तो देवाः । उपेति । 'उपोऽधिके च' इति कर्मप्रवचनीयत्वे 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' ॥

स्तोकात्प्ररुष्टोऽपि कर्षन्नवध्यान्यो यातुधर्मा क्रमते मुमूर्षन् ।
कंसः क्रियाणां सहसाकृतानां फलानि भोक्ता स पचेलिमानि ॥ १० ॥

सः कंसः सहसाकृतानां क्रियाणां पचेलिमानि स्वयमेव पक्वानि फलानि भोक्ता यः यातुधर्मा यातूनां राक्षसानां धर्म इव धर्म आचारो यस्य तादृशः सन् क्रमते कौटिल्येन वर्तते । स्तोकात्प्ररुष्टः अल्पेन कारणेन भृशं रुष्टः क्रुद्धः । अवध्यान् गुर्वादीन् अपि कर्षन् हिंसन् मुमूर्षन् संभावितमरणः ॥—क्रमत इति।'अनुपसर्गाद्वा' इति तङ्। पचेलिमानीति।'केलिमर उपसंख्यानम्' 'कर्मकर्तरि चायमिष्यते'।अवध्यानिति।'हनो वा यद्वधश्च वक्तव्यः' इति यद्वधादेशौ। स्तोकात्प्ररुष्टेति। 'करणे च स्तोका–'इत्यादिना पञ्चमी। 'स्तोकान्तिक–'इति समासः। 'अलुगुत्तरपदे' इत्यलुगधिकारः प्रागानङः। उत्तरपद इत्यापादान्तम्। 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुक् । सहसाकृतानामिति । 'ओजःसहोम्भस्तमसस्तृतीयायाः' इत्यलुक् । मुमूर्षन्निति । 'आशंसायामुपसंख्यानम्' इति सन् । सा च प्रयोक्तृधर्मः । सनि 'पूर्ववत्सनः' इत्यात्मनेपदस्य नावकाशः। 'नहि शदिम्रियतिमात्रमात्मनेपदनिमित्तं किं तर्हि शिदाद्यपि' इत्युक्तेः । यातुधर्मेति । 'धर्मादनिच्केवलात्' इत्यनिच् समासान्तः ॥

अजर्यमार्यैः सह संगतं तत्कान्येव कर्माण्यवजानते ते।
श्वःश्रेयसं त्वाप्स्यति सर्पिरादेर्ये जानते ते न पदं विपत्त्याः ॥ ११ ॥

ते आर्यैः सदाचारपरैः सह तत् चिराभ्यस्तं संगतं कान्येव कर्माणि अवजानते अपह्नुवते । अजर्यं न जर्यमिति त्वा श्वःश्रेयसं भद्रं आप्स्यति । ये सर्पिरादेः घृतादिना होमसाधनेन जानते प्रवर्तन्ते ते विपत्त्याः आपदः पदं न भजन्ति । 'जपतां जुह्वतां चापि विनिपातो न विद्यते' इति स्मृतिः ॥—अवजानत इति । 'अपह्नवे ज्ञः' इति तङ् । जानत इति । 'अकर्मकाच्च' इति तङ् । 'ज्ञोऽविदर्थस्य करणे' इति षष्ठी । अजर्यमिति । 'अजर्यं संगतम्' इति यत् । आर्येति । 'ऋहलोर्ण्यत्'। श्वःश्रेयसमिति । मयूरव्यंसकादिसमासः। 'श्वसो वसीयःश्रेयसः' इत्यच्समासान्तः ॥

संजानते ब्रह्मरहस्यमग्र्यं विरिञ्चभूये विगतस्पृहा ये ।
तान्भ्रूणहत्यामपि निघ्नतस्त्वं स सत्यवद्यान्भज नित्यमित्यान् ॥ १२ ॥

स त्वं तान् नित्यं भज । कान् । ये अग्र्यं ब्रह्मरहस्यं वेदस्य रहसि भवं तात्पर्यं संजानते सम्यग्विदन्ति । विरिञ्चभूये ब्रह्मत्वे विगतस्पृहाः । भ्रूणहत्यामपि निघ्नतः । सत्यवद्यान् सत्यवादिनः । इत्यान् अनुगन्तव्यान् ॥—संजानते इति । 'संप्रतिभ्यामनाध्याने' इति तङ् । सत्यवद्यानिति । 'वदः सुपि क्यप् च' इति यत् । विरिञ्चभूये इति । 'भुवो भावे' इति क्यप् । भ्रूणहत्यामिति । 'हनस्त च' इति भावे क्यप् । इत्यानिति । 'एतिस्तुशास्वृदृजुषः क्यप्' । ससत्यवद्यान् इति एकपदत्वपक्षे सत्यवचनयुक्तान् । अग्र्यमिति। 'अग्राद्यत्' । रहस्यमिति । 'दिगादिभ्यो यत्' ॥

उक्त्वत्यृषिः कारितयोग्यकर्मा शौरिं समापृच्छ्य सभृत्यभार्यम् ।
साहस्रखेयान्नगरात्सुमेधास्तं मार्ग्यशोकं कलयन्स्वधामैत् ॥ १३ ॥

---

१. दिशि इति पुस्तकस्थः पाठः काशिकानुसारं शदिकृतः.

ऋषिः इति उक्त्वा कारितयोग्यकर्मा पुंसवनादि कारयित्वा शौरिं समापृच्छ्य नगरात् स्वधाम ऐत् गतवान् । सभृत्यभार्यं भृत्यभार्यासहितं मार्ग्यशोकं कलयन् अपनेयदुःखं चिन्तयन् । साहस्रखेयात् साहस्रं सहस्रपरिमितेन धनेन हेतुना निर्वृत्तं खेयं परिखा यत्र ॥—खेयानिति । 'खनु अवदारणे' । 'ई च खनः' इति खनेः क्यप् । अन्त्यस्य च ईत्वम् । भृत्येति । 'भृञोऽसंज्ञायाम्' इति क्यप् । भार्येति । 'ऋहलोर्ण्यत्' । मार्ग्येति । 'मृजेर्विभाषा' इति क्यप् । तदभावे 'ऋहलोर्ण्यत्' । पक्षे वृद्धिः कुत्वं च । 'मृज्य' इति पाठे क्यपि 'क्ङिति च' इति मृजेर्वृद्धेर्लघूपधगुणस्य प्रतिषेधः । साहस्रमिति । 'तेन निर्वृत्तम्' इत्यण् ॥

मासे सुतं वैजननेऽथ सूतमादाय शौरिर्वदमानमद्यौत् ।
तमात्मनालक्षतमं कुराजं भिद्योद्ध्यकल्पं व्यथितोऽमृषोद्यः ॥ १४ ॥

अथ शौरिः वैजनने प्रसवयोग्ये मासे सूतं सुतमादाय तं कुराजं कुत्सितं राजानं अद्यौत् अभिगतवान् । वदमानं भासमानम् । आत्मनालक्षतमं लक्षसंख्यापूरकं बहुपरिवारयुक्तम् । भिद्योद्ध्यकल्पं नदविशेषद्वयवत् दुर्निवारम् । व्यथितः । अमृषोद्यः मृषावादरहितः ॥—वदमानमिति । 'भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः' इति शानच् । अमृषोद्य इति । 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः' इति क्यन्निपात्यते । भिद्योद्ध्येति । 'भिद्योद्ध्यौ नदे' इति क्यन्निपात्यते । आत्मनालक्षतममिति । 'नित्यं शतादिमासार्धमाससंवत्सराच्च' इति तमडागमः । 'आत्मनश्च पूरणे' इत्यलुक् । वैजनन इति । विजननशब्दात् 'ज्योत्स्नादिभ्य उपसंख्यानम्' इति अण् मत्वर्थीयः । अद्यौत् । 'द्यु अभिगमने' ॥

संस्त्यानया सिध्यरुचः शुचास्य प्रष्ठस्य शिष्टेषु गविष्ठिरस्य ।
प्रणाय्यगृह्योऽतिविनीयधामाप्यप्रेष्ट सत्योद्यतया स कंसः ॥ १५ ॥

स कंसः अस्य सत्योद्यतया सत्यवादितया अति अतिशयेन अप्रेष्ट प्रीतोऽभूत् । प्रणाय्यगृह्यः असंमतजनपक्ष्यः । विनीयधामा विनीयस्य पापस्य आस्पदमपि । संस्त्यानया घनीभूतया शुचा सिध्यरुचः पुष्यनक्षत्रवद् म्लानशोभस्य । शिष्टेषु प्रष्ठस्य पुरोगमस्य । गवि वाचि स्थिरस्य ॥—[विनीयेति ।] 'विपूयविनीयजित्या मुञ्जकल्कहलिषु' इति कल्के क्यन्निपात्यते । गृह्येति । 'पदास्वैरबाह्यपक्ष्येषु च' इति पक्षभावे क्यप् । प्रणाय्येति । 'प्रणाय्योऽसंमतौ' इति ण्यदायादेशनिपातनम् । गविष्ठिरस्येति । 'गवियुधिभ्यां स्थिरः' इति षत्वम् । अलुक् च निपातनात् । संस्त्यानेति । 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वम् । प्रष्ठस्येति । 'प्रष्ठोऽग्रगामिनि' इति षत्वम् ।

अवीवचच्चेति तथा व्यथां मा युग्येन यायाः ससुतः समीत्सन् ।
अश्राव्यपादानमनष्टमो वां न ह्यात्मजन्मा मम मित्र भीतेः ॥ १६ ॥

---

१ 'कुल्य' इति पुस्तकगतः पाठः. २ 'पथ्याः' इति पुस्तकगतः पाठः.

स इति अवीवचच्च उक्तवांश्च । हे मित्र बन्धो, त्वं व्यथां मा तथाः कार्षीः । ससुतः युग्येन वाहनेन यायाः गच्छ । समीर्त्सन् वर्धितुमिच्छन् । वां युवयोः अनष्टमः आत्म-जन्मा पुत्रः मम भीतेः अपादानं हेतुः न अश्रावि ॥—युग्येति । 'युग्यं च पत्रे' इति युजेः क्यप् कुत्वं च । अवीवचच्चेति । 'वच परिभाषणे' । युजादिः । तथा इति । 'तनादिभ्यस्त-थासोः' इति वा सिचो लुक् । समीर्त्सन्निति । 'ऋधु वृद्धौ' । संपूर्वः सन् । 'सनीवन्तर्ध-[भ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्'] इति [प]क्ष इडभावः । 'अजादेर्द्वितीयस्य' इति र्धशब्दस्य द्विवचनम् । 'आप्ज्ञप्यृधामीत्' इतीत्वं रपरम्, अभ्यासलोपः । 'खरि च' इति चर्त्वम् । लटः शता ॥

संप्रावदन्तैव गुणांस्तवार्या विप्रावदन्तेह न केऽपि साधो ।
आलाप्यभाजां वचसां तथैषां ममाधुनैवान्ववदिष्ट चेतः ॥ १७ ॥

हे साधो, आर्याः तव गुणान् संप्रावदन्त एव । इह गुणेषु विषये न केऽपि विप्रावदन्त विरुद्धमवदन् । तथा आलाप्यभाजां आलापनाभाजां एषां जनानां वचसां मम चेतः अधुनैव अन्ववदिष्ट अनुवादमकार्षीत् । अनुः सादृश्ये ॥—संप्रावदन्तेति । 'व्यक्तवाचां समु-च्चारणे' इति तङ् । अन्ववदिष्टेति । 'अनोरकर्मकात्' इति तङ् । विप्रावदन्तेति । 'वि-भा[षा] विप्रलापे' इति तङ् । आलाप्येति । 'आसुयुवपिरपिलपित्रपिचमश्च' इति ण्यत् ॥

अवश्यलाव्या दिविजा ममाद्य ये खेचरीं वाचमुदैरिरंस्ताम् ।
नूनं गृहेशूर इतीमके मां क्षिपन्ति वर्षेजजलानिवार्यम् ॥ १८ ॥

अद्य मम दिविजा देवा अवश्यलाव्या अवश्यमुच्छेदनीया ये तां खेचरीं वाचं अशरी-रवाचं उदैरिरन् उदीरितवन्तः । इमके कुत्सिता इमे मां गृहेशूर इति क्षिपन्ति । नूनं वर्षेजजलानिवार्यं वर्षे जायते यज्जलं तेनानिवार्यम् ॥—अवश्यलाव्या इति । 'ओरावश्य-[के]' इति ण्यत् । मयूरव्यंसकादिसमासः । 'लुम्पेदवश्यमः कृत्ये' इति मलोपः । खेच-रीमिति । 'तत्पुरुषे [कृ]ति बहुलम्' इति सप्तम्या अलुक् । दिविजा इति । 'प्रावृट्शर-त्कालदिवां जे' इति अलुक् । वर्षेजेति । 'विभाषा वर्षक्षरशरवरात्' इत्यलुक् ॥

अवागिरन्तैव यकृन्ति नृणां ये पूतनाद्या यमशिश्रियंस्ते ।
वाणीमकार्यैः प्रसितस्य तस्य न चेतसा संगिरते स्म शौरिः ॥ १९ ॥

शौरिः तस्य तादृशस्य कंसस्य वाणीं चेतसा न संगिरते स्म नाङ्गीकृतवान् । ये नृणां यकृन्ति एव कालखण्डान्येव अवागिरन्त भक्षितवन्तः, ते पूतनाद्या यं अशिश्रियन् आश्रितवन्तः । अकार्यैः प्रसितस्य अकार्येषु प्रसक्तस्य ॥—अवागिरन्तेति । 'गॄ निगरणे' । 'अवाद्ग्रः' इति तङ् । संगिरत इति । 'समः प्रतिज्ञाने' इति तङ् । अशिश्रियन्निति । 'णि-श्रिद्रुस्रुभ्यः—' इति चङ् । अकार्यैरिति । 'ऋहलोर्ण्यत्' । 'प्रसितोत्सुकाभ्याम्—' इति तृतीया ॥

इदंवचोऽनुचरमाण ईते तस्मिन्स्वमादाय शिशुं निकाय्यम् ।
आनाय्यपूज्यो मधुरां प्रणाय्यस्तां नारदः स्मायति लोकपान्थः ॥२०॥

तस्मिञ्शौरौ स्वं शिशुमादाय निकाय्यं गृहं ईते सति नारदः तां मधुरां आयति स्म प्राप्तवान् । इदंवचः अस्य वाक्यं अनुचरमाणे अनुत्क्रम्य वर्तमाने आनाय्यपूज्यः आनाय्योऽग्निविशेषः । तद्वत् पूज्यः । प्रणाय्यः निष्कामः तथापि लोकपान्थः लोकेषु पथो नित्यं गच्छन् ॥—अनुचरमाण इति । 'उदश्चरः सकर्मकात्' इत्यात्मनेपदम् । लटः शानच् । 'आनाय्योऽनित्ये' इत्याङ्पूर्वान्नयतेर्ण्यदायादेशौ । प्रणाय्य इति । 'प्रणाय्यो संमतौ' इति प्रपूर्वान्नयतेर्ण्यदायादेशौ । निकाय्येति । 'पाय्यसांनाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु' इति निवासे वाच्ये निपूर्वाच्चिनोतेर्ण्यदायादेशावादिकुत्वं च निपात्यते । लोकपान्थः। 'पन्थो ण नित्यम्' गच्छतीत्यर्थे ॥

सकुण्डपाय्यैर्विदिताग्निचित्यैश्चिन्वद्भिरग्नींश्च समूह्यमुख्यान् ।
अध्येतृभिः सम्यगृचां चरूणां पचैः कुशाग्रीयविशालधीभिः ॥ २१ ॥
वासिष्ठकालेयमुखेषु सामस्वधीतिभिर्ब्रह्मभिरन्वितां ज्ञैः ।
सवामदेव्येषु तथैव वास्त्रवैयाघ्रमुख्यैश्च रथैर्द्रढिष्ठैः ॥ २२ ॥
अभ्रेण खे संचरमाण आराद्बिलेशयद्वेषिसमानजूतिः ।
प्राह्णेतनादित्यकरोपमस्तः पुरीं ददृश्वान्गजतावृतां सः ॥ २३ ॥

ज्ञैः विद्वद्भिः ब्रह्मभिः अन्विताम् । सकुण्डपाय्यैः तन्नामक्रतुविशेषसहितैः । विदिताग्निचित्यैः विदिता अग्निचित्या अग्निचयनं यैः । समूह्यमुख्यान् अग्नीन् चिन्वद्भिः । च ऋचां सम्यगध्येतृभिः । सवामदेव्येषु वासिष्ठकालेयमुखेषु सामसु अधीतृ(ति)भिः । कुशाग्रीयविशालधीभिः कुशाग्रीया कुशाग्रवन्निशिता विशाला वा धीर्येषाम् । चरूणां पचैः, तथैव रथैश्च अन्विताम् । वास्त्रवैयाघ्रमुख्यैः वस्त्रेण परिवृता वास्त्राः । व्याघ्रस्य विकारश्चर्म वैयाघ्रं तैः परिवृताः । तैश्च तैश्च द्रढिष्ठैर्दृढतरैः ॥ स पुरीं आरात् ददृश्वान् दृष्टवान् । अभ्रेण मेघेन खे संचरमाणः तद्वाहनतया चरन् बिलेशयद्वेषिसमानजूतिः गरुडतुल्यवेगः । प्राह्णेतनादित्यकरोपमस्तः प्राह्णेतनः प्राह्णे भवः । ता जटा । गजतावृतां गजसमूहव्याप्ताम् ॥—कुण्डपाय्येति । 'क्रतौ कुण्डपाय्यसंचाय्यौ' इति निपातनम् । समूह्येति । 'अग्नौ परिचाय्योपचाय्यसमूह्याः' इति निपातनम् । 'समूह्यं चिन्वीत पशुकामः' इति श्रुतिः । अग्निचित्येति । 'चित्याग्निचित्ये च' इति भावे यकारस्तु निपात्यते । अध्येतृभिरिति । 'ण्वुल्तृचौ' इति तृच् । पचैरिति । 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यच् । पचतीति पचः । ज्ञैरिति । जानातीति ज्ञः । 'इगुपधज्ञाप्रीकिरः कः' । वासिष्ठेति । वसिष्ठेन दृष्टं 'दृष्टं साम' इत्यण् । कालेयेति । 'कलेर्ढक्' । कलिना दृष्टम् । वामदेव्येति । तेन दृष्टमित्यर्थे 'वामदेवाड्ड्यड्ड्यौ' । वास्त्रेति । 'परिवृतो रथः' इत्यण् । [वैयाघ्रेति ।] 'आतश्चोपसर्गे'

इति व्याजिघ्रतेः कः । व्याघ्रः । 'द्वैपवैयाघ्रादञ्' । कुशाग्रीयेति । 'कुशाग्राच्छः' ॥ संचरमाण इति । 'समस्तृतीयायुक्तात्' इत्यात्मनेपदम् । प्राह्णेतनेति । 'घकालतनेषु कालनाम्नः' इति वा सप्तम्या अलुक् । बिलेशयेति । 'अधिकरणे शेतेः' इत्यच् । 'शयवासवासिष्वकालात्' इति वा अलुक् । गजतेति । 'गजाच्च वक्तव्यम्' इति तल् । तलन्तं नित्यं स्त्री । दद्दश्वानिति । 'दृशेश्चेति वक्तव्यम्' इति क्वसोर्वा इट् ॥

भ्राष्ट्रानपूपान्पललं च शूल्यं क्षैरेयमौदश्वितमश्नतान्धः ।
या दाधिकाद्यं च जनेन पूर्णा रराज कौमारवधूत्ककान्ता ॥ २४ ॥

या पुरी जनेन पूर्णा रराज । भ्राष्ट्रानपूपान् क्षैरेयं क्षीरेण संस्कृतं औदश्वितं उदश्विति संस्कृतं दाधिकाद्यं दधिसंस्कृतं दाधिकं तदादि च अन्धः अन्नं च अश्नतां कौमारवधूत्ककान्ता अपूर्वपतीः कुमारीरुपपन्नाः कौमाराः ते च ते वधूत्काश्च कान्ता यत्र । अथवा अपूर्वपतयः पतीनुपपन्नाः कुमार्यः कौमार्यः ताश्च ता वध्वश्च तासु उन्मनसः कान्ता यत्र ॥—कौमारेति । 'कौमारापूर्ववचने' इत्यण् । शूल्यमिति । 'शूलोखाद्यत्' [इति यत् ।] दाधिकेति । 'दध्नष्ठक्' । औदश्वितमिति । 'उदश्वितोऽन्यतरस्याम्' इति ठगणौ । क्षैरेयमिति । 'क्षीराड्ढञ्' ॥

रुच्यं फलं संप्रददे ह किंचिद्दास्या मिथः कश्चन कौलटेरः ।
शारावमन्नं ददेऽपरस्मै यत्रापरः स्मेरमुखस्तदानीम् ॥ २५ ॥

यत्र कश्चन कौलटेरः कुलटाया अपत्यं रुच्यं शोभनं किंचित् फलं मिथो रहसि दास्या संप्रददे दास्यै दत्तवान् । अपरः कौलटेरः अपरस्मै दास्यै शारावं शरावे उद्धृतम् अन्नं स्मेरमुखः सन् ददे दत्तवान् ॥—दास्येति । 'अशिष्टस्य व्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम्' । संप्रददे इति । 'दाणश्च सा चेच्चतुर्थ्यर्थे' इति तङ् । सेति तृतीया । कौलटेर इति । कुलटाशब्दात् शीलहीनस्त्रीवचनात् 'क्षुद्राभ्यो वा' इति ढ्रक् । 'कौलटेयः' इति पाठे 'कुलटाया वा' इति ढक् । शारावमिति । 'तत्रोद्धृतममत्रेभ्य' इत्यण् ॥

बाह्याङ्क(ङ्ग)णं यत्र सराजपुत्रकोर्जस्विराजन्यकराजकाढ्यम् ।
प्राज्यौष्ट्रकौरभ्रकबाडवाश्वीयोत्सिक्तकाण्डीरककौन्तिकाद्यम् ॥ २६ ॥

यत्र मधुरायां बाह्याङ्क(ङ्ग)णं बहिर्देशभवमङ्क(ङ्ग)णं एवंविधमभवत् । सराजपुत्रकोर्जस्विराजन्यकराजकाढ्यं राजपुत्रसमूहसहितेन ऊर्जस्विना बलवता राजन्यकेन राजन्यसमूहेन राजकेन राजसमूहेन च समृद्धम् । प्राज्येति । औष्ट्रकं उष्ट्रसमूहः । औरभ्रं उरभ्रसमूहः । उरभ्रो मेषः । बाडवं बडवासमूहः । अश्वीयमश्वसमूहः । काण्डीरकाः काण्डसंज्ञायुधयुक्ताः । कौन्तिकाः कुन्तायुधाः । प्राज्याः प्रभूता एते यत्र ॥—बाह्येति । 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' इति भवार्थे ञ्यः । बहिषष्टिलोपश्च । 'अव्ययानां भमात्रे टिलोपः' इत्यस्यानित्यत्वज्ञापकमेतत् । बाडवेति । 'खण्डिकादिभ्यश्च' इत्यञ् । अश्वीयेति ।

'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति छः । औष्ट्रादिषु 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ्' राजके 'नस्तद्धिते' इति टिलोपः । आद्यमिति । 'दिगादिभ्यो यत्' इति यत् । काण्डीरेति । 'काण्डाण्डादीरन्नीरचौ' इतीरन्मत्वर्थीयः ॥

तं पौरुषीः षट्पुरुषास्तथान्याः क्रान्त्वोपयान्तं परिखा मुनीन्द्रम् ।
दिदृक्षमाणं नृपतिं विविद्वान्द्वास्थोऽन्वजिज्ञासदवेक्ष्य दूरात् ॥ २७ ॥

द्वास्थः तं मुनीन्द्रं दूरादवेक्ष्य अन्वजिज्ञासत् ज्ञातुमैच्छत् । नृपतिं दिदृक्षमाणं विविद्वान् ज्ञातवान् । पौरुषीः पुरुषप्रमाणाः तथा अन्याश्च परिखाः क्रान्त्वा अतिक्रम्य उपयान्तं समीपं आगच्छन्तम् ॥—दिदृक्षमाणमिति । 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदम् । अन्वजिज्ञासदिति । 'नानोर्ज्ञः' इति तङ्भावः । पौरुषीरिति । 'पुरुषहस्तिभ्यामण्च' । षट्पुरुषा इति । प्रमाणे विहितस्य द्वयसजादेशस्य 'प्रमाणे लो द्विगोर्नित्यम्' इति लुकि 'पुरुषात्प्रमाणेऽन्यतरस्याम्' इति ङीबभावे टाप् । 'षट्पुरुषीः' इति वा पाठः । विविद्वानिति । विदेर्ज्ञानार्थात्क्वसुः ॥

कंसं कृतातिथ्यविधिं सजन्यं शुश्रूषमाणं मुनिरित्यवादीत् ।
न शीयते मे त्वयि सौहृदय्यं तत्प्रत्यशुश्रूषिषमीप्सितं ते ॥ २८ ॥

स मुनिः कंसं इति अवादीत् । 'मे त्वयि सौहृदय्यं न शीयते नावगच्छति । तत् ते अभीप्सितं प्रत्यशुश्रूषिषम् प्रतिश्रोतुमैच्छम् । कृतातिथ्यविधिम् । जन्यं जनस्य जल्पम् । शुश्रूषमाणं श्रोतुमिच्छन्तम् ॥—प्रत्यशुश्रूषिषमिति । 'प्रत्याङ्भ्यां श्रुवः' इति तङ्भावः । शीयते इति । 'शदेः शितः' इति तङ् । 'पाघ्रा' इति शीयादेशः । आतिथ्येति । 'अतिथेर्ञ्यः' तादर्थ्ये । जन्यमिति । 'मतजनहलात् करणजल्पकर्षेषु' इति जल्पे य[त्] । सौहृदय्यमिति । ब्राह्मणादित्वात् ष्यञ् । हृदादेशाभावपक्षः ॥

ऋजुत्वदोषान्म्रियसे पुरा त्वं जानासि न स्वं विषमस्थमेव ।
स्वसुःपतिः स्थाण्डिलसंमितस्ते भूकाश्यपश्चक्रभृतः पितायम् ॥ २९ ॥

ऋजुत्वदोषात् आर्जवमेव दोषस्तस्माद्धेतोः म्रियसे पुरा आशु प्राणांस्त्यक्ष्यसि । स्वमात्मानमेवं विषमस्थं कृच्छ्रे वर्तमानं न जानासि । ते अयं स्वसुःपतिर्वसुदेवश्चक्रभृतः पिता भूकाश्यपः । यो यो भगवतः पिता दशरथादिः स स भूकाश्यपः स्थाण्डिलसंमितः व्रतवशात् स्थण्डिले शायी स्थाण्डिलः ॥—म्रियस इति । 'म्रियतेर्लुङ्लिङोश्च' इति तङ् । विषमस्थमिति । 'सुपि स्थः' इति कः । 'स्थे च भाषायाम्' इत्यलुग्निषेधः । स्वसुः पतिरिति । 'विभाषा स्वसृपत्योः' इति षष्ठ्या अलुक् । स्थाण्डिलेति । 'स्थण्डिलाच्छयितरि व्रते' ॥

संविद्धि मातापितरौ तवेमौ यदूंश्च गोपांश्च नृपादितेयान् ।
प्रस्थं युधां नन्दनमाश्रितानां स्वं कालनेमिं स्वसखांश्च दैत्यान् ॥ ३० ॥

हे नृप, तव इमौ मातापितरौ तथा अन्यान् यदूंश्च गोपांश्च आदितेयान् संविद्धि अवेहि । त्वं आत्मानं कालनेमिं तन्नामकमसुरेश्वरं संविद्धि । युधां युद्धानां प्रस्थं प्रतिष्ठते इति प्रस्थः । आश्रितानां नन्दनम् । स्वसखान् प्रलम्बादींश्च दैत्यान् संविद्धि ॥—आदितेयानिति । 'कृदिकारादक्तिनः' । 'सर्वतोक्तिन्नर्थादित्येके' इति ङीषन्तात् 'स्त्रीभ्यो ढक्' । मातापितराविति । 'आनङृतो द्वन्द्वे' इत्यानङ्पूर्वपदस्य । प्रस्थमिति । 'आतश्चोपसर्गे' इति कः ॥

कः कालनेमेरितरो हि कण्ठेकालाङ्घ्रिभागी निपुणः समित्याम् ।
मित्रेषु साधुः प्रियमां स मे त्वां संपश्यतो मुञ्चति हा न चेतः ॥३१॥

कालनेमेरितरः को ह्येवंविधः, कण्ठेकालाङ्घ्रिभागी शिवपादभंजनशीलः । समित्यां युधि निपुणः । मित्रेषु साधुश्च स कालनेमिः । हा विषीदामि । त्वां संपश्यतः मे चेतो न मुञ्चति । प्रियमां अहं प्रियो यस्य ॥—मित्रेषु समित्यामिति । 'साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः' इति सप्तमी । तत्त्वकथने न भवति । कण्ठेकालेति । 'सप्तमीविशेषणे बहुव्रीहौ' इति सप्तम्यन्तस्य पूर्वनिपातः । 'अमूर्धमस्तकात् स्वाङ्गादकामे' इति सप्तम्या अलुक् । कण्ठेकालस्याङ्घ्री भजते सेवत इति कण्ठेकालाङ्घ्रिभागी । 'संपृचानुरुधा–' इति भजधातोर्घिनुणि 'चजोः कु घिण्यतोः' इति कुत्वम् । प्रियमामिति । 'त्वमावेकवचने' इति समास एकार्थस्यास्मदो मपर्यन्तस्य मादेशः ॥

वित्ताश्चतुर्विंशतिरङ्घ्रिहस्ता यस्याशरेन्द्रः स हि चैद्य एषः ।
स विप्रचित्तिः शृणु मागधोऽसौ यः संहितोऽभूज्जरया गुरुस्ते ॥ ३२॥

यस्य चतुर्विंशतिरङ्घ्रिहस्ता वित्ताः ख्याताः । स आशरेन्द्रो ह्येवैष चैद्यश्चेदिराजः शिशुपालः त्वं शृणु । स प्रसिद्धो विप्रचित्तोऽसुरस्ते गुरुरसौ मागधो मगधराजो जरासंधः । यो जरया संहितोऽभूत् ॥—अङ्घ्रिहस्ता इति । 'अधिकरणैतावत्त्वे च' इति द्वन्द्वैकत्वाभावः । मागध इति । 'द्व्यञ्मगधकलिङ्गसूरमसादण्' इत्यपत्येऽण् 'तस्य राजन्य[प]त्यवत्' । रावणो हि चतुष्पात् । उक्तं [च] रामायणे––'रावणो विंशतिभुजश्चतुष्पान्मानमन्दिरः' इति ॥

इन्द्राबृहस्पत्युपक्लृप्तमन्त्रा उत्साहिनोऽग्नीवरुणौ तथान्ये ।
सुरा भवन्तं बत हन्तुकामाः प्रबोधयांचक्रुरधोक्षजं तम् ॥ ३३ ॥

अग्नीवरुणौ तथा अन्ये सुराश्च भवन्तं हन्तुकामाः तमधोक्षजं प्रबोधयांचक्रुः । बत खिन्दे (खेदे) । इन्द्राबृहस्पत्युपक्लृप्तमन्त्राः । मन्त्रो गुप्तिवादः । उत्साहिनः ॥––प्रबोधयांचक्रुरिति । 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' इति परस्मैपदम् । 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इति कृञोऽपि परस्मैपदम् । इन्द्राबृहस्पती इति । 'देवताद्वन्द्वे च' इत्यानङ्

१. 'भञ्जन-' इत्यादर्शपाठः. २. 'तस्य राजनीत्येव' इति काशिकावृत्तिः.

अग्नीवरुणाविति । 'ईदग्नेः सोमवरुणयोः' इतीकारः । हन्तुकामा इति । 'तुं काममनसोरपि' इति लोपः ॥

स उत्पिबो दैत्ययशोमृतानामुदेजयः सर्वनिलिम्पभीतेः ।
गोविन्द आधेरसतां ददोऽसौ हन्ताष्टमस्ते वसुदेवसूनुः ॥ ३४ ॥

सोऽसौ गोविन्दो अष्टमो वसुदेवसूनुस्ते हन्ता । दैत्ययशोमृतानामुत्पिबः । सर्वनिलिम्पभीतेरुदेजयः कम्पयिता । असतामाधेर्ददः ॥—उत्पिब इति । 'पाघ्राध्माधेट्दृशः शः' इति शः । उदेजय इति । 'एजृ कम्पने' । 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' इति शः । निलिम्पेति । 'नौ लिम्पेरिति वक्तव्यम्' इति शः । गोविन्द इति । 'गवादिषु विन्देः संज्ञायाम्' इति शः । दद इति । 'ददातिदधात्योर्विभाषा' इति शः ॥

प्रयुङ्क्ष्व काल्यान्फलिनानुपायान्प्रियाणि मित्राणि च दर्शयस्व ।
संक्ष्णुष्व बुद्धिं शृणु भोक्ष्यसे त्वं नैवान्यथा राज्यसुखं चिराय ॥३५॥

काल्यान् प्राप्तकालान् फलिनान्फलेन निश्चितान् उपायान् प्रयुङ्क्ष्व । प्रियाणि मित्राणि च दर्शयस्व च तेषामात्मकर्मदर्शने अनुकूलो भव । बुद्धिं संक्ष्णुष्व निशितां कुरु । इदं शृणु । अन्यथा मदुक्ताकरणे त्वं राज्यसुखं चिराय नैव भोक्ष्यसे अनुभविष्यसि ॥—प्रयुङ्क्ष्वेति । 'प्रोपाभ्यां युजेरयज्ञपात्रेषु' । स्वराद्यन्तोपसृष्टादिति वक्तव्यम्' इति तङ् । संक्ष्णुष्वेति । 'समः क्ष्णुवः' इति तङ् । भोक्ष्यस इति । 'भुजोऽनवने' इति तङ् । दर्शयस्वेति । 'णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने' इति तङ् । 'हृक्रोः–' इत्यत्र 'अभिवादिदृशोरात्मनेपद उपसंख्यानम्' इति कर्तुर्वा कर्मसंज्ञायां द्वितीया । [काल्यानिति 'तदस्य प्राप्तम्' इत्यधिकारे 'कालाद्यत्' इति यत् । फलिनानिति 'फलबर्हाभ्यामिनच्' इति मत्वर्थीय इनच्] ॥

द्यावाक्षमे संचरतः सदा मे दिवस्पृथिव्योरधिपोऽसि बुद्ध्याम् ।
न भीषये नापि च गर्धये त्वां शक्त्याज्वलं नाप्यपपालयेऽहम् ॥३६॥[1]

त्वं मे बुद्ध्यां असि वर्तसे । द्यावाक्षमे लोकेषु साकल्येन संचरतः । दिवस्पृथिव्योरधिपः । अहं त्वां न भीषये, नापि च गर्धये व्यामोहये । नापि अपपालये (=अपलापये) न्यक्करोमि । शक्त्या ज्वलं ज्वलन्तम् ॥—भीषये इति । 'भीस्म्योर्हेतुभये' इति तङ् । गर्धये इति । 'गृधिवञ्च्योः प्रलम्भने' इति तङ् । अपपालये (अपलापये) इति । 'लियः संमाननशालिनीकरणयोश्च' इति तङ् । 'विभाषा लीयतेः' इत्यात्वे पुक् । ज्वलमिति । 'ज्वलितिकसन्तेभ्यो णः' इति णाभावे पचाद्यच् । द्यावाक्षमे इति । 'दिवो द्यावा' इति द्यावादेशः। दिवस्पृथिव्योरिति । 'दिवसश्च पृथिव्याम्' इति दिवसादेशः । सस्य रुत्वादिविकाराभावोऽकारोच्चारणात् ॥

---

१. 'शक्त्याज्वलं नाप्यपलापयेऽहम्' इति न्याय्यः पाठः.

हसन्नवश्यायकरं प्रभाभिर्दावं नृणामुत्पथनायनायम् ।
तमित्थमुद्दीप्य गृहात्तदीयान्मार्गं ग्रहाणां मुनिराटिटीके ॥ ३७ ॥

मुनिस्तमित्थमुद्दीप्य तदीयान् गृहात् ग्रहाणां मार्गमाटिटीके प्राप्तवान् । प्रभाभिरवश्यायकरं हिमकरं हसन् । नृणां दावं परितापकम् । उत्पथनायनायं पन्थानमुत्क्रान्तो यो नायः नयः तस्य नायं नेतारं प्रापकम् ॥—अवश्यायेति । 'श्यैङ् गतौ' । 'श्या व्यधास्रुसंस्रुवतीणवसावहृलिहश्लिषश्वसश्च' इति णः । दावं नाय इति । 'दुन्योरनुपसर्गे' इति णः । ग्रहाणामिति । 'विभाषा ग्रहः' इति णः । जलचरे ग्राहः । ज्योतिषि ग्रहः । गृहादिति । 'गेहे कः' कर्तरि कः । [आटिटीके इति ।] टीकृ गत्यर्थः । [लिट्] ॥

स्वर्गाथकानां प्रथमेऽथ तस्मिन्विच्छायिते पाणिविषक्तवीणे ।
मानुष्यकं नर्तकगायकाद्यं मुक्त्वान्तरानभ्र ततः सभायाः ॥ ३८ ॥

तस्मिन् विच्छायिते गते सति स नर्तकगायकाद्यं मानुष्यकं मनुष्यसमूहं मुक्त्वा ततः तस्याः सभायाः अन्तः पुरमानभ्र गतवान् । स्वर्गाथकानां स्वर्गायकानां प्रथमे । पाणिविषक्तवीणे पाणिविषक्ता वीणा यस्य ॥—नर्तकेति । ['शिल्पिनि ष्वुन्' ।]'नृतिखनिरञ्जिभ्यः परिगणनं (कर्तव्यम्)' । गाथकानामिति । 'गस्थकन्' [इति गायतेः] शिल्पिनि [थकन्]। गायनेति । 'ण्युट् च' । गायतेः शिल्पिनि । विषक्तवीणे इति । 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इति पूर्वपदस्य पुंवद्भावः । तत इति। 'तसिलादिष्वाकृत्वसुचः' इति पुंवद्भावः । मानुष्यकमिति । 'प्रकृत्याके राजन्यमनुष्ययुवानः' इति प्रकृतिभावेन 'आपत्यस्य च' इति यलोपाभावः ॥

विपक्षलावस्य निजस्य शत्रोरह्नाय भूत्वा लवको बहूनि ।
संजीवकोऽहं बत हायनानि भूयासमाशंसत चेतसेति ॥ ३९ ॥

स चेतसा इत्याशंसत इष्टवान् । अहं अह्नाय झटिति निजस्य शत्रोः [लवकः] उच्छेदको भूत्वा बहूनि हायनानि संवत्सरान् संजीवकः भूयासं बत इति ॥—हायनानीति। 'हश्च व्रीहिकालयोः' इति जहातेः काले ण्युट् । लवक इति । 'प्रुसृल्वः समभिहारे वुन्' इति साधुकारिणि वुन् । संजीवक इति । 'आशिषि च' इति धातुमात्राद्वुन् । विपक्षलावस्येति । 'कर्मण्यण्' इति विकार्ये कर्मणि उपपदेऽण् ॥

श्येनायते यद्यशसा त्रिलोकी दिगन्तमायेन तमोपहेन ।
तं शूरसूनुं सहजाययोग्रः कारोपरोधं निगलैरसेद्ध ॥ ४० ॥

स तं शूरसूनुं वसुदेवं [जायया देवक्या सह] कारोपरोधं कारायामुपरुध्य निगलैरसेद्ध अबध्नात् । उग्रः । यद्यशसा यस्य शूरसूनोर्यशसा त्रिलोकी श्येनायते श्येनी धवलेवाचरति । दिगन्तमायेन दिगन्तान् मिमानेन परिछिन्दता । तमोपहेन दुरितं घ्नता ॥—दि-

गन्तमायेनेति । 'ह्रावामश्च' इत्यण् । तमोपहेनेति । 'अपे क्लेशतमसोः' इति हन्तेर्डः । श्ये-नायत इति । 'क्यङ्मानिनोश्च' इति पुंवद्भावः । असेष्टेति । 'षिञ् बन्धने' (लुङ्) ॥

स तामसीबुद्धिररुष्करोक्तिः प्रणाशिकावृत्तिरथो तदीयम् ।
कोपोत्थदुष्प्रेक्षमुखीतनुर्द्राक्शिशुं प्रसह्याच्युतशङ्कयाहन् ॥ ४१ ॥

अथो स द्राक् तदीयं शिशुमच्युतशङ्कया प्रसह्य अहन् हतवान् । तामसीबुद्धिः तमोगुणविकाररूपा बुद्धिर्यस्य । अरुष्करोक्तिः अरुष्करी बाधाविधायिनी उक्तिर्यस्य प्रणाशिकावृत्तिः जनानां प्रणाशयित्री वृत्तिर्यस्य । कोपोत्थदुष्प्रेक्षमुखीतनुः कोपोत्थानेन दुर्निरीक्षवदना मूर्तिर्यस्य ॥—प्रणाशिकावृत्तिरिति । 'न कोपधायाः' इति पुंवद्भावप्रतिषेधः । तामसीबुद्धिरिति । 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' इति पुंवत्त्वाभावः । कोपोत्थेति । 'सुपि स्थः' इति योगविभागाद्भावे कः । दुष्प्रेक्षमुखीतनुरिति । 'स्वाङ्गाच्चेतोऽमानिनि' इति पुंवत्त्वाभावः ॥

पुलोमजाजानिमुदोऽवसायो गोदं फलद्वैनयिकं स्वतातम् ।
जनस्य शोकापनुदं स बद्ध्वा परम्परीणां श्रियमन्वबोभूत् ॥ ४२ ॥

स स्वतातमुग्रसेनं बद्ध्वा परम्परीणां परांश्च परतरांश्चानुभवन्तीं क्रमप्राप्तां अन्वबोभूत् भृशमन्वभवत् । पुलोमजाजानिमुदः पुलोमजा जाया यस्य तस्येन्द्रस्य मुदः अवसायः अवसानकरः । गोदं गा ददतम् । फलद्वैनयिकं फलत् वैनयिकं विनयो यस्य । जनस्य शोकापनुदं शोकमपनुदन्तम् ॥ [अवसाय इति । 'श्याद्व्यधास्रुसंस्रवतीणवसा—' इत्यवपूर्वात् 'षोऽन्तकर्मणि' इत्यतो णः ।] गोदमिति । 'आतोऽनुपसर्गे कः' । शोकापनुदमिति । 'तुन्दशोकयोः परिमृजापनुदोः' 'आलस्यसुखाहरणयोरिति वक्तव्यम्' इति कः । पुलोमजाजानिरिति । 'जायाया निङ्' समासान्तः । 'संज्ञापूरण्योश्च' इति [न] पुंवत्त्वम् । वैनयिकेति । 'विनयादिभ्यष्ठक्' स्वार्थे । परम्परीणामिति । 'परोवरपरम्परपुत्रपौत्रमनुभवति' इति खः ॥

साधिष्ठसंतापकनीतिशाली धियो यदून्साध्वितरा दधानान् ।
सुखप्रदान्भागवतांश्च नृणां गोसंख्यवर्गीयजनं च सोऽद्वेट् ॥ ४३ ॥

स यदून् भागवतान् भगवद्भक्तिर्येषां तांश्च गोसंख्यवर्गीयजनं च अद्वेट् द्वेष्टि स्म । साधिष्ठसंतापकनीतिशाली साधिष्ठाः साधुतमाः तेषां संतापिकी संतापाय समर्था या नीतिः तद्वान् । [साध्वितरा] अतिशयेन साध्वीः धियः दधानान् नृणां सुखप्रदान् ॥—[प्रदानिति ।] 'प्रे दाज्ञः' इति कः । गोसंख्येति । 'समि ख्यः' इति कः । गोसंख्यवर्गीयेति । 'वर्गान्ताच्च' इति छः । संतापकनीतीति । 'पुंवत्कर्मधारयजातीयदेशीयेषु' इति पुंवत्त्वम् । साध्वितरा इति । 'वोतो गुणवचनात्' इति ङीप् । 'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' । 'तरप्तमपौ घः' । भागवतानिति । 'भक्तिः' इत्यण् ॥

आख्याच्च भृत्यानयि भो निषेव्ये यश्चैत्रवैशाखमुखैः सदापि।
मासैः स्वकार्यार्पणतो द्विषो मे तस्याद्य यद्यस्तु कुरुध्वमेतत्॥ ४४॥

स भृत्यान् इति आख्यात् उक्तवांश्च। 'अयि भो मित्राणि, यः अहं चैत्रवैशाखमुखैर्मासैरपि सदा स्वकार्यार्पणतः निषेव्ये सेवितो भवामि तस्य तादृशस्य मे अद्य द्विषः शत्रवो भवन्ति यदि [तर्हि] अस्तु भवतु। यूयमेतद्वक्ष्यमाणं कुरुध्वम्॥—[कुरुध्वमिति।] 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति तङ्। वैशाखेति। 'नक्षत्रेण युक्तः कालः' इत्यणि विशाखायुक्ता पौर्णमासी वैशाखी 'सास्मिन् पौर्णमासीति' संज्ञायामण्। चैत्रेति। 'विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः' इति ठगभावपक्षेऽण्। अस्त्विवत्यव्ययं सासूयाङ्गीकारे॥

माहेन्द्रमाग्नेयमृतव्यमैन्द्रं द्यावापृथिव्यं च चरुं निरुप्य।
कायं च सौम्यं च सुरान्यजन्ते ये तान्द्विजानाहत सामगाद्यान्॥४५॥

यूयं तान् द्विजान् आहत। सामगाद्यान् साम गायन्तीति सामगाः। चरुं निरुप्य निर्वापं कृत्वा। किंदेवत्यम्। माहेन्द्रं महेन्द्रदेवताकम्, आग्नेयमग्निदेवत्यम्, ऋतव्यमृतुदेवत्यम्, ऐन्द्रं द्यावापृथिव्यं कायं कः प्रजापतिस्तद्देवत्यं च सौम्यं सोमदेवताकं च॥—यजन्त इति। स्वरितेत्त्वादात्मनेपदम्। सामगेति। 'गापोष्टक्'। ऐन्द्रमिति। 'सास्य देवता' इत्यण्। कायमिति। 'कस्येत्' इत्यण्, इकारादेशश्च। माहेन्द्रमिति। 'महेन्द्राद् घाणौ च' इत्यण्। सौम्यमिति। 'सोमाट्ट्यण्'। ऋतव्यमिति। 'वाय्वृतुपित्रुषसो यत्'। द्यावापृथिव्यमिति। 'द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च' इति यत्। आग्नेयमिति। 'अग्नेर्ढक्'। 'प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः'॥

मिथ्यापि ये केचन कारयन्ते पदानि लोकेऽत्र यजन्ति वा ये।
तान्दैत्यमुद्रानपि भावयध्वं तेऽपि स्फुटं नोऽपवदन्त एव॥ ४६॥

अयि तान् दैत्यमुद्रां भावयध्वं गमयत। कान्। येऽत्र लोके पदानि मिथ्यापि कारयन्ते स्वरादिदुष्टमसकृदुच्चारयन्ति। ये वा यजन्ति परार्थं यागं कुर्वन्ति तान्। तेऽपि नः अस्मभ्यं अपवदन्ते क्रुध्यन्ति असूययन्ति वा एव स्फुटम्॥—कारयन्त इति 'मिथ्योपपदात्कृञोऽभ्यासे' इति तङ्। अपवदन्त इति। 'अपाद्वदः' इति तङ्। न इति क्रुधादिना संप्रदानसंज्ञा। भावयध्वमिति। 'भू प्राप्तौ'। 'णिचश्च' इति तङ्॥

अपूपिकादं सुवितीर्णभैक्षं कैदार्यवत्कावचिकानुयातम्।
अश्वीयवद्वृद्धकतैत्तिरोत्कं तृण्यामिवान्यानवमन्यमानम्॥ ४७॥

प्राङ्मत्प्रसत्त्यैव यदीदृगासीत्तत्काकवदद्य कुलं यदूनाम्।
भवत्वनन्तार्पितपक्षपातात्परेतपिण्डादनविन्दजीवम्॥ ४८॥

यत् प्राक् मत्प्रसत्त्या मत्प्रसादेनैव ईदृगासीत्, तत् यदूनां कुलमद्येदानीं तु अनन्ता

र्पितपक्षपाता[त्] मामुपेक्ष्य विष्णौ अर्पितात् पक्षपाताद्धेतोः परेतपिण्डादनविन्दजीवं दरिद्रतया परेभ्य इतस्य पिण्डस्य अदनेन लब्धजीवनं भवतु । काकवत् काकसमूह इव तदपि अनन्ते आकाशे अर्पितात् पक्षाभ्यां पातात् प्रेतपिण्डभक्षणलब्धजीवनं भवति । कीदृक् । आपूपिकादं अपूपसमूह आपूपिकम् । सुवितीर्णभैक्षं दत्तभिक्षासमूहम् । कैदार्यवत् । कैदार्यं केदारसमूहः । कावचिकानुयातम् । कावचिकं कवचिनां समूहः । अश्वीयवत् । अश्वीयमश्वसमूहः । गृह्यकतैत्तिरोत्कम् । गृहासक्ते तित्तिरिसमूहे उत्कम् । अन्यान् सर्वान् तृण्यामिव तृणसमूहमिवावमन्यमानम् ॥—काकेति । 'तस्य समूहः' इत्यण् । भैक्षमिति । 'भिक्षादिभ्योऽण्' । कैदार्येति । 'केदाराद्यञ्च' । कावचिकेति । 'ठञ् कवचिनश्च' । तैत्तिरेति । 'अनुदात्तादेरञ्' । आपूपिकेति । 'अचित्तहस्तिधेनोष्ठक्' । अश्वीयेति । 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति छः । तृण्येति । 'पाशादिभ्यो यः' । गृह्येति । [पदास्वैरिवाह्यापक्ष्येषु च' इति] ग्रहेरस्वैरिणि क्यप् ॥

ऊर्ध्वं मुहूर्ताच्छृणुया यदि त्वमव्यथ्यमेकं द्विषतां भवन्तम् ।
निस्तृण्ढि मांसौदनिकान्किमन्यद्भाक्तान्नृपास्मानिति ते तमूचुः ॥४९॥

ते असुरास्तमित्यूचुः । हे नृप, अन्यत् किं ब्रूमहे । त्वं मुहूर्तादूर्ध्वं द्विषतां मध्ये एकमपि अव्यथ्यं व्यथाहीनं भवन्तं सन्तं यदि शृणुयाः, तर्हि अस्मान् निस्तृण्ढि जहि इति । मांसौदनिकान् येभ्यो नित्यं मांसौदनं दीयते । तथा भक्तं येभ्यो नित्यं दीयते । भक्तमन्नम् । ते भाक्ताः । न व्यथत इति अव्यथ्यः ॥—[अव्यथ्यमिति । 'राजसूयसूर्यमृषोद्य–' इति नञ्पूर्वाद्व्यथतेः क्यप् ।] शृणुया इति । 'लिङ् चौर्ध्वमौहूर्तिके' इति लोडर्थलक्षणे भविष्यति वा लिङ् । लोडर्थः प्रैषादिः । मांसौदनिकानिति । 'श्राणामांसौदनाट्टिठन्' । 'तदस्मै दीयते नियतम्' इत्यर्थे । भाक्तानिति । 'भक्तादणन्यतरस्याम्' इत्यण् ॥

उद्यच्छमानात्कदनाय कंसादुद्विग्नचित्ता यदवः सदाराः ।
प्रायेण वैराटकशैबमुख्यं देशान्तरं पादविका बतेयुः ॥ ५० ॥

यदवः कंसादुद्विग्नचित्ता भीतचित्ताः सदाराः प्रायेण बाहुल्येन वैराटकशैबमुख्यं वैराटकं विराटविषयः, शैबं शिबीनां विषयो देशः । तं देशान्तरमीयुः । बत कदनाय संकुलवधाय उद्यच्छमानात् उद्यमं कुर्वाणात् । पादविकाः पदवीं धावन्तः ॥—उद्यच्छमानादिति । 'समुदाङ्भ्यो यमोऽग्रन्थे' इत्यात्मनेपदम् । शैब इति । 'विषयो देशे' इत्यण् । ग्रामसमूहोऽत्र विषयः । वैराटकेति । 'राजन्यादिभ्यो वुञ्' । पादविका इति । 'पाथोत्तरपदपदव्यनुपदं धावति' इति ठक् । ईयुरिति । 'दीर्घ इणः किति' इत्यभ्यासस्य दीर्घः ॥

श्रेयस्क(स्त)राभिर्गुणमण्डलीभिर्या रोहिणीति स्त्रितरा वितेपे ।
शौरेर्वधूः सा निजभर्तृबन्धोर्नन्दस्य तावद्व्रजमन्ववात्सीत् ॥ ५१ ॥

तावत् शौरेः सा वधूर्जाया नन्दस्य व्रजमन्ववात्सीत् । या रोहिणीति प्रसिद्धा स्त्रितरा उत्तमस्त्री श्रेयस्क(स्त)राभिर्गुणमण्डलीभिर्वितेपे अशोभत॥—[वितेप इति ।]'उद्विभ्यां तपः'

इति तङ्। स्त्रितरेति। 'स्त्यै ष्ट्यै शब्दसंघातयोः'। 'संस्त्याने स्त्यायतेर्ड्रट्'। टिलोपय-लोपौ। ङीप्। 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति स्त्रीशब्दात्तरप्। 'नद्याः शेषस्यान्यतरस्याम्' इति वा ह्रस्वः। श्रेयस्क(स्त)राभिरिति। प्रकर्षयोगात् प्राक्स्त्रीत्वस्याविवक्षायां सिद्धिः। ङीपि तु 'उगितश्च' इति ह्रस्वाभावपक्षे 'तसिलादिष्वाकृत्वसुचः' इति पुंवद्भावः॥

अन्यायतो रिक्थहरः क्षितीशो बिभ्यन्मृतेराशु पुनर्भगिन्याः।
स स्त्रीतरायास्तनयान्सुषूतीननेष्ट पञ्चाप्यथ पञ्चभावम्॥ ५२॥

स क्षितीशः पुनर्भगिन्या द्वितीयादीन् पञ्चाप्याशु जातमात्रान् तनयान् पञ्चभावं निधनमनेष्ट प्रापितवान्। एवं षड्गर्भजन्मोक्तम्। अन्यायतो रिक्थहरः अन्यायेन द्रव्यं हरन्। मृतेर्बिभ्यत्। स्त्रीतराया अतिशयिताया स्त्रियाः सुषूतीन्॥—रिक्थहर इति। 'हरतेरनुद्यमनेऽच्'॥

यद्भागिभाजोऽपि हि जानते तान्ज्ञेयं यदष्टादश यश्च पाता।
विद्या भुजङ्गाधिपतिर्महात्मा स देवकीसप्तमगर्भ आसीत्॥ ५३॥

स भुजङ्गाधिपतिरनन्तो देवकीसप्तमगर्भ आसीत्। महात्मा महानात्मा यस्य। यद्भागिभाजो यद्भक्तान् भजन्तोऽपि यत् ज्ञेयं वस्तु तत् जानते हि। यश्च अष्टादश वेदोपवेदाङ्गोपाङ्गलक्षणा विद्याः पाता रक्षिता॥—जानत इति। 'अनुपसर्गाज्ज्ञः' इति तङ्। महात्मेति। 'आन्महतः समानाधिकरणजातीययोः' इत्याकारः। अष्टादश इति। 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः'। 'प्राक्शतादिति वक्तव्यम्' इत्याकारः॥

महीयसीरूपतयोदिता या हृल्लेखसंसारभयापहर्त्री।
या च त्रयोविंशतितत्त्वरूपा वर्णास्त्रिषष्टिश्च वपुर्यदीयम्॥ ५४॥
हृच्छोकहर्तुर्जगतां हरेः सा मायाज्ञया गर्भमथो अमुष्याः।
तं रोहिणीमाप्य पुनः स्वजन्यै नन्दस्य दारानविशद्यशोदाम्॥ ५५॥

अथो सा माया हरेराज्ञाया अमुष्यास्तं गर्भं रोहिणीमाप्य प्रापय्य पुनः स्वजन्यै आत्मनः प्रादुर्भावाय नन्दस्य दारान् यशोदामविशत्। या शास्त्रेषु महीयसीरूपतया उदिता उक्ता। अतिशयेन महती महीयसी। हृल्लेखसंसारभयापहर्त्री हृदयं लिखतीति हृल्लेखः। या च त्रयोविंशतितत्त्वरूपा। तत्र योगमते चित्तं नाम(?)तत्त्वान्तरं नहि अतस्त्रयोविंशतिको गणः। इति वोपदेवः। त्रिषष्टिर्वर्णाश्च यदीयं वपुः। जगतां हृच्छोकहर्तुः। हृदये शोको हृच्छोकः—त्रयोविंशतीति। 'त्रेस्त्रयः'। प्राक्छतादिति त्रयसादेशः। त्रिषष्टिरिति। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्' इति वा त्रयसादेशः। प्राक्छतात्।

१ 'कर्तुर्जगतां यदीयहरेः सा मायागर्भः' इत्यादर्शपाठः. २ 'योगतमे' इत्यादर्शपाठः. ३ 'वोर्पदेव' इत्यादर्शपाठः.

हृल्लेखेति । 'हृदयस्य हृल्लेख[यदण्]लासेषु' इति हृदादेशः । हृच्छोकेति । 'वा शोकष्यञ्रोगेषु' इति वा हृदादेशः । महीयसीरूपतयेति । 'उगितश्च' इति ह्रस्वाभावपक्षः । आप्येति । आङ्पूर्वाल्लृयप् । 'विभाषापः' इति णेरयादेशाभावपक्षे 'णेरनिटि' इति णेर्लोपः । 'आदित्रयं ह्रस्वदीर्घप्लुतभेदान्नवात्मकम् । दीर्घप्लुततया षट्कं परंतु द्वादशात्मकम् ॥ स्युः पञ्चविंशतिः स्पर्शा अन्तस्थानां चतुष्टयम् । षडूष्माणश्च चत्वारो यमा बिन्दुविसर्गलाः ॥ इतिषष्टि वर्णाः । दीर्घाश्चाष्टौ प्लुताश्चाष्टौ ह्रस्वाः पञ्च यमा नव । व्यञ्जनानि त्रयस्त्रिंशत् त्रिषष्टिर्वर्णजातयः ॥ ३ ॥

धन्यं वितन्वन्नपरोदधिभ्यः क्षीरोदमुच्चैरथ शार्ङ्गधन्वा ।
दुराजपद्योपलभङ्गहृद्या विधास्यमानः श्रुतिपद्धतीस्ताः ॥ ५६ ॥
पन्मिश्रतीर्थाम्बुकृतोदवासैर्जुष्यो मुनीन्द्रैः कलितोदकुम्भैः ।
सुरासुरग्रामणिदर्पदाता गर्भेऽभवद्देवकनन्दनायाः ॥ ५७ ॥

अथ शार्ङ्गधन्वा देवकनन्दनाया गर्भे अभवत् सांनिध्यमकरोत् । इतरोदधिभ्यः क्षीरोदमात्मसांनिध्येन उच्चैर्धन्यं भाग्यवन्तं वितन्वन् । ताः श्रुतिपद्धतीः दुराजपद्योपलभङ्गहृद्या दुष्टा राजान एव पादौ विध्यन्त उपलास्तेषां भङ्गेन हृदयस्य प्रिया विधास्यमानः । मुनीन्द्रैर्जुष्यः सेव्यः । पन्मिश्रतीर्थाम्बुकृतोदवासैः पदमिश्रं तीर्थाम्बु गङ्गाजलं तत्र कृत उदवासो यैः कलितोदकुम्भैः धृत उदकपूर्णकुम्भो यैः । सुरासुरग्रामणिदर्पदाता सुरासुरश्रेष्ठानां दर्पस्य प्रतिपादयिता खण्डयिता च ॥—पद्येति । 'विध्यत्यधनुषा' इति यत् । 'पद्यत्यतदर्थे' इति पादशब्दस्य पदादेशः । पद्धतीति । पादाभ्यां हन्यते इति कर्मणि क्तिन् । 'हिमकाषिहतिषु च' इति पदादेशः । बह्वादित्वात् ङीषन्तो वा । पन्मिश्रेति । 'वा घोषमिश्रशब्देषु' इति पद्भावः । क्षीरोदमिति । 'उदकस्योदः संज्ञायाम्' । 'संज्ञायामुत्तरपदस्योदकशब्दस्य उदादेशो भवतीति वक्तव्यम्' । उदवास उदधीति । 'पेषंवासवाहनधिषु च' इत्युदकशब्दस्य उदादेशः । उदकुम्भेति । 'समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानम् । मध्यमपदलोपश्च' 'एकहलादौ पूरयितव्येऽन्यतरस्याम्' इत्युदादेशः । [सुरासुरग्रामणिदर्पदाता इति] 'इको ह्रस्वोऽङ्यो गालवस्य' इति वा ह्रस्वादेशः ॥

श्रमोदबिन्दुस्नपितास साल्पे हेतौ तथाप्यैदिधदात्मधर्मम् ।
भान्ती निकामं धृतवामनां तां तदादिति(ती)मन्वकरोदिवासौ ॥५८॥

सा अल्पे हेतौ अपि श्रमोदबिन्दुस्नपिता आस बभूव । उदकस्य बिन्दव उदबिन्दवः । तथापि आत्मधर्ममैदिधदवर्धयत् । तदा निकामं भान्ती शोभमाना असौ धृतवामनां तामदिति(ती)मन्वकरोदिव ॥—ऐदिधदिति । 'विभाषोपपदेन प्रतीयमाने' इत्यात्मनेपदा-

१. 'वृत्त्यादिषु 'विदुषीतरा' इत्युदाहृतम् । तन्निर्मूलम्' इति सिद्धान्तकौमुदी. एवं चेदमपि वृत्त्यनुरोधेन बोध्यम्.

भावे परस्मैपदम् । भान्तीति । 'शेषात्कर्तरि परस्मैपदम्' । अन्वकरोदिति । 'अनुपराभ्यां कृञः' इति परस्मैपदम् । श्रमोदबिन्दिति । 'मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च' इति वा उदादेशः । आसेत्यव्ययम् ॥

सुखाहरैर्वर्महरैः सगर्भ्यैः प्रलम्बमुख्यैश्च सहाश्रवैस्तैः ।
अभिक्षिपन्नक्षमकोऽर्चनार्हान्दृष्ट्वा स्वसुर्दीप्तिमखिन्त कंसः ॥ ५९ ॥

कंसः स्वसुर्दीप्तिं दृष्ट्वा अखिन्त खिन्नोऽभूत् । सगर्भ्यैर्भ्रातृभिस्तैः प्रलम्बमुख्यैश्च सह अर्चनार्हान् । पूजामर्हतः अभिक्षिपन् अभिभवन् । सुखाहरैः सुखाहरणशीलैः वर्महरैः कवचं हर्तुं संभाव्यमानवयोभिः ॥ आश्रवैः वचनस्थितैः । अक्षमकः न विद्यमाना क्षमा यस्य ॥—अभिक्षिपन्निति । 'अभिप्रत्यतिभ्यः क्षिपः' इति परस्मैपदम् । वर्महरैरिति । 'वयसि च' इत्यच् । सुखाहरैरिति । 'आङि ताच्छील्ये' इत्यच् । अर्चनार्हानिति । 'अर्हः' इत्यच् । दीप्तिमिति । 'क्तिन्नाबादिभ्यः' । सगर्भ्यैरिति । 'सगर्भसयूथसनुताद्यत्' भवेऽर्थे । समाने गर्भे भव इति 'समानस्य च्छदसि' इति सः ॥

प्रोवाह चिन्तां परिमृष्यति स्म दैवाय कार्याद्विरराम भीतः ।
उपारमत्स्वान्न स दानमानैः सदोपरेमे विषयोपभोगात् ॥ ६० ॥

स सदा भीतश्चिन्तां प्रोवाह बभार, दैवाय परिमृष्यति स्म असूयति स्म, कार्यात् विरराम उपरतव्यापारोऽभूत्, दानमानैः स्वान् ज्ञातीन् नोपारमत् नावारयत्, विषयोपभोगात् उपरेमे निवृत्ते ॥—प्रोवाहेति । 'प्राद्वहः' इति परस्मैपदम् । परिमृष्यतीति । 'परेर्मृषः' इति परस्मैपदम् । विररामेति । 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । उपारमदिति । 'उपाच्च' सकर्मकात् परस्मैपदम् । उपरेम इति । 'विभाषाकर्मकात्' इति परस्मैपदविकल्पः । कार्यादिति । 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इत्यपादानसंज्ञायां पञ्चमी ॥

न वाजयान्यद्य वधादमुष्याः स्थेष्ठं यशो मे तनयं तु जातम् ।
विनाशयिष्यामि तदैव प(व)क्त्वेत्यासीदसौ तत्प्रसवप्रतीक्षः ॥ ६१ ॥

अहमद्यामुष्या वधात् मे स्थेष्ठं स्थिरतरं यशो न वाजयानि कम्पयानि । जातं तनयं तु तदैव प(व)क्त्वा गत्वा विनाशयिष्यामि इति चिन्तयन् असौ तत्प्रसवप्रतीक्षः तस्याः प्रसवं प्रतीक्षमाण आसीत् ॥—[प्रतीक्षमाणेति ।] 'ईक्षिक्षमिभ्यां चेति वक्तव्यम्' इति णः । वाजयानीति । 'वा गतिगन्धनयोः' । 'वो विधूनने जुक्' इति णौ जुगागमः । 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदम् । प(व)क्त्वेति । प(व)श्चुचङ्क्वादयो गत्यर्थाः ॥

उद्बोधयन्नुक्तिभिरप्रमादं सोऽतिष्ठिपच्चाप्रसवात्तदन्ते ।
अशीतकं रक्षिजनं तथापि त्रासो मनस्तस्य पराचकार ॥ ६२ ॥

तदन्ते तस्याः समीपे आ प्रसवात् प्रसवपर्यन्तं रक्षिजनं अतिष्ठिपत् स्थापयामास

उक्तिभिरप्रमादमनवधानमुद्बोधयन् । अशीतकः [न] शीतकोऽलसः । तथापि तस्य मनः पराचकार अभ्यभवत् ॥—उद्बोधयन्निति । 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' इति परस्मैपदम् । अतिछिपदिति । 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदम् ॥

द्रौहिक्षिपाकर्मठसुप्रवेष्टे गर्भं गते शंकरयाच्ञयाजे ।
स्तम्बेरमा भूवलयस्य धायाः प्रावीवृतन्द्राङ्मदवारिधाराः ॥ ६३ ॥

अजे शंकरयाच्ञया गर्भं गते भूवलयस्य धायाः भूवलयं दधतः स्तम्बेरमा दिग्गजा द्राक् मदवारिधाराः प्रावीवृतन्प्रवर्तितवन्तः । द्रौहिक्षिपाकर्मठसुप्रवेष्टे द्रौहिणो द्रोहशीलास्तेषां क्षिपायां निरासे कर्मठाः कर्मशूराः शोभनाः प्रवेष्टा भुजा यस्य ॥—स्तम्बेरमा इति । 'स्तम्बकर्णयो रमिजपोः' 'हस्तिसूचकयोरिति वक्तव्यम्' इत्यच् । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । शंकरेति । 'शमि धातोः संज्ञायाम्' इत्यच् । कर्मठ इति । 'कर्मणि घटोऽठच्' ॥

बिलेशयेशोऽपि भरावभुग्नः किमप्यगर्वायत हर्षमाणः ।
मुदद्युतच्चेतसि देवतानामनर्तयन्ताप्सरसश्च तानि ॥ ६४ ॥

विलेशयेशोऽनन्तोऽपि किमप्यगर्वायत गर्ववान् अभवत् । भरावभुग्नः । हर्षमाणो हृष्टमनाः । देवतानां चेतसि मुत् संतोषोऽद्युतद् दीप्यते स्म । तानि दैवतानि कर्तॄणि अप्सरसोऽनर्तयन्त नर्तितवत्यश्च ॥—अनर्तयन्तेति । 'न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः' इति परस्मैपदप्रतिषेधः । अगर्वायतेति । 'वा क्यषः' इति परस्मैपदमात्मनेपदं च । अद्युतदिति । 'द्युद्भ्यो लुङि' इति वा परस्मैपदम् । विलेशयेति । 'अधिकरणे शेतेः' इत्यच् । 'शयवासवासिष्वाकालात्' इति वा सप्तम्या अलुक् । हर्षमाण इति । 'ताच्छील्यवयोवचनशक्तिषु चानश्' ॥

वनेचरास्त्रैष्टुभजागतादिप्रगाथविज्ञा मुनयः सशिष्याः ।
चिक्लृप्सति स्वस्थितये हरौ तं विवृत्सदानन्दथवोऽस्वानयन्(?) ॥६५॥[1]

हरौ स्वस्थितये स्वर्गस्य रक्षायै चिक्लृप्सति परिणन्तुमिच्छति सति मुनयः सशिष्यास्तमवानयन् स्तुतवन्तः । वनेचराः । त्रैष्टुभजागतादिप्रगाथविज्ञाः । प्रगाथो मन्त्रविशेषः । त्रिष्टुबादिरस्येति त्रैष्टुभः । जगती आदिरस्येति जागतः । विज्ञाः निपुणाः । विवृत्सदानन्दथवः विवृत्सन् वर्धितुमिच्छन् आनन्दथुः सुखं येषाम् ॥—'वृद्भ्यः स्यसनोः' इति वा परस्मैपदम् । चिक्लृप्सतीति । 'लुटि च क्लृपः' इति वा परस्मैपदम् । वनेचरा इति । 'चरेष्टः' । त्रैष्टुभजागतेति । 'सोऽस्यादिरिति च्छन्दसः प्रगाथेषु' इत्यण् । 'त्रिष्टुभम्' इति विवक्षिते 'छन्दसः प्रत्य[य]विधाने नपुंसकात्स्वार्थ उपसंख्यानम्' ॥ स्वस्थितये इति । क्लृपिसंपद्यमाने चतुर्थी वक्तव्या ॥

१. एवं पाठे छन्दो विचिन्त्यम्.

अपिस्फवत्पुण्यकृतां प्रमोदं महोत्सवं प्रादित बल्लवेभ्यः ।
भिक्षाचरोपाहृतमाजिजीवच्छौरेर्मुदं रोहिणिपुत्रजन्म ॥ ६६ ॥

रोहिणिपुत्रजन्म रोहिणीपुत्रस्य रामस्य जन्म [पुण्यकृतां प्रमोदं हर्षमपिस्फवदवी-वृधत्, बल्लवेभ्यो गोपेभ्यो महोत्सवं प्रादित, शौरेर्मुदमाजिजीवत् ।] भिक्षाचरोपाहृतं च-रणेन भिक्षामर्जयद्भिः कथितम् ॥—भिक्षा इत्यत्र इकारस्य 'ह्रस्वं लघु' इति लघुसंज्ञा प्रा-प्नोति । 'संयोगे गुरु' [इति गुरु]संज्ञैव भवति । 'आकडारादेका संज्ञा' इति नियमात् । 'गुरोश्च हलः' इत्यप्रत्ययः । 'भिक्षासेनादायेषु च' इति चरेष्टः । [अपिस्फवदिति । 'स्फायी वृद्धौ' इत्यस्माण्णिचि 'स्फायो वः' इति यकारस्य वकारे 'स्फावि' इत्यस्माल्लुङि च्लेश्चङि 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'चङि' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' 'शर्पूर्वाः खयः' इति सकारलोपे 'अभ्यासे चर्च' इति पकारा-देशे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'सन्यतः' इत्यभ्यासाकारस्येत्वम् । आजिजीवदिति । आङ्पूर्वाज्जीवधातोर्णिचि लुङि चङि 'भ्राजभासभाषदीपजीवमीलपीडामन्य-तरस्याम्' इत्युपधाह्रस्वाभावपक्षः ।] बल्लवेभ्य इति । 'सुपि च' इति दीर्घे 'बहुवचने झल्येत्' इत्येत्त्वे च प्राप्ते 'विप्रतिषेधे परं कार्यम्' इति परत्वादेत्त्वमेव स्यात् । रोहिणि-पुत्रजन्मेति । 'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति ह्रस्वः ॥

ज्वरपूर्वसरा रुजः प्रशेमुः कलहाः स्त्रैणपुरःसराश्च गोष्ठे ।
भुजगेशि निशाकराभिरामे द्विषतां शोककरे तदावतीर्णे ॥ ६७ ॥

तदा भुजगेशि अनन्ते अवतीर्णे, गोष्ठे ज्वरपूर्वसरा ज्वरादयो रुजो रोगाः प्रशेमुः शान्ताः। स्त्रैणपुरःसराः कलहाश्च प्रशेमुः । स्त्रैणः । स्त्रीप्रियो जनः। निशाकराभिरामे चन्द्रवन्मधुरे। द्विषतां शोककरे शोककरणशीले । पुरःसर इति । 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति [टः ।] पूर्वसरेति । 'पूर्वे कर्तरि' इति टः । शोककर इति । 'कृञो हेतु-ताच्छील्यानुलोम्येषु' इति टः । निशाकरेति । 'दिवाविभानिशाप्रभाभास्कारान्तानन्ता-दिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु' इति टः । स्त्रैणेति । 'संग्रामे प्रयोजनयोद्धृभ्यः' इति नञ् । भुजगेशीति । 'ईश ऐश्वर्ये' क्विप्।

यो वैरकारः स्वयमेव गोष्वभूत्तृणेढि नो स स्म शकृत्करीनपि ।
नासीदकालेऽप्यफलेग्रहिर्द्रुमस्तदर्तवः कर्मकरा इवाभवन् ॥ ६८ ॥

गोषु यो वैरकारोऽभूत् स स्वयमेव शकृत्करीनपि नो तृणेढि स्म वत्सानपि न हिं-सितवान् । द्रुमोऽकालेऽपि अफलेग्रहिर्वन्ध्यो नासीत् । तदा ऋतवः कर्मकरा वैतनिका इवाभवन् ॥ [कर्मकरा इति ।] 'कर्मणि भृतौ' इति टः । वैरकार इति। 'न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु' इति टप्रतिषेधे 'कर्मण्य[ण्]' । श-

१. 'अविस्फवत्' इत्यादर्शे.

कृत्करीनिति । 'स्तम्बशकृतोरिन्' फलेग्रहिरिति । फलानि गृह्णातीति । 'फलेग्रहिरात्मंभरिश्च' इति निपातितः ॥

पृथ्व्या रक्षामभि(पि) विदधतस्तं श्रियो वासभूमे-
दैत्यश्रीणां प्रविचलयितुः स्वःश्रियाः स्थापकस्य ।
देवस्त्रीणामभिभवहृतः संभवोत्थं प्रमोदं
विश्वस्यावेत्त्रिभुवनपतेर्व्यत्रसीच्चाति कंसः ॥ ६९ ॥

कंसः विश्वस्य तं प्रमोदं त्रिभुवनपतेः संभवोत्थमवेज्ज्ञातवान् । अति व्यत्रसीच्च बिभाय । पृथ्व्याः रक्षामपि विदधतः । श्रियः वासभूमेः । दैत्यश्रीणां प्रविचलयितुः कम्पयितुः । स्वश्रियाः स्वर्गलक्ष्म्याः स्थापकस्य । देवस्त्रीणामभिभवहृतः परिभवं हरतः ॥—पृथ्व्या इति । 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञा 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्' इत्यङ्गसंज्ञा । 'आण्नद्याः' इति [आटि] वृद्धियणादेशौ । दैत्यस्त्रीणामिति । 'नेयङुवङ्स्थानावस्त्री' 'वामि' इति विकल्पेन नदीसंज्ञायां नुट् । श्रियः, स्वश्रिया इति । 'ङिति ह्रस्वश्च' इति वा नदीसंज्ञायामाड्वृद्धियणादेशाः । अन्यत्रेयङ् । वासभूमेरिति । विकल्पेन नदीसंज्ञाभावे 'शेषो घ्यसखि' इति घिसंज्ञायां 'घेर्ङिति' इति गुणः । त्रिभुवनपतेरिति । 'पतिः समास एव' इति घिसंज्ञायां गुणः । स्त्रीणामिति । 'अस्त्री' इत्युक्त्या परत्वान्नुट् ॥

कालिंमन्याः कुर्वदाशाः स्वधाम्ना गां द्यांमन्यां चोल्लसन्मालभारी ।
बिभ्यन्मृत्योर्भावनादार्ढ्ययोगाच्छौरे रूपं शश्वदीक्षांबभूव ॥ ७० ॥

मृत्योर्बिभ्यत् स भावनादार्ढ्ययोगात् शौरे रूपं शश्वद् ईक्षांबभूव प्रत्यक्षीकृतवान् । स्वधाम्ना आशाः कालिंमन्या आत्मनः कालीं मन्यमानाः कुर्वत् । गां भूमिं द्यांमन्यां स्वर्गमात्मानं मन्यमानां कुर्वत् । उल्लसन्मालभारी उल्लसन्तीं मालां बिभ्रत् ॥—ईक्षांबभूवेति । 'दीर्घं च' इति गुरुसंज्ञा । 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामः । उल्लसन्मालभारीति । 'इष्टकेषीकामालानां चितमू(तू)लभारिषु' इति ह्रस्वः । 'इष्टकादिभ्यस्तदन्तस्यापि ग्रहणम्' कालिंमन्या इति । 'जानपद[कुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु]' इति ङीषि काली । 'आत्ममाने खश्च' । 'खित्यनव्ययस्य' इति ह्रस्वः । 'अरुर्द्विषदजन्तस्य मुम्' इति मुमा ह्रस्वो न बाध्यते । द्यांमन्यामिति । 'इच एकाचोऽम्प्रत्ययवच्च' इत्यमागमो द्वितीयैकवचनवच्च स्यात् । 'औतोऽम्शसोः' ॥

दाण्डां क्रीडां ये च मौष्टामकुर्वञ्छ्यैनंपातां शश्वदाखेटकेलीम् ।
ये वाचाटास्तेऽपि वाचंयमानां योग्यामापुः सात्त्विकीमेव वृत्तिम् ॥ ७१ ॥

तेपि जनाः सात्त्विकीमेव वृत्तिमापुः । के । ये दाण्डां मौष्टां च क्रीडामकुर्वन् । दण्डः प्रहरणमस्यां क्रीडायाम् । मुष्टिः प्रहरणमस्यां क्रीडायाम् । ये च शश्वदाखेटकेलीमकुर्वन् ।

श्येनपातोऽस्यां क्रियायामिति [श्यैनंपाताम्] । ये च वाचाटाः । वाचंयमानां मुनीनां योग्याम् ॥—दाण्डां मौष्टामिति । 'तदस्यां प्रहरणमिति क्रीडायां णः' 'स्त्रियाम्' अ-[जाद्य]त[ष्टाप्]' इति टाप् । श्यैनंपातामिति । 'घञः सास्यां क्रियेति ञः' इति घञन्तात् पातशब्दात् कृद्ग्रहणे गतिकारकपूर्वस्य कारकत्वादञ् । 'श्येनतिलस्य पाते ञे' इति मुमागमः । वाचंयमानामिति । 'वाचि यमो व्रते' इति खच् । 'वाचंयमपुरंदरौ च' इति पूर्वपदस्यामागमो निपात्यते । वाचाटा इति । 'आलजाटचौ बहुभाषिणि' इत्याटच् । 'कुत्सित इति वक्तव्यम्' । 'यचि भम्' इति भसंज्ञायां कुत्वाभावः ॥

वर्मायितं मन्त्रकृतां मरुत्वतः क्लेशापहं दानवसत्वमेजयम् ।
स्वर्वासिनः सार्वमुदात्तवाङ्मयैः शर्वादयोऽस्तौषत शंयवो हरिम् ॥७२॥

शर्वादयः स्वर्वासिनो हरिमुदात्तवाङ्मयैर्वाग्विकारैरस्तौषत स्तुतवन्तः । मन्त्रकृतां मन्त्रद्रष्टॄणां वर्मायितुं वर्मवदाचरितवन्तं रक्षकम् मरुत्वतः क्लेशापहम् । दानवसत्वमेजयं दानवानां सत्त्वं हृदयं कम्पयन्तम् । सार्वं सर्वस्मै हितम् । शंयवः सुखातिशयवन्तः॥—शर्वादयोऽस्तौषतेति । 'सुप्तिङन्तं पदम्' इसि पदसंज्ञायां 'एङः पदान्तादति' इति पूर्वरूपत्वम् । वर्मायितमिति । आचारक्यचि 'नः क्ये' इति पदसंज्ञायां नलोपः । शंयव इति । 'कंशंभ्यां बभयुस्तितुतयसः' इति युस् । 'सिति च' इति पदसंज्ञायामनुस्वारपरसवर्णौ । मरुत्वत इति । मरुतोऽस्य सन्तीति मतुपि 'तसौ मत्वर्थे' इति भसंज्ञायां जश्भावः । शर्वादय इति । 'बहुषु बहुवचनम्' इति बहुवचनम् । हरिमिति । 'द्व्येकयोर्द्विवचनैकवचने' इत्येकवचनम् । वाङ्मयैरिति । 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः' इति विकारे मयट् । 'यरोऽनुनासिकेऽनुनासिको वा'।'तद्धितप्रत्यये भाषायां नित्यवचनं कर्तव्यम्'॥

अमरारिभरातुरक्षमासाध्वगदंकारपरंतपानुभावे ।
भगवत्यभिलाषकेऽवतारं भुवनं प्रीतिवशंवदं बभूव ॥ ७३ ॥

भगवति अवतारमभिलाषके सति भुवनं प्रीतिवशंवदं बभूव। अमरारिभरातुरक्षमासाध्वगदंकारपरंतपानुभावे अमरारय एव भरस्तेनातुरायाः क्षमायाः साधुर्दक्षो अगदंकारश्चिकित्सकः । परेषां तापयिता चानुभावो यस्य । 'दक्षस्तीर्थात्तशास्त्रार्थो दृष्टकर्मा भिषक् शुचिः' इति वाहटः ॥—वशंवदमिति । 'प्रियवशे वदः खच्' । 'अरुर्द्विषदजन्तस्य मुम्' परंतपेति । 'द्विषत्परयोस्तापेः' इति खच् । अगदं कारेति । अगदं करोतीत्यण् । 'कारे सत्यागदस्य' इति 'अस्तु सत्यागदस्य' कार इति वक्तव्यम्' इति मुमागमः ॥

इति सटीके वासुदेवविजये द्वितीयः सर्गः ।

तृतीयः सर्गः ।

नारायणे रात्रिमटाङ्गनानामसातये तत्र जनिष्यमाणे ।
मुक्तं सुरैर्नाकनगप्रसूनं पपात नक्षत्रपथादनल्पम् ॥ १ ॥

तत्र नारायणे जनिष्यमाणे प्रादुर्भविष्यति सति नक्षत्रपथात् अनल्पं नाकनगप्रसूनं स्वर्गवृक्षकुसुमं पपात । सुरैर्मुक्तम् । अनल्पं बहु । रात्रिमटाङ्गनानां राक्षसस्त्रीणामसातये न सातयति सुखयतीत्यसातयः ॥—नक्षत्रपथादिति । 'कारके' इत्यधिकृत्य 'ध्रुवमपायेऽपादानम्' इत्यपादानसंज्ञा । 'अपादाने पञ्चमी' । रात्रिमटेति । 'रात्रेः कृति विभाषा' इति मुमागमः । असातय इति । 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसाति–' इति नञ्पूर्वात्साते: सुखार्थाच्छः । 'नलोपो नञः' उत्तरपदे परे । अनल्पमिति । 'तस्मान्नुडचि' इति परस्य नुडागमः । नक्षत्रनाक इत्यत्र 'नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या' इति नञः प्रकृतिभावः । नगेति । नगोऽप्राणिष्वन्यतरस्याम्' इति प्रकृतिभावः ॥

येषां पराजेषत वीर्यभूम्नो येभ्यः पुरान्तर्दधते च पूर्वम् ।
मुष्टिंधयेभ्योऽपि च दानवेभ्यस्तेभ्यस्तदा नाबिभियुर्दिविष्ठाः ॥ २ ॥

तदा दिविष्ठा देवास्तेभ्यो दानवेभ्यो नाविभियुर्बिभ्यति स्म । ते पूर्वं येषां वीर्यभूम्नः पराजेषत विमुखीवभूवुः । मुष्टिंधयेभ्यो अत्यन्तवालेभ्योऽपि येभ्यः पुरा अन्तर्दधते अन्तरदधत ॥—दानवेभ्य इति । 'भीत्रार्थानां भयहेतुः' इत्यपादानसंज्ञा । [पराजेषत वीर्यभूम्नः इति । 'पराजेरसोढः'] इत्यपादानसंज्ञा । येभ्यः अन्तर्दधते । 'अन्तर्द्धौ येनादर्शनमिच्छति' इत्यपादानसंज्ञा । 'पुरि लुङ्चास्मे' इत्यनद्यतनभूतेऽपि लट् । दिविष्ठा इति । 'सुपि स्थः' इति कप्रत्यये 'हृद्युभ्यां च' इति । सप्तम्या अलुकि 'अम्बाम्बगोभूमि–' इति मूर्धन्यादेशः । मुष्टिंधयेभ्य इति । 'नाडीमुष्टयोश्च' इति खश् । [भूम्न इति पृथ्वादिभ्यः–' इतीमनिच्प्रत्यये 'बहोर्लोपो भू च बहोः' इति बहुशब्दस्य भूरादेशः प्रत्ययादिलोपश्च ॥]

बिभीहि मा देवकि ते सुतोऽयं संत्रास्यते त्वां स सगोत्रवर्ग्याम् ।
स्वस्त्यस्तु तुभ्यं सहभर्तृकायै विहाय इत्यानशिरे गिरोऽर्थ्याः ॥ ३ ॥

हे देवकि, मा विभीहि । ते सोऽयं सुतः सगोत्रवर्ग्यां त्वां संत्रास्यते रक्षिष्यति । समानगोत्राणां वर्गे भवाः सगोत्रवर्ग्याः । सहभर्तृकायै तुभ्यं स्वस्त्यस्तु इति गिरो विहाय आकाशं आनशिरे व्याप्ताः । अर्थ्या अर्थादनपेताः ॥—सगोत्रवर्ग्यामिति । 'ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु' इति समानशब्दस्य सभावः । 'वोपसर्जनस्य' इति बहुव्रीह्यवयवस्य सहशब्दस्य सभावः । सहभर्तृकायै । 'प्रकृत्याशिषि' 'अगोवत्सहलेषु' इति सहशब्दस्य प्रकृतिभावः । 'नद्यृतश्च' इति कप् समासान्तः । अर्थ्या इति । 'धर्मपथ्यर्थन्यायादनपेते' इति यत् ॥

अथार्धरात्रे निबिडैस्तमोभिरभ्रंलिहैश्छन्नदिशे निकंसः ।
खारिंपचामत्रविपक्वमन्नं विष्वण्य सुष्वाप स रक्षिवर्गः ॥ ४ ॥

अथार्धरात्रे निकंसः कंसेन नियुक्तो रक्षिवर्गोऽन्नं विष्वण्य सशब्दं भुक्त्वा सुष्वाप ।

अभ्रंलिहैराकाशलेहैर्निबिडैस्तमोभिश्छन्नदिशे छादितदिशि । खारिंपचामत्रविपक्वं खारिंपचेषु पात्रेषु विपक्वम् । खारिं पचतीति खारिंपचः ॥—'परिमाणे पचः' [इति खश्]। 'खित्यनव्ययस्य' इति ह्रस्वः । पक्वमिति । 'पचो वः' इति निष्ठातस्य वः । अभ्रंलिहैरिति । 'वहाभ्रे लिहः' इति खश् । निकंस इति । 'अवादयः क्रुष्टाद्यर्थे तृतीया' इति गतिसमासः ॥

मितंपचं किंचिदरुंतुदं तां प्रसूतिजं दुःखमयांबभूव ।
चक्रं ललाटंतपभास्कराभं दधानमीशं शरणं गता सा ॥ ५ ॥

तां प्रसूतिजं दुःखं प्रसववेदना अयांबभूव प्राप्ता । सा ईशं विष्णुं शरणं गता मितंपचमल्पं किंचित् अरुंतुदं पीडाकरं ललाटंतपभास्कराभं चक्रं दधानम् । ललाटं तपतीति तथा मध्याह्नार्कः ॥—मितंपचमिति । 'मितनखे च' इति खश् । अरुंतुदमिति । 'विध्वरुषोस्तुदः' इति खश् । संयोगान्तलोपः । ललाटंतप इति । 'असूर्यललाटयोर्दृशितपोः' इति खश् ॥

प्रियंवदं मित्रमिवानुरोधि द्विषंतपं देवमिव स्तुवानम् ।
इरंमदं ज्योतिरमुञ्चदभ्रं शनैः शनैः प्रावृषिकं ररास ॥ ६ ॥

प्रावृषिकं प्रावृषि जातमभ्रं शनैः शनैः ररास शब्दायते स्म । प्रियंवदमनुरोध्यनुवर्तनशीलं मित्रमिव । द्विषंतपं देवं स्तुवानमिव । द्विषतः तपतीति । इरंमदं ज्योतिरमुञ्चत् इरया जलेन माद्यतीति ॥—इरंमदमिति । 'उग्रंपश्येरंमदपाणिंधमाश्च' इति निपातनम्। प्रियंवदमिति । 'प्रियवशे वदः खच्' । द्विषंतपमिति । 'द्विषत्परयोस्तापेः' इति खच्। प्रावृषिकमिति । 'प्रावृषष्ठप्' । 'प्रावृषिजम्' इति वा पाठे 'प्रावृट्शरत्कालदिवां जे' इति सप्तम्या अलुक् ॥

अधीतवन्तो विधिवद्गुरुभ्यः श्रुतीः सतीर्थ्यैः सह सेष्टि मत्याः ।
भूयात्सुखं देवकनन्दनाया हृदैवमाशासत तापसौघाः ॥ ७ ॥

तापसौघाः प्रशस्तास्तपस्विनो हृदैवमाशासत प्रार्थितवन्तः । देवकनन्दनायाः सुखं भूयात् इति गुरुभ्यः सतीर्थ्यैः समानतीर्थेवासिभिः सह सेष्टि श्रुतीः [अधीतवन्तः] सेष्टीति 'अव्ययं विभक्तिसमीप–' इत्यन्तार्थकसहशब्दस्याव्ययीभावसमासे 'अव्ययीभावे चाकाले' इति 'ग्रन्थान्ताधिके च' इति वा सहशब्दस्य सभावः । सतीर्थ्यैरिति । 'समानतीर्थे वासी' इति यत् । 'तीर्थे ये' इति समानशब्दस्य सभावः । तापसौघा इति । तपःशब्दात् 'अण्च' इत्यण् मत्वर्थीयः । 'प्रशंसावचनैश्च' इति समासः । मत्या इति । 'मतजनहलात् करणजल्पकर्षेषु' इति यत् ॥

---

१. अस्य तत्पुरुषे चरितार्थत्वादुपन्यासश्चिन्त्यः.

सब्रह्मचारी नवमेघरुच्याः सोदर्यदेश्यो हरिदश्मभासाम् ।
तमालकान्तेः सदृगानन्दत्प्रभोद्गमः कश्चन जंपती तौ ॥ ८ ॥

कश्चन प्रभोद्गमः तौ जंपती जायापती आननन्दत् आनन्दयामास । नवमेघरुच्याः सब्रह्मचारी हरिदश्मभासां मरकतत्विषां सोदर्यदेश्यः ईषदसमाप्तः समानोदर्यः । तमालकान्तेः सदृक् सदृशः ॥—सब्रह्मचारीति । ब्रह्म वेदः । तदध्य[य]नार्थं [य]द्व्रतं तदपि ब्रह्म तच्चरतीति [ब्रह्मचारी] समानं ब्रह्म चर[तीति सब्रह्मचारी ।] 'व्रते' इति णिनिः । 'चरणे ब्रह्मचारिणि' इति समानस्य सः । सोदर्यदेश्य इति । समाने उदरे शयितः स्थितः इत्यर्थे 'सोदराद्यः' इति यत्प्रत्यये विवक्षिते प्रागेव 'विभाषोदरे' इति समानस्य सः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' । सदृगिति । 'दृग्दृशवतुषु' इति समानस्य सः । जंपती इति । राजदन्तादित्वात् पक्षे जायाशब्दस्य जंभावो दंभावश्च निपात्यते । परनिपातश्च ॥

इयानसावित्यपि कल्पकोट्या दुर्ज्ञानसौभाग्यविशेषसीमा ।
सुतः स तादृक्त्रिजगत्पवित्रमाहात्म्यभूमाजनि देवकीतः ॥ ९ ॥

देवकीतः स तादृक् सुतो अजनि । असौ इयान् इदंपरिमाणक इति कल्पकोट्या कल्पानां कोट्या अपि दुर्ज्ञानसौभाग्यविशेषसीमा । त्रिजगत्पवित्रमाहात्म्यभूमा ॥—देवकीत इति । 'जनिकर्तुः प्रकृतिः' इत्यपादानसंज्ञा । इयानिति । 'किमिदंभ्यां वो घः' । 'इदं किमोरीश्की' इतीशादेशः । तादृगिति । 'आ सर्वनाम्नः' इत्याकारादेशः । दुर्ज्ञानेति । 'आतो युच्' इति युच् ॥

कलानिधेः संतमसस्य हन्तुः पत्युः सतामात्तरतेरनन्ते ।
समुद्रियात्प्रादित मोदमाभ्यां विधोर्भवन्ती स्मितचन्द्रिका सा ॥१०॥

विधोर्विष्णोश्चन्द्राच्च भवन्ती स्मितचन्द्रिका आभ्यां जंपतिभ्यां मोदं प्रादित प्रददौ । कलानिधेः कलानां विद्यानां बिम्बषोडशांशानां च निधेः । संतमसस्य व्याप्ततमसोऽज्ञानस्य, तिमिरस्य च, हन्तुः । सतां साधूनां, नक्षत्राणां च, पत्युः । अनन्ते शेषे, आकाशे च, आत्तरतेः । समुद्रियात् समुद्रोद्भवात् ॥—विधोरिति । 'भुवः प्रभवः' इत्यपादानसंज्ञा । आभ्यामिति । 'कर्मणा यमभिप्रैति स संप्रदानम्' इति संप्रदानसंज्ञा । 'चतुर्थी संप्रदाने' । समुद्रियादिति । भवे 'समुद्राभ्राद् घः' ॥

पुरंदराश्मद्युतिचौर्यधुर्यविष्वद्र्यगक्षाममहःप्रवाहम् ।
तिर्यक्स्फुरत्सारसनप्रभोर्मीसौदामनीनूतनवारिवाहम् ॥ ११ ॥

सर्वंसहादुर्विषहामनस्यसर्वंकषं सर्वपथीनवीर्यम् ।
यथामुखीनं मुकुरं रमायाः श्रीकौस्तुभं प्रत्युरसं दधानम् ॥ १२ ॥

प्रतीपवृत्तैर्गरुडाश्मदण्डसध्र्यग्भिरिन्द्रारिषु बाहुदण्डैः ।
सम्यक्षु सक्तैश्चरितेषु भान्तं हृदे समेषामपि रोचमानैः ॥ १३ ॥
क्षेमंकरैः पुण्यवतामरीणां भयंकरैर्नित्यमनन्यदास्थैः ।
पनायितं वैतनिकैरिवास्त्रैः क्षीरार्णवानूपविहारलोलम् ॥ १४ ॥
कदर्थितानर्थमनन्यदर्थं स्वाभ्यां स्वधामेत्य नवं नुवानम् ।
दृग्भ्यां न धारू न परं तमेतौ जगन्ति चानन्दरसे न्यमाङ्क्षुः॥१५॥

तं दृग्भ्यां धारू साधु पिबन्तौ एतौ देवकीवसुदेवौ न परं केवलं न अपि तु जगन्ति च आनन्दरसे न्यमाङ्क्षुः न्यमज्जयन् । स्वाभ्यामात्मभ्यां स्वधाम स्वदेहं अपह्नुवानं प्रकाशयन्तम् । पुरंदराश्मद्युतिचौर्यधुर्यविष्वद्र्यगक्षमामहःप्रवाहम् । पुरंदराश्मा इन्द्रनीलः । विष्वद्र्यङ् समन्ततो व्याप्नुवत् । सारसनप्रभोर्मीसौदामनीनूतनवारिवाहम् । सारसनं काञ्ची । सर्वंसहादुर्विषहामनस्यसर्वंकषम् । सर्वंसहा भूमिः । आमनस्यं दुःखम् । सर्वपथीनवीर्यं सर्वपथं व्याप्नुवत् । प्रत्युरसं उरसि श्रीकौस्तुभं दधानम् । रमाया यथामुखीनं मुखप्रतिबिम्बदर्शनाधिकरणं मुकुरम् । बाहुदण्डैर्भान्तम् । इन्द्रारिषु प्रतीपवृत्तैः प्रतिकूलव्यापारैः । गरुडाश्मसध्र्यग्भिः मरकतदण्डसदृशैः । सध्र्यङ् सहायः । सम्यक्षु शुभेषु चरितेषु सक्तैः समेषां सर्वेषामपि हृदे रोचमानैः चित्तं स्वविषये स्पृहां कारयद्भिः । अस्त्रैः चक्रायुधैः पनायितं स्तुतं वैतनिकैः वेतनेन जीवद्भिरिव । पुण्यवतां क्षेमंकरैः । अरीणां नित्यं भयंकरैः । अनन्यदास्थैः आस्थान्तररहितैः । क्षीरार्णवानूपविहारलोलम् । अनूपं जलप्रायो देशः । कदर्थितानर्थम् । कदर्थीकृता अनर्था आपदो येन । अनन्यदर्थम् ॥—हृदे इति । 'रुच्यर्थानां प्रीयमाणः' इति संप्रदानसंज्ञा । स्वाभ्यामिति । 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' इति संप्रदानसंज्ञा । पुरंदरसर्वंसहेति । 'पूःसर्वयोर्दारिसहोः' इति खच् । क्षेमंकरैरिति । 'क्षेमप्रियमद्रेऽण् च' इति खच् । विष्वद्र्यगिति । 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन् । 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' इत्यद्र्यादेशः । [सम्यक्ष्विति । 'समः समि' । तिर्यगिति 'तिरसस्तिर्यलोपे च' । सध्र्यग्भिरिति 'सहस्य सध्रिः'।] प्रतीपेति । प्रतिगता आपोऽस्मिन्निति । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्याकारस्य ईकारः॥ 'आदेः परस्य' । अनूपेति । 'ऊदनोर्देशे' इत्यूकारः । अनन्यदास्थैरिति । 'अषष्ठ्यतृतीयास्थस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु' इति दुगागमः । अनन्यदर्थमिति। 'अर्थे विभाषा' इति दुक् । कदर्थितेति । कुत्सितोऽर्थः कदर्थः । 'कोः कत्तत्पुरुषेऽचि' इति कदादेशः । चौर्येति । ब्राह्मणादिपाठात् ष्यञ् । सौदामनीति । सुदाम्ना पर्वतेन एकदिक् । 'तेनैकदिक्' इत्यङ् । 'टिड्ढाणञ्—' इति ङीप् । नूतनेति । 'नवस्य नू आदेशस्त्नप्तनखाश्च' इति स्वार्थे तनप्रत्ययो नू आदेशश्च । सर्वपथीनेति । 'तत्सर्वादेः पथ्यङ्ग' इति खः। यथामुखीनमिति । 'यथामुखसंमुखस्य दर्शनः खः' । वैतनिकैरिति । वेतनैर्जीवतीति ठक्।

प्रत्युरसमिति । 'विभक्त्यर्थेऽव्ययीभावः' । 'प्रतेरुरसः सप्तमीस्थात्' इति समासान्तोऽच् । धारू इति । 'दाधेट्सिशदसदो रुः' ताच्छीलिकः ॥

ये कद्वदाः कोष्णवधूकुचैकश्राद्धाः कवोष्णानि पलान्यदन्तः ।
सकत्तृणारण्यजुषोऽभवंस्तेऽप्यकापथाः कापुरुषास्तदानीम् ॥ १६ ॥

ये कापुरुषाः कुत्सिताः पुरुषास्तदानीं भगवदाविर्भावसमये अकापथाः सन्मार्गस्था अभवन् । कुत्सितः पन्थाः कापथः । तद्रहिताः । कीदृशाः । कद्वदा गर्ह्यवादिनः । कोष्णवधूकुचैकश्राद्धाः । प्रभूतश्रद्धाः । कवोष्णानि ईषदुष्णानि पललानि अदन्तः । कत्तृणारण्यजुषः । कत्तृणं तृणविशेषः ॥—कद्वदा इति । 'रथवदयोश्च' इति कोः कद्भावः । कत्तृणेति । 'तृणे च जातौ' इति कद्भावः । कापथेति । 'का पथ्यक्षयोः' इति कादेशः । कोष्णेति । 'ईषदर्थे' इति कादेशः । कापुरुषा इति । 'विभाषा पुरुषे' इति कादेशः । कवोष्णानीति । 'कवं चोष्णे' इति कवादेशः । श्राद्धा इति । श्रद्धार्चावृत्तिभ्यो णः मत्वर्थीयः ॥

उदूढहर्षा ननृतुर्मयूरा व्यहेऽपि पद्मा व्यरुचन्प्रफुल्लाः ।
वीरुत्ततिर्भृङ्गकुलैररंसीदामोदमुद्वोढुमिवानुसर्थाः (?) ॥ १७ ॥

मयूरा उदूढहर्षा ननृतुः । व्यह्ने अपि अहनि अतीतेऽपि पद्माः प्रफुल्ला व्यरुचन् शोभन्ते स्म । विगतमहो व्यह्नः । वीरुत्ततिः भृङ्गकुलैरामोदं सौरभ्यं हर्षं चोद्वोढुमनुसर्थां(?)इव॥— मयूरा इति । मह्यां रौतीति रौतेरचि टिलोपः । महीशब्दस्य मयूभावः । 'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारलोपौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥' 'पृषोदरादीनि यथोपदिष्टम्' इति लोपविकारादयः । व्यह्न इति । 'संख्याविसायपूर्वस्याह्नस्याह्नन्यतरस्यां ङौ' इत्यह्नादेशाभावे रूपम् । उदूढेति । वहेः क्तः । यजादित्वात्संप्रसारणम् । 'हो ढः' 'झषस्तथोर्धोऽधः' इति तस्य धः । तस्य ['ष्टुना ष्टुः' इति] ष्टुत्वम् । 'ढो ढे लोपः' । 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' । उद्वोढुमिति । 'सहिवहोरोदवर्णस्य' इत्योकारः । ढलोपः । वीरुदिति । विविधं रोहतीति क्विप् । [न्यं]क्वादित्वात् हस्य धः । 'अन्येषामपि दृश्यते' इति दीर्घः । प्रफुल्ल इति । 'ञिफला विशरणे' । 'ञीतः क्तः' । 'ति च' इति अकारस्य उकारः ॥

यायावरा लाक्षणिकाः कठाश्च कौशिक्यनु ब्राह्मणिपैप्पलादाः ।
ये तैत्तिरीयाः क्रमकाः समे ते विश्वंभरं तुष्टुवुरार्त्विजीनाः ॥ १८ ॥

ते समे सर्वे विप्रा विश्वंभरं तुष्टुवुः । के । यायावराः । 'अग्निहोत्रक्रमात्रस्तु यात्राशीलो द्विजो हि यः । याचमानः क्रमाद्वर्णान् स हि यायाव[रः] स्मृतः ॥' लाक्षणिका इति । लक्षणमधीतवन्तो ज्ञातवन्तो वा । द्वावर्थावत्रानुवर्तेते । क्रमकाः क्रममधीयाना विदन्तो वा । कठाः कठेन प्रोक्तमधीयाना विदन्तो वा । कौशिक्यनुब्राह्मणिपैप्पलादाः । कौशिकिनः कौशिकेन प्रोक्तं कल्पमधीयाना विदन्तो वा । अनुब्राह्मणिनः अनुब्राह्मणमधी-

यानाः । पैप्पलादं पिप्पलादप्रोक्तं छन्दोऽधीयानाः । तैत्तिरीयाः तित्तिरिप्रोक्तं छन्दोऽधी-
यानाः विदन्तो वा । आर्त्विजीनाः ऋत्विजमर्हन्तो यागयोग्याः । ऋत्विक्कर्मार्हा वा ॥—वि-
श्वंभरमिति । 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' इति खच् । यायावरा इति । यातेर्यङ् ।
'यश्च यङः' इति वरच् । लाक्षणिका इति 'तदधीते तद्वेद' इत्यधिकृत्य क्रतूक्थादिसूत्रा-
न्ताट्ठक् इति 'अनुसूर्लक्ष्यलक्षणे च (?)' इति ठक् । क्रमका इति । 'क्रमादिभ्यो वुन्' ।
अनुब्राह्मणीति । 'अनुब्राह्मणादिनि' । पैप्पलादा इति । पिप्पलादशब्दात् 'तेन प्रोक्तम्' इत्यण् ।
छन्दसि तदन्तात् 'छन्दोब्राह्मणानि च तद्विषयाणि' इति वचनात् अध्येतृवेदित्रोरुत्पन्नस्य
'प्रोक्तात् लुक्' इति लुक् । तैत्तिरीया इति । 'तित्तिरिवरतन्तुखण्डिकोखाच्छण्' तदन्ता-
दप्युत्पन्नस्य प्रत्ययस्य लुक् । कौशिकीति । 'काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' । तदन्ता-
दुत्पन्नस्य 'प्रोक्ताल्लुक्' । 'छन्दोब्राह्मणानि च' इति चकारात् कल्पसूत्राणामपि केषांचित्
तद्विषयता । कठा इति । 'कलापिवैशंपायनान्तेवासिभ्यश्च' इति वैशंपायनान्तेवासित्वाण्णि-
निः । तस्य 'कठच[र]काल्लुक्' तदन्तात्तथा तद्विषयादुत्पन्नस्य प्रत्ययस्य 'प्रोक्तात् लुक् ।'
आर्त्विजीना इति । 'यज्ञर्त्विग्भ्यां घखञौ' । 'तत्कर्मार्हन्तीत्युपसंख्यानम्' ॥

औदुम्बरे वैदिशनैम्बमुख्ये देशेऽवसन्ये स जनंगमौघाः ।
ये चाधिकौशाम्बि जनास्तदानीमाकस्मिकीं प्रीतिमयासिषुस्ते ॥१९॥

ते जना अपि तदानीमाकस्मिकीमविद्यमानहेतुकां प्रीतिमयासिषुः । ये औदुम्बरे
वैदिशनैम्बमुख्ये च देशे तन्नामकेषु देशेषु अवसन् । अधिकौशाम्बि कौशाम्ब्यामवसन् ।
ते जनंगमौघाः । जनंगमाश्चण्डालाः ॥—जनंगमा इति । 'गमश्च' इति खच् । औदुम्बर
इति । उदुम्बरा अस्मिन्सन्तीति तथा । 'तदस्मिन्नस्तीति देशे तन्नाम्नि' इत्यण् । कौशा-
म्बीति । कुशाम्बेन निर्वृत्ता इति तथा । 'तेन निर्वृत्तम्' इत्यण् । नैम्बेति । निम्बानां निवास
इति । 'तस्य निवासः' इत्यण् वैदिशेति । विदिशाया नगर्या अदूरभवं नगरं वैदिशम् ।
'अदूरभवश्च' इत्यण् । आकस्मिकमिति । अकस्माच्छन्दो विनयादिः स्वार्थे ठक् ॥

पाण्ड्यैः कलिङ्गैः कुरुभिः प्रसिद्धा वसुंधरा सर्वगशक्तिसारे ।
जाते हरौ तारपतावुदीते कुमुद्वतीव स्म चकास्तिरूपम् ॥ २० ॥

हरौ जाते वसुंधरा चकास्तिरूपं स्म । प्रशस्त[म]शोभत । तारपतौ उदीते कुमुद्व-
तीव पाण्ड्यैः कलिङ्गैः कुरुभिर्जनपदैः प्रसिद्धा अलंकृता । सर्वगशक्तिसारे सर्वं गच्छति
व्याप्नोति इति सर्वगः । 'अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः' इति गमेः कर्मण्युपपदे डः
'डित्यभस्यापि' इति टिलोपः । पाण्ड्यैः कलिङ्गैः कुरुभिः इति । पाण्ड्यादीनां निवास
इत्यर्थे उत्पन्नस्याणो 'ज[न]प[दे]लुप्' इति लुप् । 'लुपि युक्तवद्व्यक्तिवचने' इति पुं-
स्त्वं बहुत्वं च । 'पाण्डोर्जनपदशब्दात् क्षत्रियात् ड्यण्वक्तव्यः' इति पाण्ड्यशब्दः । कु-
मुद्वतीति । 'कुमुदनडवेतसेभ्यो ड्मतुप्' । डित्वाट्टिलोपः । 'झयः' इति मत्वम् । चकास्तिरूप-
मिति । 'प्रशंसायां रूपप्' ॥

तापिच्छनीकाशरुचि प्रतीचि स्वर्वैरिमर्माविधि पुंसि रागात् ।
स शत्रुहः स्तादिति वक्तुकामः स्वयं व्यलज्जिष्ट विविच्य गर्गः ॥२१ ॥

गर्गः प्रतीचि सर्वप्रत्यगात्मनि पुंसि रागात् स शत्रुहः शत्रूणां हन्ता भूयादिति वक्तुकामः सन् विविच्य स्वयं व्यलज्जिष्ट लज्जते स्म । तापिच्छनीकाशरुचि तमालसदृशकान्तौ स्वर्वैरिमर्माविधि असुराणां मर्मवेधकर्तरि ॥—शत्रुह इति । 'आशिषि हनः' इति डः । मर्माविधीति । मर्मपूर्वकाद्व्यधधातोः क्विपि । 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' इति पूर्वपदस्य दीर्घः । संप्रसारणम् । नीकाश इति । पचाद्यच् । 'इकः काशे' इति दीर्घः । प्रतीचीति । 'चौ' इति दीर्घः ॥

दन्तावलेन्द्रं सुचिरेण बाष्पपाथःपरीवाहततस्तुराषाट् ।
विमुच्य विश्वावसुविष्टुतः सन्नातिष्ठदष्टापदविष्टराग्र्यम् ॥ २२ ॥

तुराषाट् सुचिरेण दन्तावलेन्द्रं ऐरावतं विमुच्य विश्वावसुविष्टुतः सन् अष्टापदविष्टराग्र्यं स्वर्णसिंहासनमातिष्ठत् आक्रम्य स्थितवान् वाष्पपाथः परीवाहततः ॥—दन्तावलेति । 'दन्तशिखात्संज्ञायाम्' इति मत्वर्थीयो [व]लच् । 'वले' इति दीर्घः । विश्वावस्विति । 'विश्वस्य वसुराटोः' इति दीर्घः । परीवाहेति । 'वाहेर्भावे घञ्' । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः । अष्टापदेति । 'अष्टनः संज्ञायाम्' इति दीर्घः । तुराषाडिति । तुरं वेगवन्तं सहते इति 'छन्दसि सहः' इति ण्विः । छन्दसा अपि लोके भवन्तीति 'अन्येषामपि दृश्यते' इति दीर्घः ॥

क्षिप्नुः सुदर्पात्पुरुहूतपक्ष्यान्कंसः पतिघ्नीमथ पाणिरेखाम् ।
दारैर्दधद्भिः सहितोऽजशक्त्या मूर्छां तदानर्च्छ कुमारघाती ॥ २३ ॥

अथ तदा कंसः अजशक्त्या विष्णुमायया हेतुना मूर्छामानर्च्छ प्राप्तवान् । पतिघ्नीं पाणिरेखां दधद्भिः दारैः सहितः । सुदर्पात् दर्पसमृद्धेर्हेतोः पुरुहूतपक्ष्यान् इन्द्रपक्षभवान् क्षिप्नुर्निरसनशीलः । कुमारघाती ॥—[कुमारघातीति।] 'कुमारशीर्षयोर्णिनिः' । पतिघ्नीमिति । हन्तेः 'लक्षणे जायापत्योष्टक्' । हूतेति । हूतमाह्वानम् । ह्वयतेः क्तः । यजादित्वात् संप्रसारणम् । 'अङ्गस्य' इत्यासप्तमाध्यायपरिसमाप्तेरधिकारः । 'हलः' इति दीर्घः । सुदर्पादिति । समृद्धावव्ययीभावः ॥

तमीशितारं तिसृणां गतीनां सुखाय नृणामुररीकृताङ्गम् ।
चतुर्दशानां प्रभवं तनूजं विद्यापदानां पितरौ तनु (नुतः) स्म ॥ २४॥

[पितरौ देवकीवसुदेवौ तनूजमात्मजं नुतः स्म तुष्टुवतुः ।] तिसृणां सत्त्वरजतमोमयीनां [गतीनां]ईशितारम् । नृणां सुखाय उररीकृताङ्गम् । चतुर्दशानां विद्यापदानां स्था[नभूतम्]। [गतीनामिति ।] 'ह्रस्वनद्यापो नुट्' इति । 'नामि' इति दीर्घः। तिसृणामिति । 'न तिसृचतसृ' इति दीर्घाभावः । नृणामिति । 'नृ च' इति दीर्घः । चतु[र्दशानाम्] इति । ['षट्चतुर्भ्यश्च']

[इति नुट् । 'नोपधायाः' इति दीर्घः ।] ईशितारमिति। 'ईश ऐश्वर्ये' । तृच् । 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृ[पोतृ]प्रशास्तॄणाम्' इति दीर्घः ॥

बंहिष्ठ[धामानमुपेयिवांसं मनुष्यलोकं] पुरुषं महान्तम् ।
प्रशासितारं परिपन्थिनस्तमित्यब्रुवातां प्रियकारमुर्व्याः ॥ २५ ॥

तमित्यब्रुवाताम्। [बंहिष्ठधा]मानमतिप्रवृद्धतेजसम्। मनुष्यलोकमुपेयिवांसं प्राप्नुवन्तम्। महान्तं पुरुषम् । [परि]पन्थिनः प्रशासितारम् ॥ [उर्व्याः प्रियकारम् ।] बंहिष्ठधामानमिति । 'सर्वनामस्थाने चासंबुद्धौ' इति दीर्घः। उपेयिवांसमिति। ['उ]पेयिवाननाश्वाननूचानश्च' इति क्वस्वन्तो निपातितः । ['उगिदचां सर्वनामस्थाने चाधातोः' इति नुम् । 'सान्तमहतः संयोगस्य' इति । महान्तमिति । महधातोरौणादिकेऽतिप्रत्यये शतृवद्भावे चोगित्त्वान्नुमि 'सान्तमहतः–' इति दीर्घः ।] प्रशासितारमिति तृन्नन्तस्य दीर्घः । प्रियकारमिति । 'क्षेमप्रियमद्रेऽण् च' इति कृञोऽण् ॥

[1].. ।
.... ॥ २६ ॥
.... ।
.... ॥ २७ ॥

सुहृन्मनोजूर्तिकृतस्तथापि तस्मान्मदीयान्वयनाशवांशः ।
हस्तिघ्नतो भोजपतेर्भयं नो भनक्ति मूर्तं हृदयं शुचैव ॥ २८ ॥

तथापि तस्मात् भोजपतेर्भयं नो हृदयं भनक्ति भग्नं करोति । सुहृन्मनोजूर्तिकृतः। जूर्तिः ज्वरः पीडा । मदीयान्वयनाशवांशः मदीयस्य वंशस्य नाशं वाञ्छतः । हस्तिघ्नतः हस्तिनं हन्तुं समर्थात् शुचैव मूर्तं मूर्च्छायुक्तम् ॥—हस्तिघ्नत इति 'शक्तौ हस्तिकपाटयोः' इति टक् । 'गमहन[जनखनघसां लोपः क्ङित्यनङि'] इत्युपधालोपः । वांश इति । 'वाछि इच्छायाम्' । क्विप् । 'छ्वोः शूडनुनासिके च' इति छकारस्य शकारः । जूर्तिति। 'ज्वर रोगे' । 'स्त्रियां क्तिन्' 'ज्वरत्वरश्रि(स्रि)व्यविमवामुपधायाश्च' इति वकारस्य उपधाया अकारस्य स्थाने ऊठ् । मूर्तमिति । 'मुर्च्छा मोहसमुच्छ्राययोः' । क्तः । 'राल्लोपः' इति छलोपः । 'न ध्याख्या[पृमूर्छिमदाम्'] इति नत्वाभावः । भनक्तीति । 'भञ्जो मर्दने'। 'रुधादिभ्यः श्नम्' 'श्नान्नलोपः' इति धातुनकारस्य लोपः ॥

स्वमुत्तमर्णाय यथाधमर्णस्तस्मै कुमारान्बत धारयामः ।
तस्य स्मरन्तः स्पृहयामहे न स्वजीवितायापि शपामहे ते ॥ २९ ॥

यथा अधमर्ण उत्तमर्णाय स्वं धनं धारयति तथा तस्मै कुमारान् धारयामः । बत व

---

1. अत्र श्लोकद्वयं सव्याख्यं त्रुटितम्.

तस्य स्मरन्तः स्वजीवितायापि न स्पृहयामहे इच्छामः । ते शपामहे शरीरं स्पृशाम इति शपथं कुर्महे शपथं ज्ञापयितुं इच्छामः ॥—ते इति । 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' इति संप्रदानसंज्ञा । तस्मै इति । 'धारेरुत्तमर्णः' इति तत्तुल्यत्वात्संप्रदानसंज्ञा । स्पृशयामहे इति (स्वजीवितायापीति) । 'स्पृहेरीप्सितः' इति संप्रदानसंज्ञा । [तस्येति 'अधीगर्थदयेशां कर्मणि' इति षष्ठी] ॥

निषेवितो झार्झरपाणिघाद्यैः कौक्षेयकक्रूरतराग्रहस्तः ।
पुरायमैति श्रुतसंभवस्ते क्रुधं धियोऽन्धंकरणीं दधानः ॥ ३० ॥

अयं ते श्रुतसंभवः श्रुतत्वात्संभवः पुरा ऐति शीघ्रमागमिष्यति । धियो अन्धकरणीमन्धीभावकरणभूतां क्रुधं दधानः । कौक्षेयकक्रूरतराग्रहस्तः । कौक्षेयकः खड्गः । झार्झरपाणिघाद्यैर्निषेवितः । झर्झरवादनं शिल्पमस्येति झार्झरः ॥—पाणिघाद्यैरिति । पाणितलयोर्मिथो घट्टनेन वादनं कुर्वन्तः पाणिघाः । 'पाणिघताडघौ शिल्पिनि' अन्धंकरणीमिति । 'आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेश्वच्वौ कृञः करणे ख्युन्' । कौक्षेयकेति । कुक्षिशब्दात् 'कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु' इति ढकञ् । यौगिकोऽपि रूढः । झार्झर इति । 'मड्डुकझर्झरादणन्यतरस्याम्' इति शिल्पेऽण् ॥

भक्तेष्वभिव्यक्तमिदं पिधाय बालोचितं रूपमुरीकुरुष्व ।
परिष्वजेमह्यचिराद्विभो त्वां गोपायितुं क्वापि पुनर्लषामः ॥ ३१ ॥

त्वमिदं रूपं पिधाय आच्छाद्य बालोचितं रूपमुरीकुरुष्वाङ्गीकुरुष्व । हे विभो, त्वामचिरात् परिष्वजेमहि तथा प्रार्थयामहे । पुनः क्वापि गोपायितुं रक्षितुं लषामः । भक्तेषु अभिव्यक्तम् । [अभिव्यक्तमिति ।] 'अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु क्तः' । 'अनिदितां हल उपधायाः क्ङिति' इति नलोपः । परिष्वजेमहीति । 'दंशसञ्जस्वञ्जां शपि' इति नलोपः ॥

नादेयतोयागमदुर्निवारः पौरस्त्यपाकाहतिदृष्टकर्मा ।
क्रुध्यन्नहेतावपि नाथ सद्भ्यो माभिद्रुहत्त्वां सहसा स कंसः ॥ ३२ ॥

हे नाथ, कंसः सहसा त्वां मा अभिद्रुहत् । नादेयतोयागमदुर्निवारः । नद्यां भवं नादेयम् । पौरस्त्यपाकाहतिदृष्टकर्मा पुरस्ताज्जातानां शिशूनां हनने दृष्टं कर्म यस्य । अहेतावपि सद्भ्यः क्रुध्यन् तान् प्रति क्रोधं कुर्वन् ॥—सद्भ्य इति । 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति संप्रदानसंज्ञा । त्वामिति ।' क्रुधद्रुहोरुपसृष्टयोः कर्म' इति कर्मसंज्ञायां द्वितीया । नादेयमिति । 'नद्यादिभ्यो ढक्' । पौरस्त्येति । 'दक्षिणापश्चात्पुरसस्त्यक्' ॥

येऽसभ्यमैक्षन्त विषद्रुहृद्भ्यः कार्तान्तिकाः पुण्यसुकर्मभाग्भ्यः ।
दशद्विषादोरगताक्ष्यमाहुस्ते त्वानुरज्यन्मनसः सुपानम् ॥ ३३ ॥

ये कार्तान्तिका दैवज्ञाः पृष्टा अस्मभ्यमैक्षन्त अस्माकं शुभाशुभं पर्यालोचितवन्तः । ते त्वां सुपानं अकृच्छ्रेण रक्षणीयमाहुः । विषद्रुहृद्भ्यः विषादनशीलं हृदयं येषाम् ।

पुत्र्यसुकर्मभाग्भ्यः पुत्रनिमित्तं सुकर्म भजद्भ्यः। दस्रद्विषादोरगताक्ष्र्यमनुरज्यन्मनसः स्वयमेवानुरागं दधद् मनो येषाम् ॥—अस्रभ्यमिति। 'राधीक्ष्योर्यस्य विप्रश्नः' इति संप्रदानसंज्ञा। कार्तान्तिका इति। कृतान्तो दैवम्। 'तद्वेद' इति ठक्। उरगेति। उरसा गच्छतीति 'गमेर्डः'। 'उरसो लोपश्च'। अनुरज्यदिति। 'कुषिरजोः प्राचां श्यन्परस्मैपदं च'। कर्मकर्तरि। पुत्र्येति। 'पुत्राच्छ च' इति यत्। सुकर्मभाग्भ्य इति। 'भजो ण्विः'॥

अथानुरागस्यदविह्वलाभ्यां ताभ्यां प्रतिश्रुत्य तथेति वाञ्छाम्।
स्यन्त्वेव सौहार्दभरेण देवस्तावूचिवानञ्चितमुग्धहासः ॥ ३४ ॥

अथ देवो वाञ्छां तथा इति ताभ्यां प्रतिश्रुत्य सौहार्दभरेण स्यन्त्वा इव तौ ऊचिवान् उक्तवान्। अनुरागस्यदविह्वलाभ्यां स्यदो वेगः। अञ्चितमुग्धहासः। अञ्चितः पूजितः॥—ताभ्यामिति 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' इति संप्रदानसंज्ञा। अनुरागेति। 'भावे' घञ्। 'घञि च भावकरणयोः' इति लोपः। स्यदेति।। स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते। ['स्यदोजवे'।] अञ्चितेति। नाञ्चेः पूजायाम् इति नलोपाभावः। स्यन्त्वेति। 'क्त्वि स्कन्दिस्यन्दोः' इति नलोपाभावः॥

प्राच्येऽपि वामङ्ग भवोभयस्मिन्सुतोऽभवं दिव्यवपुः प्रसद्वः।
तत्रत्यमुन्मीलयितुं मयेदं वृत्तं सुखं ह्यस्त्यमिवापि रूपम् ॥ ३५ ॥

अङ्ग, अहं वां युवयोः [प्राच्ये] प्राग्भवे भवोभयस्मिन् जन्मद्वयेऽपि सुतोऽभवम्। दिव्यवपुः दिविभवम्। प्रसद्वः प्रसादशीलः। तत्रत्यं तत्र भवं वृत्तं ह्यस्त्यमिव गतदिवसजातमिव सुखमुन्मीलयितुं मया इदं रूपं आपि प्राप्तम् ॥—दिव्यप्राच्येति। 'द्युप्रागपागुदक्प्रतीचो यत्'। तत्र[त्य]मिति। 'अव्ययात्त्यप्'। अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः। [निनिर्भ्यां ध्रुवगत्योश्च प्रवेशो नियमे तथा ॥'] ह्यस्त्यमिति। 'ऐषमोह्यः श्वसोऽन्यतरस्याम्' इति त्यप्॥

भक्त्यै [प]रिक्रीतमुपाददानं वपुः शिशूनामुचितं पिता तम्।
तत्प्रेरितात्मा नवराङ्कवत्वक्पर्यङ्किकाया जगृहे कराभ्याम् ॥ ३६ ॥

पिता तं नवराङ्कवत्वक्पर्यङ्किकायाः कराभ्यां जगृहे। राङ्कवी रङ्कुसंबन्धिनी। शिशूनामुचितं वपुरुपाददानम्। भक्त्यै भक्त्या परिक्रीतम्। तत्प्रेरितात्मा अन्तर्यामिणा तेन प्रेरितबुद्धिः॥—भक्त्यै इति। 'परिक्रयणे संप्रदानमन्यतरस्याम्' इति वा संप्रदानसंज्ञा। कराभ्यामिति। 'साधकतमं करणम्' इति करणसंज्ञायां 'कर्तृकरणयोस्तृतीया' इति तृतीया। राङ्कवेति। 'रङ्कोरमनुष्येऽण्च'॥

आढ्यंभविष्णुः प्रमदेन गच्छन्पथा प्रियंभावुकतां गतेन।
स नन्दगोष्ठाय ददर्श मार्गे दीव्यन्तमूर्मीन्यमुनाप्रवाहम् ॥ ३७ ॥

नन्दगोष्ठाय पथा गच्छन् स मार्गे यमुनाप्रवाहं ददर्श। प्रमदेन आढ्यंभविष्णुः अ-

नाढ्यः समृद्धो भूतः । प्रियंभावुकतां गतेन प्रियतां प्राप्तेन । ऊर्मीन् दीव्यन्तमूर्मीभिः क्रीडन्तम् ॥—ऊर्मीनिति । 'दिवः कर्म च' इति कर्मसंज्ञा । मार्गे इति । 'आधारोऽधिकरणम्' इत्यधिकरणसंज्ञायां 'सप्तम्यधिकरणे च' । आढ्यंभविष्णुरिति । प्रियंभावुकतेति । 'कर्तरि भुवः खिष्णुच्खुकञौ' आढ्यादिषूपपदेषु । गोष्ठायेति । गावस्तिष्ठन्त्यस्मिन्निति 'घञर्थे कविधानम्' इति कः । 'अम्बाम्बगोभूमि' इति षत्वम् ॥

अध्यास्त यं नक्रकुलं स्थवीयो द्विपोऽप्यमङ्क्त्वा न यमुत्ततार ।
नभस्पृगूर्मिस्तितरीषतोऽस्य हरेर्दधस्यैकपदीमदात्सः ॥ ३८ ॥

स यमुनाप्रवाहस्तितरीषतस्तरितुमिच्छतोऽस्य वसुदेवस्यैकपदीं मार्गमदात् । नभःस्पृगूर्मिः । हरेर्दधस्य हरिं दधतः । यं स्थवीयः स्थूलतरं नक्रकुलमध्यास्तावर्तत । यं द्विपोऽपि अमङ्क्त्वा नोत्ततार ॥—यमिति । 'अधिशीङ्स्थासां कर्म' इत्याधारस्य कर्मसंज्ञा । नभस्पृगिति । 'स्पृशोऽनुदके क्विन्' । अमङ्क्त्वेति । 'जान्तनशां विभाषा' इति वा नलोपाभावः । द्विप इति द्वाभ्यां करेणास्येन च पिबतीति । 'सुपि' इति योगविभागात् कः ॥

तावज्जनित्वा व्रजनाथपत्न्या मनो जनस्याभिनिविश्य देव्या ।
अभाजि निद्राच्छलतोऽर्थबोधः शक्त्या हरेः प्रागशिषद्यथा सः ॥३९॥

तावत् हरेः शक्त्या देव्या मायया व्रजनाथपत्न्या जनित्वा निद्राच्छलतो जनस्य मनो अभिनिविश्यार्थबोधो विषयज्ञानं अभाजि भग्नः । स हरिर्यथा प्रागशिषत् नियुक्तवान्॥—मन इति । 'अभिनिविशश्च' इति कर्मसंज्ञा । अभाजीति । 'भञ्जेश्च चिणि' इति वा नलोपः। 'अभञ्जि' इति वा पाठः । अशिषत् । 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङ् । 'शास इदङ्हलोः' इति इत्वम् । 'शासिवसिघसीनाम्' इति षत्वम् ॥

जहि द्विषो वत्सक शाधि लोकानित्यात्मनाशंसुरथात्मजं स्वम् ।
शौरिर्यशोदाशयने न्यधात्तामादत्त चोत्तानशयां कुमारीम् ॥ ४० ॥

अथ शौरिः स्वमात्मजं यशोदाशयने न्यधात् । तामुत्तानशयामुत्तानत्वेन शयानां कुमारीमादत्त च । हे वत्सक, द्विषो जहि वध्याः, लोकान् शाधि इति आत्मना आशंसुरिच्छुः ॥—शाधीति । 'शा हौ' इति शासः शादेशः । 'असिद्धवदत्राभात्' इति शाभावस्यासिद्धत्वात् 'हुझल्भ्यो हेर्धिः' । जहीति 'हन्तेर्जः' इति हौ जादेशः । उत्तानशयामिति । 'उत्तानादिषूपसंख्यानम्' इत्यच् । 'पुंवत्कर्मधारय—' इति पुंवत्त्वम् ॥

गत्वा दधृग्धाम ततः स्वपत्न्या निधाय पल्यङ्कतले शिशुं ताम् ।
विरत्य कृत्यान्निगलार्पिताङ्घ्रिः सुखी स तत्पूर्ववदन्ववात्सीत् ॥ ४१ ॥

स ततो धाम स्वगृहं गत्वा स्वपत्न्याः पल्यङ्कतले तां शिशुं निधाय कृत्यात् विरत्य विरतो भूत्वा पूर्ववत् तद्धामान्ववात्सीत् । दधृक् प्रगल्भः । निगलार्पिताङ्घ्रिः । सुखी स्व-

१५

स्थचित्तः ॥—तदिति । 'उपान्वध्याङ्वसः' इति कर्मसंज्ञा । दधृगिति । 'ऋत्विग्दधृक्स्रग्दिगु-ष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन्प्रत्ययान्तो निपातितः । गत्वेति । 'अनुदात्तोपदेशवन-तितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इति नलोपः । अनुस्वारोत्तमा अनुनासिका इति प्रातिशाख्ये । अनुदात्तोपदेशा अनुनासिकान्ता यमिरमिनमिगमिहनिमन्यतयः । वि-रत्येति । 'वा ल्यपि' इति मलोपः । मान्तानां विकल्पेन अन्येषां नित्यम् ॥

स्वरेण पुर्यन्तगताथ बाला सा तादृशेनातितरामरोदीत् ।
स्वापेन काष्ठैः सदृशः शयानः स यादृशाबुद्ध्यत रक्षिवर्गः ॥ ४२ ॥

अथ सा बाला तादृशेन स्वरेण अतितरां अरोदीत् । यादृशा स रक्षिवर्गोऽबुद्ध्यत । पुर्यन्तगता पुर्यन्तं गच्छता स्वरेण । स्वापेन निद्रया काष्ठैः सदृशः शयानः ॥—तादृशे-नेति । 'त्यदादिषु दृशोऽनालोचने कञ्च' इति कञ् । यादृशेति । कञ्चेति चकारात् क्विन् । सदृश इति । 'समानान्ययोश्चेति वक्तव्यम्' इति कञ् । 'दृग्दृशवतुषु' इति समानस्य सादेशः । तादृशादयो रूढिशब्दाः । पुर्यन्तगता इति । 'गमः क्वौ' 'गमादीनामिति वक्त-व्यम्' इति मलोपे तुक् ॥

नालोकयत्किंचन नाशृणोद्वा न चावदत्किंचन कंचना पि ।
जातत्वराभीतिरुपेत्य कंसं प्राबूबुधत्स प्रसवं भगिन्याः ॥ ४३ ॥

स रक्षिवर्गः, किंचन वस्तु नालोकयत्, नाश्रृणोत् वा, कंचनावपि किंचन नावदत्, जा-तत्वराभीतिः उपेत्य कंसं भगिन्याः प्रसवं प्राबूबुधत् निवेदयामास ॥—प्रसवमिति । 'कर्तुरीप्सिततमं कर्म' इति कर्मसंज्ञायां 'कर्मणि द्वितीया' । किंचनेति । 'तथायुक्तं चानी-प्सितम्' इति कर्मसंज्ञा । कंचनेति । 'अकथितं च' इति कर्मसंज्ञा । कंसमिति । 'गति-बुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' इति कर्मसंज्ञा । जातेति । 'जन-सनखनां सञ्झलोः' इत्याकारादेशः ॥

जाजायमानेन भयेन नभ्राडतायताथो सहसोत्थितश्च ।
मित्रध्रुगादीनवभाक्प्रकम्पः कंसः समाभ्रच्च जवादरिष्टम् ॥ ४४ ॥

अथो कंसो जाजायमानेन भृशं जायमानेन भयेन नभ्राट् शोभारहितः अतायत अकारि। सहसा उत्थितश्च जवादरिष्टं सूतिकागृहं समाभ्रत् गतवांश्च । मित्रध्रुक् । मित्रेभ्यो द्रुह्यति इति । आदीनवभाक् आदीनवः क्लेशः प्रकम्पः ॥—मित्रध्रुगिति । 'सत्सूद्विषद्रुहदुहयुज-विदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' इति क्विप् । आदीनवभागिति । 'भजो ण्विः' । जाजायमानेति । यङ् । 'ये विभाषा' इत्याकारः । 'जञ्जन्यमानेन' इति वा पाठः । अतायतेति यङ् । 'तनोतेर्यकि' इति वा आकारः । 'अतन्यत' इति वा पाठः ॥

कुमारजीवादमवेक्ष्य कंसं क्रव्यात्सदृक्षं तरसाजिहानम् ।
सा देवकी संपरिषस्वजेऽजां प्रलापिनी चातितरामरोदत् ॥ ४५ ॥

सा देवकी तरसा आजिहानमागच्छन्तं कंसमवेक्ष्याजां कन्यारूपां महामायां संपरिषस्वजे दृढं परिरब्धवती, अतितरां अरोदच्च । कुमारजीवादं जीवमत्तीति । क्रव्यात्सदृक्षं राक्षसतुल्यम् । प्रलापिनी प्रलपनशीला ॥—परिषस्वज इति । 'प्रादयः' 'उपसर्गाः क्रियायोगे' इत्युपसर्गसंज्ञा । 'उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्' इति षत्वम् । अवेक्ष्येति । 'गतिश्च' इति गतिसंज्ञायां 'कुगतिप्रादयः' इति समासः । जीवादमिति । 'अदोऽनन्ने' इति विट् । क्रव्यादिति । 'क्रव्ये च' इति विट् । सदृक्षमिति । 'क्सश्च वक्तव्यः' इति क्सः । 'दृक्षे चेति वक्तव्यम्' इति समानस्य सभावः ॥

सुकर्मणः क्ष्माविबुधान्हविर्दुघास्तथार्जुनीर्गाः स्म निहन्ति सत्कषम् ।
अनान्नसुत्रामककाङ्क्षितापदं न लालपा सा तमचीकरत्कृपाम् ॥ ४६ ॥

सा लालपा भृशा(?)तं कंसं कृपां नाचीकरत् कारयामास । सत्कषं सतः कषयति पीडयति इति । अनान्नसुत्रामककाङ्क्षितापदं आन्ना अन्नं लब्धारः सुत्रामा ग्रामणीः श्रेष्ठो येषां सुत्रामका देवास्तैः काङ्क्षिता आपद्यस्य । सु कर्मणः क्ष्माविबुधान्, तथा हविर्दुघा अर्जुनीर्गाश्च, निहन्ति स्म हतवान् । शोभनं कुर्वन्तीति सुकर्माणः । हविर्दुहन्तीति हविर्दुघाः ॥—तमिति । 'हृक्रोरन्यतरस्याम्' इति वा कर्मसंज्ञा । य इति । 'स्वतन्त्रः कर्ता' इति कर्तृसंज्ञा । तिङाभिहितत्वात् तृतीयाभावः । लालपेति । 'तत्प्रयोजको हेतुश्च' इति हेतुसंज्ञा कर्तृसंज्ञा च । हेतुत्वाण्णिचो निमित्तं कर्तृत्वाच्च तिङ्प्रत्ययः । नेति । 'प्राग्रीश्वरान्निपाताः' इत्यधिकृत्य 'चादयोऽसत्वे' इति निपातसंज्ञा । 'स्वरादिनिपातमव्ययम्' 'अव्ययादाप्सुपः' इति सुपो लुक् । हविर्दुघा इति । 'दुहः कब्घश्च' इति कप् । घकारश्चान्तादेशः । सुत्रामेति । 'त्रैङ् पालने' । 'आतो मनिन्क्वनिब्वनिपश्च' इति मनिन् । सुकर्मण इति । 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । सत्कषमिति । 'क्विप्च' इति क्विप् । सुत्रामकेति । 'स एषां ग्रामणीः' इति कन् ॥

शूत्कुर्वता तीव्रमसाधुकारिणा कंसेन सा रोषभयातुरीसता ।
दीनामसत्कृत्य सहोदरां हठादग्राहि कन्या जगतामलंकृतिः ॥ ४७ ॥

कंसेन सहोदरां देवकीमसत्कृत्यानादृत्य सा कन्या हठादग्राहि । तीव्रं शूत्कुर्वता । असाधुकारिणा । रोषभयातुरीसता(?)रोषभयातुरीभवता । दीनाम् । जगतामलंकृतिः॥—आतुरीसतेति । 'अभूततद्भावे' इति च्विः । 'ऊर्यादिच्विडाचश्च' इति गतिसंज्ञा । शूत्कुर्वतेति । 'अनुकरणं चानितिपरम्' इति गतिसंज्ञा । असत्कृत्वेति । 'आदरानादरयोः सदसती' इति गतिसंज्ञा । अलंकृतिरिति । 'भूषणेऽलम्' इति गतिसंज्ञा । असाधुकारिणेति । 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । सहोदरामिति । सहशब्दोऽत्र समानार्थे ॥

इमां मृदित्वा सुहृदां पुरस्कृतस्तेभ्यः कणेहत्य ददान ईप्सितम् ।
अनस्तमित्यार्दयितास्मि सुत्वनस्तामित्यदःकृत्य निरास सोऽश्मनि॥४८॥

अदःकृत्य कर्तव्याकर्तव्यं निश्चित्य तामश्मनि निरास चिक्षेप । इमां मृदित्वा संचूर्ण्य ।

[अनस्तमित्य]मृतिमप्राप्य सुत्वनो यागसंबन्धिस्नानं कृतवतो यज्वनोऽर्दयितास्मि पीडयिष्यामि । सुहृदां पुरस्कृतः पूजितः । तेभ्य ईप्सितं वस्तु कणेहत्य श्रद्धां प्रतिहत्य ददानः॥—[कणेहत्येति ।] 'कणेमनसी श्रद्धाप्रतीघाते' इति गतिसंज्ञा । पुरस्कृत इति । 'पुरोऽव्ययम्' इति गतिसंज्ञा । अनस्तमित्येति । 'अस्तं च' इति गतिसंज्ञा । अदःकृत्येति । 'अदोऽनुपदेशे' इति गतिसंज्ञा । सुत्वन इति । 'सुयजोर्ड्वनिप्' ॥

सुरवैरिवनानि भर्ष्टुरेनामनुजां वाल्यतिरोहितानुभावाम् ।
स तिरस्कृतभीः प्रमोदभूम्ना क्षिपमाणः स्म विभाति सिंहनादी ॥४९॥

एनां क्षिपमाणो विभाति स्म । सुरवैरिवनानि भर्ष्टुरनुजाम् वाल्यतिरोहितानुभावाम् । प्रमोदभूम्ना तिरस्कृतभीः सिंहनादी सिंहवन्नदन्॥—तिरोहितेति । 'तिरोऽन्तर्धौ' इति गतिसंज्ञा । तिरस्कृतेति । 'विभाषा कृञि' इति वा गतिसंज्ञा । सिंहनादीति । 'कर्तर्युपमाने' इति णिनिः । [अनुजामिति।] अनु पश्चाज्जायते इति 'अन्येष्वपि दृश्यते' इति डः। भर्ष्टुरिति । 'आर्धधातुके' इत्यधिकृत्य 'भ्रस्जो रोपधयो रमन्यतरस्याम्' इति रेफोपधयो रमादेशः ॥

अभ्रे ततो निजचिकीर्षितमालुनानां
सब्रह्मचारिमहसं नवमेघभायाः ।
तां ब्रह्मवादिविमलात्मगुहैकसिंहीं
साक्षाच्चकार सहसा सहसां स कंसः ॥ ५० ॥

ततः स कंसः सहसा तामभ्रे आकाशे साक्षाच्चकार दृष्टवान् । निजचिकीर्षितमालुनानां छिन्दन्तीं नवमेघभायाः सब्रह्मचारिमहसं श्यामवर्णाम् । ब्रह्मवादिविमलात्मगुहैकसिंहीं ब्रह्मवादिनामपूर्णमन्यताभिन्नवेद्यप्रथाशुभाशुभकर्मवासनालक्षणमलत्रयरहित आत्मबुद्धिरेव गुहा तत्राद्वितीयतया स्फुरन्तीं सहसां हसेन हासेन सह वर्तमानाम् ॥—साक्षाच्चकारेति । 'साक्षात्प्रभृतीनि च' इति गतिसंज्ञा । ब्रह्मवादीति । ब्रह्मणि(?) वदतीति णिनिः । ब्रह्मचारीति । 'व्रते' इति णिनिः । चिकीर्षितमिति । सनोऽकारस्य 'अतो लोपः' इत्यकारस्य लोपः । सिंहीमिति । जातिलक्षणो ङीष् ॥

आत्तायुधाहितजनैः सह संयतित्री
शत्रोर्मनोरथशतान्यथ बेभिदित्री ।
आकाशचारिवनिताभिरुपास्यमाना
साह स्म तन्मनसिकृत्य महान्तमर्थम् ॥ ५१ ॥

अथ सा महान्तमर्थं मनसिकृत्य निश्चित्य तमाह स्म । अहितजनैः सह संयतित्री यो द्धुमिच्छन्ती इव आत्तायुधा शत्रोः कंसस्य मनोरथशतानि बेभिदित्री भृशं भेत्री । आक

शचारिवनिताभिरुपास्यमाना ॥—मनसिकृत्येति । 'अनत्याधान उरसिमनसी' इति गतिसंज्ञा । आकाशचारीति । 'बहुलमाभीक्ष्ण्ये' इति णिनिः । आभीक्ष्ण्यं तात्पर्यम् । बेभिदित्रीति । भिदेर्यङन्तात् तृन् । 'यस्य हलः' इति साच्कस्य यकारस्य लोपः । संयतित्रीति । 'यम उपरमे' । क्विप् । 'गमः क्वौ' इत्यनुवृत्तौ 'गमादीनामिति वक्तव्यम्' इत्यनुनासिकलोपः । संयत् स्त्रियां पुंसि वा । तत इच्छार्थे क्यच् । तदन्तात् तृन् । 'क्यस्य विभाषा' इति यलोपः ॥

मित्रस्य कंस जगतां परकीयमानी
मा भूर्ममोरसि कुरुष्व वचो मदीयम् ।
भावत्कमीप्सितमिदं विफलं त्वया य-
त्पाणौकृता बत पुरा विधवा भवन्ति ॥ ५२ ॥

हे कंस, त्वं मम परकीयमानी मा भूः मां परकीयां मा मन्यस्व । जगतां मित्रस्य मदीयं वच उरसि कुरुष्व अङ्गीकुरु । भावत्कं भवदीयमीप्सितं विफलं यत् तत् त्वया पाणौ कृताः परिणीताः स्त्रियः पुरा विधवा भवन्ति आशु भविष्यन्तीत्यर्थः ॥—पाणौ कृतेति ।'नित्यं हस्ते पाणावुपयमने' इति गतिसंज्ञा । 'ते प्राग्धातोः' इति गत्युपसर्गाणां धातोः प्राक्प्रयोगः । मदीयमिति । 'त्यदादीनि च' इति वृद्धसंज्ञायाम् 'वृद्धाच्छः' । भावत्कमिति 'भवतष्ठक्छसौ' । परकीयमानीति । परशब्दाद् 'गहादिभ्यश्च' इति छः । 'कुग्जनस्य परस्य च' इति कुगागमः । मानीति । 'मनः' इति णिनिः । 'क्यङ्मानिनोश्च' इति पुंवद्भावः ॥

योऽभूच्छूरंमन्य जन्मान्तरे ते हन्ता कश्चित्सोऽधुना मर्त्यभावम् ।
मध्येकृत्य ख्यातिमान्नाशकस्त्वां शुम्भत्युच्चैः क्वापि सद्वर्णितौजाः ॥५३॥

हे शूरंमन्य, यो जन्मान्तरे ते हन्ता कश्चित् अभूत् सोऽधुना मर्त्यभावं मध्येकृत्य त्वां नाशकः त्वां नाशयितुं क्वापि देशे उच्चैः शुम्भति । ख्यातिमान् । सद्वर्णितौजाः ॥—मध्येकृत्येति । 'मध्येपदेनिवचने च' इति गतिसंज्ञा । शूरंमन्येति । 'आत्ममाने खश्च' इति खश् । अतीताः प्रत्ययाः सार्वकालिकाः । नाशक इति । नश्यतेर्ण्यन्तात् ण्वुल् । 'णेरनिटि' इति णिलोपः । वर्णितेति । वर्णयतेः क्तः । 'निष्ठायां सेटि' इति णिलोपः ॥

प्रियंकरं तं भुवि सोमयाजिनां मन्ये स्ववीर्येण हनिष्यसीति ।
ब्रुवे न तं हास्य हनिष्यसि ध्रुवं स त्वां तु राजन्नचिराद्धनिष्यति ५४

त्वं स्ववीर्येण तं हनिष्यामीति किं मन्ये मन्यसे । भुवि सोमयाजिनां प्रियंकरम् । अहं ब्रुवे—हे हास्य, त्वं तं न हनिष्यसि ध्रुवम् । हे राजन्, स तु त्वामचिरात् हनिष्यति ॥—सोमयाजिनामिति । 'भूते' इत्यधिकारो 'वर्तमाने लट्' इति यावत् । 'करणे यजः' इति णिनिः । हनिष्यसीति । 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इति मध्यमपुरुषः । हनिष्यसि मन्ये इति । 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च'

इति प्रहासे मध्यमोत्तमयोः प्राप्तयोरुत्तममध्यमौ विधीयेते । ब्रुवे इति । 'अस्मद्युत्तमः' इत्युत्तमपुरुषः । हनिष्यतीति । 'शेषे प्रथमः' इति प्रथमपुरुषः ॥

ग्रामेयकैर्नागरकैश्च लोकैर्निरीक्ष्यमाणा सह राजकीयैः ।
कर्मन्दिवन्द्या प्रकथय्य सैवं तिरोदधेऽनु स्तनयित्नुपद्याम् ॥ ५५ ॥

सा देवी एवं प्रकथय्य स्तनयित्नुपद्यां मेघमार्गमनु तिरोदधे । राजकीयैः राजसंबन्धिभिर्ग्रामेयकैर्ग्रामेभवैर्नागरकैः प्रवीणैर्नगरभवैश्च लोकैर्निरीक्ष्यमाणा कर्मन्दिवन्द्या कर्मन्दप्रोक्तं भिक्षुसूत्रमध्यायिनः कर्मन्दिनः ॥—[कर्मन्दीति] 'कर्मन्दकृशाश्वादिनिः' । अनु स्तनयित्नुपद्यामिति । 'स्तन गदी देवशब्दे' चुरादिः औणादिक इत्नुच् । ['अयामन्ताल्वाय्येत्न्विष्णुषु' इति णे] रयादेशः । पादाय हिता पद्या । 'शरीरावयवाद्यत्' । 'पद्यत्यतदर्थे' इति पद्भावः । [अन्विति ।]'कर्मप्रवचनीयाः' 'अनुर्लक्षणे' इति कर्मप्रवचनीयसंज्ञा । 'कर्मप्रवचनीययुक्ते द्वितीया' । प्रकथय्येति । कथयतेर्ल्यप् । 'ल्यपि लघुपूर्वात्' इति णेरयादेशः ग्रामेयकैरिति । 'कत्र्यादिभ्यो ढकञ्' । नागरकैरिति । 'नगरात्कुत्सनप्रावीण्ययोः' इति वुञ् । राजकीयैरिति । 'राज्ञः क च' इति छः । कश्चान्तादेशः ॥

व्यामोहमन्ववसितेन हृदा नृपोऽपि
प्रक्षीय सोऽक्षितधियौ निगलाद्विमोक्षम् ।
प्रापय्य शौरिमथ तां भगिनीं च वाक्यै-
रक्षीणसौहृदमपेतशुचावतानीत् ॥ ५६ ॥

अथ स नृपोऽपि हृदा प्रक्षीय क्षीणचित्तो भूत्वा अक्षीणसौहृदं शौरिं तां भगिनीं च निगलात् विमोक्षं प्रापय्य वाक्यैरपेतशुचावतानीत् । व्यामोहं अनु व्यामोहेन अवसितेन संबद्धेन । अक्षितधियौ अदीनमनसौ ॥—अन्विति । 'तृतीयार्थे' इति कर्मप्रवचनीयसंज्ञा । तद्योगे द्वितीया । प्रापय्येति । 'विभाषापः' इति णेर्वायादेशः । प्रक्षीयेति । 'क्षियः' इति ल्यपि दीर्घः । अक्षीणेति । कर्तरि 'निष्ठायामण्यदर्थे' इति दीर्घः । अक्षितेति । कर्तरि । निष्ठा । 'वाक्रोशदैन्ययोः' इति वा दीर्घः ॥

असकृत्कृतवृत्रहाभिषङ्गः सुकृतां सोमसुतामसोढसौख्यः ।
गृहमेत्य स भागिनेयघाती द्रुतमाजूहवदात्मनः सहायान् ॥ ५७ ॥

स गृहमेत्य द्रुतमात्मनः सहायान् आजूहवत् आह्वाययामास । असकृत्कृतवृत्रहाभिषङ्गः कृतेन्द्रपरिभवः । सुकृतां सोमसुतां सोमं सुतवतां सोमयाजिनामसोढसौख्योऽसोढतत्सुखः ॥—भागिनेयघातीति । 'कर्मणि हनः' इति णिनिः । 'कुत्सितग्रहणं कर्तव्यम्' । वृत्रहेति 'ब्रह्मभ्रूणवृत्रेषु क्विप्' । सुकृतामिति । 'सुकर्मपापमन्त्रपुण्येषु कृञः' इति क्विप् । सोमसुतामिति । 'सोमे सुञः' इति क्विप् । आजूहवदिति । ह्वयतेर्णिच् । 'ह्वः संप्रसारणम्' इति

सन्परे णौ च संप्रसारणम् । संप्रसारणस्य बलीयस्त्वात् 'शाच्छासाह्वाव्यावेपां युक्' इति प्रागेव युङ् न भवति ॥

अघपूतनाबकमुखा बलिनः परिवादिनः सततमग्निचिताम् ।
नितरामपारिमुखिकेन नृणामधिपेन तेऽथ सदकारिषत ॥ ५८ ॥

अथ अघपूतनाबकमुखास्ते नृणामधिपेन नितरां सदकारिषत सत्कृताः । बलिनः । अग्निचितामग्निं चितवतां सततं परिवादिनोऽपवादशीलाः । अपारिमुखिकेन सौमुख्यवता॥—अग्निचितामिति । 'अग्नौ चेः' इति क्विप् । सदकारिषतेति । कृञः कर्मणि लुङि 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इत्युपदेशेऽजन्तत्वाच्चिण्वद्भाव इडागमश्च । 'चिण्वद्वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति। इट चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥' इति चिण्भावयोजनम्॥

सुभृशमुपदिदीये मृत्युभीत्या मदीयं
हृदयमनु च यः स्वं वीर्यतोऽमंस्त विश्वम् ।
स्वजनमपरिमेयक्रौर्यमोजायमानं
नृपतिरथ स पश्यन्प्रण्यगादीत्प्रणेयम् ॥ ५९ ॥

अथ नृपतिः स्वजनं पश्यन् आलोकनेन संभावयन् प्रण्यगादीत् उक्तवान् । मदीयं हृदयं मृत्युभीत्या सुभृशमुपदिदीये क्षीणमभूत् । यश्च विश्वं वीर्यतः स्वमनु आत्मनो हीनममंस्त । अपरिमेयक्रौर्यम् । ओजायमानमोजस्विनं भवन्तम् । प्रणेयं वश्यम् ॥—[ओजायमानमिति ।] 'ओजसोऽप्सरसोर्नित्यम्' इति क्यङि सलोपः । अन्विति । 'हीने'इति कर्मप्रवचनीयसंज्ञा । उपदिदीये इति । 'दीङ् क्षये' । 'दीङो युडचि क्ङिति' इति युडागमः । परिमेयेति । 'माङ् माने' । 'अचो यत्' । 'ईद्यति' इत्याकारस्येकारः । प्रण्यगादीदिति । अड्व्यवायेऽपि नेर्गदादिषु णत्वमिष्यते ॥

सर्वोऽपि यानुप गुणैर्जगतीह तेषां
न स्थीयते नहि मया जननाद्वशे वः ।
तेभ्यश्च युष्मदप मे सुहृदोऽनुकार्यं
नैवास्ति वर्तनमपि स्थ च मां सहार्दाः ॥ ६० ॥

हे सुहृदः, इह जगति सर्वोऽपि जनो गुणैर्यानुप हीनो भवति मया तेषां वो वशेऽधीनत्वे आ जननात् जननमारभ्य नहि न स्थीयते । अपि तु स्थीयत एव । तेभ्यो युष्मत् अप तान् युष्मान् वर्जयित्वा मे अनुकार्यं कार्ये कार्ये वर्तनं च नैवास्ति । मामभि लक्षणीकृत्य सहार्दाः सस्नेहाः स्थ भवथ च ॥—उपेति । 'उपोऽधिके च' इति चकाराद्धीने कर्मप्रवचनीयसंज्ञा । अपेति । 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञायां 'पञ्चम्यपाङ्परिभिः' इति तद्युक्ते पञ्चमी । आ जननादिति । 'आङ्मर्यादावचने' इति कर्मप्रवचनी-

यसंज्ञा । अभीति । 'अभिरभागे' इति कर्मप्रवचनीयसंज्ञा । स्थीयते इति । 'घुमास्थागापाजहातिसां हलि' इति हलादौ क्लित्यकारस्येकारः ॥

क्षीबा ये चारण्यकाः पा(प)र्वतीया दुर्देशस्थाः सन्ति सामुद्रका वा ।
यौष्माकीणेनैव वीर्येण सर्वेऽप्यास्माकत्वं प्रापितास्तेऽक्लिशित्वा ॥ ६१ ॥

ते सर्वेऽपि यौष्माकीणेन युष्मत्संबन्धिना वीर्येण अक्लिशित्वा अनायासेन [आस्माकत्वं] अस्मदीयत्वं प्रापिताः । के । ये आरण्यका अरण्ये भवाः । पा(प)र्वतीयाः पर्वते भवाः । दुर्देशस्था यवनादयः । ये वा सामुद्रकाः समुद्रे भवाः सन्ति ते क्षीवा वीर्यादिना मत्ताः ॥—सामुद्रका इति । 'धूमादिभ्यश्च' इति वुञ् । 'समुद्रान्नावि मनुष्ये च' वुञिष्यते । आरण्यका इति । 'अरण्यान्मनुष्ये' । 'पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्' इति वुञ् । शैषिकः । पा(प)र्वतीया इति 'पर्वताच्च' [इति छः] यौष्माकीणेनेति । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ् । 'तस्मिन्नणि च युष्माकास्माकौ' इति युष्माकादेशः । आस्माकेति । अन्यतरस्यां ग्रहणादण् । तस्मिन्नस्माकादेशः । दुर्देशस्था इति । 'आतो लोप इटि च' इत्याकारलोपः । क्षीवा इति । 'अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाः' इति निपातितः ॥

स्थेयात्स्वामी शक्रतः प्रत्यशद्रुः प्रम्लेयासुश्चास्य सर्वोपसर्गाः ।
प्रग्लायासुः शत्रवश्चेति मां प्रत्याशंसध्वे गृध्नवो यूयमेव ॥ ६२ ॥

यूयमेव मां प्रति लक्षणीकृत्य इति आशंसध्वे इच्छथ । गृध्नव इच्छाधर्माणः । कथम् । अस्माकं स्वामी अशद्रुरनवसन्नः शक्रतः प्रति शक्रस्य प्रतिनिधिः सन् स्थेयात् । अस्य सर्वोपसर्गाः सर्वोपद्रवाः प्रम्लेयासुः म्लाना भूयासुश्च । शत्रवः प्रग्लायासुः ग्लानाः सन्तु च ॥—प्रतीति । 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति कर्मप्रवचनीयसंज्ञा । 'प्रतिनिधिप्रतिदाने च यस्मात्' इति तद्योगे पञ्चमी । 'प्रतियोगे पञ्चम्यास्तसिः' । स्थेयादिति । 'एर्लिङि' इति घुमास्थादीनामेकारः । प्रम्लेयासुरिति । प्रग्लायासुरिति । 'वान्यस्य संयोगादेः' इति वा एत्वम् । स्वामीति । 'स्वामिन्नैश्वर्ये' इति निपातितः ॥

कुतोऽध्युपेयाद्विपदीदृशानित्येतां धियं तावदतो विहाय ।
मृत्युं विहन्तुं मम यस्यत स्म प्राप्तामिमां यस्यत यस्यतेति ॥ ६३ ॥

अतो यूयमीदृशान् कुतः केन प्रकारेण विपत् अध्युपेयात् प्राप्नुयात् इत्येतां धियं तावद्विहाय मम प्राप्तामासन्नत्वेन श्रुतामिमां मृत्युं विहन्तुं यस्यत यस्यतेति यस्यत स्म भृशं यत्नं कुरुत ॥—अधीति । 'अधिपरी अनर्थकौ' इति कर्मप्रवचनीयसंज्ञा । धात्वर्थव्यतिरेकेणार्थस्यानभिधानात् संज्ञायाः प्रयोजनं स्वरविषयम् । विहायेति । 'न ल्यपि' इति घुमास्थादीनामित्वाभावः । यस्यत स्मेति । 'अधीष्टे च' इति स्मे लोट् ॥

अतिसक्ततयैव मामकीने हितकृत्ये मम सा हि भागिनेयी ।
भुवि सुस्थमुपादिशद्रिपुं मे वितथाभूदशरीरिणी तु वाणी ॥ ६४ ॥

सा मम भागिनेयी स्वसुरपत्यं मामकीने हितकृत्येऽतिसक्ततयैव मे रिपुं भुवि सुस्थमुपादिशत् । अशरीरिणी तु वाणी तु वितथा असत्या अभूत् ॥—सुस्थमिति । 'सुः पूजायाम्' इति कर्मप्रवचनीयसंज्ञा । अतिसक्ततयेति । 'अतिरतिक्रमणे च' इति चकारात् पूजायां कर्मप्रवचनीयसंज्ञा । मामकीने इति । खञि 'तवकममकावेकवचने' इति अस्मदो ममकादेशः ॥

प्रणिजगदुरथासुरा नरेन्द्रं नृप किमिदं भवति ह्यधि त्रिलोकी ।
कमलभवमपि स्वजेत भीतिस्त्वयि रुषिते किमुताल्पकं कृतान्तम् ६५

अथ असुरा नरेन्द्रं प्रणिजगदुरुक्तवन्तः । हे नृप, किमिदं वैक्लव्यम् । त्रिलोकी भवति अधि हि भवत्स्वामिकं त्रैलोक्यम् । त्वयि रुषिते कमलभवमपि भीतिः स्वतेज आलिङ्गितुं संभाव्यते । अल्पकं कृतान्तं किमुत ॥—अपीति । 'अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु' इति संभावनायां कर्मप्रवचनीयसंज्ञा । लिङ् च संभावने । अधीति । 'अधिरीश्वरे' इति कर्मप्रवचनीयसंज्ञा । भवतीति 'यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी' इति सप्तमी ॥

ब्रूमो वयं संप्रति पश्य तावद्द्वित्रैर्दिनैरेव भवन्तमेत्य ।
निजेन दण्डेन भियापमित्य याचिष्यति स्वं न स जीवितं किम् ॥६६॥

वयं संप्रति ब्रूमः । पश्य तावत् । स कृतान्तो भिया द्वित्रैर्दिनैरेव भवन्तमेत्य निजेन दण्डेनापमित्य प्रहृत्य स्वं जीवितं किं न याचिष्यति । कृतान्तो भवन्तं याचित्वा निजेन दण्डेन भवदधीनं स्वजीवितं व्यतिभास्यति व्यतिहरिष्यते ॥— अपमित्येति । 'उदीचां माङो व्यतीहारे' इति उत्तरकाले क्त्वा विधीयते । गतिसमासे 'मयतेरिदन्यतरस्याम्' इतीत्वम् ॥

विप्रैः सुराविक्रयिणां विरोपिभिश्चिन्वद्भिरग्नीन्रथचक्रचिन्मुखान् ।
आहत्यकर्मा यदि सोऽन्यभुव्यभूत्तस्याधिकुर्मः क्ष मञ्जसोष्णकाः॥६७॥

स कन्यकोक्त्या द्योतितो विष्णुर्यद्यन्यभुव्यभूत् तर्हि अञ्जसा तस्य क्षयमधिकुर्मः । विप्रैराहत्यकर्मा । सुराविक्रयिणां विरोपिभिः रथचक्रचिन्मुखान् अग्नीन् चिन्वद्भिरुष्णका उष्णमिव शीघ्रं कुर्वन्तः । अधिकुर्मः॥—क्षयमिति । 'विभाषा कृञि' इत्यधेर्वा कर्मप्रवचनीयसंज्ञा । कर्मण्येवात्र द्वितीया । रथचक्रचिदिति । 'कर्मण्यग्न्याख्यायाम्' इति क्विप् । रथचक्रवच्चीयत इति संज्ञैषा । 'रथचक्रचितं चिन्वीत भ्रातृव्यवान्' इति श्रुतिः । सुराविक्रयिणामिति । 'कर्मणीनि विक्रयः' इति इनिः । कुत्सानिमित्तमिह कर्म । उष्णका इति । 'शीतोष्णाभ्यां कारिणि' इति कन् । अभूदिति । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' ॥

भूतार्थदृश्वन्नथ राजयुध्वन्नस्माभिरेतैः सहकृत्वभिस्ते ।
न खल्वसाध्यो दिविजोऽपि सोऽजः किमु कशीयो मनुजत्वमीतः ६८

अयि भूतार्थदृश्वन् परमार्थं दृष्टवन्, राजयुध्वन् राज्ञो योधितवन् तैरस्माभिः सहकृत्वभिः सहकृतवद्भिः सहायभूतैर्दिविजोऽपि सोऽजस्तेन खलु असाध्यः, अपि तु मारयितव्य एव । कशीयः कृशतरं मनुजत्वमीतः प्राप्तः । किमु ॥—भूतार्थदृश्वन्निति । कर्मण्युपपदे 'दृशेः क्वनिप्' । राजयुध्वन्निति । 'राजनि युधिकृञः' । युधिरन्तर्भावितण्यर्थत्वात् सकर्मकः । युध्यमानं राजानं यदापरः प्रेरयति युध्यस्वेति तदा युधिः प्रयोज्येन सकर्मकः । सहकृत्वभिरिति । 'सहे च' इति क्वनिप् । दिविज इति । 'सप्तम्यां जनेर्डः' । 'प्रावृट्शरत्कालदिवां जे' इत्यलुक् । अज इति । अन्येष्वपि 'दृश्यते' इति डः । ईत इति । 'ई गतौ' । 'निष्ठा' इति भूते क्तः ॥

त्वदनुजात्मजा साथवा प्रजा कथमिवैद्वपुस्तादृशं क्षणात् ।
हृतविभूतयः शाम्बरीं सुरा न किमदीदृशन्मेह विश्वसीः ॥ ६९ ॥

अथवा त्वदनुजात्मजा सा प्रजा कथमिव तादृशं वपुः क्षणादैत् प्राप्ता । त्वया हृतविभूतयः सुराः शाम्बरीं मायां तादृशीं न किमदीदृशन् अदर्शयन् । इह अस्मिन्नर्थे मा विश्वसीः विश्वासं कार्षीः ॥—आत्मजेति । 'पञ्चम्यामजातौ' इति डः । प्रजेति । 'उपसर्गे च संज्ञायाम्' इति डः । त्वदनुजेति । त्वामनुजाता त्वदनुजा । 'अनौ कर्मणि' इति डः । अदीदृशन्निति । 'लुङि' इति भूते लुङ् । ऐदिति । 'अनद्यतने लङ्' 'आडजादीनाम्' इत्याडागमः । विश्वसीरिति । 'न माङ्योगे' इति अडाटोरभावः ॥

ये यज्वानः शुश्रुवांसः श्रुतीनामर्थाञ्छान्तिं सर्वदोपेयिवांसः ।
तेषां घातः स्याज्जरद्ब्राह्मणानां घातो विष्णोस्ते यदस्यैकमूर्त्तिः ॥७०॥

ये जरद्ब्राह्मणा यज्वान इष्टवन्तः श्रुतीनामर्थान् शुश्रुवांसः श्रुतवन्तः, सर्वदा शान्तिं मनोजयमुपेयिवांसः प्राप्तवन्तश्च, तेषां जरद्ब्राह्मणानां वृद्धानां ब्राह्मणानां घातो विष्णोर्घातः स्यात् । ते अस्य एकमूर्तिः प्रधानशरीरं यत् ॥—जरदिति । 'जीर्यतेरतृन्' । शुश्रुवांस इति । 'भाषायां सदवसश्रुवः' इति लिटः क्वसुः । उपेयिवांस इति । 'उपेयिवाननाश्वाननूचानश्च' इति निपातनम् । ब्राह्मणानामिति । ब्रह्मणोऽपत्यार्थेऽण् । अजातावेव [लि]टि लोपः ॥

खादित्वा तृणचयमाशितंभवं या
निर्मन्तुं ददति हविः समांसमीनाः ।
प्रष्ठौहीरवनिप कूलमुद्रुजास्ता
हन्मो गाः परिभविनीः स्तनंधयीर्वा ॥ ७१ ॥

हे अवनिप, ता गाश्च हन्मः । समांसमीनाः प्रत्यब्दं सूयमानाः । प्रष्ठौहीः बाल्य एव गर्भिणीः । स्तनंधयीः अतिबालाश्च । कूलमुद्रुजाः कूलं भिन्दतीः । परिभविनीः अस्मत्परिभव

करीः'। या आशितंभवं तृप्तिसाधनभूतं निर्मन्तुं निरपराधं तृणचयं खादित्वा हविर्ददति॥—स्तनंधयीरिति । 'धेट् पाने' । 'नासिकास्तनयोर्ध्माधेटोः' इति खश् । धेटष्टित्वात् 'टिड्ढाणञ्–' इति ङीप् । कूलमुद्रुजा इति । रुजो भङ्गे । 'उदि कूले रुजिवहोः' इति खश् । आशितंभवमिति । 'आशिते भुवः करणभावयोः' इति करणे खच् । आशितस्तृप्तो भवत्यनेनेति । प्रष्ठौहीरिति । पञ्चमे षष्ठे वा वर्षे वहतीति । 'वहश्च' इति ण्विः । उपधावृद्धिः । प्रष्ठवाहशब्दात् ङीप् । 'वाह ऊठ्' इति वकारस्य संप्रसारणम् । 'एत्येधत्यूठ्सु' इति ऊठि पूर्वपरयोर्वृद्धिः । समांसमीना इति । 'समां समां विजायते' इति खः ॥

द्वैरात्रिका ये शिशवस्त्र्यहीना मास्या भुवि द्वैसमिकाः समीनाः ।
तान्पञ्चमास्यानपि च त्रिवर्षान्सर्वान्प्रहन्मोऽद्य तवापदर्थम् ॥ ७२ ॥

वयमद्य तव आपदर्थमापन्निवृत्तये तान् सर्वान् शिशून् प्रहन्मः । कान् । भुवि ये द्वैरात्रिका द्वेरात्री भूताः । त्र्यहीनाः । त्रीण्यहानि भूताः । मास्याः मासं भूताः । द्वैसमिकाः द्वैसमे भूताः । समीनाः समा भूताश्च शिशवः सन्ति तान् । तथा पञ्चमास्यान् पञ्च मासान् ता[न्] । अपि च त्रिवर्षान् त्रीणि वर्षाणि भूतांश्च ॥—मास्यानिति । मासाद्वयसि यत्खञौ' इति यत् । पञ्चमास्यानिति । 'द्विगोर्यप्' । समीना इति । 'समायाः खः' । द्वैसमिका इति । 'द्विगोर्वा' इति खाभावपक्षे ठञ् । द्वैरात्रिका इति । 'रात्र्यहःसंवत्सराच्च' इति ठञ् । त्र्यहीना इति । तेनैव खः । त्रिवर्षानिति । 'चित्तवति नित्यम्' इति खठञोर्लुक् ॥

न तेऽस्त्यभिज्ञा सहकुष्ठलाधिपं विजेष्यते संयति राजकं भवान् ।
न वाभिजानासि विकत्थिनः सुरान्यदप्रतिस्तब्धपराक्रमोऽजयः ॥७३॥

ते अभिज्ञा स्मृतिर्नास्ति किम् । भवान् संयति सहकुष्ठलाधिपं कुत्सितस्थलाधिपतिसहितं तं राजकं राजसमूहं विजेष्यते जितवान् । नाभिजानासि वा । विकत्थिनः श्लाघाशीलान् सुरान् अप्रतिस्तब्धपराक्रमोऽनभिभूतपराक्रमः सन् अजय इति यत् ॥—विजेष्यते इति । 'अभिज्ञावचने लृट्' इत्यनद्यतनभूते लृट् । अजय इति । 'न यदि' इति लृडभावे लङ् । कुष्ठलेति । 'विकुशमिपरिभ्यः स्थलम्' इति षत्वम् । अप्रतिस्तब्धेति । 'प्रतिस्तब्धनिस्तब्धौ च' इति षत्वाभावो निपात्यते ॥

इदमपि तवाभिज्ञातं यत्क्षणे[न] दिशांपती-
नपि युधि भवान्भङ्क्ष्यत्येषां हरिष्यति वा वसु ।
तितनिषसि यत्कस्त्वं श्वासो निवारयिता ततः
परिपरि परं धर्माधर्मावपास्य बलीयसः ॥ ७४ ॥

इंद तवाभिज्ञातमपि भवान् युधि दिशांपतीन् अपि क्षणेन भङ्क्ष्यति भग्नवान् । एषां वसु हरिष्यति वा हृतवांश्च । यत् तितनिषसि ततः तस्मात् श्वासः प्राणन् सन् को नि-

वारयिता न कोऽपि । धर्माधर्मौ परं केवलं बलीयसः परिपरि अतिबलवन्तं परिहृत्य व-
र्तेते इत्यपास्य जानीहि ॥—भङ्क्ष्यति हरिष्यतीति । 'विभाषा साकाङ्क्षे' इति यच्छब्द-
सहिते केवले चाभिज्ञावचने उपपदे वा लृट् । तत इति । 'वारणार्थानामीप्सितः' इत्यपा-
दानसंज्ञा । श्वास इति । 'श्याद्व्यधास्रुसंस्रुवतीणवसावहलिहश्लिषश्वसश्च' इति णः । परि-
परि इति । 'परेर्वर्जने' 'असमासे चेति वक्तव्यम्' इति द्वित्वम् 'पञ्चम्यपाङ्परिभिः' ॥

अर्ध्यां शंभोर्भावयित्वा मृडानीं लेभे तस्माद्रावणः प्रागभीष्टम् ।
आयान्त्यायःशूलिकान्पार्श्वकान्वा संप्रत्यर्था पश्य न न्यायवृत्तान् ॥७५॥

प्राक् रावणो विश्रवसोऽपत्यं शंभोरर्ध्यामर्धे वर्तमानां मृडानीं भावयित्वा तस्माद-
भीष्टं लेभे । संप्रति आयःशूलिकान् तीक्ष्णोपायेनार्थानन्विच्छतः पार्श्वकान् वा अनृ-
जुना उपायेनार्थानन्विच्छतश्च । अर्था आयान्ति । पश्य । न तु न्यायवृत्तान् ॥—अर्ध्यामिति ।
'अर्धाद्यत्' शैषिकः । पार्श्वकानिति । 'पार्श्वेनान्विच्छति' । इति कन् । आयःशूलिका-
निति । 'अयःशूलदण्डाजिनाभ्यां टक्ठञौ' । शंभोरिति । डप्रकरणे 'मितद्र्वादिभ्य उपसं-
ख्यानम्' इति डः । 'भू प्राप्तौ' आत्मनेपदी । शं कल्याणं भूतवान् लब्धवानिति । रावण इति ।
'शिवादिभ्योऽण्' इति गणे 'विश्रवणरवणौ' इति पाठात् विश्रवसो रवणादेशः ॥

निग्राहिता सोऽपि सुधारसान्धो दर्शिष्यते येन पतन्पदोस्ते ।
जगद्भुजाविक्रमजेन तेऽदः प्रभावभूम्ना परिभाविषीष्ट ॥ ७६ ॥

यः पुरुषस्ते पदोः पतन् न दर्शिष्यते स सुधारसान्धः सुधारसाशनोऽपि निग्राहिता
हनिष्यते । भवद्भुजाविक्रमजेन प्रभावभूम्ना अदो जगत् परिभाविषीष्ट परिभूयताम् ॥—वि-
क्रमजेति । 'पञ्चम्यामजातौ' इति डः । दर्शिष्यत इति । 'स्यसिच्' इति चिण्वद्भावः ।
परिभाविषीष्टेति । सीयुटि । निग्राहितेति । तासौ ॥

इत्युक्तवत्यै स सहायतायै प्रीणन्पराध्र्यानि [वसूनि] वाग्मी ।
ददेऽवराध्र्यानि च राष्ट्रियानि द्वैप्यानि मध्यानि च पार्वतानि ॥ ७७॥

स इति उक्तवत्यै सहातायै सहायस्तं समूहाय प्रीणन् तां तोषयितुं वसूनि रत्नानि ददे
दत्तवान् । वाग्मी प्रशस्तवाक् । कानि । पराध्र्यानि उत्तमाध्र्यानि अवराध्र्यानि अधमा-
र्ध्यानि मध्यानि समानि राष्ट्रियानि राष्ट्रे भवानि द्वैप्यानि समुद्रसमीपद्वीपे भवानि पार्वतानि
पर्वते भवानि च ॥—[पार्वतानि] इति । 'विभाषामनुष्ये' इति छाभावपक्षेऽण् । राष्ट्रियाणीति ।
'राष्ट्रावारपाराद् घखौ' । पराध्र्यानीति । अवराध्र्यानीति 'परावराधमोत्तमपूर्वाच्च' इति
यत् । मध्यानीति । मध्यशब्दात् 'अ सांप्रतिके' इत्यप्रत्ययः । द्वैप्यानीति । 'द्वीपादनु-
समुद्रं यञ्' । वाग्मीति । 'वाचो ग्मिनिः' मत्वर्थीयः ॥

देवद्रीचा दोःपटिम्नाप्रदिष्ठानत्यन्तीनांस्तांस्तथादिश्य वश्यान् ।
शश्वद्विष्णोर्घातुकान्भीरुकः सन्स न्यध्यासीत्तन्मयं विश्वमेतत् ॥ ७८ ॥

स तान् तथा आदिश्य शश्वत् विष्णोर्भीरुकः सन् एतत् विश्वं तन्मयं विष्णुमयं न्यध्यासीत् दृष्टवान् । देवध्रीचा देवान् प्राप्नुवता दोःपटिम्ना सामर्थ्येन अभ्रदिष्ठान् अमृदुतमान् । अत्यन्तीनान् अत्यर्थं गमनशीलान् । वश्यान् वशंप्राप्तन् । घातुकान् दैत्यहननशीलान् ॥—अत्यन्तीनानिति । 'अवारपारात्यन्तानुकामंगामी' इति । खः । वश्यानिति । 'वशं गतः' इति यत् । भीरुक इति । 'भियः क्रुकन्निति वक्तव्यम्' । 'भीलुकः' इति वा पाठः ॥

अध्वनीनकथितान्नुश्रृण्वन्नन्दगोपसुतसंभवजन्यान् ।
उत्सवान्व्रजपदे हरिमर्च(य)ञ्जायया स मुमुदे वसुदेवः ॥ ७९ ॥

स वसुदेवो जायया सह मुमुदे । व्रजपदे अध्वनीनकथितान् नन्दगोपसुतसंभवजन्यान् तेन जातान् उत्सवान् अनुश्रृण्वन् हरिमर्च(य)न् पूजयन् ॥—अध्वनीनेति । 'अध्वनो यत्खौ' । अनुश्रृण्वन्निति । 'श्रु श्रवणे' । अस्माल्लट् । 'लः परस्मैपदम्' इति परस्मैपदसंज्ञा । 'शेषात्कर्तरि परस्मैपदम्' । मुमुद इति । 'तङानावात्मनेपदम्' इत्यात्मनेपदसंज्ञा । 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः' इति प्रथमपुरुषसंज्ञा । 'शेषे प्रथमः' इति प्रथमपुरुषः । 'तान्येकवचनद्विवचनबहुवचनान्येकशः' इत्येकवचनसंज्ञा । 'द्व्येकयोर्द्विवचनैकवचने' इत्येकवचनम् । स इति । 'सुपः' इति वचनसंज्ञा । 'विभक्तिश्च' इति सुपां तिङां च विभक्तिसंज्ञा । 'त्यदादीनामः' इति विभक्तावकारादेशः । जाययेति । 'आङि चापः' इत्येकारः । 'परः संनिकर्षः संहिता' इति संहितासंज्ञायां 'एचोऽयवायावः' इत्ययादेशः । वसुदेव इति । 'विरामोऽवसानम्' इत्यवसानसंज्ञायां 'खरवसानयोर्विसर्जनीयः' ॥

इति वासुदेवकृते वासुदेवविजयकाव्ये पदचन्द्रिकाख्यया व्याख्यया समेतस्तृतीयः सर्गः ।

धातुकाव्यम् ।

स्मरत हरेर्मधुरतरं मुरलीनिनदामृतं हि शब्दमयम् ।
पदयुगलं च भवान्या महिषारेर्मुक्तिनिलयवासिन्याः ॥
गुरुपादाब्जसंसेवानितान्तविमलाशयैः ।
सतीर्थ्यैरत्र लिख्यन्ते धातुकाव्यार्थलोचनाः ॥

अथ वासुदेवकविविरचितस्य [वासुदेवविजयाभिधस्य] काव्यरत्नस्य शेषपरिपूरणाय चिकीर्षितं प्रतिजानीते—

उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान्धातून्क्रमेणैव हि माधवाश्रयात् ॥ १ ॥

वासुदेवेन प्राक् पाणिनिसूत्रमण्डलमुदाहृतम् । अद्यापरस्तदूर्ध्वतो धातूनुदाहरति इत्य-

न्वयः। वासुदेवो नाम केरलेषु पुरुवनग्रामजन्मा कश्चिद् द्विजन्मा। पाणिनेः सूत्राणि पाणिनिसूत्राणि तेषां मण्डलं समूहः उदाहृतमुदाहरणैः प्रकाशीकृतम्। अपर इत्यौद्धत्यपरिहाराय नामानुक्तिः। तदूर्ध्वत इति सप्तम्यर्थे तसिः। तस्य सूत्रोदाहरणस्योर्ध्वभागे धातूनुदाहरतीत्यर्थः। अन्योदाहरणकाव्येषु क्वचिदप्यदृष्टमिदमितीहातिशयं प्रतिपादयति—क्रमेणैवेति। अयं भावः—अस्ति तावद्दुर्लभप्रयोगाणामखिलधातूनामक्रमेणाप्येकत्रावगमे जिज्ञासूनां महानुपयोगः। इह पुनः क्रमेणैवोदाहरणादेतस्मिन् प्रकरणभागे एतावति योऽयं धातुरिति सम्यगवगम्यमाने श्रोतृजनस्य कौतुकातिशयः किमु वक्तव्य इति। हिशब्देन च क्रमेणैवेत्यस्यानुद्भूतत्वं सूचयतान्यान्यपि गणविभजनादीनि दुष्करतराण्यद्भुतान्यत्र भविष्यन्तीति सूचयति॥ ननु धातुपाठानां बहुत्वात् कोऽयं क्रमोऽस्मिन्नाश्रीयत इत्यत्राह—वृकोदरोदितानिति। भीमसेनप्रणीतानित्यर्थः। न च भीमसेनप्रणीतत्वं प्रसिद्धिमात्रत्वादप्रामाणिकमिति मन्तव्यम्। 'तस्माद् भीमसेनस्यायमेव पाठो युक्तः' इति पुरुषकार एव कथितत्वात्। ननु भीमसेनपाठस्यापि मैत्रेयादिधातुवृत्तिभेदकृतैः मतभेदादिभिः व्याकुलत्वाद् दुःसाधमुदाहरणमित्याशङ्क्याह—माधवाश्रयादिति। माधवो नाम धातुवृत्तिकारः। तेन तद्रचितो ग्रन्थो लक्षणीयः। तद्रूपस्याश्रयस्यावलम्बस्य सद्भावादयमुदाहरति। अतो न दुःसाधत्वमिति। किं च। माधवस्य लक्ष्मीवल्लभस्य मधुकुलावतीर्णस्य पूर्णब्रह्मणः आश्रयात् सर्वात्मना शरीरकरणात्[1] तत्करुणयैवेदं क्रियते। अतो न दुःसाधत्वमिति भावः। अपि च। माधव एवाश्रयः प्रतिपाद्यः। तस्माद्धेतोरेवेदं क्रियते। अतो माधवविषयकथाकथनचिन्तनाद्यर्थमेव क्रियमाणत्वात् सदोषमपि खेदाय न भवतीति भावः। एवं च माधवाश्रयादित्यनेनैवेष्टदेवतानुसरणमपि कृतं वेदितव्यम्। 'कंसहिंसाप्रबन्धार्थौ वीरभक्त्यादयो रसाः। त्रिभिर्दिनैः कृतं कर्म त्रिभिः सर्गैश्च कथ्यते॥ अक्रूरयोगो यात्रादिचापच्छेदान्तचेष्टितम्। मल्लोद्योगादिकं सान्तपर्यन्तं च त्र्यहे कृतम्॥ धातुपाठे च भूवादिभूयान् भवति तत्र च। अगणः प्रथमो भागो द्यूताद्यो गणवान् परः॥ अनयो रगणो भागः प्रथमः सर्ग उच्यते। द्वितीयभागमारभ्य तुदाद्यन्तं द्वितीयके॥ रुधादितश्चुराद्यन्तं तृतीयेनोपवर्ण्यते। व्यज्यते गणभेदादिः कथाभेदादिलाञ्छनैः॥ तात्पर्यभेदाद्योज्यन्ते तुल्यार्था अपि धातवः॥'

अथैवंभूतं काव्यमारभते—

स गान्दिनीभूरथ गोकुलैधितं स्पर्धालुधीगाधितकार्यबाधिनम्।
द्रक्ष्यन्हरिं नाधितलोकनाथकं देधे मुदास्कुन्दितमन्तरिन्द्रियम्॥ २॥

अथ स गान्दिनीभूर्हरिं द्रक्ष्यन् अन्तरिन्द्रियं मुदास्कुन्दितं देधे। अथ श्रीकृष्णानयनार्थं कंसनियोगानन्तरं स तत्तादृशभगवद्भक्तिशालि गान्दिनीतो भवत्युत्पद्यते इति गान्दिनीभूरक्रूरः। गान्दिनी श्वफल्कभार्या। द्रक्ष्यन्निति भविष्यत्प्रत्ययस्यात्रासन्नभविष्यत्काल-

१. 'शरणीकरणात्' पाठः. २. 'माश्रीत्य' पाठः.

परत्वाद् द्रष्टुमारब्ध(?)इत्यर्थः । भोक्ष्यमाण आचरतीतिवत् । अन्तरिन्द्रियं मनः । तदानीमाभ्यन्तरतमे भगवद्रूपे एवात्याविष्टत्वेन बहिर्मनोवृत्तीनामसत्प्रायत्वात् अन्तरिन्द्रियत्वमेव मनसो जातमिति भावः । मुदि संतोषे समुद्रस्थानीये आस्कुन्दितमाप्लुतं स्नातं निमग्नमित्यर्थः । मुदायां स्कुन्दितमिति वा । हलन्तादपि वा टाप् स्यात् इत्याकारान्तस्यापि मुदाशब्दस्य सद्भावात् । अथवा मुदा हेतुना उत्प्लुत्य गतं कृतनर्तनमित्यर्थः । यद्वा मुदा कर्त्र्या उद्धृतमुन्नमितं वर्धितमिति यावत् । कीदृशं हरिं इत्यत्राह—गोकुलैधितं गोकुले प्रवृद्धम् । गोकुलं गोष्ठः । स्पर्धालुधीगाधितकार्यबाधिनं स्पर्धालूनां स्पर्धावतां धियि बुद्धौ गाधितं प्रतिष्ठितं लब्धस्थानमित्यर्थः । लिप्सतं वा कार्यं बाधितुं शीलं यस्य तम् । नाधितलोकनाथकं नाधितलोकस्य उपतप्तजनस्य नाथकमीशितारं रक्षकमित्यर्थः । नाधितस्य प्रार्थितस्य निजलोकस्य आशीरूपेणानुग्रहितारं वा ॥—गान्दिनीभूरिति । गान्दिन्या भवत्युत्पद्यत इति गान्दिनीभूः । **१ भू** सत्तायाम् । उदात्तः परस्मैभाषः । अस्मात् 'क्विप् च' इति क्विप् । एधितमिति । **२ एध** वृद्धौ । एतदादयः कत्थान्ता उदात्ता अनुदात्तेतः । अस्मात् 'गत्यर्थाकर्मक–' इत्यादिना कर्तरि क्तः । स्पर्धालुरिति । **३ स्पर्ध** संघर्षे । संघर्षः पराभिभवेच्छा । पराभिभवस्य धात्वर्थान्तर्भावादकर्मकः । अस्माद् 'गुरोश्च हलः' इत्यप्रत्यये स्पर्धा । स्पर्धां लात्यादत्ते मितद्वादित्वाद्डुः । **४ गाधृ** प्रतिष्ठालिप्सयोर्ग्रन्थे च । आत्मयापनास्थानलाभश्च प्रतिष्ठा । एकत्र स्थापनं संदर्भो वा ग्रन्थः । संदर्भः शब्दविषयोऽर्थविषयोऽपि । अस्मात् कर्तरि कर्मणि वा क्तः । कार्यबाधिनमिति । **५ बाधृ** लो[1]डने । लोडनं प्रतिघातः । अस्मात् 'सुप्यजातौ णिनिः' इति णिनिः । नाधितलोकनाथकमिति । **६ नाधृ ७ नाथृ** याच्ञोपतापैश्वर्याशीःषु । ऐश्वर्यमाधिपत्यं नियन्तृत्वं च । 'नृति-नन्दि-नर्दि-नक्कि-नाटि नाधृ-नाथृ-नृवर्जिताः सर्वे नादयो णोपदेशाः' इत्युक्त्या द्वावप्यणोपदेशौ । आद्यो णोपदेश इत्येके । आद्यात् कर्तरि कर्मणि वा क्तः द्वितीयाण् ण्वुल् । देधे । **८ द्‌ध** धारणे । लिट् । स्कुन्दितम् । **९ स्कुदि** आप्रवणे । आप्रवणमाप्लवनमुत्प्लुत्य गमनं वा । उद्धरणं वा । अस्मादिदित्वान्नुमि प्राग्वत् क्तः ॥

यद्यस्य भगवतीयान् प्रेमातिशयः तर्हि कथं पूर्वमेव न प्रस्थितवान् इत्यत्राह—

प्रश्विन्दिताशं यशसा पुराप्यसौ विवन्दिषुस्तं नतभन्दिनं विभुम् ।
स्वमन्दिरात्स्पन्दितुमेव नाशकत्कंसात्परिक्लिन्दितसज्जनाद्भिया ॥ ३ ॥

अपिरुभयत्र योजनीयः । असौ पुरा अपि तं विभुं विवन्दिषुरपि स्वमन्दिरात् स्पन्दितुमेव नाशकत् । असावक्रूरः । पुरापि पुरैव विवन्दिषुर्वन्दितुमिच्छुः । इहापिर्विरोधे । स्पन्दितुं किंचिदपि चलितुं नाशकत् न शक्तोऽभूत् । कीदृशम् । यशसा प्रश्विन्दिताशं प्रश्विन्दिताः सम्यग्धवलीकृता आशा दिशो येन तम् । नतभन्दिनं नतान् नमनकर्तॄन् भन्दयितुं सुखयितुं कल्याणवतः कर्तुं वा शीलं यस्य तम् । कंसात् भिया । हेतौ तृतीया ।

---

१. 'लोटने' पाठः.

कीदृशान् । परिक्लिन्दितसज्जनात् । परिक्लिन्दिताः परिदेविताः सज्जना येन तस्मात् ॥—श्विन्दितेति । १० **श्विदि** श्वैत्ये । णिजन्तात् कर्मणि क्तः । विवन्दिषुरिति । ११ **वदि** अभिवादनस्तुत्योः । प्रणतिपूर्वकमाशीर्वचनं नतिमात्रं वाभिवादनम् । अस्मात् सन्नन्तात् 'सनाशंसभिक्ष उः' इत्युप्रत्ययः । नतभन्दिनमिति । १२ **भदि** कल्याणे सुखे च । कल्याणं कल्याणवद्भावः । अस्माण्णिजन्ताण् णिनिः । मन्दिरादिति । १३ **मदि** स्तुतिमोदमदस्वप्नकान्तिगतिषु । स्वप्न आलस्यम् । अस्मादधिकरणार्थे 'इषि-मदि-मुदि-खिदि-श्विदि-भिदि-मन्दि' इत्यादिना किरच् । स्पन्दितुमिति । १४ **स्पदि** किंचिच्चलने । तस्मात् 'शक्धृष–'इत्यादिना तुमुन् । परिक्लिन्दितेति । १५ **क्लिदि** परिदेवने । अस्माण्णिजन्तात् कर्मणि क्तः ॥

अस्य संतोषातिशयं दर्शयति—

मुदा स चेतो ददृदे चिरं हरौ स्वादात्सुरैः स्वर्दितमङ्गलोर्दने ।
अकूर्दतेवास्य पुरः स्वखूर्दकैर्वनान्तगूर्दी रिपुगोदसूद्यसौ ॥ ४ ॥

स मुदा चिरं हरौ चेतो ददृदे । मुदा हेतुना ददृदे समर्पितवान् । स्वादात् माधुर्यात् हेतोः सुरैः स्वर्दितमङ्गलोर्दने स्वर्दितानि आस्वादितानि मङ्गलरूपाण्यूर्दनानि क्रीडनानि यस्य तस्मिन् । मनोलयस्यातिशयमाह—असौ अस्य पुरः स्वखूर्दकैरकूर्दतेव । असौ हरिः स्वखूर्दकैः स्वकीयैः क्रीडकैर्वयस्यैरित्यर्थः । सहार्थे तृतीया । अकूर्दत क्रीडितवान् । वनान्तगूर्दी वनान्ते वनमध्ये गूर्दितुं क्रीडितुं शीलं यस्य सः । रिपुगोदसूदी रिपूणां गोदः क्रीडां सूदितुं हिंसितुं शीलं यस्य ॥—मुदा । १६ **मुद** हर्षे । अस्मात् संपदादिक्विप् । ददृदे । १७ **दद** दाने । धारणे च कल्पद्रुमे । अस्माल्लिटि 'न शसदद–' इत्येत्वाभ्यासलोपाभावः । स्वादात् । १८ **स्वद** १९ **स्वर्द** आस्वादने । आस्वादमनुभवः । 'धात्वादेः षः सः' । स्वदेर्घञ् । स्वर्दितेति कर्मणि क्तः । अनयो राघः षोपदेशः । अन्यो नः । 'अदन्त्य(?)पराः सादयः षोपदेशाः । स्मिङ्-स्विदि-स्वदि-स्वञ्जि-स्वपयश्च' इत्युक्तेः । ऊर्दनेति २० **उर्द** माने क्रीडायां च । अस्माल्ल्युटि । 'उपधायां च' इति दीर्घः । अकूर्दतेति २१ **कुर्द** २२ **खुर्द** २३ **गुर्द** २४ **गुद** क्रीडायामेव । कुर्देर्लङ् । खूर्दकैः खूर्देर्ण्वुल् । वनान्तगूर्दी । रिपुगोदसूदी । गूर्देर्णिनिः । गुदेश्च घञ् । २५ **षूद** क्षरणे । निःक्षरणं तदर्हिंसार्थेऽप्यस्ति अस्माण्णिनिः ॥

गभीरनिह्रादमथास्थितो रथं ह्लदादनुस्वादितकृष्णसत्कथः ।
पृदाकुजिद्वेगमयत्नतो ययौ वियोयुतत्काननजोतिनाध्वना ॥ ५ ॥

अथ स रथमास्थितोऽयत्नतो वियोयुतत् काननजोतिनाध्वना पृदाकुजिद्वेगं ययौ आस्थितः आरुह्य स्थितः । अयत्नतोऽप्रयासेन । वियोयुतत् काननजोतिना वियोयुतत् अत्यर्थं भासमानेन काननेन जोतितुं भासितुं शीलं यस्य तेन । पृदाकुजिद्वेगम् । फूत्कार

१. 'दन्त्याजन्तसादयः' इति फलितोऽर्थः.

दिकुत्सितशब्दकरणात् पृदाकुः सर्पः । तं जयतीति पृदाकुजित् गरुडः । तस्य वेग इव वेगो यस्य इति क्रियाविशेषणं रथविशेषणं वा । गभीरनिर्ह्रादं गभीरो निर्ह्रादो ध्वनिः यस्य तं रथम् । ह्रादादनुस्वादितकृष्णसत्कथः । ह्रादात् सुखेन हेतुना अनुस्वादिताः पुनः पुनश्चर्व्यमाणाः कृष्णस्य सत्कथाः येन सः ॥—निर्ह्रादमिति । २६ ह्राद अव्यक्ते शब्दे । अस्माद् घञ् । ह्रादात् । २७ ह्लादी सुखे च । चादव्यक्तशब्देऽपि । अस्मादपि घञ् । अनुस्वादितेति । २८ स्वाद आस्वादने । कर्मणि क्तः । पृदाकुरिति । २९ पर्द कुत्सिते शब्दे । अस्मात् 'पर्देर्नित्संप्रसारणमल्लोपश्च' इत्याकुप्रत्ययो रेफस्य संप्रसारणं पकारस्थिताकारस्य लोपश्चायत्नतः । ३० यती प्रयत्ने । अस्माद् 'यजयाचयत–' इति नङ्प्रत्ययः । वियोयुतदिति । ३१ युतृ ३२ जुतृ भासने । युतेः यङ्लुगन्ताच्छता । जोतिना । जुतेर्णिनिः ॥

एवं गोकुलं प्रति प्रस्थितोऽक्रूरो निजेप्सितप्रतिबन्धमाशङ्कमानः प्रार्थयते—

स वेथते स्माखिलवेथितं विधिं प्रश्रन्थितग्रन्थनधीरकत्थनः ।
अतेन्मुरारिर्मम चिन्मयोऽन्तिके च्योतन्दिशः प्रश्च्युतितैः स्मितामृतैः ६

स विधिं वेथते स्म । विधिमीश्वरं वेथते स्म प्रार्थितवान् । अखिलवेथितं सर्वजनैः प्रार्थितमिति विधिविशेषणं प्रधानकर्म वा । प्रश्रन्थितग्रन्थनधीः प्रकर्षेण श्रन्थितं शिथिलीभूतं ग्रन्थनं कौटिल्यं यस्यास्तादृशी धीर्यस्य सः । अकत्थनः । न कत्थनमात्मश्लाघाशीलं यस्य सः । अस्य विष्णोः श्लाघाशील इति वा । प्रार्थनीयमेवाह—मुरारिर्मामन्तिके अतेत् सततं गच्छेत् । चिन्मयो ज्ञानस्वरूपः । प्रश्च्युतितैः स्मितामृतैर्दिशश्च्योतन् । प्रश्च्युतितैर्गलितैः । च्योतन् आसिञ्चन् ॥—वेथत इति । ३३ विथृ ३४ वेथृ याचने । विथेः 'लट् स्मे' इति भूते लट् । वेथितम् । वेथेः कर्मणि क्तः । प्रश्रन्थितेति । ३५ श्रथि शैथिल्ये । तच्च विशिष्टता अगाधता वा । अस्मात् कर्तरि क्तः । ग्रन्थनेति । ३६ ग्रथि कौटिल्ये । शाठ्यं वक्रता वा तत् । अस्माल्ल्युट् । अकत्थन इति । ३७ कत्थ श्लाघायाम् । सा च परविषया स्वविषया च स्यात् । अस्माद् 'अनुदात्तेतश्च–' इति युच् । अत्र युजन्तोक्त्या तवर्गान्तानुदात्तेतां समाप्तिः सूचिता । अतेदिति । ३८ अत सातत्यगमने । इतः शुन्धन्ता उदात्ताः उदात्तेतः । अस्माल्लिङ् । उदात्तेत् प्रकरणारम्भकद्योतकमिदम् । चिन्मय इति । ३९ चिती संज्ञाने । तच्च चैतन्यं स्मरणं च । भट्टिमते(?) ज्ञानमात्रं च । अस्मात् संपदादिक्विबन्तान्मयट् । तद्रूप इति केचित् । इति कौमुद्युक्तेः । ताद्रूप्ये मयट् । च्योतन् । ४० च्युतिर् आसेचने । आर्द्रीभवनं तत् । अस्माच्छता । प्रश्च्युतितैरिति । ४१ श्च्युतिर् क्षरणे । स्रुतिस्तत् । अस्मात् कर्तरि क्तः ॥

कंसं प्रति हितानुक्तिदोषेण प्रार्थनप्रतिबन्धमाशङ्क्य परिहरति[1]—

ममन्थ विश्वं सुजनानकुन्थकान्प्रपुन्थ्य बन्धूनपि लुन्थति स्म यः ।
स भोजराडद्य हरिं मिमन्थिषुः प्रमान्थनं सेधतु को निषेत्स्यति ॥ ७ ॥

---

१. 'प्रार्थितप्रतिबन्ध' पाठः.

यो विश्वं ममन्थ क्षोभितवान् । अकुन्थकान् सुजनान् प्रपुन्थ्य बन्धूनपि लुन्थति स्म अकुन्थकान् अहिंसकान् प्रपुन्थ्य हिंसित्वा क्लेशयित्वा वा लुन्थति स्म हतवान् । स भोजराट् अद्य हरिं मिमन्थिषुः प्रमान्थनं सेधतु कः निषेत्स्यति । मिमन्थिषुर्हन्तुमिच्छुः । प्रमान्थनं हिंसां सेधतु प्राप्नोतु ॥—ममन्थेति । ४२ मन्थ विलोडने । क्षोभणं तत् । असालिट् । अकुन्थकानिति । ४३ कुथि ४४ पुथि ४५ लुथि ४६ मथि ४७ मान्थ हिंसासंक्लेशनयोः । कुन्थेर्ण्वुल् । प्रपुन्थ्येति । पुन्थेर्ल्यप् । लुन्थति । लुन्थेर्भूते लट् । मिमन्थिषुः । मन्थेः सनि उप्रत्ययः । प्रमान्थनम् । मान्थेर्ल्युट् । सेधतु । ४८ षिध गत्याम् । अतिसर्गे प्राप्तकाले वा लोट् । निषेत्स्यति । ४९ षिधू शास्त्रे माङ्गल्ये च । शास्त्रं शास्त्रगतं शासनं शासनमात्रं वा । माङ्गल्यं मङ्गलक्रिया । अस्माल्लृट् ॥

पलान्यखाद्यानि खदन्वदद्वपुर्गदन्नवाच्यानि रदन्सतां मनः ।
नदन्मदादर्दितसंक्षयोऽधुना क्षणं खलो नर्दतु गर्दभस्वरैः ॥ ८ ॥

खल एषोऽधुना गर्दभस्वरैः क्षणं नर्दतु । गर्दभस्वरैर्गर्दभसदृशैः स्वरैः । क्षणं 'कालाध्वनोः' इति द्वितीया । नर्दतु शब्दं करोतु । अखाद्यानि पलानि खदन् अभक्ष्याणि मांसानि भक्षयन् । अत एव वदद्वपुः स्थिरीभवद्देहः अवाच्यानि गदन् सतां मनः रदन् विलिखन् पीडयन् मदात् नदन् । अत एव अर्दितसंक्षयः अर्दितः प्राप्तः सर्वैः प्रार्थितो वा संक्षयो नाशो यस्य सः ॥—अखाद्यानीति । ५० खाद्द भक्षणे । अस्माद् ण्यत् । खदन्निति । ५१ खद स्थैर्ये हिंसायां च । चाद्भक्षणेऽपि । वदन्निति । ५२ बद स्थैर्ये । गदन्निति । ५३ गद् व्यक्तायां वाचि । रदन्निति । ५४ रद विलेखने । तच्च विदारणं क्षोभणं वा । नदन्निति । ५५ णद अव्यक्ते शब्दे । 'णो नः' एभ्यः शता । अर्दितेति । ५६ अर्द गतौ याचने च । अस्मात् कर्मणि क्तः । नर्दत्विति । ५७ नर्द ५८ गर्द शब्दे । नर्देरतिसर्गे लोट् । गर्दभ इति । 'कृशृशलिगर्दिभ्योऽभच्' इत्यभच्प्रत्ययः ॥

अतर्दकास्त्वद्य विकर्दमाशयाः प्रखर्दवृत्तैरसमन्तितान्तिकाः ।
श्रुतान्दुकैश्चित्तगजेन्द्ररोधिनस्तुष्यन्तु सन्तो गुणबिन्दुलोलुपाः ॥ ९ ॥

सन्तोऽद्य तुष्यन्तु । अतर्दका अहिंसकाः । विकर्दमो विगतदोष आशयो येषां ते । प्रखर्दवृत्तैः क्रूरव्यापारैरसमन्तितमसंबद्धमन्तिकं येषां ते । श्रुतान्दुकैः शास्त्ररूपैरन्दुकैः पादकटकैः चित्तरूपं गजेन्द्रं रोद्धुं शीलं येषां ते । गुणस्य बिन्दौ लेशे लोलुपाः सश्रद्धाः ॥—अतर्दका इति । ५९ तर्द हिंसायां । ण्वुल् । विकर्दमेति । ६० कर्द कुत्सिते शब्दे । बाहुलकात् औणादिकोऽमच् । प्रखर्देति । ६१ खर्द दन्दशूके । दन्दशूक इति तत्कर्तृ

दंशनमुक्तम् । अस्मात् पचाद्यच् । असमन्तितेति । **६२ अति ६३ अदि** बन्धने । अन्तेः कर्मणि क्तः । अन्दुकेति । 'अन्दूदृम्भूकफेलूकर्कन्धूदिधिषू' इत्यूप्रत्ययान्ता अन्देः स्वार्थे कनि । 'केऽणः' इति ह्रस्वः । इन्द्रेति । **६४ इदि** परमैश्वर्ये । अस्माद् 'ऋज्रेन्द्र–' इत्यादिना निपातितो रन् । बिन्दुरिति । **६५ बिदि** अवयवे । बाहुलकादुप्रत्ययः ॥

मनोज्ञगण्डं तमनिन्दितानन्नं नन्दात्मजं शारदचन्द्रशीतलम् ।
पराक्रमत्रन्दनकन्दितासुरं संक्रन्दनक्रन्दितमीक्षितास्महे ॥ १० ॥

वयं तं नन्दात्मजमीक्षितास्महे द्रक्ष्यामः । तद्दिवसे एव भगवद्दर्शनानिश्चयात् लुट्प्रयोगः । मनोज्ञगण्डमित्यादीनि त्रीणि विशेषणानि स्पष्टानि । पराक्रमत्रन्दनकन्दितासुरं पराक्रमरूपेण त्रन्दनेन चेष्टया कन्दिता रोदिता असुरा येन तम् । संक्रन्दनक्रन्दितमिन्द्रेण बहुकृत्वः स्वरक्षणार्थमाहूतम् ॥—गण्डम् । **६६ गडि** वदनैकदेशे । अस्मात् पचाद्यच् । वदनैकदेश इति तदारम्भक्रियोक्ता । अनिन्दितेति । **६७ णिदि** कुत्सायाम् । कर्मणि क्तः । नन्देति । **६८ टुनदि** समृद्धौ । समृद्धिर्हर्षे पर्यवस्यति । पचाद्यच् । चन्द्रेति । **६९ चदि** आह्लादे दीप्तौ च । 'स्फायि-तञ्चि-वञ्चि-शकि-क्षिपि क्षुदि-सृपि-तृपि-दृपि-वन्दि-उन्दि श्विति-वृति-अजि-नी पदि मदि-मुद-खिदि-छिदि-भिदि-मन्दि-चन्दि दहि-दसि-दम्भि-वसि-वाशि-शीङ्-हसि-सिधि-शुम्भिभ्यो रक् इति रक् । त्रन्देति । **७० त्रदि** चेष्टायाम् । ल्युट् । कन्दितेति । **७१ कदि ७२ क्रदि ७३ क्लदि** आह्वाने रोदने च । क्रन्देर्णिजन्तात् क्तः । संक्रन्दनेति । 'समि-क्रन्दि-कृषि-हृदिभ्यः' इति नन्द्यादिपाठाल्ल्युट् । क्रन्दितमिति । क्रन्देः कर्मणि क्तः ॥

अक्लिन्दनीयाञ्शुधितात्मनो जनान्प्रशीकते यः करुणावलोकनैः ।
तमुत्तमश्लोकमवेक्ष्य तत्स्तुतिद्रेकैरुपध्रेकयितास्मि दिक्तटम् ॥ ११ ॥

यः करुणावलोकैः शुधितात्मनो जनान् प्रशीकते । शुधितः शुद्ध आत्मा मनो येषां तान् प्रशीकते नितरां सिञ्चति । अक्लिन्दनीयान् परिदेवयितुमनर्हान् । अहं तमुत्तमश्लोकमवेक्ष्य तत्स्तुतिद्रेकैर्दिक्तटमुपध्रेकयितास्मि तत्स्तुतिद्रेकैस्तस्य स्तुतिरूपैर्द्रेकैः शब्दैरुपध्रेकयितास्मि शब्दयिष्यामि ॥—आक्लिन्दनीयानिति । **७४ क्लिदि** परिदेवने । अस्माण्णिजन्तादनीयर् । शुधितेति । **७५ शुन्ध** शुद्धौ । अस्मात् कर्तरि क्तः । 'अनिदिताम्' इति नकारस्य लोपः । अतादय उदात्ता उदात्तेतः । प्रशीकत इति । **७६ शीकृ** सेचने । एतदादयः श्लाघ्यन्ता उदात्ता अनुदात्तेतः । अस्माल्लट् । आत्मनेपदारम्भसूचकस्तशब्दः । अवलोकनैरिति । **७७ लोकृ** दर्शने । ल्युट् । उत्तमश्लोकमिति । **७८ श्लोकृ** संघाते । स च ग्रन्थनम् । तच्च कर्मगतं कर्तृगतं वा । अस्मात् कर्मणि घञ् । द्रेकैरिति । **७९ द्रेकृ ८० ध्रेकृ** शब्दोत्साहयोः । शब्दोत्साह इत्येके । उत्साहो वृद्धिरौद्धत्यं वा । द्रेकेर्घञ् । उपध्रेकयितास्मि । ध्रेकेर्लुट् ।

स एवमादीन्विमृशन्नरेकधीरसेकत स्रेकितमानसो हरौ ।
दुःस्रङ्कमाश्रङ्क्य हरेः पदं जनः प्रश्लङ्कते कुत्र रुजं क शङ्कते ॥ १२॥

स एवमादीन् विमृशन् असेकत गतवान् । अरेकधीररेका शङ्का धीर्यस्य सः । हरौ स्रेकितमानसो गतमना जनो दुःस्रङ्कं हरेः पदमाश्रङ्क्य कुत्र रुजं प्रश्लङ्कते क शङ्कते । दुःस्रङ्कं दुष्प्रापं आश्रङ्क्य प्राप्य कुत्र रुजं पीडां प्रश्लङ्कते प्राप्नोति । न कापीत्यर्थः । क कार्ये ॥—अरेकेति ।८१ **रेकृ** शङ्कायाम् । घञ् । असेकत । ८२ **सेकृ** ८३ **स्रेकृ** ८४ **स्रकि** ८५ **श्रकि** ८६ **श्लकि** गत्यर्थाः । सेकेर्लङ् । स्रेकितेति । स्रेकेः कर्तरि क्तः । दुःस्रङ्कमिति । स्रङ्केः 'ईषद्दुःसुषु कृच्छ्रा' इत्यादिना खल् । आश्रङ्क्येति । श्रङ्केर्ल्यप् । प्रश्लङ्कत इति श्लङ्केर्लट् । शङ्कत इति ।८७ **शकि** शङ्कायाम् । लट् ॥

फलाङ्कितान्वङ्कितवल्लिमङ्कितान्वनप्रदेशानुरुकाककोकिलान् ।
वृकावृतान्मुग्धचकोरकूजितानुड्डीनकङ्कानयमत्यवङ्कत ॥ १३ ॥

अयं वनप्रदेशान् अत्यवङ्कत अतिक्रान्तवान् । फलाङ्कितान् फलैश्चिह्नितान् । वङ्कितवल्लिमङ्कितान् वङ्किताभिः कुटिलाभिर्वल्लिभिर्लताभिर्मङ्कितान् मण्डितान् । मुग्धं चकोरकूजितं येषु तान् । उड्डीनाः कङ्काः येषु तान् ॥—अङ्कितेति । ८८ **अकि** लक्षणे । कर्मणि क्तः । वङ्कितेति । ८९ **वकि** कौटिल्ये । कर्तरि क्तः । मङ्कितानिति । ९० **मकि** मण्डने । कर्मणि क्तः । काक इति । ९१ **कक** लौल्ये । इच्छायां च द्रुमे । अस्माद् बाहुलकात् कर्तरि घञ् । कोकिलः । ९२ **कुक** ९३ **वृक** आदाने । 'सलि-कलि-अनि-महि-भडि-भण्डि-शण्डि-पिण्डि-तुण्डि-कुकि-भूभ्य इलच्' । इति कुकेरिलच् । वृकेति । वृकेरिगुपधत्वात् कः । चकोरेति । ९४ **चक** तृप्तौ प्रतिघाते च । अस्मात् 'कठिचकिभ्यामोरच्' इत्योरच् । कङ्केति । ९५ **ककि** ९६ **वकि** ९७ **श्वकि** ९८ **त्रकि** ९९ **ढौकृ** १०० **त्रौकृ** १०१ **ष्वष्क** १०२ **वष्क** १०३ **मस्क** १०४ **टिकृ** १०५ **टीकृ** १०६ **तिकृ** १०७ **तीकृ** १०८ **रघि** १०९ **लघि** गत्यर्थाः । कङ्केः पचाद्यच् । अत्यवङ्कतेति । वङ्केर्लङ् ॥

प्रश्वङ्कनोत्रङ्कितबद्रथस्वनादढौकि भीतैरपि नो शिखावलैः ।
विष्वक्परित्रौकितलोचनैः स्थितं विष्वष्कमाणाम्बुदनादशङ्कया ॥ १४॥

शिखावलैः प्रश्वङ्कनोत्रङ्किततद्रथस्वनाद्भीतैरपि नो अढौकि । शिखावलैर्मयूरैः । प्रश्वङ्कनेन वेगगमनेन उत्रङ्कितादुद्गतात् तद्रथस्वनात् । नो न अढौकि गतम् । विष्वष्कमाणाम्बुदनादशङ्कया विष्वक्परित्रौकितलोचनैः स्थितम् । विष्वष्कमाणस्य वेगेन गच्छतो मेघस्य नाद इति शङ्कया विष्वक् परितः परित्रौकिते संचारिते लोचने यैः तथाभूतैः ॥—प्रश्वङ्कनेति । श्वङ्केर्ल्युट् । उत्रङ्कितेति । त्रङ्केः कर्तरि क्तः । अढौकीति । भावे चिण् । परित्रौकितेति । त्रौकेः णिचि कर्मणि क्तः । विष्वष्कमाणेति । ष्वष्केः शानच् । 'सुब्धातुष्ठिवुष्वष्कतीनां न' इति धात्वादेः षः साभावः ॥

अवस्कि रोहिद्भिरमस्कि विष्किरैरटेकि गोधाभिरटीकि पन्नगैः ।
अरङ्घि कोलैर्लघु तद्रथस्वनात्प्रबुध्य सिंहैः पुनरङ्घितं तदा ॥ १५ ॥

तद्रथस्वनात् रोहिद्भिरवस्कि धावितम् । विष्किरैरमस्कि पक्षिभिरुद्गतम् । गोधाभिरटेकि गतम् । पन्नगैरटीकि अपसृतम् । कोलैर्लघु अरङ्घि शीघ्रं गतम् । सिंहैः पुनः प्रबुध्य तदा अङ्घितम् । अन्येषां गतिराक्षिप्ता निन्दिता वा ॥—अवस्कि, अमस्कि, अटेकि, अटीकि, अरङ्घि । वस्कादीनां पञ्चानां भावे लुङि चिण् । लघ्विति । 'रङ्घिलङ्घ्योर्नलोपश्च' इत्युप्रत्ययः । अङ्घितम् । ११० अघि १११ वघि ११२ मघि गत्याक्षेपे । गतौ गमनारम्भे चैके । कैतवे च । अङ्घेः साध्ये भावे क्तः ॥

प्रवङ्घमानस्य च तस्य सत्वरं विमङ्घनस्याधिकराघितात्मनः ।
निकाममुल्लाघतनोः समत्यगात्प्रद्राघिता श्लाघ्यगुणस्य वर्तनी ॥ १६ ॥

सत्वरं प्रवङ्घमानस्य तस्य प्रद्राघिता वर्तनी समत्यगात् च । प्रवङ्घमानस्य सम्यग्गच्छतः प्रद्राघिता अत्यर्थमायता समत्यगात् अतिक्रान्ता । विमङ्घनस्य विगतं कैतवं यस्य तस्य । अधिकराघितात्मनोऽधिकं राघितः समर्थ आत्मा मनो यस्य तस्य । निकाममुल्लाघतनोः उल्लाघा निर्गतरोगा तनुर्यस्य तस्य ॥—प्रवङ्घमानस्येति । वङ्घेः शानच् । विमङ्घनस्य । मङ्घेर्ल्युट् । राघितेति । ११३ राघृ ११४ लाघृ ११५ द्राघृ सामर्थ्ये । दाघृ आयामे च । स च दैर्घ्यं क्रियासमर्थनं वा । राघेः कर्तरि क्तः । उल्लाघेति । 'अनुपसर्गात्फुल्लक्षीव–' इति लाघेर्निपातितः । प्रद्राघितेति । द्राघेः कर्तरि क्तः । श्लाघ्येति । ११६ श्लाघृ कत्थने । अस्मात् कर्मणि ण्यत् । शीकादय उदात्ता अनुदात्तेतः ॥

अफक्कतातक्यगुणेन तङ्कता खलश्वबुक्कापरुषे पुरेऽमुना ।
फेनैः कखन्तीमिव तां कलिन्दजां संतीर्य वृन्दावनमैक्ष्यनोखितम् ॥ १७ ॥

अफक्कता अमुना तां कलिन्दजां संतीर्य वृन्दावनमैक्षि । अफक्कताः मन्दगमनमसद्व्यापारं वा कुर्वता । अतक्यगुणेन । अतक्याः अपरिहसनीया गुणा यस्य तेन । खलश्वबुक्कापरुषे पुरे तङ्कता । खला एव श्वानस्तेषां बुक्काभिर्भषणैः परुषे पुरे तङ्कता कृच्छ्रेण जीवता । कीदृशीं कलिन्दजामित्यत्राह—फेनैः कखन्तीं हसन्तीमिव । कीदृशं वृन्दावनमित्यत्राह—अनोखितं क्वचिदप्यशुष्कम् ॥—अफक्कतेति । ११७ फक्क नीचैर्गतौ । शिङ्घयन्ता उदात्ता उदात्तेतः । नीचैर्गतिर्मन्दगमनमसद्व्यापारो वा । अस्मात् परस्मैपदारम्भद्योतकः शता । अतक्येति । ११८ तक हसने । अस्मात् कर्मणि 'तकिशसिचतियतिजनीनां यद्वाच्यः' इति यत् । तङ्कता । ११९ तकि कृच्छ्रजीवने । शता बुक्केति । १२० बुक्क भषणे । भषणं श्वरवः । 'गुरोश्च हलः' इत्यप्रत्ययः । १२१ कख हसने । शत्रन्तान्ङीप् । अनोखितम् । १२२ ओखृ १२३ राखृ १२४ लाखृ १२५ दाखृ १२६ ध्राखृ शोषणालमर्थयोः । ओखेः कर्तरि क्तः ॥

वृन्दावनं विशिनष्टि चतुर्दशभिः—

अराखितत्वग्भिरलाखितच्छदैः प्रद्राखिताध्राखिफलैश्च शाखिभिः ।
प्रश्लाखितं प्रोखितसत्वमुङ्खितं खगैर्वखन्मारुतवङ्खिसौरभम् ॥ १८ ॥

शाखिभिः प्रश्लाखितं व्याप्तम् । कीदृशैरित्यत्राह—अराखितत्वग्भिः । अराखिता अ-शुष्का त्वग् येषां तैः । अलाखितास्तरुणाश्छदा येषां तैः । प्रद्राखितानि अत्यन्तपर्या-प्तानि अध्राखीन्यशोषणशीलानि फलानि येषां तैः । प्रोखितसत्वम् । प्रोखितानि इत-स्ततो गच्छन्ति सत्वानि जन्तवो यस्मिंस्तत् । खगैरुङ्खितं प्राप्तम् । वखन्मारुतवङ्खिसौरभम् । वखता संचरता वायुना सह गमनशीलं सौरभं सौरभ्यं यस्य तत् ॥—अराखितेति । राखेः कर्तरि क्तः । अलाखितेति । लाखेः क्तः । प्रद्राखितेति । द्राखेः क्तः । अध्राखीति । ध्राखेर्णिनिः । शाखीति । १२७ शाखृ १२८ श्लाखृ व्याप्तौ । शाखेरप्रत्ययान्ताद्व्रीह्यादित्वादिनिः । प्रश्लाखितम् । श्लाखेः क्तः । प्रोखितेति । १२९ उख १३० उखि १३१ वख १३२ वखि १३३ मख १३४ मखि १३५ णख १३६ णखि १३७ रख १३८ रखि १३९ लख १४० लखि १४१ इख १४२ इखि १४३ ईखि १४४ वल्ग १४५ रगि १४६ लगि १४७ अगि १४८ वगि १४९ मगि १५० तगि १५१ त्वगि १५२ श्रगि १५३ श्लगि १५४ इगि १५५ रिगि १५६ लिगि गत्यर्थाः । उखेः कर्तरि क्तः । उङ्खितमिति । उङ्खेः कर्मणि क्तः । वखदिति । वेखेः शता । वङ्खीति । वङ्खेर्णिनिः ॥

मखत्कपोतं मदमङ्खिबर्हिणं लखत्पिकं नङ्खितखञ्जनोत्करम् ।
रखच्छशं रङ्खितरङ्कु रिङ्खितद्विपं लखत्केसरिलङ्खदारवम् ॥ १९ ॥

मखन्त उद्गच्छन्तः कपोता यस्मिंस्तत् । मदेन मङ्खन्तो गमनशीला बर्हिणो यस्मिंस्तत् । नखन्तः संचरन्तः पिकाः यस्मिंस्तत् । नङ्खितः संचरन् खञ्जनानामुत्करो यस्मिंस्तत् । रखन्तः शशा यस्मिंस्तत् । रङ्खिता रङ्कवो यस्मिंस्तत् । रिङ्खिताश्चलिता द्विपा यस्मिंस्तत् । लखन्त्यः इतस्ततो गच्छन्त्यः केसरिभ्यो लङ्खन्तुद्गच्छन्नारवो यस्मिंस्तत् ॥—मखेः शता । मिङ्खेर्णिनिः । नखेः शता । नखेः क्तः । रङ्खेः शता । रङ्खेः क्तः । लखिलङ्ख्योः शता ॥

एखच्चकोरोत्करमिङ्खितं शुकैः प्रेङ्खल्लतावल्गनरङ्गमण्डपम् ।
विलङ्खदेणं शबराङ्गनाजनप्रवङ्खितं मङ्गलधेनुतङ्खितम् ॥ २० ॥

एखन्त उद्गच्छन्तश्चकोरोत्कराः यस्मिंस्तत् । शुकैरिङ्खितं प्राप्तम् । प्रेङ्खन्त्याश्चलन्त्या लतारूपायाः नर्तक्याः वल्गनस्य नर्तनस्य रङ्गमण्डपम् । विलङ्खन्तो विशेषेण गच्छन्त एणा यस्मिंस्तत् । शबराङ्गनाजनैः प्रवङ्खितं प्राप्तम् । मङ्गलधेनुतङ्खितं मङ्गलरूपाभिर्धेनु-

१. 'चकोरोत्सराः' इति पाठः.

भिस्तङ्गितं व्याप्तम् ॥—एखदिति । इखेः शता । इङ्खितम् । इङ्खेः कर्मणि क्तः । प्रेङ्खदिति । ईङ्खेः शता । वल्गनेति । वल्गेर्ल्युट् । रङ्गेति । रङ्गेः गच्छन्त्यस्मिन् प्रेक्षकाणां मनांसीति । 'हलश्च' इति संज्ञायामधिकरणे घञ् । अङ्गेः प्राप्नोत्यवयवानित्यङ्गम् । प्राग्वद् घञ् । अस्मात् 'अङ्गात् कल्याणे' इति पामादिपाठान्मत्वर्थीयो नः । प्रवङ्गितमिति । वङ्गेः कर्मणि क्तः । मङ्गलेति । 'मङ्गेरलच्' इत्यलच् । तङ्गेः कर्मणि क्तः ॥

त्वङ्गत्खगश्रङ्गितपक्षमारुतश्लङ्गद्रजोराजिभिरिङ्गिताम्बरम् ।
रिङ्गत्प्रियालिङ्गितभृङ्गसंगमत्वङ्गत्प्रसूनं रवितापयुङ्गितम् ॥ २१ ॥

त्वङ्गतां दयमानानां खगानां श्रङ्गितैश्चलितैः पक्षमारुतैः श्लङ्गन्तीभी रजोराजिभिरिङ्गितं व्याप्तमम्बरं यस्मिंस्तत् । रिङ्गन्त्या चलन्त्या प्रिययालिङ्गितानां मृगाणां संगमेन त्वङ्गन्ति चलन्ति प्रसूनानि यस्मिंस्तत् । रवितापेन युङ्गितं वर्जितम् ॥ त्वङ्गदिति । त्वङ्गेः शता । श्रङ्गेः कर्तरि क्तः । श्लङ्गेः शता । इङ्गेः कर्मणि क्तः । रिङ्गदिति । रिङ्गेः शता । आलिङ्गितेति । आङ्पूर्वत्वादाश्लेषार्थत्वम् । कर्मणि क्तः । त्वङ्गदिति । त्वगि कम्पने । अस्माच्छता । युङ्गितमिति । **१५७ युगि १५८ जुगि १५९ वुगि** वर्जने । युङ्गेः कर्मणि क्तः ॥

विजुङ्ग्य बुङ्ग्यं गुणसंघदङ्घका अलङ्घितानन्दरसात्तघर्घना[1]ः ।
सुमङ्घिताः शिङ्घितपुष्पसौरभा यद्वर्चमानाः पशुपाः प्रसेचिरे ॥ २२ ॥

पशुपाः यत् प्रसेचिरे यत् वृन्दावनं प्रसेचिरे सम्यक् सेवितवन्तः । कीदृशा इत्यत्राह— बुङ्ग्यं विजुङ्ग्य गुणसंघदङ्घकाः । वर्जनीयं वर्जयित्वा गुणसंघस्य दङ्घकाः पालकाः । अलङ्घितस्य अशुष्कस्य परिपूर्णस्य आनन्दस्य रसेनास्वादनेनात्तं स्वीकृतं घर्घनं हासो यैस्ते । सुष्टु मङ्घिताः मण्डिताः । शिङ्घित आघ्रातः पुष्पाणां सौरभो यैस्ते ॥—विजुङ्ग्येति । जुङ्गेर्ल्यप् । बुङ्ग्यमिति । बुङ्गेर्ण्यत् । दङ्घका इति । 'दघि पालने त्यागे च द्रुमे' । अस्माण्ण्वुल् । अलङ्घितेति । 'लघि शोषणे' । कर्तरि क्तः । घर्घनेति । **१६० घर्घ** हसने[2] । ल्युट् । सुमङ्घिताः । **१६१ मघि** मण्डने । कर्तरि क्तः । **१६२ शिघि** आघ्राणे । कर्मणि क्तः । फक्कादय उदात्ता उदात्तेतः । वर्चमाना इति । **१६३ वर्च दीप्तौ** । ईजन्ता उदात्ता अनुदात्तेतः । अस्माच्छानच् । प्रसेचिरे । **१६४ षच** सेचने सेवनेऽपि । लिट् ॥

सुलोचना यत्र शचीसमप्रभा अशाश्वचुः श्वञ्चितसौरभाः कचे ।
सकञ्चुकाः काञ्चनकाञ्चिभूषिता व्रजाङ्गना निर्मचनेन नर्मणा ॥ २३ ॥

यत्र व्रजाङ्गना निर्मचनेन नर्मणा अशाश्वचुः । निर्मचनेन निर्गतं मचनं शाठ्यं यस्मात् तेन । नर्मणा सह अशाश्वचुः इतस्ततश्चरितवत्यः । कचे केशे श्वञ्चितं व्याप्तं सौरभं यासां ताः । सुलोचना इत्यादि विशेषणचतुष्कं स्पष्टम् ॥—सुलोचना । **१६५ लोचृ** दर्शने । करणे

---

१. स्वार्थणिचमाश्रित्य 'घाघनाः' इति पठनीयम्. २. धातुपाठे तु 'घघ हसने' इत्युपलभ्यते.

ल्युट्। शचीति। १६६ शच व्यक्तायां वाचि। इन्नन्तात् 'कृदिकारादक्तिनः' इति ङीष्। अशाश्वचुः। १६७ श्वच १६८ श्वचि गतौ। यङ्लुगन्तात् श्वचेर्लङि 'सिजभ्यस्त–' इति झेर्जुस्। श्वञ्चितेति। श्वञ्चेः कर्तरि क्तः। कचेति। १६९ कच बन्धने। दीप्तौ च द्रुमे। यूनां मनो बध्नातीति पचाद्यच्। कञ्चुकेति। १७० कचि १७१ काचि दीप्तिबन्धनयोः। कञ्चेः बाहुलकादुक्प्रत्ययः। काञ्चनेति। काञ्चीति। काञ्चेरनुदात्तेत्त्वाद्युच्। औणादिक इन्नपि। मचनेति। १७२ मच १७३ मुचि कल्कने। मचीत्येके। मुचेत्यन्ये। कल्कनं दम्भः। शाठ्यं कत्थनं वा। लोकरञ्जनार्थं साध्वाचारो दम्भः। मचेर्ल्युट्॥

अमुञ्चनैर्मञ्चितचित्तपञ्चितत्रयीमतप्रस्तुचितैः शुभार्जकैः।
समृञ्जितं कन्दमभृक्तसत्फलान्यदद्भिरेकत्र यदेजितं जनैः॥ २४॥

यद् एकत्र शुभार्जकैर्नरैरेजितम्। शुभस्य पुण्यस्य तत्फलभूतस्य ब्रह्मज्ञानस्य वा अर्जकैः। एजितं शोभितम्। अमुञ्चनैः। न मुञ्चनं दम्भः शाठ्यमात्मश्लाघा वा येषां तैः। मञ्चितचित्तपञ्चितत्रयीमतप्रस्तुचितैः मञ्चिते हरौ धारिते पूजिते उन्नते वा चित्ते पञ्चितेन व्यक्तीकृतेन त्रयीमतेन वेदान्तसिद्धान्तेन प्रस्तुचितैः प्रसन्नैः। समृञ्जितं कन्दमभृक्तसत्फलानि चादद्भिः समृञ्जितमग्निपक्कम्। अभृक्तानि अनग्निपक्कानि। कालपक्कानीति यावत्॥—अमुञ्चनैरिति। मुञ्चेर्ल्युट्। मञ्चितेति। १७४ मचि धारणोच्छ्रायपूजनेषु। कर्मणि कर्तरि वा क्तः। पञ्चितेति। १७५ पचि व्यक्तीकरणे। कर्मणि क्तः। प्रस्तुचितैः। १७६ ष्टुच प्रसादे। कर्तरि क्तः। [अर्जकैः]। १७७ ऋज गतिस्थानार्जनोर्जनेषु। अर्जनोपार्जनेष्विति वा पाठः। अर्जनं स्वीकारः। ऊर्जनं शक्तिप्राप्तिः प्राणनं वा। आङ्पूर्वाद् ऋजेर्ण्वुल्। समृञ्जितम्। १७८ ऋजि १७९ भृजी भर्जने। भर्जनं पाकः। ऋजेः कर्मणि क्तः। अभृक्तेति। भृजेः प्राग्वत् क्तः। ईदित्त्वादनिट्त्वम्। एजितम्। १८० एजृ १८१ भ्रेजृ १८२ भ्राजृ दीप्तौ। एजेः कर्तरि क्तः॥

अभ्रेजि विभ्राग्भिरनीजितैश्च यत्कदाप्यशोचद्भिरशेषजन्तुभिः।
चुकोच यत्रोत्कुचिताङ्गमुन्मुदः क्रौञ्चोऽपि लुञ्चन्हृदि सम्यगार्तताम्॥२५॥

यदशेषजन्तुभिरभ्रेजि च। अभ्रेजि शोभितम्। विभ्राग्भिः विशेषेण शोभमानैः। अनीजितैरकुत्सितैः। कदाप्यशोचद्भिः सदा संतुष्टैः। यत्र क्रौञ्चोऽपि हृद्यार्ततां सम्यग्लुञ्चन्नुन्मुदः उत्कुचिताङ्गं चुकोच। क्रौञ्चः पक्षी लुञ्चन्नपनयन्नुत्कुचितान्युच्चैः कुचितानि कुटिलीभूतान्यङ्गानि यस्मिन् तथेति उत्कोचनक्रियाविशेषणम्। चुकोच उच्चैः कूजितवान्॥—अभ्रेजि। भ्रेजेर्णिजन्तात् कर्मणि चिण्। विभ्राग्भिः। भ्राजेः क्विपि 'चोः कुः' इति कुत्वम्। व्रश्चादिषत्वं तु राजेत्यनन्तरपठितस्यैव। अनीजितैः। १८३ ईज गतिकुत्सनयोः। कर्मणि क्तः। वर्चादयः पचिवर्ज्यमुदात्ता अनुदात्तेतः। अशोचद्भिः। १८४ शुच शोके। व्रजान्ता उदात्ता उदात्तेतः। अस्माच्छता। चुकोच। १८५ कुच शब्दे तारे। गतावित्येके। अस्माल्लिट्। उत्कुचितेति। १८६ कुञ्च १८७ क्रुञ्च गतिकौटिल्याल्पीभावयोः। गते

कौटिल्ये द्रव्यस्याल्पीभावे चेत्यर्थः । 'गतिकौटिल्ययोः' इति द्रुमे । कुचेः कर्तरि क्तः । क्रौञ्च इति । क्रुञ्चेः 'ऋत्विग्दधृग्–' इत्यादिना क्विनि क्रुङ् । अस्मात् पुनः प्रज्ञादित्वादण् । लुञ्चन् । १८८ लुञ्च अपनयने । शता । सम्यगिति । १८९ अञ्चु गतिपूजनयोः । 'ऋत्विग्' इत्यादिना क्विन् । 'क्विन्प्रत्ययस्य कुः' [1] इति कुत्वम् ॥

आवक्रचञ्चूपुटतञ्चदारवत्वञ्चत्खगम्रुक्तशिखैर्लताद्रुमैः ।
अम्लुक्तरश्मौ शशिना निमुम्रुचे निमुम्लुचेऽर्केण च यत्र संततम् २६

यत्र शशिना निमुम्रुचे । अर्के (र्के)ण च निमुम्लुचे । उभयोरस्तमितमित्यर्थः । कीदृशे वने । लताद्रुमैरम्लुक्तरश्मौ अप्रविष्टरश्मौ । कीदृशैर्लताद्रुमैः । आवक्रचञ्चूपुटतञ्चदारवत्व-ञ्चत्खगम्रुक्तशिखैः । ईषद्वक्रचञ्चूमध्यात् तञ्चता उद्गच्छता आरवेण शब्देन सह त्व-ञ्चद्भिर्गच्छद्भिः खगैर्म्रुक्ताः प्राप्ताः शिखाः अग्राणि येषां तैः ॥—आवक्रेति । १९०वञ्चु १९१ चञ्चु १९२ तञ्चु १९३ त्वञ्चु १९४ म्रुञ्चु १९५ म्लुञ्चु १९६ म्रुचु १९७ म्लुचु गत्यर्थाः । वञ्चेः 'स्फायितञ्चि–' इत्यादिना रक्ि नलोपश्च । चञ्चू इति । चञ्चेः 'पटिचटिचञ्चिभ्यश्च' इति भोजोक्त्या उप्रत्ययः । 'अप्राणिजातेश्च' इत्यूङ् । तञ्च-त् त्वञ्चदिति । तञ्चेः त्वञ्चेश्च शता । म्रुक्तेति । म्रुञ्चेः कर्मणि क्तः । अम्लुक्तेति । म्लुञ्चेः कर्तरि क्तः । निमुम्रुचे निमुम्लुचे । म्रुचिम्लुच्योर्भावे लिट् । निपूर्वत्वाद्वयोरस्तमयार्थत्वम् ॥

समग्रुचत्क्षीरमथाग्लुचद्धृतं चुकोज वासांसि चुखोज मानसम् ।
समग्लुचत्केलिषु सज्जमानधीः स यत्र गुञ्जन्मणिनूपुरो हरिः ॥ २७॥

हरिर्यत्र क्षीरं समग्रुचदचोरयत् ॥ अथ घृतं अग्लुचज्जहार । वासांसि चुकोज हृत-वान् । मानसं चुखोज । वृ(व्र)जवासिनां हृदयं लीलाभिरपहृतवानित्यर्थः । यत्र केलिषु स-ज्जमानधीर्गुञ्जन्मणिनूपुरः स समग्लुचत् । सज्जमाना संनह्यन्ती धीर्यस्य सः । गुञ्जन्तौ क्वणन्तौ मणिनूपुरौ यस्य सः । समग्लुचत् संचचार ॥—समग्रुचत् । १९८ ग्रुचु १९९ ग्लुचु २०० कुजु २०१ खुजु स्तेयकरणे । ग्रुचेः 'जृस्तम्भु–' इत्यादिना [illegible] अग्लुचत् । ग्लुचेः प्राग्वदङ् । चुकोज-चुखोज । कुजेः खुजेश्च लिट् । समग्लुचत् । २०२ ग्लुञ्चु २०३ षस्ज गतौ । 'षचे' इत्यप्येके । षस्जेर्लक्षणया संनाहार्थता । ग्लुञ्चे-रङि नलोपः । सज्जमानेति । 'यदभिप्रायेषु सज्जते' इति भाष्यप्रयोगादात्मनेपदम् । तेन शानच् । गुञ्जदिति । २०४ गुजि अव्यक्ते शब्दे । शता ॥

सुरार्चिते म्लेच्छजनैर्दुरासदे श्रीलच्छिताङ्के सितपुष्पलाञ्छिते ।
यत्र स्थिते वाञ्छितदे हरिद्रुमे तदाञ्छितह्रीच्छनमास्त नन्दनम् ॥२८॥

---

१. 'चोकुः' इत्येतद्दृष्ट्यास्यासिद्धतत्वेन 'चोः कुः' इत्यस्योपन्यासो युक्तः. २. 'नका-रजावनुस्वारपञ्चमौ झलि धातुषु । सकारजः शकारश्च षाट्टवर्गस्तवर्गजः ॥' इत्यभियुक्तोक्त्या धातूनां नकारोपधत्वात्,

यत्र हरिद्रुमे स्थिते तत् नन्दनमाञ्छितह्रीच्छनमास्त । हरिद्रुमे हरिरूपे हरिचन्दने च नन्दनं नन्दनोद्यानमाञ्छितह्रीच्छनं आञ्छितमायतं ह्रीच्छनं लज्जा यस्य तत् । हरिद्रुमं विशिनष्टि—सुरार्चिते सुरैर्देवैः पूजिते । म्लेच्छजनैर्दुरासदे प्राकृतजनैर्दुष्प्रापे । श्रीलच्छिताङ्गे श्रिया लक्ष्म्या शोभया च लच्छितमङ्कितमङ्गं यस्य तस्मिन् । स्मितपुष्पलाञ्छिते स्मितैरेव पुष्पैः स्मितैर्विकसितैः पुष्पैश्च लाञ्छिते । वाञ्छितदे ईप्सितदे ॥—अर्चितेति । २०५ **अर्च** पूजायाम् । 'अचे' इत्येके । अर्चेः कर्मणि क्तः । म्लेच्छेति । २०६ **म्लेछ** अव्यक्ते शब्दे । स चास्पष्टशब्दः । अपशब्दो वा । म्लेच्छेः पचाद्यच् । लच्छितेति । २०७ **लछ** २०८ **लाछि** लक्षणे । लच्छेः कर्मणि क्तः । 'च्छे च' इति तुक् । पूर्वत्र 'दीर्घात्' इति तुक् । लाञ्छितेति । लाञ्छेः कर्मणि क्तः । वाञ्छितेति । २०९ **वाछि** इच्छायाम् । कर्मणि क्तः । आञ्छितेति । २१० **आछि** आयामे । कर्तरि क्तः । ह्रीच्छनम् । २११ **ह्रीछ** लज्जायाम् । ल्युट् । प्राग्वत्तुक् ॥

अहूर्णचित्ताः परिमूर्च्छितव्रताः स्फूर्णामया अप्रयुशः कृतोञ्छनाः ।
भजन्ति यां व्युष्टिमतोऽपि भूयसीं ध्रजन्ति यद्ध्रञ्जनमात्रतो जनाः ॥२९॥

ईदृशा यां व्युष्टिं भजन्ति जनाः । यद्ध्रञ्जनमात्रतोऽपि भूयसीं ध्रजन्ति । व्युष्टिं फलम् । यद्ध्रञ्जनमात्रतो यस्य वृन्दावनस्य ध्रञ्जनमात्रतः प्राप्तिमात्रेण । ध्रजन्ति प्राप्नुवन्ति । कीदृशा इत्यत्राह—अहूर्णचित्ताः अहूर्णमकुटिलं चित्तं येषां ते । परिमूर्छितव्रताः परिमूर्छितं परिपूर्णं व्रतं येषां ते । स्फूर्णामयाः स्फूर्णा विस्मृता आमया यैस्ते । अप्रयुशोऽप्रमत्ताः । कृतोञ्छनाः वृत्त्यर्थं कृतमुञ्छनं धान्यानां पृथक्पृथगादानं यैस्ते ॥—अहूर्णेति । २१२ **हुर्छा** कौटिल्ये । इह कौटिल्यमपसरणमित्येके । कर्तरि क्तः । आदित्वादनिट्त्वम् । परिमूर्छितव्रताः । २१३ **मूर्छा** मोहसमुच्छ्राययोः । 'गुरोश्च हलः' इत्यप्रत्यये मूर्छा । तस्मात् 'तदस्य संजातम्' इति तारकादित्वादितचि मूर्छितम् । स्फूर्णेति । २१४ **स्फुर्छा** विस्मृतौ । कर्मणि क्तः । अप्रयुशः । २१५ **युछ** प्रमादे । अस्मात् क्विपि 'च्छ्वोः शूड्–' इति छस्य शः । उञ्छनेति । २१६ **उछि** उञ्छे । उञ्छो धान्यानां पृथक्पृथगादानम् । अस्माल्ल्युट् । व्युष्टिमिति । २१७ **उछी** विवासे । स च समाप्तिः । प्रायेण विवन्धनवर्जनातिक्रमेषु च द्रुमे । अस्मात् क्तिन् । ध्रजन्ति । २१८ **ध्रज** २१९ **ध्रजि** २२० **धृज** २२१ **धृजि** २२२ **ध्वज** २२३ **ध्वजि** गतौ । 'व्रजि' इत्येके । ध्रजेर्लट् । ध्रञ्जेर्ल्युट् ॥

अथ वनवर्णनमुपसंहृत्याक्रूरस्य प्रवृत्तिमाह—

प्रध्रज्य मोदं स दधृञ्ज तद्वनं ध्वजोद्गतिध्वञ्जितकूजदण्डजम् ।
स्वर्गोपमं सर्जितपुण्यसंचयो गभीरगर्जद्रथतर्जिताम्बुदः ॥ ३० ॥

स मोदं प्रध्रज्य तद्वनं दधृञ्ज । प्रध्रज्य प्राप्य दधृञ्ज प्राप । ध्वजोद्गतिध्वञ्जितकूजदण्डजं ध्वजस्योद्गत्योर्ध्वगमनेन ध्वञ्जिता गताः कूजन्तो अण्डजाः यस्मात्तत् । सर्जितपु-

ण्यसंचयोऽर्जितसुकृतौघः । गभीरगर्जद्रथतर्जिताम्बुदः गभीरं यथा तथा गर्जता शब्दायमानेन रथेन तर्जितो भर्त्सितोऽम्बुदो येन सः ॥—प्रध्रज्येति । ध्रजेर्ल्यप् । दधृञ्ज धृञ्जेर्लिट् । ध्वजेति । ध्वजेः पचाद्यच् । ध्वञ्जितेति । ध्वञ्जेः कर्तरि क्तः । कूजदिति । **२२४ कूज** अव्यक्ते शब्दे । शता । स्वर्गेति । **२२५ अर्ज २२६ षर्ज** अर्जने । सुष्ठु अर्जते । अर्जेर्घञि वार्तिकमते न्यङ्क्वादित्वात् कुत्वम् । सर्जितेति । षर्जेः कर्मणि क्तः । [गर्जदिति] । **२२७ गर्ज** शब्दे । मेघशब्दे द्रुमे । अस्माच्छता । तर्जितेति । **२२८ तर्ज** भर्त्सने । कर्मणि क्तः ॥

अकर्जितोऽसौ हरिखर्जनोत्कधीरजत्पशुव्रातमजेन तेजितम् ।
लसत्खजाकं व्रजमासदत्क्रमादखञ्जितैरेजितचामरैर्हयैः ॥ ३१ ॥

असौ हयैः क्रमात् व्रजमासददपगतोऽभूत् । अकर्जितोऽभीतो दुःखरहितो निश्चलबुद्धिश्च । हरिखर्जनोत्कधीः । हरेः खर्जने पूजायामुत्का धीर्यस्य सः । अजत्पशुव्रातमजन्तो गच्छन्तः पशुव्राता यस्मिंस्तत् । अजेन तेजितं पालितम् । लसत्खजाकं लसन्तः खजाका मन्थनदण्डा यस्मिंस्तत् । अखञ्जितैरपङ्गुभिः । एजितचामरैरेजिताः कम्पिताश्चामरा येषु तैः ॥—अकर्जित इति । **२२९ कर्ज** व्यथने । तच्च भयदुःखं चलनं च । अस्मात् कर्तरि क्तः । खर्जनेति । **२३० खर्ज** पूजने । मार्जने च द्रुमे । ल्युट् । [अजदिति] । **२३१ अज** गतिक्षेपणयोः । शता । तेजितम् । **२३२ तेज** पालने । कर्मणि क्तः । खजाकेति । **२३३ खज** मन्थे । 'खजेराकः' इत्याकप्रत्ययः । अखञ्जितैः । **२३४ खजि** गतिवैकल्ये । कर्तरि क्तः । एजितेति । **२३५ एजृ** कम्पने । कर्तरि क्तः ॥

विस्फूर्जदक्षीणघनाघनोपमक्षीजा लजन्तस्त्रिदशानलाञ्जितान् ।
लाजादिहोतृष्वपि लञ्जनप्रदा यस्मिन्विनेशुर्जजनेषु दानवाः ॥ ३२ ॥

दानवा यस्मिन् जजनेषु विनेशुः । यस्मिन् व्रजे । जजनेषु युद्धेषु । कीदृशा इत्यत्राह — विस्फूर्जदक्षीणघनाघनोपमक्षीजाः । विस्फूर्जद्भिः स्तनयद्भिः, अक्षीणैः पूर्णैर्घनाघनैर्मेघैरुपमा यस्य तादृशः क्षीजोऽव्यक्तशब्दो येषां ते । अलाञ्जितान् कैरप्यभर्त्सितांस्त्रिदशांल्लजन्तो भर्त्सयन्तः । लाजादिहोतृष्वपि लञ्जनप्रदा भर्त्सनप्रदाः ॥—विस्फूर्जदिति । **२३६ टु ओ स्फूर्जा** वज्रनिर्घोषे[1] । शता । अक्षीणेति । **२३७ क्षि** क्षये । कर्तरि क्तः । 'निष्ठायामण्यदर्थे' इति दीर्घे 'क्षियो दीर्घात्' इणि निष्ठानत्वम् । क्षीजेति । **२३८ क्षीज** अव्यक्ते शब्दे । घञ् । लजन्त इति । **२३९ लज २४० लजि** भर्त्सने । **२४१ लाज २४२ लाजि** भर्त्सने । भर्जने चेति लीलाशुकः । लजेः शता । अलाञ्जितान् । लाजेः कर्मणि क्तः । लाजेति । लाजेः कर्मणि घञ् । लञ्जनेति । लञ्जेर्ल्युट् । जजनेषु । **२४३ जज २४४ जजि** युद्धे । जजेर्ल्युट् ॥

---

१. 'व्रजनिर्घोषे' इति पाठः.

जहर्ष जञ्जातुजितस्थलैरसौ वृषैरतुञ्जैर्गजगञ्जिभिर्वृतम् ।
गर्जत्खरं गृञ्जितधेनुमोमुजद्घट्टसोत्करं मुञ्जदजं वजन्व्रजम् ॥ ३३ ॥

असौ व्रजं वजञ्जहर्ष । वजन् प्राप्नुवन् । किदृशं व्रजम् । वृषैर्वृतं व्याप्तम् । कीदृशैर्वृषैः । जञ्जातुजितस्थलैः जञ्जया परस्परयुद्धेन तुजितानि पीडितानि स्थलानि यैस्तैः । अतुञ्जैर्नराणामहिंसकैः । गजगञ्जिभिर्गज इव शब्दायमानैः । कीदृशं व्रजम् । गर्जत्खरं गर्जन्तः शब्दायमानाः खरा यस्मिंस्तम् । गृञ्जितधेनुमोमुजद्वत्सोत्करं गृञ्जिताः हुंकाररवं कुर्वाणा धेनवो नवप्रसूता गावो यस्मिंस्तच्च । मोमुजतः पुनः पुनः शब्दायमाना वत्सोत्करा यस्मिंस्तच्च । मुञ्जदजं मुञ्जन्तो नदन्तोऽजाश्छागा यस्मिंस्तं च ॥—जञ्जेति । जञ्जेः 'गुरोश्च–' इत्यकारः । तुजितेति । २४५ तुज हिंसायाम् । कर्मणि क्तः । अतुञ्जैः । २४६ तुजि पालने च । प्राणने च द्रुमे । अच् । गजेति । २४७ गज २४८ गजि २४९ गृज २५० गृजि २५१ मुज २५२ मुजि शब्दार्थाः । गज मदने च । मज मजि इत्यप्येके । शब्दायते माद्यति वेत्यर्थे गजेरच् । गञ्जीति । गञ्जेः 'कर्तर्युपमाने' इति णिनिः । गर्जदिति । गृजेः शता । गृञ्जितेति । गृञ्जेः कर्तरि क्तः । मोमुजदिति । मुजेर्यङ्लुकि शता । मुञ्जदिति मुञ्जेः शता । वजन् । २५३ वज २५४ व्रज गतौ । वजेः शता । व्रजेः 'गोचरसंचर–' इत्यादिना घः ॥

मार्गात्स दृष्ट्वा हरिपादलाञ्छनं व्यवेष्टतोर्व्यां महनीयचेष्टितः ।
तत्केलिसंगोष्टितलोष्टमानमद्वने मरुद्घट्टितपोस्फुटद्रुमे ॥ ३४ ॥

मार्गात् स हरिपादलाञ्छनं दृष्ट्वोर्व्यां महनीयचेष्टितो व्यवेष्टत । मार्गात् मार्गमतिक्रान्तवान् । व्यवेष्टत विलुठितवान् । महनीयचेष्टितो महनीयं चेष्टितं व्यापारो यस्य सः । वने तत्केलिसंगोष्टितलोष्टमानमत् । तस्य भगवतः केल्या संगोष्टितं संघातीकृतं लोष्टमिष्टकाखण्डम् ! कीदृशे वने । मरुद्घट्टितपोस्फुटद्रुमे मरुद्घट्टिता वायुभिः कम्पिताः । अत एव पोस्फुटतः अत्यर्थं दलन्तो द्रुमा यस्मिंस्तस्मिन् ॥—मार्गादिति । २५५ अट्ट अतिक्रमहिंसनयोः । शाड्न्ता उदात्ता अनुदात्तेतः । दोपधस्तोपधो वायम् । टोपधोऽपि द्रुमे । अस्मात् क्विपि संयोगान्तलोपः । व्यवेष्टत । २५६ वेष्ट विलुठने । अकर्मकः । लङ् । चेष्टितेति । २५७ चेष्ट चेष्टायाम् । अस्मात् सिद्धभावे क्तः । गोष्टितेति । २५८ गोष्ट २५९ लोष्ट संघाते । गोष्टेर्णिजन्तात् कर्मणि क्तः । लोष्टमिति । पचाद्यच् । घट्टितेति । २६० घट्ट चलने । कर्तरि क्तः । पोस्फुटदिति । २६१ स्फुट विकसने । यङ्लुगन्तात् शता ॥

अनन्कुमार्गेषु शुभाध्वनैव वन्प्रमन्भृशोत्कण्ठितगोपिके हरौ ।
स पापमुन्भिर्बुधहेड्भिरुन्मदैरनेठितां क्ष्मां पुनरप्यहिण्डत ॥ ३५ ॥

स उन्मदैरनेठितां क्ष्मां पुनरप्यहिण्डत । उन्मदैरुद्धतमदैरनेठितामपीडितामहिण्डत-

गच्छत् । कीदृशः । कुमार्गेषु अनन्नगच्छन् । शुभाध्वना एव वन्नसहाय एव गच्छन् । भृशोत्कण्ठितगोपिके हरौ प्रमन् भृशमुत्कण्ठिता गोपिका यस्मिंस्तस्मिन् । सोत्कण्ठस्मृतिमान् । कीदृशैरुन्मदैः । पापमुन्भिः पापस्य पालकैः । बुधहेड्भिः बुधानां बाधकैः ॥—अनन्निति । २६२ अठि गतौ । अस्मात् क्विपि संयोगान्तलोपे अन् । तस्मान्नञ्समासे नुट् । वन्निति । २६३ वठि एकचर्यायाम् । सा चासहायगमनम् । प्राग्वत् । क्विप् । प्रमन्निति । २६४ मठि २६५ कठि शोके । अत्र शोकः सोत्कण्ठस्मरणम् । उत्कण्ठामात्रे त्वकर्मकः । मण्ठेः प्राग्वत् क्विप् । संयोगान्तलोपश्च । उत्कण्ठितेति । कण्ठेः कर्तरि क्तः । पापमुन्भिः । २६६ मुठि पालने । क्विप् । बुधहेड्भिः २६७ हेठ विबाधायाम् । २६८ एठ च । हेठेः क्विप् । अनेठिताम् । एठेः कर्मणि क्तः । अहिण्डत । २६९ हिडि गत्यनादरयोः । लङ् ॥

प्रहुण्डितानैक्षत चारुकुण्डलान्प्रवण्डितार्थानविमण्डिताशयान् ।
स भण्डिलो भोजनृपालपिण्डभुक्प्रमुण्डितांस्तत्र जनानतुण्डकान्॥३६॥

भण्डिलः स तत्र प्रहुण्डिताञ्जनानैक्षत । भण्डिलो दूतः । प्रहुण्डितान् संघातीभूतान् । चारुकुण्डलान् चारूणि कुण्डलानि येषां तान् । प्रवण्डितार्थान् प्रवण्डिताः सम्यक् विभक्ता अर्थाः पुरुषार्था धनानि वा येषां तान् । अविमण्डिताशयान् । अविमण्डितोऽविभक्त आशयो येषां तान् । एकमनस्कानित्यर्थः । प्रमुण्डितान् अत्यन्तशुद्धान् । अतुण्डकान् अहिंसकान् । पिण्डमन्नम् ॥—प्रहुण्डितानि[ति] । २७० हुडि संघाते । कर्तरि क्तः । कुण्डलेति । २७१ कुडि दाहे । 'मृदिमण्डिकुण्डिकन्दिभ्योऽलच्' इत्यलच् । प्रवण्डितेति । २७२ वडि विभाजने । २७३ मडि च । द्वौ वेष्टनेऽपीत्येके । वण्डेः कर्मणि क्तः । अविमण्डितेति । मण्डेः कर्मणि क्तः । भण्डिल इति । २७४ भडि परिभाषणे । तच्च परितो भाषणम् । सनिन्दवचनं वा । परिहास इत्येके । अस्मात् 'सलिकल्यनिभटिभण्डितण्डिभ्य इलच्' इतीलच् । पिण्डेति । २७५ पिडि संघाते । पचाद्यच् । प्रमुण्डितान् । २७६ मुडि मार्जने । शुद्धिन्यग्भावौ तत् । कर्तरि क्तः । अतुण्डकान् । २७७ तुडि तोडने । दारणं हिंसनं वा तत् । अस्माण् ण्वुल् ॥

अभुण्डितोच्चण्डगतीनशण्डनान्कुमार्गवैतण्डिकपण्डितावृतान् ।
स तानकण्डान्दधिखण्डनादिकस्वधर्मसक्तान्गतहेडमानमत् ॥ ३७ ॥

स तान् गतहेडमानमत् । गतहेडं गतावज्ञं यथा तथा नमस्कृतवान् । कीदृशान् । अभुण्डितोच्चण्डगतीन् अस्वीकृतक्रूरव्यापारान् । अशण्डनान् न शण्डनं परिपीडा येषां तान् । कुमार्गवैतण्डिकपण्डितावृतान् असन्मार्गस्य वैतण्डिकाः खण्डनैकपरा ये पण्डितास्तैरावृतान् मिश्रान् । अकण्डान् मदरहितान् । दधिखण्डनादिकस्वधर्मसक्तान् दधिखण्डनादिके दधिमथनादिके स्वधर्मे सक्तान् ॥—अभुण्डितेति । २७८ भुडि वरणे । स्वीकारस्तत् । हरण इत्येके । कर्मणि क्तः । उच्चण्डेति । २७९ चडि कोपे । पचाद्यच् ।

क्रूरत्वार्थो लक्षणया । शण्डनेति । २८० शडि रुजायां संघाते च । ल्युट् । वैतण्डि-केति । २८१ तडि ताडने । अस्माद् 'गुरोश्च' इत्यकारे वितण्डा परपक्षस्य ताडनं नि-रसनं तया दीव्यति व्यवहरतीति वैतण्डिकः ॥—पण्डितेति । २८२ पडि गतौ । प्राग्व-दकारे पण्डा ज्ञानं गत्यर्थानां ज्ञानार्थत्वात् । अस्मात् तारकादित्वादितचि पण्डितः । अकण्डान् । २८३ कडि मदे । घञ् । खण्डनेति । २८४ खडि मन्थे । ल्युट् । हे-डेति । २८५ हेडृ २८६ होडृ अनादरे । हेडेर्घञ् ॥

अहोडनीयान्पशुपालयानसौ अपश्यदानन्दपयोधिबाडितः ।
सुपाकविद्रालिफलालिभिर्द्रुमैः स्निग्धानविध्राडितचारुशालिकान् ॥३८॥

असौ पशुपालयानपश्यत् । कीदृश इत्यत्राह—आनन्दपयोधिबाडितो मोदपयोधावा-प्लुतः । कीदृशान् इत्यत्राह—अहोडनीयान् अनादर्तुमयोग्यान् । सुपाकविद्रालिफलालिभि-र्द्रुमैः । स्निग्धान् । सुपाकेनातिपक्कतया विशरणशीलाः फलानां आलयो येषां तैर्द्रुमैः स्नि-ग्धान् निबिडान् । अविध्राडितचारुशालिकान् अविध्राडिता अविशीर्णमञ्जरीयुक्ता अत एव चारवः शालयो येषु तान् । 'शेषाद्विभाषा' इति कप् ॥—अहोडनीयानिति । होडेरनीयर् । बाडितेति । २८७ बाडृ आप्लाव्ये । आप्लवनं तत् । कर्तरि क्तः । वि-द्रालि । २८८ द्राडृ २८९ ध्राडृ विशरणे । द्राडेर्णिनिः । 'डलयोरुक्तिभेदस्तु डकारो नाक्षरान्तरम्' इत्युक्त्या डस्य लः । अविध्राडितेति । ध्राडेः कर्तरि क्तः । शालीति ।२९० शाडृ श्लाघायाम् । डलयोरभेदाल्लकारः । अस्मादौणादिक इन् । अट्टादय उदात्ता अनुदात्तेतः ॥

पशुपालयानेवं वर्णयति पञ्चदशभिः(त्र्यष्टभिः)—

प्रशौटदुस्रागणयौटितान्तिकान्मेटद्वृषाम्रेडितघोषमेदुरान् ।
अम्लेटकैश्चाकटुचाटुभाषितैरटैः पटत्संरटिताञ्जनोत्करैः ॥ ३९ ॥

प्रशौटद्भिर्गर्वायमाणैरुस्रागणैर्गोगणैः । यौटितं संबद्धमन्तिकं येषां तान् । मे-टतां माद्यतां वृषाणामाम्रेडितेन पुनः पुनः कृतेन घोषेण नर्दनेन मेदुरान् पूर्णान् । जनो-त्करैः पटत्संरटितान् पटत् व्याप्नुवत् संरटितं शब्दो येषां तान् । कीदृशैः । अम्लेटकैर-माद्यद्भिः । अकटु अतीक्ष्णं चाटु प्रियं भाषितं येषां तैः । अटैः संचरद्भिः ॥—प्रशौट-दिति । २९१ शौटृ गर्वे । गण्यन्ता उदात्ता उदात्तेतः । अस्माच्छता । यौटितेति । २९२ यौटृ बन्धे । कर्मणि क्तः । मेटदिति । २९३ मेटृ २९४ म्रेडृ २९५ म्लेटृ उन्मादे । मेटेः शता । म्रेडेः कर्मणि क्तः । आङ्पूर्वत्वादुक्त्यर्थः । अम्लेटकैः । म्लेटे-र्ण्वुल् । अकटु इति । २९६ कटे वर्षावरणयोः । चटे इत्येके । कटेः 'कटिबन्ध्यन्धि-भ्यश्च' इत्युत्प्रत्ययः । चाट्विति । 'दसनिजनिचरिचटिरहिभ्यो ञुण्' । अटैः । २९७ अट २९८ पट गतौ । अटेः पचाद्यच् । पटेः शता । संरटितेति । २९९ रट परि-भाषणे । 'नपुंसके भावे क्तः' ॥

लाटार्हशाटीवटितैर्वटुत्रजैर्वृतान्खलैश्चाकिटितान्प्रखेटकैः ।
अशेटनीयैः सुधियामसेटकैर्युताञ्जटाझाटधरैश्च कैश्चन ॥ ४० ॥

वटुव्रजैर्वृतान् व्याप्तान् । कीदृशैः । लाटार्हशाटीवटितैः । लाटार्हाभिर्बाल्ययोग्याभिः शाटीभिर्वस्त्रैर्वटितैर्वेष्टितैः । प्रखेटकैः खलैरकिटितांश्च । प्रखेटकैस्त्रासकैः । अकिटितान् अत्रासितान् । कैश्चन जटाझाटधरैश्च युतान् । जटाझाटो जटासंघः । कीदृशैः । सुधियामशेटनीयैरत्यन्तमादर्तव्यैः । स्वयं चान्येषामसेटकैरादर्तृभिः ॥—लाटेति । ३०० लट बाल्ये । घञ् । शाटीति । ३०१ शट रुजा[१]विशरणगत्यवसादनेषु । घञन्तात् 'जातेरस्त्रीविषयाद्–' इति ङीष् । वटितैः । ३०२ वट वेष्टने । कर्मणि क्तः । वटुरिति । 'वटिचटिचञ्चिभ्यश्च' इति भोजोक्त्या तस्मादेव उन् । अकिटितान् प्रखेटकैरिति । ३०३ किट ३०४ खिट त्रासे[२] । त्रासनायामित्यर्थः । भीमार्थे च द्रुमे । कर्मणि क्तः । ण्वुल् च अशेटनीयैः । ३०५ शिट ३०६ षिट अनादरे । शिटेरनीयर् । असेटकैः । षिटेर्ण्वुल् । जटाझाटेति । ३०७ जट ३०८ झट संघाते । जटेरच् । झटेर्घञ् ॥

क्वचिद्भटाधिष्ठितवेदिकातटान्क्वचिच्च खट्वाविहरन्नटीजनान् ।
क्वचिच्च पेटीशतपूर्णहाटकान्क्वचित्सटालोटनलोलघोटकान् ॥ ४१ ॥

भटैरधिष्ठित आस्थितो वेदिकानां तट उन्नतप्रदेशो येषु तान् । खट्वायां विहरन्तः क्रीडन्तो नटीजना येषु तान् । पेटीशतेषु पूर्णानि हाटकानि हेमानि येषु तान् । सटानां गलरोम्णां लोटनेन क्षोभणेन लोलाश्चलन्तो घोटका अश्वा येषु तान् ॥—भटेति । ३०९ भट भृतौ । भृतिर्वेतनप्राप्तिः । अस्मात्पचाद्यच् । तटेति । ३१० तट उच्छ्राये । अच् । खट्वेति । ३११ खट काङ्क्षायाम् । 'अशिप्रुषिलटिकणिखटिविशिभ्यः क्वन्' इति क्वन् । नटीति । ३१२ णट नृत्तौ । हिंसायां च द्रुमे । नृत्तिर्नर्तनम् । तच्चात्र नटव्यापारः । अस्मादचि जातिङीष् । पेटीति । ३१३ पिट शब्दसंघातयोः । घञन्ताद् गौरादिङीष् । हाटकानिति । ३१४ हट दीप्तौ । संज्ञायां ण्वुल् । बाहुलकात् स्त्रीत्वाभावः । सटेति । ३१५ षट अवयवे । अजन्ताट्टाप् । लोटनेति । ३१६ लुट विलोटने । 'लुल' इत्यन्ये । लुटेर्ल्युट् । लोलेति । लुलेरच् ॥

चेटैर्विटैश्चानुगतानवेटकैरेटत्पशूत्केटिरजःकटन्मलान् ।
प्रकण्टिताशोदयदंशुमण्डितैरकुण्डरत्नैर्मुडितार्कदीधितीन् ॥ ४२ ॥

चेटैर्विटैश्चानुगतान् व्याप्तान् । कीदृशैः । अवेटकैरनाक्रोशकैः । परेषामनिन्दकैः । एटद्भ्यः पशुभ्य उत्केटिभिरूर्ध्वं गच्छद्भी रजोभिर्हेतुभिः कटदपगच्छन् मलं पापं येभ्यस्तान् । अकुण्डरत्नैरकुण्डैरविकलैः संपूर्णैः रत्नैः पद्मरागादिरत्नैर्मुडिता मर्दिता तिरस्कृतार्कप्रभा येषु तान् । कीदृशै रत्नैः । प्रकण्डिताशोदयदंशुमण्डितैः । प्रकण्डिताशं व्याप्तदिकं

१. 'विरुजा' पा०. २. 'वित्रासे' पा०.

यथा तथोदयद्भिरुद्गच्छद्भिरंशुभिर्मण्डितैरलंकृतैः ॥—चेटैरिति । ३१७ चिट परप्रैष्ये । अच् । विटैः । ३१८ विट शब्दे । इगुपधत्वात् कः । अवेटकैः । ३१९ बिट आक्रोशे । ण्वुल् । एटदिति । ३२० इट ३२१ किट ३२२ कटी गतौ । इटेः शता । पशूंकेटीति । 'बहुलमाभीक्ष्ण्ये' इति णिनिः । कटदिति । कटेः शता । प्रकण्टितेति । 'इदितं कटिमिच्छन्ति केचिदन्ये तमेदितम् । इधातुमत्र प्रश्लिष्टमधातुं वा परे जगुः ॥' इत्युक्तेः कटेरित्त्वपक्षे कर्मणि क्तः । उदयदिति । इधातुप्रश्लेषपक्षे शता । मण्डितैः । ३२३ मडि भूषायाम् । कर्मणि क्तः । अकुण्डेति । ३२४ कुडि वैकल्ये । अच् । मुडितेति । ३२५ मुड ३२६ ड मर्दने । कर्मणि क्तः ॥

अचुन्ननुन्मुण्डितपुण्डरीकभृत्सरःश्रियो रुण्डकलुण्डनोज्झितान् ।
अस्फोटदग्र्यस्फटिकादिभाजनान्पाठोत्सुकैश्चावठरैर्लसन्मठान् ॥ ४३ ॥

अचुण्ड्यनल्पीभवन्त्यनुन्मुण्डितान्यखण्डितानि । अविकसितानीति यावत् । पुण्डरीकाणि बिभ्रति यानि सरांसि तैः श्रीः शोभा येषां तान् । तथा रुण्डकानां चोराणां लुण्डनेन चौर्येणोज्झितांस्त्यक्तान् । अस्फोटन्त्यभिन्नानि अग्र्याणि श्रेष्ठानि स्फटिकादिभाजनानि येषां तान् । पशुपालयान् अवठरैरमूर्खैः पाठोत्सुकैर्लसन्मठांश्च । पाठो विद्याभ्यासः । मठो गृहविशेषः ॥—अचुन्निति । ३२७ चुडि अल्पीभावे । क्विप् । अनुन्मुण्डितेति । ३२८ मुडि खण्डने । पुडीत्येके । मुण्डेः कर्मणि क्तः । पुण्डरीकेति । 'पर्परीकादयश्च' इत्यत्र 'मृद्वीकतिन्तिडीक-बाह्लीक-वलीक-कल्मलीक-पुण्डरीक-चञ्चरीक-प्रतीक-सभीक-पूतिकादयश्च' इत्यत्र(?) भोजेन निपातितः । रुण्डक-लुण्डनेति । ३२९ रुटि ३३० लुटि स्तेये । 'रुठि लुठि' इत्येके । 'रुडि लुडि' इत्यपरे । ण्वुल्ल्युटौ । अस्फोटदिति । ३३१ स्फुटिर् विशरणे । स्फुट स्फुटि स्फुटे इत्येके । स्फुटेः शता । स्फटिकेति । 'अलिकलिदलिस्फटिकाभ्यश्च' इति भोजोक्त्या स्फटेः किकन् । पाठेति । ३३२ पठ व्यक्तायां वाचि । घञ् । अवठरैरिति । ३३३ वठ स्थौल्ये । अस्मादौणादिकोऽरप्रत्ययः । मठेति । ३३४ मठ ३३५ कठ मदनिवासयोः । मठेर्घञर्थे कः ॥

वनाश्रयत्वेऽपि सकाठपर्यठद्रठन्मृगालीहठकर्मवर्जितान् ।
रोठन्नृशंसालुठितैरनोठकैर्वृतान्धनाढ्यैर्मणिपीठसंश्रयैः ॥ ४४ ॥

वनाश्रयत्वे सकाठं समदं यथा तथा पर्यठन्त्याः चरन्त्याः रठन्त्याः शब्दायमानाया मृगाल्या हठकर्मणा क्रूरकर्मणा वर्जितान् । मणिपीठसंश्रयैर्धनाढ्यैर्वृतान् । कीदृशैः । रोठन्नृशंसालुठितैः । रोठद्भिर्हिंसकैर्नृशंसैः क्रूरैरलुठितैरपीडितैरनोठकैरन्येषामहिंसकैः ॥—काठेति । कठेर्घञ् । पर्यठदिति । 'अठ गतौ' इत्यप्येके । शता । रठदिति । ३३६ रठ परिभाषणे । [रट इत्येके ।] शता । हठेति । ३३७ हठ प्लुतिशठत्वयोः । बलात्कार इत्येके । पचाद्यच् । रोठदिति । ३३८ रुठ ३३९ लुठ ३४० उठ उपघाते । ऊठेत्येके । रुठेः शता । अलुठितैरिति । लुठेः कर्मणि क्तः । ओठकैरिति । उठेर्ण्वुल् । पीठेति । ३४१ पिठ हिंसासंक्लेशनयोः । घञर्थे कः । 'अन्येषामपि दृश्यते' इति दीर्घः ॥

शठत्वमार्गे शुठितैरकुण्ठितैरलुण्ठिताशुण्ठितसौहृदान्वितैः ।
प्ररुण्ठिताघैरनुलुण्ठकैर्हरेः प्रचुड्डबोधाड्डिरतीव शोभितान् ॥ ४५ ॥

हरेरनुलुण्ठकैरतीव शोभितान् । अनुलुण्ठकैरनुचरैः । अतीवात्यर्थम् । कीदृशैः शठत्वमार्गे शुठितैः प्रतिहतगतिभिः । अकुण्ठितैः स्वकृत्येष्वप्रतिहतैः । अलुण्ठितेनाप्रयासेनाप्रतिहतेन वा अशुण्ठितेनाशुष्केण क्षीणेन च सौहृदेनान्वितैः । प्ररुण्ठितं सम्यग्गतमघं येषां तैः । प्रचुड्डस्य अभिप्रायाविष्करणस्य बोधे अड्डिरभियुक्तैः ॥—शठत्वेति । ३४२ **शठ** कैतवे च । अस्मात्पचाद्यजन्तात् त्वप्रत्ययः । शुठितैः । ३४३ **शुठ** गतिप्रतिघाते । ३४४ **कुठि** च । अयं प्रतिघातमात्र एवेति माधवः । आलस्ये गतिप्रतिघाते वास्ति द्रुमे । शुठेः कर्मणि क्तः । अकुण्ठितैः । कुठेः कर्तरि क्तः । अलुठितेति । ३४५ **लुठि** आलस्ये प्रतिघाते च । कर्तरि क्तः । अशुण्डितेति । ३४६ **शुठि** शोषणे । प्राग्वत् क्तः। प्ररुण्ठितेति । ३४७ **रुठि** ३४८ **लुठि** गतौ । रुण्ठेः कर्तरि क्तः । लुण्ठेर्ण्वुल् । प्रचुड्डेति । ३४९ **चुड्ड** भावकरणे । अभिप्रायाविष्करणं तत् । अस्माद् घञ् । अड्डिरिति । ३५० **अड्ड** अभियोगे । दोपधादस्मात् क्विपि संयोगान्तलोपः ॥

अकड्ढरिक्रीडनधूततोडकान्प्रहूडितान्होडदरोड्यभिक्षुकैः ।
प्ररोडकानङ्गविलोलितैर्वृतान्रतावडद्भिर्ललनाजनैः कलैः ॥ ४६ ॥

अकड्ढा अकर्कशेन हरिक्रीडनेन धूता निरस्तास्तोडकाः पीडका येषु तान् । होडद्भिः संचरद्भिः । अरोड्यैः आदरणीयैर्भिक्षुकैः संन्यासिभिः प्रहूडितान् प्राप्तान् । ललनाजनैर्वृतान् । कीदृशैः । प्ररोडकेन सर्वोन्मादकेन अनङ्गेन विलोलितैर्मादितैः । रतावडद्भिरुद्यच्छद्भिः । कलैर्मधुरैः ॥—अकदिति । ३५१ **कड्ड** कार्कश्ये । चुड्डादयस्त्रयो दोपधाः । डोपधाश्च द्रुमे । कड्डेः प्राग्वत् क्विप् । क्रीडनेति । ३५२ **क्रीडृ** विहारे । ल्युट् । तोडकानिति । ३५३ **तुडृ** तोडने । 'तूडृ' इत्येके । तोडनमुक्तम् । तुडेर्ण्वुल् । प्रहूडितान् । ३५४ **हूडृ** ३५५ **होडृ** गतौ । हुट्ट इत्येके । हूडेः कर्मणि क्तः । होडदिति । होडेः शता । अरोड्येति । ३५६ **रौडृ** अनादरे । ण्यत् । प्ररोडकेति । ३५७ **रोडृ** ३५८ **लोडृ** उन्मादे । रोडेर्णिजन्ताद् ण्वुल् । विलोलितैः लोडेर्णिजन्तात् कर्मणि क्तः । अडद्भिः । ३५९ **अड** उद्यमे । शता । ललनेति । ३६० **लड** विलासे । लडेर्युच् । कलैः । ३६१ **कड** मदे । कडि इत्येके । कडेरच् । शौटादय उदात्ता अयतिवर्ज(?) उदात्तेतः ॥

अथ गोपगृहान् पश्यतोऽक्रूरस्य हर्षातिशयमाह—

अतिप्त हर्षाश्रु धृतिश्च तेपिता गृहानिमान्प्रस्तिपितार्ति पश्यतः ।
अस्तेपितानन्दरसस्य तस्य न व्यग्लेपि चाङ्गैर्विपिनाध्वकेपनात् ॥४७॥

इमान् गृहान् प्रस्तिपितार्ति पश्यतः तस्य हर्षाश्रु अतिप्त । प्रस्तिपिता क्षरिता गता आर्तिर्यस्मिन् तथा पश्यतस्तस्याक्रूरस्य हर्षाश्रु अतिप्ताक्षरत् । धृतिश्च तेपिता गता ।

विपिनाध्वकेपनादङ्गैर्न व्यग्लेपि च । विपिनाध्वनो वनमार्गस्य केपनात् संचरणादङ्गैर्न व्यग्लेपि न विशेषतः ग्लानीभूतम् । कीदृशस्य । अस्तेपितोऽगतः आनन्दातिशयो यस्य तस्य ॥—अतिप्तेति । ३६२ तिपृ ३६३ तेपृ ३६४ ष्टिपृ ३६५ ष्टेपृ क्षरणार्थाः 'धिपृ धेपृ' इत्येके । तेपृ कम्पने च । स्तुभान्ता अनुदात्तेतः उदात्तास्तिपिवर्जम् तिपेर्लुङ् । तेपितेति । प्रस्तिपितेति । अस्तिपितेति । तेप्यादीनां त्रयाणां कर्तरि क्तः व्यग्लेपि । ३६६ ग्लेपृ दैन्ये । भावे लुङि चिण् । विपिनेति । ३६७ टुवेपृ कम्पने 'वेपितुह्योर्ह्रस्वश्च' इतीनच् । केपनात् । ३६८ केपृ ३६९ गेपृ ३७० ग्लेपृ च चकारात् कम्पने गतौ च । केपेर्ल्युट् ॥

अगेपनोऽग्लेपत स व्रजं यदा रविस्तदामेपत पश्चिमां दिशम् ।
प्ररेपितात्कोरकतां सरोरुहादलेपि भृङ्गैः कुमुदं त्रपान्वितैः ॥ ४८ ॥

स यदा व्रजमग्लेपत तदा रविः पश्चिमां दिशममेपत गतवान् । अगेपनो निश्चलधीः । तदा च त्रपान्वितैर्भृङ्गैः कोरकतां प्ररेपितात् प्राप्तात् सरोरुहात् कुमुदमलेपि प्राप्तम् ॥—अगेपनेति । गोपेः 'अनुदात्तेतश्च–' इति युच् । अग्लेपत । ग्लेपेर्लङ् । अमेपतेति । ३७१ मेपृ ३७२ रेपृ ३७३ लेपृ गतौ । मेपेर्लङ् । प्ररेपितात् । रेपेः कर्तरि क्तः । अलेपि । लेपेः कर्मणि लुङि चिण् । त्रपेति । ३७४ त्रपूष् लज्जायाम् । 'षिद्भिदादिभ्योऽङ्' इत्यङि त्रपा ॥

संध्यां वर्णयत्यष्टभिः—

सकम्पहेरम्बसमानलम्बनाः समाव्रजन्नम्बितघण्डिकास्तदा ।
प्रलम्बसास्नाः कबरत्विषो वृषा अक्लीबिताः क्षीबतयातिशीभराः ॥ ४९ ॥

तदा वृषाः समाव्रजन् वनादागतवन्तः । कीदृशा इत्यत्राह—सकम्पं हेरम्बेण गणेशेन समानं लम्बनं शब्दो येषां ते । अक्लीबिताः अतिप्रगल्भाः क्षीबतया मत्तत्वेनातिशीभरा नितरां रम्याः । अम्बिताः शब्दिता घण्डिका येषां ते । प्रलम्बा अवस्रस्ताः [सास्ना येषां ते] । कबरा नानारूपा त्विट् येषां ते ॥—सकम्पेति । ३७५ कपि चलने । घञ् । हेरम्बेति । ३७६ रबि ३७७ लबि ३७८ अबि शब्दे । ३७९ लबि अवस्रंसने च । हे इत्येवं रम्बते इति हेरम्बः । रम्बेः कर्मण्यण् । लम्बनेति । लम्बेर्ल्युः । अम्बितेति । अम्बेः कर्तरि क्तः । प्रलम्बेति । अवस्रंसनार्थाल् लम्बेः पचाद्यच् । कबरेति । ३८० कबृ वर्णे । बाहुलकादरप्रत्ययः । अक्लीबिताः । ३८१ क्लीबृ अधार्ष्ट्ये । कर्तरि क्तः । क्षीबतयेति । ३८२ क्षीबृ मदे । 'अनुपसर्गात्फुल्लक्षीब–' इति निष्ठायामिड्भावो लोपश्च निपातितः । शीभराः । ३८३ शीभृ कत्थने । ३८४ चीभृ च । पूर्ववदरप्रत्ययः ॥

प्रचीभ्यरेभैः पशवोऽम्भसांनिधिप्ररम्भणस्तम्भिभिरागता व्रजम् ।
अस्कम्भिताः प्राप्य शिशून्सजम्भनानुज्जृम्भहर्षा लिलिहुः सशल्भनम् ॥५०

पशवः प्रचीभ्यरेभैः सह व्रजमागताः प्रचीभ्याः प्रशंसनीया रेभाः शब्दास्तैः। कीदृशैः। अम्भसां निधेः समुद्रस्य प्ररम्भणं शब्दं स्तम्भयितुं रोद्धुं शीलं येषां तैः । अस्कम्भिताः शिशून् प्राप्य उज्जृम्भहर्षाः सशल्मनं लिलिहुः । अस्कम्भिताः प्रतिबन्धरहिताः । उज्जृम्भो वर्धमानो हर्षो यासां ताः । सशल्मनं शल्मनेन सहितं यथा तथा । शल्मनं श्लाघा । लिलिहुः । शिशून् विशिनष्टि—सजम्भनान् जम्भनेन सहितान् । जम्भनं जृम्भा ॥ —प्रचीभ्येति । चीभेर्ण्यत् । रेभैः । ३८५ रेभृ शब्दे । अभि रभि इत्येके । रेभेर्घञ् । अम्भसामिति । अम्भेरसुन् । अम्भसांनिधीति 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । प्ररम्भणेति । रम्भेर्ल्युट् । स्तम्भिभिरिति । ३८६ ष्टभि ३८७ स्कभि प्रतिबन्धे । स्तम्भेर्णिजन्ताण्णिनिः । अस्कम्भितः । स्कम्भेः कर्तरि क्तः । सजम्भनान् । ३८८ जभि ३८९ जृभि गात्रविनामे । आद्य इदिदित्येके । जम्भेर्ल्युट् । रधिजभोरचीति नुम् । उज्जृम्भेति । जृम्भेः पचाद्यच् । सशल्भनम् । ३९० शल्भ कत्थने । ल्युट् ॥

वल्भप्रगल्भाः पथिकाश्च तत्क्षणं सुश्रम्भणस्तोभयुतानगुर्गृहान् ।
गोपायतां धर्ममधूपितात्मनां जल्पान्विमुच्याभवदुद्यमो जपे ॥ ५१ ॥

पथिकाश्च तत्क्षणं गृहान् अगुः । यथा गावस्तथा पान्था अपि तं कालमभिव्याप्य संध्यावसितिरितपर्यन्त(?)मागताः । कीदृशाः । वल्भे भोजने प्रगल्भाः समर्थाः । कीदृशान् गृहान् । सुश्रम्भणस्तोभयुतान् समीचीनपाकव्यापारयुक्तान् । [ततश्च]धर्मं गोपायतामधूपितात्मनां जल्पान् विमुच्य जपे उद्यमोऽभवत् । गोपायतां परिरक्षताम् । अधूपितोऽसंतप्त आत्मा मनो येषां तेषां सतामित्यर्थात् ॥—वल्भेति । ३९१ वल्भ भोजने । घञ् । प्रगल्भाः । ३९२ गल्भ धार्ष्ट्ये । पचाद्यच् । सुश्रम्भणेति । ३९३ श्रम्भु पाके । ल्युट् । स्तोभेति । ३९४ ष्टुभु स्तम्भे । अयं व्यापारार्थे प्रसिद्धः । अस्मात् घञ् । तिपादयोऽनुदात्तेतः । तिपिवर्जमुदात्ताः । गोपायतामिति । ३९५ गुपू रक्षणे । स्तम्भान्ता उदात्ता उदात्तेतः । अस्मात् 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यायप्रत्ययान्तः शता । अधूपितेति । ३९६ धूप संतापे कर्तरि क्तः । जल्पान् । ३९७ जल्प ३९८ जप व्यक्तायां वाचि । जप मानसे च । जल्पेर्घञ् । जप इति । 'व्यधजपोरनुपसर्गे' इत्यप् ॥

चेपुः सपन्तोऽसचितां प्रियां प्रियाः संध्येति रेपुः कललापिनः शुकाः ।
श्येनाश्चुपित्वा तुतुपुः कपोतकान्काकानतुम्पन्नभितुत्रुपुः शशान् ॥५२॥

प्रिया सपन्तोऽसचितां प्रियां चेपुः । प्रियाः पादप्रणामादिभिर्मिलिता अरञ्चितां प्रियां सान्त्वयामासुः । कललापिनः शुकाः संध्या इति रेपुर्व्यक्तमवदन् । श्येनाश्चुपित्वा कपोतकांस्तुतुपुः । पक्ष्याखेटाय विसृष्टाः श्येनाश्चुपित्वा मन्दं गत्वा तुतुपुरपीडयन् । काकान् अतुम्पन् विव्यथुः । शशानभितुत्रुपुरहिंसन् ॥—चेपुरिति ॥ ३९९ चप सान्त्वने । लिट् । सपन्तः । ४०० षप समवाये । षचेत्येके । समवायः संबन्धः सम्यगवबोधो वा । सपेः शता । असचिताम् । सचेः कर्तरि क्तः । रेपुः । ४०१

रप ४०२ लप व्यक्तायां वाचि । रपेर्लिट् । कललापिनः । लपेर्णिनिः । चुपित्वा । **४०३ चुप** मन्दायां गतौ । अस्मात् 'समानकर्तृकयोः पूर्वकाले' इति क्त्वा । तुतुपुः । **४०४ तुप ४०५ तुम्प ४०६ त्रुप ४०७ त्रुम्प ४०८ तुफ ४०९ तुम्फ ४१० त्रुफ ४११ त्रुम्फ** हिंसार्थाः । तुपेर्लिट् । अतुम्पन् । तुम्पेर्लङ् । अभितुत्रुपुः । त्रुपेर्लिट् ॥

अत्रुम्प्यधामानमिनं प्रतोफितुं प्रतुम्फशीलान्मिलतोऽथ राक्षसान् ।
अत्रोफकास्तुम्फितुमुद्यता जलैर्वापीमपर्पन्नरफन्नदीं द्विजाः ॥ ५३ ॥

अथ द्विजाः अत्रुम्प्यधामानमिनं प्रतोफितुं मिलतः राक्षसान् जलैस्तुम्फितुमुद्यताः वापीमपर्पन् । नदीमरफन् । अत्रुम्प्यमहिंस्यं धाम तेजो यस्य तमिनं सूर्यं प्रतोफितुं हिंसितुं मिलतः संघीभवतो राक्षसान् मन्देहनाम्नो जलैः संध्याञ्जलिभिस्त्रुम्फितुं हन्तुमपर्पन्नगच्छन् । केचित् नदीमरफन्नगच्छन् । कीदृशाः द्विजाः । अत्रोफका अहिंसकाः । कीदृशान् राक्षसान् । प्रत्रुम्फशीलान् । प्रतुम्फो हिंसनं शीलं येषां तान् ॥—अत्रुम्प्येति । त्रुम्पेर्ण्यत् । प्रतोफितुम् । तुफेस्तुमुन् । प्रतुम्फेति । तुम्फेर्घञ् । अत्रोफकाः । त्रुफेर्ण्वुल् । तुम्फितुम् । त्रुफेस्तुमुन् । अपर्पन्निति । **४१२ पर्प ४१३ रफ ४१४ रफि ४१५ अर्ब ४१६ पर्ब ४१७ लर्ब ४१८ वर्ब ४१९ मर्ब ४२० कर्ब ४२१ खर्ब ४२२ गर्ब ४२३ शर्ब ४२४ षर्ब ४२५ चर्ब** गतौ । अर्बादयो नोपधा इत्येके । पर्पेर्लङ् । रफेश्च लङ् ॥

हयैः सुरम्फैर्द्रुतमर्बतो रवेः पर्बद्भिरालर्ब्यत रक्तिमा करैः ।
प्रवर्ब्य शैलानुपमर्ब्य पद्मिनीं प्रकर्ब्य चाशाः श्रमशोणितैरिव ॥ ५४ ॥

सुरम्फैर्हयैर्द्रुतमर्बतो रवेः पर्बद्भिः करैः रक्तिमा आलर्ब्यत । सुरम्फैः शोभनगमनशीलैः । अर्बतः गच्छतः । पर्बद्भिः प्रसरद्भिः करैः रश्मिभिः । रक्तिमा रक्तत्वम् । आलर्ब्यत सम्यगवापि । शैलान् प्रवर्ब्य, पद्मिनीमुपमर्ब्य, आशाः प्रकर्ब्य च, श्रमशोणितैरिव । शैलाग्रगमनेन पद्मिनीप्राप्त्या सर्वदिक्संचारेण च जातेन परिश्रमेण शोणितैरिव ॥—सुरम्फैरिति । रम्फेर्घञ् । अर्बे शता । पर्बेश्च । आलर्ब्यत । कर्मणि लङ् । वर्बिमर्बिकर्बीनां ल्यप् ॥

अखर्बि शैलाग्रमगर्बि सौधभूरशर्बि शाखाशिखरं च रश्मिभिः ।
ऊर्ध्वप्रसर्बान्न तु चर्बिता मही दिक्कुम्बितेऽर्के परिलुम्बिताम्बुजे ॥ ५५ ॥

रश्मिभिः शैलाग्रमखर्बि । सौधभूरगर्बि । शाखाशिखरं च अशर्बि । सर्वत्र प्राप्तमित्यर्थः । अर्के परिलुम्बिताम्बुजे दिक्कुम्बिते ऊर्ध्वप्रसर्बात् मही न तु चर्बिता । परिलुम्बितानि अर्दितानि अम्बुजानि येन तादृशे अर्के दिशाच्छादिते सति । ऊर्ध्वगमनात् हेतोर्मही रश्मिभिः न प्राप्ता अखर्बि । अगर्बि । अशर्बि । एषु कर्मणि चिण् । प्रसर्बेति ।

सर्वेर्घञ् । चर्वेः कर्मणि क्तः । कुम्बितेति । **४२६ कुबि** आच्छादने । प्रागवत् क्तः । परिलुम्बितेति । **४२७ लुबि ४२८ तुबि** अर्दने । लुम्बेः प्रागवत् क्तः ॥

वियोगसंतुम्बितकोकचुम्बिता संतापसृब्धापि जगाद तद्वधूः ।
मा त्वां स्मरः सृम्भतु शोभनाकृते चिन्ता न शुम्भेन च सुम्भतु व्यथा ॥५६

वियोगसंतुम्बितकोकचुम्बिता तद्वधूः संतापसृब्धा अपि जगाद । वियोगेन भविष्यता संतुम्बितेनार्दितेन कोकेन चुम्बिता तद्वधूस्तस्य कोकस्य वधूः स्वयं संतापेन सृब्धा पीडिता अपि जगाद । हे शोभनाकृते भासमानाकृते, प्रिय, त्वां स्मरो मा सृम्भतु पीडयतु । चिन्ता न शुम्भेत् न स्फुरतु । पीडयतु वा । व्यथा न च सुम्भतु ॥—संतुम्बितेति तुबेः कर्मणि क्तः । **४२९ चुबि** वक्त्रसंयोगे । प्रागवत् क्तः । सृब्धा । **४३० षृभु ४३१ षृन्भु** हिंसार्थौ । षिभु षिन्भु इत्येके । ष्टभेः प्रागवत् क्तः । सृम्भेर्लोट् । शोभदिति । **४३२ शुभ ४३३ शुन्भ** भाषणे । हिंसायां च भासन इत्येके । पुन्भेत्यन्ये । शुभेः शता शुभेर्लिङ् । सुन्भेर्लोट् गुपादय उदात्ता उदात्तेतः ॥

प्रघिण्य भूषाः परिघुण्य मालिकाः प्रघृण्य घोणापुटघूर्णिचन्दनम् ।
पणाय्यरूपाः पनिताकृतीन्ययुर्भामिन्य एवाक्षमया स्वकामुकान् ॥५७॥

भामिन्य एव भूषाः प्रघिण्य मालिकाः परिघुण्य घोणापुटघूर्णिचन्दनं प्रघृण्य च अक्षमया स्वकामुकान् ययुः । भामिन्यः प्रणयकुपिताः स्त्रियः । एवेत्यप्यर्थे । भूषा मालिकाः चन्दनं च गृहीत्वेत्यर्थः । घोणापुटं नासान्तर्भागं घूर्णयति भ्रमयतीति तथा । कीदृश्यः । पणाय्यं स्तुत्यं रूपं यासां ताः । कीदृशान् कामुकान् । पनिता स्तुता आकृतिर्येषां तान् ॥—प्रघिण्य । परिघुण्य । प्रघृण्येति । **४३४ घिणि ४३५ घुणि ४३६ घृणि** ग्रहणे । इदित्वाद् नुमि ष्टुत्वं ल्यप् । घोणेति । **४३७ घुण ४३८ घूर्ण** भ्रमणे । घुणेरचिक्रोडादिनिपातनात् टाप् । घूर्णीति । घूर्णेर्णिजन्ताण्णिनिः । पणाय्येति । **४३९ पण** व्यवहारे स्तुतौ च । **४४० पन** च । पन स्तुतावेव । 'गुपूधूप–' इत्यायान्ताण्ण्यत् । पनितेति । पनेः कर्मणि क्तः । भामिन्यः । **४४१ भाम** क्रोधे ।। घञन्तान्मत्वर्थीय इनिः । अक्षमयेति । **४४२ क्षमूष्** सहने । षित्वादङ् । कामुकानिति । **४४३ कमु** कान्तौ । कान्तिरिच्छा । 'लषपत–' इत्यादिना उकञ् । घिण्यादय उदात्ता अनुदात्तेतः ॥

अणद्दिशः केलिरणैर्मनोज्ञया वाण्या भणन्तो मणिभूषणोत्कणाः ।
वनात्कुमाराः क्वणिताग्र्यवेणवो व्रणद्विषाणभ्रणिताभ्रमाययुः ॥ ५८ ॥

कुमारा वनात् क्वणिताग्र्यवेणवो व्रणाद्विषाणभ्रणिताभ्रमाययुः । व्रणता शब्दायमानेन विषाणेन भ्रणितं शब्दितमभ्रमाकाशं यस्मिन् तथा आययुः । कीदृशा बालाः । केलिरणैः अणद्दिशो अण्यन्त्यः शब्दायमानाः दिशो येषां ते । मनोज्ञया वाण्या भणन्तः । मणिभूषणैः उत्कणाः सशब्दाः । क्वणिता अग्र्या वेणवो येषां ते ॥—अणदिति । **४४४ अण ४४५ रण ४४६ वण ४४७ भण ४४८ मण ४४९ कण ४५० क्वण**

४५१ व्रण ४५२ भ्रण ४५३ ध्वण शब्दार्थाः । धण इत्येके । अणेः शता । म-णीति । मणेरौणादिक इन् । उत्कणा । कणेरप् । क्वणितेति । क्वणेः कर्तरि क्तः । व्रण-दिति । व्रणेः शता । भ्रणितेति । भ्रणेः प्राग्वत् क्तः ॥

ध्वणच्छिशून्धाणसमोणिताशुभाञ्शोणान्पृथुश्रोणिजनो दुदोह च ।
प्रश्लोणितान्प्रैणनविभ्रणत्क्षितीननुल्बणान्धेनुगणान्कनत्स्तनान् ॥ ५९ ॥

पृथुश्रोणिजनो धेनुगणान् दुदोह । गोपस्त्रीजनो नवसूतान् पशुगणान् अदुहत्(?)। कीदृशान् । ध्वणच्छिशून् शब्दायमाना बाला[1] येषां तान् धाणसमोणिताशुभान् धाणेन शब्देन सम्यगोणितमपनीतमशुभं यैस्तान् । शोणान् रक्तवर्णकपिलप्रायान् । प्रश्लोणि-तान् एकत्र संघातीभूतान् । प्रैणनेन गत्या विभ्रणन्ती शब्दायमाना क्षितिर्येषां तान् । अ-नुल्बणान् सौम्यान् । कनन्तः शोभमानाः स्तना येषां तान्॥—ध्वणदिति । ध्वणेः शता । धाणेति । धाणेर्घञ् । ओणितेति । **४५४ ओणृ** अपनयने । कर्मणि क्तः । शोणान् । **४५५ शोणृ** वर्णगत्योः । पचाद्यच् । श्रोणीति । **४५६ श्रोणृ** संघाते । **४५७ श्लोणृ** च । श्रोणेरिन् । प्रश्लोणितान् । श्लोणेः कर्तरि क्तः । प्रैणनेति । **४५८ प्रैणृ** गतिप्रेरणश्लेष-णेषु । ['पैणृ' इत्यपि क्वचित्पठ्यते ।] ल्युट् । विभ्रणदिति । **४५९ भ्रण** शब्दे । वण इत्येके। भ्रणेः शता । 'रषाभ्याम्' इति णः । उल्बणेति । वणेः पचाद्यच् । कनदिति । **४६० कनी** दीप्तिकान्तिगतिषु । शता । स्तनेति । **४६१ ष्टन ४६२ वन** शब्दे । पचाद्यच् ॥

वनाद्वनं सानुममन्द्रमन्गृहं व्याधोत्करोऽहंमतिमीमिताशयः ।
चान्तामिषश्छान्तजलः फलावलीं जान्त्वा झमञ्जेमनमक्रमीद्गुहाम्॥६०॥

वनाद् वनं सानुं चामन्, गृहं द्रमन्, व्याधोत्करः चान्तामिषः, छान्तजलः, फला-वलीं जान्त्वा जेमनं झमन् गुहामक्रमीत् । अमन् संचरन् । द्रमन् प्राप्नुवन् । चान्तं भक्षितं मांसं येन सः । छान्तं पीतं जलं येन सः । जान्त्वा भुक्त्वा । जेमनं लेह्यं आहारम्। झमन्नदन् । अक्रमीत् प्रविवेश । अहंमतिः अज्ञानं तेन मीमितः प्राप्तः आशयो यस्य सः ॥— वनादिति । वनेरच् । वनमिति । **४६३ वन ४६४षण** संभक्तौ । अर्थभेद-मात्रेण पुनः पठितस्य वनेरप्यच् । सानुमिति । 'दृसनि' इति सनेः ञुण् । अमन् । **४६५ अम** गत्यादिषु । आद्युक्तेः शब्दसंभक्तिरोगेषु । अस्माच्छता । द्रमन् । **४६६ द्रम ४६७ हम्म ४६८ मीमृ** गतौ । मीम शब्देऽपीत्येके । द्रमेः शता । अहम्मतिः । हम्मेर्भावे श्तिप् शप् च । हम्मतिर्ज्ञानम् । नञ्समासः । मीमितेति । मीमेः कर्मणि क्तः । चान्तेति । छान्तेति । **४६९ चमु ४७० छमु ४७१ जमु ४७२ झमु** अदने । जिमेति चैके । चमिछम्योः कर्मणि क्तः । जान्त्वा । जमेः क्त्वा झमन्। झमेः शता । जेमनम् । जिमेर्ल्युट् । अक्रमीत् । **४७३ क्रमु** पादविक्षेपे । लुङ् ॥

---

१. 'मालाः' इति पाठः.

अन्तस्थया कौतुकमूर्च्छया व्रजं तदायतासौ वयमानवात्सकम् ।
पयः प्रदोहादिरताः प्रमय्य तं प्रैक्षन्त नूत्नाचयितं कुतूहलात् ॥ ६१ ॥

असौ तदा अन्तस्थया कौतुकमूर्च्छया व्रजमायत् आगच्छत् । कीदृशं व्रजम् । वयमानं ततस्ततो गच्छत् वात्सकं वत्ससमूहो यस्मिंस्तम् । पयः प्रदोहादिरता जनाः प्रमय्य नूत्नाचयितं तं कुतूहलात् प्रैक्षन्त । प्रमय्य प्राप्य नूत्नया आचयितं आगतम् ॥—आयतेति । **४७४ अय ४७५ वय ४७६ पय ४७७ मय ४७८ चय ४७९ तय ४८० णय** गतौ । षय इत्यप्येके । 'तय णय रक्षणे च' इत्येके । अयेर्लङ् । वयेः शानच् । पयेरसुन् । मयेर्ल्यप् । आचयितं । चयेः कर्तरि क्तः ॥

प्रतय्य किंचिन्नयितो गृहान्तिकं ददर्श धन्यः स दयालुमीश्वरम् ।
गोदोहदेशे रयितं सहाग्रजं तमूतसत्कीर्त्तिमपूतिभिर्गुणैः ॥ ६२ ॥

धन्यः स किंचित् प्रतय्य गृहान्तिकं नयितः दयालुमीश्वरं सहाग्रजं ददर्श । प्रतय्य चरित्वा । नयितः प्राप्तः । कीदृशमीश्वरम् । गोदोहदेशे रयितमुपगतम् । अपूतिभिर्गुणैरूतसत्कीर्त्तिम् । सुरभिभिः सर्वेन्द्रियानन्दिभिः स्वगुणरूपैर्गुणैस्तन्तुभिरूता कृता सती प्रशस्ता कीर्तिरूपा पटी येन तम् । प्रतय्येति । तयेर्ल्यप् । नयितः । णयेः कर्तरि क्तः । दयालुमिति । **४८१ दय** दानगतिरक्षणहिंसादानेषु । 'स्पृहिगृहिपतिदयि–' इत्यादिनालुच् । रयितम् । **४८२ रय** गतौ । कर्तरि क्तः । ऊतेति । **४८३ ऊयी** तन्तुसंताने । कर्मणि क्तः । अपूतिभिरिति । **४८४ पूयी** विशरणे दुर्गन्धे च । क्तिन् ॥

ईश्वरं विशिनष्टि चतुर्दशभिः—

प्रक्नोपयन्तं मुरलीं महीभरक्ष्मायं बलस्फीतसुपीनदोर्युगम् ।
अशेषतां भ्रूशलनैर्वलद्दृशा प्रवल्लमानं प्रियबल्लवीशुचम् ॥ ६३ ॥

मुरलीं प्रक्नोपयन्तं शब्दयन्तं महीभरक्ष्मायं महीभरस्य क्ष्मायं विधूनयितारं त्यक्तारं बलेन स्फीतमतिस्थूलं दोर्युगं यस्य तम् । भ्रूशलैर्भ्रुवोश्चलनैरशेषतामशेषस्य नायितारं पालकम् । वलद्दृशा । वलन्त्या संचरन्त्या दृशा प्रियवल्लवीशुचं प्रवल्लमानं छादयन्तम् ॥—प्रक्नोपयन्तमिति । **४८५ क्नूयी** शब्दे उन्दे च । 'अर्त्तिह्री–' इत्यादिना पुकि शता । भरक्ष्मायं । **४८६ क्ष्मायी** विधूनने । कर्मण्यण् । स्फीतसुपीनेति । **४८७ स्फायी ४८८ ओप्यायी** वृद्धौ । द्वयोः कर्तरि क्तः । अशेषतां । **४८९ तायृ** संतानपालनयोः । क्विपि 'लोपो व्योः' इति यलोपः । शलनैरिति । **४९० शल** चलनसंवरणयोः । ल्युट् । वलदिति । **४९१ वल ४९२ वल्ल** संवरणे संचरणे च । अनुदात्तेत्तां तङोऽनित्यत्वाद्वलेः शता । प्रवल्लमानमिति । वल्लवीति वल्लेः शानच् । औणादिकोऽवक्च ॥

मामल्यमानं स्मितमल्लिकावलीमाभाल्यदैत्याधिपभल्लनोद्धुरम् ।
कलोरुकल्लोलकलिन्दजाजले बालैस्तयूभिः सह देवनोत्सुकम् ॥ ६४ ॥

स्मितमल्लिकावलीं मामल्यमानं पुनः पुनः धारयन्तम् आभाल्यानामहिंस्यानां दैत्याधिपानां भल्लने हिंसने उद्धुरमुद्युक्तम् । तयूभिः क्रीडकैर्बालैः सह कलाः शब्दायमानाः उरवो महान्तः कल्लोला यस्मिंस्तादृशे कलिन्दजाजले देवनोत्सुकं क्रीडनोत्सुकम् ॥—मामल्यमानमिति । **४९३ मल ४९४ मल्ल** धारणे । मलेर्यङ् । मल्लिकेति । मल्लेः 'संज्ञायाम्' इति ण्वुल् । आभाल्येति । **४९५ भल ४९६ भल्ल** परिभाषणहिंसादानेषु । भलेर्ण्यत् । भल्लनेति । भल्लेर्ल्युट् । कलेति । **४९७ कल** शब्दसंख्यानयोः । पचाद्यच् । कल्लोलेति । **४९८ कल्ल** अव्यक्ते शब्दे । 'बहुलमन्यत्रापि' इत्यलक्प्रत्ययः । तयूभिरिति । **४९९ तेवृ ५०० देवृ** देवने । तेवेः 'क्विपि शूङ्' इत्यूठि अयादेशः । देवनेति । देवेर्ल्युट् ॥

सेव्यं सतां शंकरगेव्यमब्जभूग्लेव्यं सुरैः पेव्यममेव्यमुन्मदैः ।
प्रम्लेवितं रेवितवत्समण्डलीं मव्यद्भिराभीरजनैरसूक्ष्यकैः ॥ ६५ ॥

सतां सेव्यं सेवितव्यं शंकरेण गेव्यं सेवनीयम् अब्जभुवा ग्लेव्यं सेव्यं सुरैः पेव्यं सेवितुं शक्यम् उन्मदैरमेव्यं सेवितुमशक्यम् आभीरजनैः प्रम्लेवितं सेवितम् । कीदृशैः । रेवितानामुत्प्लुत्य गच्छतां वत्सानां मण्डलीं मव्यद्भिर्बध्नद्भिः । असूक्ष्यकैरन्योन्यमीर्ष्यामकुर्वद्भिः ॥—सेव्यं, गेव्यं, ग्लेव्यं, पेव्यं, अमेव्यमिति । **५०१ षेवृ ५०२ गेवृ ५०३ ग्लेवृ ५०४ पेवृ ५०५ मेवृ ५०६ म्लेवृ** सेवने । पञ्चानां ण्यत् । प्रम्लेवितं । म्लेवेः कर्मणि क्तः । रेवितेति । **५०७ रेवृ** प्लवगतौ । प्लवगतिः प्लुतगतिः । अयादय उदात्ता अनुदात्तेतः । मव्यद्भिः । **५०८ मव्य** बन्धने । अवान्ता उदात्ता उदात्तेतः । असूच्छता । सूक्ष्यकैः । **५०९ सूक्ष्य ५१० ईक्ष्य ५११ ईर्ष्य** ईर्ष्यार्थाः । सूक्ष्येर्ण्वुल् ॥

राधाकृतेक्ष्याकलहावलोकनादीर्ष्यां हयन्त्या रमया प्रमोदितम् ।
प्रशुच्य सोमं कृतहर्यतैर्नुतं समालितं फुल्लसरोजमालया ॥ ६६ ॥

राधाकृतेक्ष्याकलहावलोकनात् राधाकृतस्य ईक्ष्याकलहस्य दर्शनादीर्ष्यां अक्षमां हयन्त्या प्राप्नुवत्या रमया प्रमोदितं सोमं प्रशुच्य कृतहर्यतैर्नुतं प्रशुच्याभिषुत्य कृतो हर्यतो यज्ञो यैस्तैः । फुल्लसरोजमालया समालितं विभूषितम् ॥—ईक्ष्या । ईर्ष्या इति । 'गुरोश्च हलः' इत्यकारः । हयन्त्या । **५१२ हय** गतौ 'भक्तिशब्दयोः' इत्येके । शत्रन्तान्ङीप् । प्रशुच्येति । **५१३ शुच्य** अभिषवे । अभिषवो निष्पीडनस्नपनसुरासन्धानस्नानादिः । ल्यप् । हर्यतेति । **५१४ हर्य** गतिकान्त्योः । अस्मात् 'भृमृदृशियजीपर्व्यमिनमिहर्यिभ्योऽतच्' इत्यतच् । समालितं । **५१५ अल** भूषणपर्याप्तिवारणेषु । कर्मणि क्तः । फुल्लेति । **५१६ ञिफला** विशरणे । तच्च विशीर्णत्वम् । विकसनम् । 'अनुपसर्गात्फुल्ल—' इत्यादिना निपातितः ॥

उन्मीलनश्मीलनलीलया दृशोरुत्स्मीलितक्ष्मीलितविश्वविष्टपम् ।
पिच्छस्रजा पीलितनीलकुन्तलं शीलेन संकीलितलोकमानसम् ॥ ६७ ॥

दृशोरुन्मीलनश्मीलनलीलयोन्मीलननिमीलनरूपया लीलयोत्स्मीलितं प्रकाशितम् क्ष्मीलितं तिरोहितं च सर्वविष्टपं येन तम्। पिच्छस्रजा पीलितं बद्धं नीलकुन्तलं येन तम् । शीलेन संकीलितं बद्धं वशीकृतं लोकमानसं येन तमीश्वरम् ॥—उन्मीलनश्मीलनेति । ५१७ **मील** ५१८ **श्मील** ५१९ **स्मील** ५२० **क्ष्मील** निमेषणे । संकोचनं तत् । मीलश्मीलाभ्यां ल्युट् । उत्स्मीलितक्ष्मीलितेति । स्मीलक्ष्मीलाभ्यां णिजन्ताभ्यां कर्मणि क्तः । पीलितेति । ५२१ **पील** प्रतिष्टम्भे । रोधनं तत् । कर्मणि क्तः । नीलेति । ५२२ **णील** वर्णे । इगुपधत्वात् कः । शीलेनेति । ५२३ **शील** समाधौ । समाधिर्निष्ठाकरणम् । घञ् । संकीलितेति । ५२४ **कील** बन्धने । कर्मणि क्तः ॥

सन्मार्गसंकूलिषु शूलदायिनं दहन्तमेनांसि च तूलपूलवत् ।
मूलं फलं वाप्यदतामचुल्लतां प्रफुल्लभक्त्युन्नतिचिल्लचेतसाम् ॥ ६८ ॥
अवेलितानां प्रतिचेलधारिणामकेलिलोले हृदि बद्धखेलनम् ।
फणीश्वरक्ष्वेलरुधं प्रवेल्लितस्रजं मुहुः पेलववातफेलनात् ॥ ६९ ॥

सन्मार्गसंकूलिषु सन्मार्गनिरोधशीलेषु दुष्टेषु । शूलदायिनं पीडाकरम् । तूलपूलवदेनांसि दहन्तं च । प्रतिचेलधारिणां प्रतिचेलानि वल्कलादीनि दधानानां यमिनामकेलिलोले हृदि बद्धलेखनं कृतपीडनम् । मूलं फलं वा अपि अदतां भक्षयताम् अचुल्लतामनाविष्कृताभिप्रायाणां प्रफुल्लया विकसितया भक्त्युन्नत्या चिल्लचेतसामार्द्रीभवन्मनसामवेलितानां केनाप्यचलितानां फणीश्वरक्ष्वेलरुधं कालियस्य विषं रुन्धन्तम् । पेलवस्य मृदोर्वातस्य फेलनाच्चलनान् मुहुः प्रवेल्लितस्रजं दोलायमानवनमालम् ॥—सन्मार्गसंकूलिष्विति । ५२५ **कूल** आवरणे । णिनिः । शूलेति । ५२६ **शूल** रुजायां संघाते च । घञ् । तूलपूलवत् । ५२७ **तूल** निष्कर्षे । निष्कोषणं तत् । ५२८ **पूल** संघाते । द्वयोर्घञ् । मूलं फलम् । ५२९ **मूल** प्रतिष्ठायाम् । ५३० **फल** निष्पत्तौ । द्वयोः पचाद्यच् । अचुल्लताम् । ५३१ **चुल्ल** भावकरणे । शता । प्रफुल्लेति । ५३२ **फुल्ल** विकसने । पचाद्यच् । चिल्लेति । ५३३ **चिल्ल** शैथिल्ये भावकरणे च । अच् । अवेलितानाम् । ५३४ **वेल** ५३५ **चेल** ५३६ **केल** ५३७ **खेल** ५३८ **क्ष्वेल** ५३९ **वेल्ल** चलने । वेलेः कर्मणि क्तः । चेलेति । चेलेरच् । केलीति । केलेरिन् । खेलनमिति । खेलेर्ल्युट् । द्वयोः क्रीडार्थत्वं धातूनामनेकार्थत्वात् । क्ष्वेलेति क्ष्वेलेर्घञ् । प्रवेल्लितेति । वेल्लेः कर्तरि क्तः । पेलवेति । ५४० **पेल** ५४१ **फेल** ५४२ **शेल** गतौ । 'कुडिकितिपणिपेलपल्लिवल्लिगालिभ्योऽवक्' इति पेलेरवक् फेलनात् फेलेर्ल्युट् ॥

सुमार्गशेलात्स्खलतां खलात्मनां गलच्छिदार्थं सलितं महीतलम् ।
दलत्तनुप्रश्वलितान्परान्प्रतिप्रश्वल्लिताखोडसुदर्शनायुधम् ॥ ७० ॥

सुमार्गशेलात् सन्मार्गगमनात् स्खलतां चलतां खलात्मनां गलच्छिदार्थं महीतलं सलितं प्राप्तं युद्धे दलत्तनु विदीर्यमाणदेहं यथा भवति तथा प्रश्वलितान् आशु गतान् परान्

प्रति प्रश्वल्लितमाशु गमितमखोडमप्रतिहतगति अखञ्जं सुदर्शनायुधं येन तम् ॥—शैलादिति शैलेर्घञ् । स्खलताम् । ५४३ स्खल संचलने । प्रतिघातेऽप्यस्ति । शता । खलेति ५४४ खल संचये । पचाद्यच् । गलेति । ५४५ गल अदने । अच् । सलितम् ५४६ षल गतौ । कर्तरि क्तः । दलदिति । ५४७ दल विदारणे । शता । प्रश्वल्लितान् । ५४८ श्वल ५४९ श्वल्ल आशुगमने । श्वल्लेः कर्तरि क्तः । प्रश्वल्लितेति । श्वल्लेर्णिजन्तात् कर्मणि क्तः । अखोडेति । ५५० खोल्ट ५५१ खोर्ऋ गतिप्रतिघाते । खोरेरच् । डलयोरभेदाड्डः ॥

अखोरधौरत्पतगेन्द्रवाहनं स्वसेविनां तित्सरिषां निराडिनम् ।
क्मरन्मनोदुर्गममभ्रमेचकं वभ्रद्वधूविभ्रमवृष्टिमभ्रितम् ॥ ७१ ॥

अखोरमप्रतिहतगति यथा तथा धौरच्चतुरं गच्छत् पतगेन्द्रवाहनं यस्य तम् । स्वसेविनां तित्सरिषां व्याजकरणेच्छां निरसितुं शीलं यस्य तम् । क्मरतां कुटिलानां मनसो दुर्गमम् अभ्रमिव मेचकम् । वभ्रन्तीनां चरन्तीनां वधूनां विभ्रमवृष्टिमभ्रितं प्राप्तम् ॥—अखोरेति खोरेः पचाद्यच् । धौरदिति । ५५२ धोर्ऋ गतिचातुर्ये । शता तित्सरिषेति । ५५३ त्सर छद्मगतौ । सन्नन्तादकारः । क्मरदिति । ५५४ क्मर हूर्च्छने । कौटिल्यं तत् शता । अभ्रेति । ५५५ अभ्र ५५६ वभ्र ५५७ मभ्र ५५८ चर गत्यर्थाः । अभ्रेः पचाद्यच् । वभ्रेः शता । मभ्रेः कर्मणि क्तः ॥

संचारनिष्ठ्यूतनखेन्दुचद्रिकं लोके जयन्तं सकलैकजीवनम् ।
अपीवितां नाप्यतिमीवितां श्रितं तनुं सुतीवोरुमनीवमध्यमाम् ॥७२॥

पूर्वार्धः स्पष्टः । न अपीवितामतिमीवितामपि तनुं श्रितम् । अपीवितां कृशाम् अतिमीवितां अतिस्थूलाम् । कीदृशीं तनुम् । सुतीवौ सम्यक् पीनावूरू यस्यास्ताम् अनीवं कृशं मध्यमं मध्यप्रदेशो यस्यास्ताम् ॥— संचारेति । चारेर्घञ् । निष्ठ्यूतेति ५५९ ष्ठिवु निरसने । आस्यान्निःसारणं तत् । 'सुऽधातुष्ठिवुष्वष्कतीनां न' इति सत्वाभावः । कर्मणि क्तः । जयन्तम् । ५६० जि जये । जय उत्कर्षप्राप्तिः जीवनम् । ५६१ जीव प्राणधारणे । ल्युट् । अपीविताम् । अतिमीविताम् । ५६२ पीव ५६३ मीव ५६४ तीव ५६५ णीव स्थौल्ये । पीविमीव्योः कर्तरि क्तः । तीविनीव्योरिगुपधत्वात्कः ॥

प्रक्ष्यूतगोपीशुचमूर्णपूतनं तूर्णानसं थूर्णबकादिदानवम् ।
दुदूर्विषून् धूर्वितुमेव गूर्वणं मूर्वन्तमापूर्वितपर्वताध्वरम् ॥ ७३ ॥

प्रक्ष्यूता निरस्ता गोपीनां शुक् येन तम् । ऊर्णा हिंसिता पूतना येन तम् । तूर्णं चूर्णीकृतमनः शकटं येन तम् । थूर्णाः हताः बकादिदानवाः येन तम् । दुदूर्विषून् हन्तुमिच्छून् । धूर्वितुं हन्तुमेव गुर्वणमुद्यमं मूर्वन्तं बध्नन्तं परिगृह्णन्तमित्यर्थः । आपूर्वितः संपूरितो निर्वर्तितः पर्वताध्वरो येन तत् ॥—प्रक्ष्यूतेति । ५६६ क्षिवु ५६७ क्षेवु निरसने ।

कर्मणि क्तः । ['क्षयूतगोपी'इति पाठे क्षेवुधातुर्बोध्यः ।] ऊर्णेति । **५६८ उर्वी ५६९ तुर्वी ५७० थुर्वी ५७१ दुर्वी ५७२ धुर्वी** हिंसार्थाः । ऊर्वेः कर्मणि क्तः । 'लोपो व्योर्वलि' वलोपे । 'रदाभ्यां' इति नत्वम् । 'र्वोरुपधाया दीर्घ इकः' । तूर्णद्धूर्णेति । तुर्वीथुर्व्योः प्राग्वत् क्तः । दुदूर्विषून् । दुर्वेः सन्युप्रत्ययः । धूर्वितुं । धुर्वेस्तुमुन् । गूर्वणम् । **५७३ गुर्वी** उद्यमने । ल्युट् । मूर्वन्तम् । **५७४ मुर्वी** बन्धने । शता । अपूर्वितेति । **५७५ पुर्व ५७६ पर्व ५७७ फर्व ५७८ मर्व** पूरणे । अन्त्यो गतौ च द्रुमे । पूर्वेः कर्मणि क्तः । पर्वतेति । 'भृमृदृशि' इत्यादिना पर्वेरतच् ॥

अफर्विताकाङ्क्षितमर्वकं सतां मांसादिसंचर्वकदुष्टभर्वकम् ।
कर्वद्वधूकेलिरसेन खर्वितं गर्वार्वकं शर्वपरेण सर्वताम् ॥ ७४ ॥

सतामफर्वितस्यापूर्णस्याकाङ्क्षितस्य मर्वकं पूरकम् । मांसादेः संचर्वकाणां दुष्टानां भर्वकं हन्तारम् । कर्वन्तीनां दृप्यन्तीनां वधूनां केलिरसेन खर्वितं माद्यन्तम् । शर्वपरेण हिंसापरेण सर्वतां लोकं हिंसतां गर्वस्यार्वकं नाशकम् ॥—अफर्वितेति । फर्वेः कर्तरि क्तः । मर्वकम् । मर्वेर्ण्वुल् । संचर्वकम् । **५७९ चर्व** अदने । ण्वुल् । भर्वकम् । **५८० भर्व** हिंसायाम् । ण्वुल् । कर्वदिति । **५८१ कर्व ५८२ खर्व ५८३ गर्व** दर्पे । आद्य इदिदित्येके । तस्माच्छता । खर्वितम् । खर्वेः कर्तरि क्तः । गर्वेति । गर्वेर्घञ् । अर्वकमिति । **५८४ अर्व ५८५ शर्व ५८६ षर्व** हिंसायाम् । अर्वेर्ण्वुल् । सर्वेति । शर्वेर्घञ् सर्वताम् । सर्वेः शता ॥

विश्वेन्वितं स्रङ्मधुपिन्विताङ्गकं मिन्वन्तमुच्चैः कृपयैव निन्वकान् ।
हिन्वन्तमाभीरकुलं विलासिनीर्दिन्वन्तमाधिन्वितदेवमण्डलम् ॥ ७५ ॥

विश्वस्मिन्निन्वितं व्याप्तं सर्वैः प्रीणितं वा । स्रङ्मधुना पिन्वितानि सिक्तानि अङ्गानि यस्य तम् । कृपया कृपामृतेन एव निन्वकान् सेवकान् उच्चैरधिकं मिन्वन्तं सिञ्चन्तम् । आभीरकुलं हिन्वन्तं प्रीणयन्तम् । विलासिनीर्दिन्वन्तं तोषयन्तम् । आधिन्वितं सम्यक्प्रीणितं देवमण्डलं येन तम् ॥—इन्वितमिति । **५८७ इवि** व्याप्तौ । प्रीणने चैके । इदित्त्वान्नुम् । कर्तरि क्तः । पिन्वितमिति । **५८८ पिवि ५८९ मिवि ५९० णिवि** सेचने । सेवन इत्येके । पिन्वेः कर्मणि क्तः । मिन्विन्तम् । मिन्वेः शता । निन्वकान् । निन्वेर्ण्वुल् । हिन्वतम् । दिन्वन्तम् । **५९१ हिवि ५९२ दिवि ५९३ धिवि ५९४ जिवि** प्रीणनार्थाः । हिन्विदिन्व्योः शता । आधिन्वितेति । धिन्वेः कर्मणि क्तः ॥

जिन्वन्तमुर्वीं निजरिण्वनैः सतां रण्वन्तमन्तर्भवधन्वपादपम् ।
कृण्वन्तमाश्चर्यगतीरमूतिदं जगन्त्यवन्तं त्रिदशोपधावितम् ॥ ७६ ॥

निजरिण्वनैरात्मीयसंचारैरुर्वीं जिन्वन्तं प्रीणयन्तम् । सतामन्तर्मनो रण्वन्तं प्राप्नुवन्तम् । भवरूपे धन्वनि मरुभूमौ पादपं छायाकरं वृक्षम् । आश्चर्यगतीः कृण्वन्तं कुर्वन्तम्

अमूतिदं बन्धाभावस्य मोक्षस्य दातारम् । जगन्ति अवन्तं रक्षन्तम् । त्रिदशैरुपधावितं स्तुतं सेवितं वा ॥—जिन्वन्तम् । जिन्वेः शता । रिण्वनैः । ५९५ रिवि ५९६ रवि ५९७ धवि गत्यर्थाः । रिण्वेर्ल्युट् । रण्वन्तम् । रण्वेः शता । धन्वेति । 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति धन्वेः कनिन् । कृण्वन्तम् । ५९८ कृवि हिंसाकरणयोश्च । चाद् गतौ । शता । अमूतीति । ५९९ मव बन्धने । क्तिनि 'ज्वरत्वर–' इत्यूठ् । अवन्तमिति । ६०० अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभाववृद्धिषु । 'दानभागवृद्धिषु' इति वा पाठः । अस्माच्छता । मव्यादय उदात्ता जयतिवर्जमुदात्तेतः । उपधावितम् । ६०१ धावु गतिशुद्ध्योः । शुद्धिः शोधना । जवे च द्रुमे । उपपूर्वत्वात् स्तुत्यर्थता । उदात्तः स्वरितेत् । अस्मात् कर्मणि क्तः ॥

ईदृशं भगवन्तं दृष्टवतोऽक्रूरस्य भाग्यमभिनन्दति—

संधुक्षमाणमरिधिक्षकमूष्मजालं
संवृक्ष्यवेदमतशिक्षकभिक्षुगम्यम् ।
संक्लेशितस्वकथदक्षणदीक्षितं तं
प्रेक्ष्यैष जन्मफलमीषितवान्महात्मा ॥ ७७ ॥

एष तं प्रेक्ष्य जन्मफलमीषितवान् प्राप्तवान् । कीदृशमित्याह—अरीणां धिक्षकं क्लेशकं दाहकं वा । ऊष्मजालं प्रतापं संधुक्षमाणं संदीपयन्तम् । ऊष्मान्तधातुजालमत्रारभ्यते इति भाति । संवृक्ष्यं संवरणीयं परिग्राह्यं यत् वेदमतं तस्य शिक्षकैरभ्यासकैर्भिक्षुभिर्गम्यम् । संक्लेशिता सम्यक्कथिता स्वकथा यैस्तेषां दक्षणे वर्धनायां जीवने वा दीक्षितं संप्राप्तव्रतम् ॥ —संधुक्षमाणमिति । ६०२ धुक्ष ६०३ धिक्ष संदीपनक्लेशनजीवनेषु । घाषान्ता उदात्ता अनुदात्तेतः । धुक्षेः शानच् । धिक्षकमिति । धिक्षेर्ण्वुल् । संवृक्ष्येति । ६०४ वृक्ष वरणे । ण्यत् । शिक्षकेति । ६०५ शिक्ष विद्योपादाने । ण्वुल् । भिक्षु इति । ६०६ भिक्ष याच्ञायामलाभे लाभे च । क्लेशे व्यक्तायां वाचि चेत्येके । 'सनाशंसभिक्ष उः' इति उः । संक्लेशितेति । ६०७ क्लेश अव्यक्तायां वाचि । बाधन इत्येके । उपतापे च द्रुमे । कर्मणि क्तः । दक्षणेति । ६०८ दक्ष वृद्धौ शीघ्रार्थे च । ल्युट् । दीक्षितमिति । ६०९ दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । 'अस्यार्थो व्रतसंप्राप्तिस्तद्भेदाः कथिता इमे । सा च मौण्ड्यात् क्वचित् क्वापि दीक्षणीयादिकेज्यया ॥ उपनीत्या क्वचित् क्वापि नियमग्रहमात्रतः । क्वचिद् गुर्वादिनन्दे ते व्रतमस्त्विति शासनात् ॥ ······दीक्षते वाग्मी यजमानस्तु माणवः । तपसे च महानाम्न्यै तत्र ह्यादेशना व्रतम् ॥' अस्माद्दीक्षेः कर्तरि क्तः । प्रेक्ष्येति । ६१० ईक्ष दर्शने । ल्यप् । ईषितवानिति । ६११ ईष गतिहिंसादर्शनेषु । क्तवतुः ॥

भाषितुं स खलु हर्षवर्षितो गेषितुं समुचितं च नाशकत् ।
येषणासहरिजेपसंभ्रमान्नेपितस्मृतिरपेषितो रथात् ॥ ७८ ॥

स खलु हर्षवर्षितो हर्षेण वर्षितः स्निग्धीभूतः पूर्णः सन् भाषितुं समुचितं च गेषितुमन्वेष्टुं नाशकत् । येषणात्सहरिजेषसंभ्रमात् येषणात्तेन प्रयत्नलब्धेन हरिजेषेण श्रीकृष्णप्राप्त्या जातात् संभ्रमाद्धेतोर्नेषितस्मृतिर्गतस्मृती रथात् अपेषितोऽपगतोऽवतीर्णवान्॥—भाषितुम् । ६१२ **भाष** व्यक्तायां वाचि । तुमुन् । वर्षितः । ६१३ **वर्ष** स्नेहने । स्नेहनं स्निग्धीभावः । कर्तरि क्तः । गेषितुम् । ६१४ **गेषृ** अन्विच्छायाम् । ग्लेषृ इत्येके । गेषेस्तुमुन् । येषणेति । ६१५ **येषृ** प्रयत्ने । ल्युट् । जेषेति । ६१६ **जेषृ** ६१७ **णेषृ** ६१८ **पेषृ** ६१९ **प्रेषृ** गतौ जेषेर्घञ् । नेषितस्मृतिः । अपेषितः । नेष्पेष्योः कर्तरि क्तः ॥

सुप्रेषितान्पथि सरेषवृके सहेषं
हेषास्तकासरमदानतिभासुराङ्गान् ।
नासोत्थरासलसितान्नसितेन दाम्ना
सूतो ययाम समराभ्यसितांस्तुरंगान् ॥ ७९ ॥

सूतः सारथिर्नसितेन सम्यग्वर्तनात् कुटिलेन दाम्ना तुरंगान् ययाम बबन्ध । कीदृशान् । सरेषवृके सशब्दवृके पथि मार्गे सहेषं सशब्दं यथा तथा सुप्रेषितान् सम्यक् चरित्वा गतान् । हेषया शब्देनास्तो निरस्तः कासराणां महिषाणां मदो यैस्तान् । अतिभासुराङ्गान् । नासोत्थेन रासेन शब्देनाश्वस्वभावजेन शोभितान् । समरेऽभ्यसितानभीतान् ॥—सुप्रेषितानिति । प्रेषेः कर्तरि क्तः । रेषेति । ६२० **रेषृ** ६२१ **हेषृ** ६२२ **ह्रेषृ** । अव्यक्ते शब्दे । अत्र रेषिर्वृकशब्दे हेषिरश्वशब्दे ह्रेषेति चाश्वशब्दे पठितव्यम् । रेषेर्घञ् । हेषेरकारः । ह्रेषेश्च । कासरेति । ६२३ **कासृ** शब्दकुत्सायाम् । रोगजे कुत्सितशब्देऽयं प्रसिद्धः । शब्दमात्रे शोभार्थेऽप्याह भट्टिः । 'सुन्दिकन्दिमन्दिमन्थिमञ्जिपञ्जिपिञ्जिपिटिकासिकुटिकुशिकदिवेदिभ्योऽरन्' इति भोजोक्त्या कासेररन् । भासुरेति । ६२४ **भासृ** दीप्तौ । 'भञ्जभासमिदो घुरच्' इति भासेर्घुरच् । नासेति । ६२५ **णासृ** ६२६ **रासृ** शब्दे । नासेरकारः । रासेर्घञ् । नसितेति । ६२७ **णस** कौटिल्ये । कर्तरि क्तः । अभ्यसितान् । ६२८ **भ्यस** भये । प्राग्वत् क्तः ॥

आशंसितास्त्रिमुदितो भुवनग्रसिष्णुं
विष्णुं तमेनमसतां ग्लसमानमीहाम् ।
अक्रूर एत्य बहुधागतमंहितांहा
गर्होज्झितोऽपतदगल्ह्यतमे पदाब्जे ॥ ८० ॥

अक्रूर एनं तं विष्णुमेत्याशंसितास्त्रिमुदितोऽगल्ह्यतमे पदाब्जेऽपतत् । अगल्ह्यतमेऽत्यन्तमगर्हणीये । कीदृशः । बहुधा गतं मंहितं प्रवृद्धमंहो यस्य सः । गर्हयोज्झितः । कीदृशम् । भुवनस्य ग्रसिष्णुं संहर्तारम् । असतामीहां चेष्टामिच्छां वा ग्लसमानं ना-

शयन्तम् ॥—आशंसितेति । ६२९ आङः शसि इच्छायाम् । नोपधोऽयमित्येके । कर्मणि क्तः । ग्रसिष्णुः । ६३० ग्रसु ६३१ ग्लसु अदने । 'भुवश्च' इति चकारादिष्णुच् । ग्लसेः शानच् । ईहाम् । ६३२ ईह चेष्टायाम् । बहुधेति । ६३३ बहि ६३४ महि वृद्धौ । 'बंहेर्नलोपश्च' इत्युप्रत्ययः । 'संख्याया विधार्थे धा' इति धाप्रत्ययः । मंहेः कर्तरि क्तः । अंह इति । ६३५ अंह गतौ । औणादिकोऽसुन् । गर्हेति । ६३६ गर्ह ६३७ गल्ह कुत्सायाम् । गर्हैरकारः । गल्हेर्ण्यत् ॥

बर्हप्रबल्हसमलंकृतिरालिलिङ्ग
प्रोत्थाप्य वर्हकनिवल्हदुतं तमीशः ।
प्लीहायितासुरभरक्षतिवेहितोर्वी-
भैषज्यजेहपरया निजबाहयैव ॥ ८१ ॥

ईशस्तं प्रोत्थाप्य निजबाहया एव आलिलिङ्ग । कीदृशः । बर्हप्रबल्हेन बर्हश्रेष्ठेन समलंकृतिर्यस्य सः । कीदृशम् । वर्हकाणां हिंसकानां निवल्हेन हिंसया दुतमुपतप्तम् । कीदृश्या बाहया । प्लीहायितानां गुल्मरोगवदाचरतामसुराणां भरक्षतौ वेहिताया: सप्रयत्नाया उर्व्याः भैषज्यजेहे चिकित्साकरप्रयत्ने परया तत्परया ॥—बर्हप्रबल्हेति । ६३८ बर्ह ६३९ बल्ह प्राधान्ये । द्वयोः पचाद्यच् । वर्हकनिवल्हेति । ६४० वर्ह ६४१ वल्ह परिभाषणहिंसाच्छादनेषु । दाने च द्रुमे । परिभाषणमत्र वञ्चनवादः । वर्हेर्ण्वुल् । वल्हेर्घञ् । प्लीहायितेति । ६४२ प्लिह गतौ । 'श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्वन्मातरिश्वन्मघवन्' इति प्लिहेः कनिनि दीर्घो निपातितः । वेहितेति । ६४३ वेहृ ६४४ जेहृ ६४५ बाहृ प्रयत्ने । बेहृ इत्येके । जेहिर्गतौ च । वेहेः कर्तरि क्तः । जेहेर्घञ् । बाहेरचि टाप् ॥

द्राहितः शुभपथप्रकाशने सस्वजेऽथ तमनूह्यवैभवः ।
गाढमैत्ररसगृह्यमाणधीर्भूषणग्लहनघुंषितो बलः ॥ ८२ ॥

अथ बलस्तमक्रूरं सस्वजे आलिङ्गितवान् । कीदृशः । शुभपथप्रकाशने सन्मार्गप्रवर्तने द्राहितः उन्निद्रः । अनूह्यमतर्क्यं वैभवं यस्य सः । गाढेनातिमात्रेण मैत्ररसेन बन्धुत्वाह्लादेन गृह्यमाणा वशीक्रियमाणा धीर्यस्य सः । भूषणानां ग्लहनेन धारणेन घुंषितः कृतकान्तिः ॥—द्राहितेति । ६४६ द्राहृ निद्राक्षये । क्षेपे चेत्येके । कर्तरि क्तः । प्रकाशनेति । ६४७ काशृ दीप्तौ । ल्युट् । ऊह्येति । ६४८ ऊहृ वितर्के । ण्यत् । गाढेति । ६४९ गाहू विलोडने । क्षोभणं तत् । लक्षणया जलाद्यवतरणेऽपि । भावे क्तः । गृह्यमाणेति । ६५० गृहू ग्रहणे । ६५१ ग्लहू च । गृहेः कर्मणि शानच् । ग्लहनेति । ग्लहेर्ल्युट् । घुंषितेति । ६५२ घुषि कान्तिकरणे । घषी इत्येके । घषेलन्ये । धुक्षादय उदात्ता अनुदात्तेतः । कर्तरि क्तः ॥

घोषद्भूषः पङ्कजाक्षस्तमूचे पापश्रेणी तक्षणे त्वष्टृधर्मा ।
उक्षनेनं मन्दहासेन रक्षन्विश्वन्निक्षन्वल्लवीस्तृक्षिताघाः ॥ ८३ ॥

पङ्कजाक्षस्तमूचे । कीदृशः । घोषन्त्यः शब्दायमाना भूषा यस्य सः । पापश्रेण्यास्तक्षणे तनूकरणे त्वष्टुरिव तक्ष्ण इव धर्मो व्यापारो यस्य सः । एनमक्रूरं मन्दहासेनोक्षन्नार्द्रीकुर्वन् । तृक्षिताघा गताघाः वल्लवीर्निक्षन् चुम्बन् ॥—घोषदिति । ६५३ **घुषिर्** अविशब्दने । ऋदित्येके । अर्हान्ता उदात्तेतः शिषिवर्जमनुदात्ताः । आविष्कृताभिप्रायं वचनं विशब्दनम् । तद्व्यतिरिक्तेऽर्थेऽयं धातुः । स चार्थः शब्दमात्रं वा यथाप्रयोगमन्यो वा । अस्माच्छता । पङ्कजाक्षः । ६५४ **अक्षू** व्याप्तौ । संघाते च द्रुमे । अस्मादौणादिकेऽन्नन्तादक्षिशब्दात् समासान्ताः षच् । तक्षणे । ६५५ **तक्षू** ६५६ **त्वक्षू** तनूकरणे । तक्षेर्ल्युट् । त्वष्टृ । 'नप्तृनेष्टृत्वष्टृ–' इत्यादिना तृन्नन्तो निपातितः । उक्षन् । ६५७ **उक्ष** सेचने । रक्षन् । ६५८ **रक्ष** पालने । निक्षन् । ६५९ **णिक्ष** चुम्बने । त्रिभ्यः शता । तृक्षितेति । ६६० **तृक्ष** ६६१ **ष्टृक्ष** ६६२ **णक्ष** गतौ । तृक्षेः कर्तरि क्तः ॥

आस्तृक्षितोऽद्य वितनोषि महत्सुखं नो
नक्षत्रराडिव परं विकलङ्कवक्षाः ।
संमृक्षितोरुगुलमाक्षिकहृद्यवाच-
स्तक्षन्ति नाम शुचमिष्टकराः सपक्षाः ॥ ८४ ॥

हे अक्रूर, आस्तृक्षित आगतस्त्वमद्य नो महत् सुखं वितनोषि । नक्षत्रराट् चन्द्र इव । परं केवलं विकलङ्कवक्षा विकलङ्कं निर्दोषं वक्षो हृदयं यस्य सः । चन्द्रस्तु सकलङ्कमध्य इत्येव भेदः । तवास्मासु सुखकरणं न चित्रम् । यस्मात् संमृक्षितोरुगुलमाक्षिकहृद्यवाचः संमृक्षितः संघातीकृतः उरुगुलो माक्षिकं मधु च । ते इव हृद्यवाक् येषां तादृशाः प्रियतराः सपक्षा बन्धवः शुचं तक्षन्ति नाम च्छादयन्ति खलु ॥—आस्तृक्षिता इति । ष्टृक्षेः कर्तरि क्तः । नक्षत्रेति । 'अमिनक्षियजि–' इत्यादिना नक्षेत्रन् । वक्ष इति । ६६३ **वक्ष** रोषे । संघात इत्येके । संघातीभवन्त्यस्थीन्यत्रेति असुन् । संमृक्षेति । ६६४ **मृक्ष** संघाते । म्रक्ष इत्येके । मृक्षेः कर्मणि क्तः । माक्षिकेति । 'पिपीलिकेतिकहृदिकमक्षिकाद्यप्' इति भोजेन निपातिता मक्षिका[1] । तस्मात् 'तेन कृतम्' इत्यर्थे अण् । तक्षन्ति । ६६५ **तक्ष** त्वचने । तच्च संवरणं त्वचो ग्रहणं वा । ग्रहणमात्रे च द्रुमे । पक्षेत्यप्येके । तक्षेर्लट् । पक्षेति । पक्षेरच् ॥

सूक्ष्यं त्वदीक्षा चिरकाङ्क्षिता नो वाङ्क्षाम्यमाङ्क्ष्यान्न तु नीचलोकान् ।
द्राक्षां जनो वाञ्छति नो फलानि ध्राङ्क्षद्द्रुहुध्वाङ्क्षविचूषितानि ॥ ८५ ॥

---

१. माधवस्तु 'कुन् शिल्पिसंज्ञयोः' इत्यनेन क्वुनि मक्षिकारूपसिद्धिमाह.

हे सूक्ष्यं आदरणीय सखे अक्रूर, त्वदीक्षा नश्विरकाङ्क्षिता । अहममाङ्क्षयान् काङ्क्षि-मयोग्यान् नीचलोकान् न तु वाङ्क्षामि द्रष्टुमिच्छामि । जनो द्राक्षां वाञ्छति । ध्राङ्क्षद्भि-र्घोरं शब्दायमानैर्बहुभिर्ध्वाङ्क्षैर्विचूषितानि पीतरसानि फलानि नो वाञ्छति ॥—सू-क्ष्यैति । ६६६ सूक्ष्यं आदरणे । ण्यत् । काङ्क्षितेति । ६६७ काक्षी ६६८ वाक्षि ६६९ माक्षि काङ्क्षायाम् । काङ्क्षिः कर्मणि क्तः । वाङ्क्षेर्लट् । माङ्क्षेर्ण्यत् । द्राक्षामिति ६७० द्राक्षि ६७१ ध्राक्षि ६७२ ध्वाक्षि घोरवासिते च । चात् काङ्क्षायाम् । द्राङ्क्षे-राकारे द्राक्षा । द्राक्षेति यवादौ निपातनान्नलोपः । ध्राङ्क्षदिति । ध्राङ्क्षे शता । ध्वाङ्क्षैति ध्वाङ्क्षेरच् । विचूषितानि । ६७३ चूष पाने । कर्मणि क्तः ॥

तूषं तनोषि कमलस्य यथैव पूषा
खेदं च मूषसि कृपारसरूषितात्मन् ।
शूषन्दृशोरमृतयूषमजूषकस्त्वं
भूषस्यनूषमतिरीषभुजां प्रियः क्ष्माम् ॥ ८६ ॥

हे कृपारसरूषितात्मन् कृपातिशयेन रूषितो रञ्जितः आत्मा मनो यस्य तादृश हे अ-क्रूर, त्वं तूषं संतोषं तनोषि । पूषा सूर्यः कमलस्य यथा तथा । खेदं मूषसि हरसि च । त्वं क्ष्मां भूषसि अलंकरोषि । कीदृशस्त्वम् । तत्राह—दृशोः पानपात्रभूतयोरमृतयूषं घनीभूतामृतरसं शूषन्नुत्पादयन् । अजूषकोऽहिंसकः । अनूषा अन्येषामपीडाकरा मति-र्यस्य सः । ईषभुजामुञ्छवृत्तीनां प्रियः ॥—तूषमिति । ६७४ तूष तुष्टौ । घञ् । पूषेति । ६७५ पूष वृद्धौ । 'श्वन्नुक्षन्—' इत्यादिना कनिनि निपातितः । मूषसि । ६७६ मूष स्ते-ये । लट् । रूषितेति । ६७७ लूष ६७८ रूल भाषायाम् । रूष आलेपन इत्येके । रूषेः कर्मणि क्तः । शूषन्निति । ६७९ शूष प्रसवे । स चाभ्यनुज्ञा । 'या पीडा श्रवसापि शौति (?) महती (ता) मौत्सुक्यपीडासिकाम्' इत्यत्र सौतेरुपादानार्थप्रयोगात् उपादानमपि प्रसवः अस्माच्छता । यूषमिति । ६८० यूष हिंसायाम् । ६८१ जूष च । यूष्यते हिंस्यते पाकेनेति घञि यूषो घनीभूतः क्षीरादिः । अजूषकः । जूषेर्ण्वुल् । भूषसि । ६८२ भूष अलंकारे । लट् । अनूषेति । ६८३ ऊषरुजायाम् । पचाद्यचि नञ्समासः । ई-षेति । ६८४ ईष उञ्छे । घञ् ॥

इत्युक्तः सुरकाषिखाषिणमसावूचे जगच्छेषका-
न्नित्यं ते जषते झषादिवपुषे रक्षश्चमूशाषिणे ।
केश्यादीन्वषणोत्सुकान्प्रशमते भूयोऽपि रोषिष्यते
रेषोऽन्यान्भषतो नमोऽस्तु कमलाकोष्णस्तनं जोषते ॥ ८७ ॥

---

१. 'वाशिते' इति पाठः

इत्युक्तोऽसौ सुरकाषिणः सुरहिंसाशीलान् असुरान् खषितुं हिंसितुं शीलं यस्य तं श्रीकृष्णमूचे । किमूचे । तत्राह—झषादिवपुषे ते नमोऽस्तु । कीदृशाय । जगतः शेषकान् हिंसकान् नित्यं जषते हिंसते । रक्षश्चम्वाः शाषिणे हननलीलाय । वषणे हिंसने उत्सुकान् केश्यादीन् प्रषमते हिंसते । अन्यान् भषतः श्वरवसमशब्दं कुर्वतः पिशुनोक्तिं वा कुर्वतो रेषो हिंसकान् भूयोऽपि रोषिष्यते हनिष्यते । कमलाया लक्ष्म्याः कोष्णस्तनं जोषते सेवमानाय ॥—सुरकाषिखाषिणमिति । **६८५ कष ६८६ खष ६८७ शिष ६८८ जष ६८९ झष ६९० शष ६९१ वष ६९२ मष ६९३ रुष ६९४ रिष** हिंसार्थाः । कषिखष्योर्णिनिः । शिषेर्ण्वुल् । जषेः शता । झषेर्घञर्थे कः । शषेर्णिनिः । वषेर्ल्युट् । मषेः शता । रुषेर्लृटि शता । रिषेः 'अन्येभ्योऽपि दृश्यते' इति विच् । भषतः । **६९५ भष** भर्त्सने । तच्चेह श्वरवः । पिशुनोक्तौ च द्रुमे । शता । उष्णेति । **६९६ उष** दाहे । 'इणसिञ्जिदीङुष्यविभ्यो नक्' इति नक् । जेषते । **६९७ जिषु ६९८ विषु ६९९ मिषु** सेवने । जिषेः शता ॥

वेषैर्मेष्यतमैः प्रपोषदशुभप्रश्रेषिभिः श्लेषति
प्रोष्यान्प्लुष्टजनान्कृपामृतपृषद्वर्षी भवान्दानवान् ।
सामर्षं परघर्षिणोऽपि हृषितास्त्वां नोपयान्त्याहवे
तोसह्रासविहीनशङ्खजनितह्रासाद्रसद्दिक्तटम् ॥ ८८ ॥

भवान् वेषैर्मत्स्यादिरूपैर्दानवान् श्लेषति भस्मीकरोति । कीदृशो भवान् । कृपारूपस्यामृतस्य पृषतं बिन्दुं वर्षितु शीलं यस्य सः । कीदृशैर्वेषैः । मेष्यतमैः सर्वैरुपास्यतमैः । प्रपोषन्तं वर्धमानमशुभं प्रश्रेषितुं दग्धुं शीलं येषां तैः । कीदृशान् दानवान् । प्रोष्यान् भस्मीकर्तुं योग्यान् । प्लुष्टाः दग्धा जना यैस्तान् । सामर्षं सक्रोधं यथा तथा परान् घर्षितुमभिभवितुं शीलं येषां तेऽपि हृषिताः प्रतिहता आहवे त्वां नो उपयान्ति । कीदृशं त्वाम् । तोसस्य शब्दस्य ह्रासेनाल्पतया विहीनो यः शङ्खस्तेन जनितात् ह्रासात् शब्दाद्धेतोः रसन्तः शब्दायमाना दिक्तटा यस्य तम् ॥—वेषैरिति । विषेर्घञ् । मिषेर्ण्यत् । प्रपोषदिति । **७०० पुष** पुष्टौ । शता । प्रश्रेषिभिः । **७०१ श्रिषु ७०२ श्लिषु ७०३ प्रुषु ७०४ प्लुषु** दाहे । श्रिषेर्णिनिः । श्लिषेः लट् । प्रुषेर्ण्यत् । प्लुषेः कर्मणि क्तः । पृषदिति । **७०५ पृषु ७०६ वृषु ७०७ मृषु** सेचने । आद्यौ हिंसाक्लेशयोश्च । मृषु सहने च । मृषु हिंसाक्लेशदैन्येष्वित्येके । पृषेः 'वर्तमाने पृषद्बृहत्' इत्यतौ निपातितः। वृषेर्णिनिः मृषेर्घञ्। परघर्षिणः। **७०८ घृषु** संघर्षे। णिनिः। हृषितः । **७०९ हृषु** अलीके । तुष्टौ च द्रुमे । कर्तरि क्तः । 'हृषेर्लोमसु' इतीड्विकल्पः । तोसह्रासेति । **७१० तुस ७११ ह्रस ७१२ ह्लस ७१३ रस** शब्दे । हसिरल्पीभावेऽपि । तुसिहस्योर्घञ् । ह्लसेरपि घञ् । रसेः शता ॥

इत्यादिवादिनमजो लसितस्मितस्तं
संवार्य धर्मपथघस्मरदुर्जनोज्जः।
जीमूतचर्चिरवझर्झरवाद्यहृद्यं
तेनैव चानुपिसितो निलयं पिपेस ॥ ८९ ॥

अज इत्यादिवादिनं तं लसितस्मितः सन् सखे अलं स्तुत्वेति संवार्य तेन एवा-नुपिसितोऽनुगतः सन् निलयं पिपेस प्राप्तवान्। कीदृशोऽजः। धर्मपथघस्मराणां धर्ममार्गनाशकानां दुर्जनानामुज्ज उच्चैर्हिंसकः। कीदृशं निलयम्। जीमूतचर्चि मेघान् तर्जितुं शीलं यस्य तादृशो रवो यस्य तेन झर्झरवाद्येन हृद्यम् ॥—लसितेति। ७१४ लस श्लेषणक्रीडनयोः। शोभायां प्रसिद्धः। कर्तरि क्तः। घस्मरेति। ७१५ घस्लृ अदने। 'सृघस्यदः क्मरच्' इति क्मरच्। उज्जः। ७१६ जर्स ७१७ चर्च ७१८ झर्झ परिभाषणहिंसातर्जनेषु। जर्सेः क्विपि 'रात्सस्य' इति संयोगान्तलोपः। 'अत्वसन्तस्य' इति दीर्घस्तु धातुत्वान्न। जीमूतचर्चि। चर्चेः णिनिः। झर्झेररः। अनुपिसितः। ७१९ पिसृ ७२० पेसृ गतौ। पिशृ पेशृ इत्येके। पिसेः कर्मणि क्तः। पेसेर्लिट् ॥

भूषापिशङ्गरुचिपेशलमात्ममित्र-
मक्रूरमागतमवेक्ष्य हसन्स नन्दः।
संभाव्य साधु ससुतो निशि पर्यपृच्छ-
न्मेशोद्धुतारिमशकस्य नृपस्य वृत्तम् ॥ ९० ॥

स नन्द आत्ममित्रमक्रूरमागतमवेक्ष्य साधु संभाव्य हसन् ससुतो निशि नृपस्य वृत्तं पर्यपृच्छत्। कीदृशमक्रूरम्। भूषाणां पिशङ्गया रुच्या पेशलं मनोहरम्। कीदृशस्य नृपस्य। मेशेन कोपेन शब्देन वोद्धुतास्त्यक्ता अरिरूपा मशका येन तस्य ॥—पिशङ्गेति। 'पतेरङ्गच् पक्षिणि' 'विडादिभ्यः कित्' इत्यत्र 'कुरिपिडिमृदिपिशिभ्यः कित्' इति भोजोक्तेः पिशेरङ्गच् पेशलमिति। [औणादिके कलप्रत्यये बाहुलकाद्गुणः।] हसन्निति। ७२१ हसे हसने। शता। निशीति। ७२२ णिश समाधौ। अधिकरणे संपदादि क्विप्। मेशेति। ७२३ मिश ७२४ मश शब्दे। रोषकृते च। शब्दकोपयोरिति द्रुमोक्त्या रोषकृतं रोष एव। मिशेर्घञ्। मशकस्य मशेः 'कुञ्छिलिपसंज्ञयोः' इति क्वुन् ॥

१. 'जर्ज झर्झ चर्च एषां चवर्गीयान्तेषु पाठ उचितः। नत्विहोष्मान्तेषु' इति प्रौढमनोरमा॥ नलिहेति। केचित्तु—आद्यो दन्त्योष्मान्तः। द्वावप्यर्थसाम्यात्पठितौ—इत्याहुः॥ 'मूलं त्वाद्यस्यापि चवर्गतृतीयान्तत्वमिति मते बोध्यम्' इति शब्दरत्नम्॥ माधवोऽपि—'चर्च झर्झत्योस्तुदादौ पठिष्यमाणयोरिह पाठः स्वा(शब)र्थं इति दोवमैत्रेयपुरुषकारेषु। ऊष्मान्तेषु पाठोऽर्थानुरोधादिति मैत्रेयः' इति ग्रन्थेनाद्यस्योष्मान्तत्वमभिप्रैति। 'जर्स' इति पाठे 'अत्वसन्तस्य' इति दीर्घशङ्का वृथा, 'जस्स' इति पाठे 'रात्सस्य' इत्यस्योपन्यासो वृथा। इति देवा एव विदांकुर्वन्तु ॥

सोऽप्यूचे शवतां गतस्य शशिवंशोत्थस्य भोजेजितु-
र्वृत्तं प्रस्तुतमत्र शस्त्रनिलये शस्तं च चापोत्सवम् ।
चाहेनामहितस्य चास्य निधनोद्योगं रहस्यूचिवा-
न्गन्तव्यं खलु रंहसेति च दृढामाज्ञां प्रभोरभ्यधात् ॥ ९१ ॥

सोऽपि भोजेशितुर्वृत्तमत्र शस्त्रनिलये चापोत्सवं प्रस्तुतं चोच उक्तवान् । कीदृशस्य कंसस्य । शवतां गतस्य मृतप्रायस्य शशिवंशादुत्थितस्य जातस्यास्य निधनोद्योगं च रहस्यूचिवान् । चाहेन दम्भेन शाठ्येन चामहितस्यापूजितस्य निन्दितस्य रंहसा गन्तव्यं खलु इति । प्रभोर्दृढामाज्ञामभ्यधात् चाभिहितवांश्च ॥—शवतामिति । **७२५ शव** गतौ । अजन्तात्तल् । शशीति । **७२६ शश** प्लुतगतौ । अजन्तान्मत्वर्थीय इनिः । शस्त्रेति । **७२७ शसु** हिंसायाम् । 'सर्वधातुभ्यः ष्ट्रन्' इत्यौणादिकः ष्ट्रन् । शस्तम् । **७२८ शंसु** स्तुतौ । हिंसायामित्येके । कर्मणि क्तः । 'अनिदिताम्' इति नलोपः । चाहेन । **७२९ चह** परिकल्कने । घञ् । अमहितः । **७३० मह** पूजायाम् । कर्मणि क्तः । रहसि । **७३१ रह** त्यागे । रंहसा । **७३२ रहि** गतौ । द्वयोरसुन् । दृढाम् । **७३३ दृह ७३४ दृहि ७३५ बृह ७३६ बृहि** वृद्धौ । बृहिर् इत्येके । बृहि शब्दे च । स च गजशब्दः । दृहे 'दृढः स्थूलबलयोः' इति निपातितः क्तः ॥

तच्छ्रुत्वा परिदृंहितादरमसौ नन्दो बृहद्भोजनै-
र्यानैरप्युपबृंहितो विहितवान्प्रातः प्रयातुं मनः ।
गोविन्दस्तुहिनांशुरम्यवदनः कंसं जगद्दोहिनं
प्रोहिष्यञ्जगदर्हणीयमहिमा मोदेन निन्ये निशाम् ॥ ९२ ॥

असौ नन्दः परिदृंहितादरं परिवृद्ध आदरो यत्र तथा तच्छ्रुत्वा बृहद्भोजनैर्यानैरप्युपबृंहितः पूर्णः सन् प्रातः प्रयातुं मनो विहितवान् । गोविन्दो जगद् दोहितुं मर्दयितुं शीलं यस्य तादृशं कंसं प्रोहिष्यन्नधिकमर्दयिष्यन् निशां मोदेन निन्ये नीतवान् । जगतामर्हणीयो महिमा यस्य तादृशो गोविन्दः ॥—परिदृंहितेति । दृंहेः कर्तरि क्तः । बृहदिति । बृहेः 'वर्तमाने पृषद्बृहद्' इति बृहेरतिर्निपातितः । उपबृंहित इति । बृंहेः कर्तरि क्तः । तुहिनेति । **७३७ तुहिर् ७३८ दुहिर् ७३९ उहिर्** अर्दने । 'वेपितुह्योः' इति तुहेरिनच् । जगद्दोहिनमिति । दुहिरो णिनिः । प्रोहिष्यन्निति । उहिरो लृटः शता । अर्हणीयेति । **७४० अर्ह** पूजायाम् । योग्यत्वेऽपि । अनीयर् । धुषादय उदात्तेतः शिषिवर्जमुदात्ताः ॥

इति सव्याख्याने धातुकाव्ये प्रथमः सर्गः ।

द्वितीयः सर्गः ।

एवमक्रूरस्य व्रजप्राप्तिरूपं पूर्वदिनवृत्तान्तमुक्त्वा द्वितीयदिनवृत्तान्तं वक्तुमारभते—

प्रद्योतनस्योदयमाप्य गोपाः श्वेतांशुकोन्मेदुरचारुवेषाः ।
अखिन्नरुग्घोटकरुट्यमानमार्गा जवेनालुटिता निरीयुः ॥ १ ॥

गोपाः प्रद्योतनस्योदयमाप्य जवेनालुटिता निरीयुः । प्रद्योतनः सूर्यः । उदयमाप्य लब्ध्वा इत्युदयमात्रस्य लाभत्वेनोक्त्या तेषां प्रस्थाने कौतुकातिशय उक्तः । अलुटिता अप्रतिहताः । कीदृशा इत्यत्राह—श्वेतांशुकेनोच्चैर्मेदुरः स्निग्धः पोषणशीलः चारुर्वेषो येषां ते । अखिन्ना अमुक्ता अगता रुक् शोभा प्रीतिर्वा येषां तैर्घोटकैरश्वैर्भिद्यमानमार्गाः ॥—प्रद्योतनस्येति । ७४१ द्युत दीप्तौ । कृपूपर्यन्ता उदात्ता अनुदात्तेतः । अस्माद्युच् । श्वेतेति । ७४२ श्विता वर्णे । पचाद्यच् । उन्मेदुरेति । ७४३ ञिमिदा स्नेहने । 'भञ्जभासमिदो घुरच्' । अखिन्नेति । ७४४ ञिष्विदा स्नेहनमोचनयोः । मोहनयोरित्येके । खिदेः कर्तरि क्तः । रुगिति । ७४५ रुच दीप्तावभिप्रीत्यां च । भावे संपदादिक्विप् । घोटकेति । ७४६ घुट परिवर्तने । ण्वुल् । रुट्यमानेति । ७४७ रुट ७४८ लुट ७४९ लुठ प्रतिघाते । रुठेत्येके । रुटेः कर्मणि शानच् । लुटेः कर्तरि क्तः ॥

दुष्टनिग्रहभक्तानुग्रहरूपप्रधानकार्यार्थं भगवतः प्रस्थानमाह—

कृष्णोऽपि तापोल्लुठिताङ्गशोभा आश्वास्य मारक्षुभिता महेलाः ।
अनभ्यसंतोभककंसजीवसंस्राय पापध्वदयं प्रतस्थे ॥ २ ॥

अयं कृष्णोऽपि मारेण क्षुभिताश्चलिताः महेला आश्वास्यानभ्यानामहिंस्यानां संतोभकस्य निहन्तुः कंसस्य जीवसंस्राय प्राणं[1] शिथिलीकर्तुं त्यक्तुं[2] प्रतस्थे जगाम । पापध्वत् पापनाशकः । तापेनोल्लुठिता प्रतिहताङ्गशोभा यासां ताः । उल्लुठितेति ॥—लुठेः कर्मणि क्तः । शोभेति । ७५० शुभ दीप्तौ । घञि टाप् । 'नाम्नि तु पुंस्त्वं प्रायिकम्' इति घञन्तस्यापि स्त्रीत्वम् । क्षुभितेति । ७५१ क्षुभ संचलने । तच्च पूर्वप्रकृतिविपर्यासो मथनं वा । आधेयें कर्तरि क्तः । अन्यत्र कर्मणि । अनभ्यसंतोभकेति । ७५२ णभ ७५३ तुभ हिंसायाम् । नभेः 'पोरदुपधात्' इति यत् । तुभेर्ण्वुल् । संस्रायेति । ७५४ स्रंसु ७५५ ध्वंसु ७५६ भ्रंसु अवस्रंसने । भ्रंशु इत्येके । ध्वंसु गतौ च । अयं नाशने प्रसिद्धः । स्रंसेर्घञ् । पापध्वदिति । ध्वंसेः क्विपि सौ 'वसुस्रंसुध्वंसु–' इति दः ॥

अभ्रस्तविस्रम्भजुषा बलेन समं प्रवृत्तो भुवनाभिवृद्ध्यै ।
अशर्धनैर्गोपकुलैः सहासौ ययौ कृपास्यन्दसुकृत्तमोदैः ॥ ३ ॥

असौ गोपकुलैः सह ययौ । अभ्रस्तविस्रम्भजुषा बलेन समं भुवनाभिवृद्ध्यै प्रवृत्तः । अभ्रस्तं अशिथिलं दृढं श्रीकृष्णे विस्रम्भं विश्वासं जुषते सेवते इति तथा तेन बलेन ।

१. 'पुंभूम्नि चासुषु' इति मेदिनीतो जीववाचिप्राणशब्दस्य बहुवचनान्तत्वेन 'प्राणान्' इत्युचितम्. २. 'त्याजयितुम्' इत्युचितं प्रतिभाति.

कीदृशैर्गोपकुलैः । अशर्धनैः कुत्सितशब्दमकुर्वाणैः । कृपास्यन्देन कृपामृतप्रवाहेण सम्यक्कॢप्तो मोदो येषां तैः॥—अभ्रस्तेति । भ्रंसेः कर्तरि क्तः । विस्रम्भेति । ७५७ स्रम्भु विश्वासे । घञ् । प्रवृत्त इति । ७५८ वृतु वर्तने । कर्तरि क्तः । अभिवृद्ध्यै । ७५९ वृधु वृद्धौ । क्तिन् । अशर्धनैः । ७६० शृधु शब्दकुत्सायाम् । युच् । स्यन्देति । ७६१ स्यन्दू प्रस्रवणे । घञ् । सुकॢप्तेति । ७६२ कृपू सामर्थ्ये । सामर्थ्यं शक्तिर्योग्यता वा । अन्तर्गतण्यर्थात् कर्मणि क्तः । 'कृपो रो लः' इति कुत्वम् । द्युतादय उदात्ता अनुदात्तेतः । वृत् । द्युतादयो वृत्ता गत्यर्थः । वृदिति वृतेर्भूते क्विप् ॥

अतिप्रियस्य भगवतः प्रस्थाने गोपीनां वृत्तमाह—

गोपीघटाः प्रव्यथितास्तदानीं पृथूपतापप्रसमानचिन्ताः ।
मृदुस्वभावाः स्खदिताः स्मरास्त्रैः प्रक्षञ्जिते प्राणसमे विषेदुः ॥ ४ ॥

गोपीनां घटाः समूहास्तदानीं प्राणसमे प्रियतमे श्रीकृष्णे प्रक्षञ्जिते गते विषेदुः । कीदृश्यः । प्रव्यथिता भीताः, दुःखिता वा । पृथुनोपतापेन पीडया प्रसमाना वर्धमाना चिन्ता यासां ताः । अतीक्ष्णस्वभावाः । स्मरास्त्रैः स्खदिता विदारिताः ॥—घटा इति । ७६३ घट चेष्टायाम् । क्वचित्संगमादौ । एतद्गादयः फणान्ता 'घटादयो मितः' इति मितः । आदितस्त्वरान्तानां तु 'घटादयः षितः' इति षित्वम्, अनुदात्तेत्वं च । घटेः षित्त्वात् । 'षिद्भिदादिभ्यः' इति संगच्छन्तेऽत्र समूहिन इत्यधिकरणेऽङ् । प्रव्यथितेति । ७६४ व्यथ भयचलनयोः । दुःखचलनयोरित्येके । कर्तरि क्तः । पृथु इति । ७६५ प्रथ प्रख्याने । विस्तारेऽप्यस्ति । 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च, इत्युप्रत्ययः । प्रसमानेति । ७६६ प्रस विस्तारे । शानच् । मृदु इति । ७६७ म्रद मर्दने । म्रदेः प्राग्वदुप्रत्ययः । स्खदिता । ७६८ स्खद स्खदने । विदारणं तत् । ण्यन्तात् कर्मणि क्तः । मित्त्वाद्ध्रस्वः । प्रक्षञ्जितेति । ७६९ क्षजि गतिदानयोः । क्षज इत्येके । क्षञ्जेः कर्तरि क्तः ॥

दक्षापरेणास्तकृपेण तासामक्रान्दि चेतः क्रदनैः स्मरेण ।
शरीरमक्रान्दि वचोऽपि वेगादक्लान्दि चक्रे मरणत्वरापि ॥ ५ ॥

स्मरेण तासां चेतः क्रदनैर्विक्लवीकरणैः । पीडाभिरिति यावत् । अक्रान्दि विक्लवीकृतम् । शरीरमक्रान्दि । वचोऽप्यक्लान्दि । उभयत्रापि पूर्ववदर्थः । मरणत्वरापि चक्रे । कीदृशेन । दक्षायां हिंसायां परेण त्यक्तकृपेण ॥—दक्षेति । ७७० दक्ष गतिहिंसनयोः । 'घटादिषु त्विहापूर्वपठिताः सर्वदा मितः । बहिःस्थस्येह पाठे तु मित्त्वमुक्तेऽर्थ एव हि ॥' इत्युक्तेर्वृद्ध्यर्थतया प्राक्पठितस्य दक्षेरनयोरर्थयोर्मित्त्वम् । षित्त्वादङ् । कृपेति । ७७१ क्रप कृपायां गतौ च । 'क्रपेः संप्रसारणं च' इति भिदादि पाठात् संप्रसारणमङ्च । अक्रान्दि । अक्रान्दि । अक्लान्दि । ७७२ कदि ७७३ क्रदि ७७४ क्लदि वैक्लव्ये । वैकल्य इत्येके । त्रयोऽप्यनिदित इत्यन्ये । इदितां कन्दादीनां णिजन्तात् कर्मणि चिणि

['चिण्णमुलो दीर्घोऽन्यतरस्याम्' इति दीर्घः।] कदनैः। अनिदितः कदेर्ल्युट्। त्वरेति
७७५ ञित्वरा संभ्रमे। षित्त्वादङ्॥

गोपीनां वचोवैक्लव्यादुक्तिं प्रपञ्चयति—

ताः संज्वरन्तीर्गलदश्रुधारा विमोहशक्त्या हिडयन्वियोगः।
मिथो निजार्तिं वटयांचकार हरेश्च चेष्टा भटयांचकार॥ ६॥

वियोगस्ता विमोहशक्त्या हिडयन् बद्धाः कुर्वन् मिथो निजार्तिं वटयांचकार। हरे-श्चेष्टाश्च भटयांचकार। उभयत्र भाषयांचकारेत्यर्थः॥—संज्वरन्तीः। पीड्यमानाः। गलद-श्रुप्रवाहाः। संज्वरन्तीरिति। **७७६ ज्वर** रोगे। फणान्ता उदात्ता उदात्तेतः। ज्वरेः शतरि ङीप्। गलदिति। **७७७ गड** सेचने। तच्च जलादेः पतनमात्रम्। गडेः शता। हिडयन्। **७७८ हेड** वेष्टने। णौ मित्त्वाद्ध्रस्वः। 'एच इक्' । शता। वटयांचकार। भटयांचकार इति। **७७९ वट ७८० भट** परिभाषणे। श्वेट(?) इत्येके। आद्य-योर्णौ लिट्॥

वियोगवह्निं नटयन्वतान्तर्धृतिं च नः प्रस्तकयन्गतोऽसौ।
कृष्णः पुरस्त्रीश्चकयेदिदानीं नर्माणि चोक्त्वा कखयेद्रगामः॥ ७॥

नोऽस्माकमन्तर्मनसि वियोगवह्निं नटयंश्चलयन् दीपयन्, धृतिं प्रस्तकयन् प्रति-हतां कुर्वंश्च गतोऽसौ कृष्ण इदानीं पुरस्त्रीश्चकयेत् तर्पयेत् नर्माण्युक्त्वा कखयेत् हासयेच्च द्वयोः संभावने लिङ्। बतेति खेदे। इति वयं रगामः शङ्कामहे॥—नटयन्निति। **७८१ णट** नृत्तौ। पूर्वं नटव्यापारेऽयं धातुरुक्तः। अत्र तु नर्तनव्यापारश्चलनादिश्च नृत्तिः। तत्र मित्त्वम्। णट गतावित्येके। नतावित्यन्ये। प्रस्तकयन्। **७८२ ष्टक** प्रतिघाते। द्वयोर्णौ शता। चकयेत्। **७८३ चक** तृप्तौ। कखयेत्। **७८४ कखे** हसने। द्वयो-र्लिङ्। रगामः। **७८५ रगे** शङ्कायाम्। लट्॥

श्रीकृष्णविरहदुःखं छादयितुमशक्ता काचिदाह—

लग्नं हृदन्ते ह्नगये कथं वा रागं कथं नु ह्नगयामि तापम्।
असग्यमास्रं स्थगये कथं वा कगामि किंवा हरयेऽकिताय॥ ८॥

अहं हृदन्ते लग्नं सक्तं रागं कथं वा ह्नगये च्छादयामि। तापं च कथं नु ह्नगयामि छा-दयामि। असग्यं छादयितुमशक्यमास्रमश्रुजालं कथं वा स्थगये च्छादयामि। रागतापयो-रन्तःस्थत्वेनादृश्यत्वेऽपि तद्धेतुरास्रोद्गमो दुर्वार एवेति भावः। अकिताय कुटिलं गतात्-व्याजेन प्रस्थिताय हरये हरिं प्राप्तुं किं वा कगामि करोमि। न किंचिदपि कर्तुं शक्यमि-त्यर्थः॥—लग्नमिति। **७८६ लगे** सङ्गे। 'क्षुब्धस्वान्तध्वान्त—' इत्यादिना क्तान्तो निपातितः। ह्नगये। ह्नगयामि। **७८७ ह्नगे ७८८ ह्लगे ७८९ षगे ७९० ष्टगे** सं-वरणे। तच्चात्र तिरोधानमेव। स्थगेर्ण्यन्तस्य तिरोधापनार्थदर्शनात्। आद्ययोर्णौ लट्। असग्यम्। सगेर्णौ ण्यत्। स्थगये स्थगेर्णौ लट्। कगामि। **७९१ कगे** नोच्यते।

क्रियासामान्यार्थत्वादनेकार्थत्वाच्च 'अस्यायमर्थः' इति नोच्यते । नोच्यत इत्यवचनमर्थ इत्यन्ये । अस्माल्लट् । अकिताय । **७९२ अक ७९३ अग** कुटिलायां गतौ । अकेः कर्तरि क्तः ॥

पीडातिशयादक्रूरं शपन्ति—

अगन्मनीषः कणयन्मुकुन्दमस्मान्वियोगं रणयन्स दूतः ।
चणन्विषादं विशणन्विचिन्तां श्रणन्विमोहं श्रथितोऽस्तु सद्यः ॥ ९ ॥

मुकुन्दं कणयन् गमयन् । हेतौ शता । तस्माद्धेतोः । अस्मान् वियोगं रणयन् प्रापयन् । तत एव विषादं चणन्, विचिन्तां विशणन्' विमोहं श्रणन् । त्रिषु प्रयच्छन्नित्यर्थः । अस्मभ्यमित्यर्थात् । स दूतः सद्यः श्रथितो हिंसितोऽस्तु । कीदृशः । अगन्ती कुटिलीभवन्ती मनीषा यस्य सः ॥—अगदिति । अगेः शता । कणयन् रणयन्निति । **७९४ कण ७९५ रण** गतौ । द्वयोर्णौ शता । चणन् विशणन् श्रणन्निति । **७९६ चण ७९७ शण ७९८ श्रण** दाने च । एषां शता । श्रथितः । **७९९ श्रथ ८०० श्लथ ८०१ क्नथ ८०२ क्रथ** हिंसार्थाः । श्रथेः कर्मणि क्तः ॥

सर्वरक्षिणो भगवतः स्वरक्षादोषमाशङ्क्य परिहरन्ति—

श्लथ्यात्मनां क्राथयताच्युतेन किं नाङ्गजो नः क्नथयन्नचानि ।
वनाम किं प्रज्वलितो हरेण सोऽद्यापि यद्विह्वलयन्ननङ्गः ॥ १० ॥

श्लथ्यात्मनां हिंस्यस्वरूपान् क्राथयता । 'जासिनिप्रहण—' इति कर्मणि षष्ठी । अच्युतेन नोऽस्मान् क्नथयन् हिंसन् अङ्गजः किं न अचानि कस्मान्न हिंसितः । हरेण प्रज्वलितः सोऽनङ्गोऽद्यापि विह्वलयति यत् यस्मात् तस्मात् किं वनाम करवाम । न किंचित् ॥—श्लथेर्ण्यत् । क्राथेर्णिजन्ताच्छता । 'जासिनिप्रहणनाटक्राथ—' इति निपातनाद्दीर्घः । क्नथेर्णौ शता । श्लथादीनां णिजन्तानामपि हिंसामात्रमर्थः । जास्यादिसूत्रे हिंसायामित्युक्तेः । 'हन्त्यर्थाश्च' इति चुरादिपाठाद्वा । अचानि । चन च । हिंसार्थ इति शेषः । अस्माण्णौ चिण् । वनाम । **८०३ वनु** च नोच्यते । कगिवदयमपि क्रियासामान्यार्थ इत्यर्थः । अस्माल्लोट् । प्रज्वलितः । **८०४ ज्वल** दीप्तौ । णौ कर्मणि क्तः । विह्वलयति । **८०५ ह्वल ८०६ ह्मल** चलने । ह्वलेर्णौ लट् ॥

भगवतो बाल्यकृतं दुर्ललितत्वमप्यतिदुर्विस्मरमित्याह—

प्र(अ)ह्मल्यचित्तां स्मरयत्यसौ मां नन्दात्मजः संदरकः खलानाम् ।
अनारि येन श्रपितं पयोऽपि बालैर्मुहुः संज्ञपितासुरेण ॥ ११ ॥

असौ नन्दात्मजो मां स्मरयति सोत्कण्ठं ध्यापयति । खलानां संदरको भीषयिता ।

---

१. अत्र पुस्तकद्वयेऽपि सर्वत्र 'कृथ्यात्मनां' इति पाठः, श्रथश्लथेत्यत्रापि क्नथेति पाठः.

प्र(अ)झल्यं चलयितुमशक्यं चित्तं यस्यास्ताम् । येन श्रपितं पक्वं पयोऽपि बालैः प्रयोज्यं कर्तृभिरनारि नायितम् । मुहुरिति काकाक्षिवदुभयत्रान्वेति । मुहुः संज्ञपिता मारिता असुरा येन तेन ॥ —प्र(अ)झल्येति । झलेर्णौ ण्यत् । स्मरयति । ८०७ स्मृ आध्याने सोत्कण्ठस्मरणं तत् । णौ लट् । संदरकः । ८०८ दॄ भये । णौ ण्वुल् । अनारि । ८०९ नॄ नये । णौ चिण् । श्रपितम् । ८१० श्रा पाके । पाको विक्लित्तिः । श्रायतिश्रात्योः स्मिन्नर्थे मित्त्वं णौ कर्मणि क्तः । संज्ञपितेति । मारणतोषणनिशामनेषु ८११ ज्ञा । निशामनं प्रदर्शना । निशातेष्वित्येके । मारणार्थे कर्मणि क्तः ॥

तापशान्तावन्यथोपायं संभावयन्ति—

तमेव किं विज्ञपयेम मारं येनाच्युतं प्रज्ञपयेन्न बाणान् ।
करे सरोजं चलयन्न चाल्यः स किं मुरारिश्छदयेत्पुनर्नः ॥ १२ ॥

वयं तं मारमेव विज्ञपयेम तोषयेम । किम् । येन तोषणेनासावच्युतं प्रज्ञपयेत् प्रदर्शयेत् । बाणान् न प्रज्ञपयेत् निशातयेत् । स मुरारिर्लीलया करे सरोजं चलयन् नः छदयेत् किं प्राणनं वा कुर्यात् । अचाल्यः भावादन्यथाकर्तुं अन्यत्र हर्तुं नेतुं स्वचित्तात् क्षेप्तुं निरसितुं च वा न शक्याः ॥—विज्ञपयेदिति । तोषणे णिचि लिङ् । प्रज्ञपयेदिति निशामननिशातनयोः । चलयन्निति । कम्पने । ८१२ चलिः । णौ शता । अचाल्यः कम्पनादन्यत्र मित्त्वाभावे णिजन्ताण्यत् । अन्यथाकरणं हरणं क्षेपो वा तत्रार्थाः । छदयेत् । ८१३ छदिर् ऊर्जने । बलनं प्राणनं वा तत् । छदेर्णौ लिङ् ॥

भगवतो दर्शनमेव प्रार्थयन्ते—

यद्वर्णने को लडयेन्न जिह्वां भक्तांश्च दुष्टान्मदयत्यलं यः ।
दृश्येत वेणुं ध्वनयन्कदा वा स नन्दसूनुः स्वनयन्कलापम् ॥ १३ ॥

यद्वर्णने को जिह्वां न लडयेत् क्षोभयेत् । यो भक्तान् दुष्टांश्चालं मदयति अलं हर्षयति दीनयति च । स नन्दसूनुर्वेणुं ध्वनयन् शब्दयन् कलापं स्वनयन् अवतंसीकुर्वन् कदा वास्माभिर्दृश्येत ॥—लडयेदिति । जिह्वोन्मथने ८१४ लडिः । उन्मथनं क्षोभणम् तच्च जिह्वायाः । जिह्वायाः क्षोभणं वा । जिह्वायाः क्षोभणार्थे णिचि लिङ् । मदयति ८१५ मदी हर्षग्लेपनयोः । ग्लेपनं दैन्यम् । लट् । ध्वनयन् । ८१६ ध्वन शब्दे । णौ शता । स्वनयन् । ८१७ स्वन अवतंसने च । चाच्छब्दे । णौ शता ॥

दर्शनप्रकार एव प्रार्थ्यते—

दलं दलं धैर्यभरं कटाक्षान्वलं वलं प्रस्खलयन्मनो नः ।
त्रपं त्रपं नर्मगिरा विषादं क्षपं क्षपं किं जनयेत्स मोदम् ॥ १४ ॥

मनः प्रस्खलयंश्चलयन् स श्रीकृष्णः कटाक्षान् वलं वलं पुनः पुनः संचारयन् धैर्यभरमतिशयं दलं दलं पुनः पुनर्विदारयन् नर्मगिरा त्रपं त्रपं पुनः पुनर्लज्जयन् विषादं

क्षपं क्षपं पुनः पुनर्विनाशयन् नो मोदं जनयेत् किम् ॥—दलं दलमित्यादिचतुर्षु '**दलि-वलि-स्खलि-त्रपि-क्षपयश्च**' इति भोजोक्त्या मित्त्वे ण्यन्तादाभीक्ष्ण्ये णमुल् । 'नित्यवीप्सयोः' इति द्विरुक्तिः । 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' इति दीर्घाभावे रूपम् । प्रस्खलयन् । स्खलेर्णौ शता । जनयेत् । घटादयो मितः । '**जनी-जॄष्-क्नसु-रञ्जो-ऽमन्ताश्च**' इति णौ मित्त्वे जनेर्लिङ् ॥

श्रीकृष्णेन पूर्वं सुखितत्वादिदानीं पीडाधिक्यमित्याहुः—

वाग्भिर्विशङ्कां विजरय्य मारं परिक्नसय्य स्नसितत्रपेण ।
अराञ्जि येनाभिरमय्य गूढं वधूजनः स ज्वलयत्यलं नः ॥ १५ ॥

स्नसितत्रपेण । स्नसिता निरस्ता त्रपा येन तादृशेन । येन वाग्भिर्विशङ्कां विजरय्य नाशयित्वा मारं परिक्नसय्य दीपयित्वा वर्धयित्वा गूढमभिरमय्य वधूजनोऽराञ्जि रञ्जितः स श्रीकृष्णोऽस्मान् अलं ज्वलयति संतापयति ॥—विजरय्य । जॄषो णिजन्तात्ल्यप् । 'ल्यपि लघुपूर्वात्' इत्ययादेशः । परिक्नसय्य क्नसेः प्राग्वल् ल्यप् । स्नसितेति । 'जनीजॄष्णसु-' इति पाठे णिजन्तात् कर्मणि क्तः । अराञ्जि । रञ्जेर्णौ चिणि 'चिण्णमुलोः—' इति दीर्घः । अभिरमय्य । अमन्ताण्णिचि प्राग्वत् ल्यप् । ज्वलयति । '**ज्वल-ह्वल-ह्मल-नमामनुपसर्गाद्वा**' इति मित्वविकल्पान् मित्त्वपक्षे णिचि लट् ॥

हा ज्वालयन्ति ह्वलयन्ति चित्तमह्वाल्यवैरिह्मलकस्य लीलाः ।
अह्मालितात्मा नमयन्ननाम्यान्स ग्लापयत्यग्लपकः कुतो नः ॥ १६ ॥

अह्वाल्यवैरिह्मलकस्याक्षोभणीयशत्रुक्षोभकस्य तस्य लीलाश्चित्तं ज्वालयन्ति तापयन्ति, ह्वलयन्ति क्षोभयन्ति च । हा कष्टमह्मालितात्माक्षोभितमनाः । अनाम्यान् प्रह्वीकर्तुमशक्यान् नमयन् । अग्लपकोऽपीडकः स कुतो हेतोर्नो ग्लापयति पीडयति ॥—ज्वालयन्तीति । ज्वलेरमित्त्वे लट् । ह्वलयन्ति । ह्वलेर्मित्त्वे लट् अह्वाल्येति । ह्वलेर-मित्त्वे ण्यत् ह्मलकस्य । ह्मलेर्णौ मित्त्वे ण्वुल् । अह्मालितेति । अमित्त्वे कर्मणि क्तः । नमयन् । अनाम्यान् । नमेः शतृण्यतौ । ग्लापयति । अग्लपकः । '**ग्ला-स्ना-वनु-व-मां च**' इति मित्त्वविकल्पे ग्लाधातोर्लण्ण्वुल् च ॥

भगवतो जलक्रीडादिषु स्वाभिमतसिद्धिं बकवधाद्यद्भुतकर्म चानुस्मृत्य तस्मिन्नेव मनो लीयत इत्याहुः—

यः स्नाप्यमानः स्नपयंस्तथास्मान्कृत्स्नं च वान्यं वनयन्नरंस्त ।
अवामयत्संवमितासृजायो बकेन तं कामयते मनो नः ॥ १७ ॥

योऽस्माभिः स्नाप्यमानः सिच्यमानोऽस्मान् स्नपयन् प्रतिषिञ्चन् कृत्स्नं वान्यमस्माभिः कारयितव्यं बहु कर्म वनयन् कारयंश्चारंस्त क्रीडितवान् । यो वमितासृजा छर्दितरक्तेन बकेन अवामयत् छर्दयामास तं नो मनः कामयते ॥—स्नाप्यमानः स्नपयन्निति । स्नाधातोर्णौ शानच्छता च । वान्यं वनयन्निति । वनेर्ण्यच्छता च । अवामयत् वमितेति ।

वमेर्णौ लङ्। कर्मणि क्तश्च। कामयते इति। **'न कम्यमिचमाम्'** इत्यमित्त्वे णिङि वृद्धिः॥

दर्शनमेव प्रार्थयमाना विरमन्ति—

तमामयन्तं द्विषतस्तृणं गाः प्रचामयन्तं क्व निशामयेयम्।
निशम्यया मञ्जुगिरा कदा नः स यामयेद्वा यमनादिकार्ये॥ १८॥

तं क्व काले देशे वा निशामयेयं पश्येयम्। कीदृशं तम्। द्विषत आमयन्तं पीडयन्तम्। गास्तृणं प्रचामयन्तमादयन्तम्। स निशम्यया श्राव्यया मञ्जुगिरा कदा नो यमनादिकार्ये परिवेषणादिकर्मणि यामयेत् व्यापारयेत्॥—आमयन्तमिति। अमेर्णिचि शतरि मित्त्वाभावे दीर्घः। प्रचामयन्तमिति। चमेः प्राग्वद्। निशामयेयमिति। ८१८ **'शमो दर्शने'** इत्यमित्त्वे णौ लिङ्। निशम्यया। अदर्शनार्थत्वेन मित्त्वे णिचि ण्यत्। यामयेत्। ८१९ **'यमोऽपरिवेषणे'** इत्यमित्त्वे णौ लिङ्। व्यापारणात्रार्थः। यमनेति। परिवेषणार्थे णौ मित्त्वे ल्युट्॥

उक्तं गोपीविलासमुपसंहरति—

इत्याद्यवस्खादितमानसास्ता बालाः परिस्खादितधैर्यबन्धाः।
दुष्टानपस्खादयितुं प्रयाते कृष्णे विलेपुः फणिता विमोहम्॥ १९॥

कृष्णे दुष्टानपस्खादयितुं विदारयितुं प्रयाते सति। ता बाला विमोहं फणिताः प्राप्ता इत्यादि विलेपुः। कीदृश्यः। अवस्खादितं विदारितं मानसं यासां ताः। परिस्खादितो नाशितो धैर्यबन्धो यासां ताः॥—अवस्खादितेति। ८२० **'स्खदिर् अवपरिभ्यां च'** इति मित्त्वनिषेधाण्णिचि दीर्घे कर्मणि क्तः। परिस्खादितेति तद्वत्। अपस्खादयितुमिति। 'अपावपरिभ्यश्चेत्येके' इत्यपात् परस्य स्खदेरमित्त्वे णिचि तुमुन्। फणिता इति। ८२१ **फण** गतौ। कर्तरि क्तः। वृत् घटादिर्वृत्तः। ज्वरादय उदात्ता उदात्तेतः॥

प्रस्थितस्य भगवतः श्रीकृष्णस्यावस्थामाह—

कृष्णोऽपि रेजे पथि गोपबालैर्भ्राजिष्णुभिर्भ्राशितपार्श्वदेशः।
विभ्लाशितेऽक्रूररथे सरामः स्यमत्पयोदस्वनभाजि तिष्ठन्॥ २०॥

कृष्णोऽप्यक्रूररथे सरामस्तिष्ठन् पथि रेजे। भ्राजिष्णुभिः शोभनशीलैर्गोपबालैर्भ्राशितपार्श्वदेशः शोभितपार्श्वभागः। स्यमत्पयोदस्य शब्दायमानमेघस्य स्वनमिव स्वनं भजत्याश्रयति यत्तस्मिन् रथे॥—रेजे इति। ८२२ **राजृ** दीप्तौ। उदात्तः स्वरितेत्। अस्माल्लिटि 'फणां च सप्तानाम्' इत्येत्त्वाभ्यासलोपविकल्पः। ८२३ **टुभ्राजृ** ८२४ **टुभ्राश्ट** ८२५ **टुभ्लाश्ट** दीप्तौ। उदात्ता अनुदात्तेतः। भ्राजेः 'अलंकृञ्-' आदिना ताच्छील्ये इष्णुच्। भ्राशितभ्लाशितेति। द्वयोः कर्तरि क्तः। स्यमदिति। ८२६ **स्यमु** ८२७ **स्वन** ८२८ **ध्वन** शब्दे। क्षमान्ता उदात्ता अनुदात्तेतः। स्यमेः शता। स्वनेति 'स्वनहसोर्वा' इत्यप्। स्वनान्ताः सप्त फणादयः॥

गोपैर्ध्वनद्भिः समितैर्वृतोऽपि देवो न तस्ताम विचिन्त्य गोपीः ।
ज्वालेन तापेन चला जडाङ्गीरटालशोकट्वलितप्रतापाः ॥ २१ ॥

ध्वनद्भिः शब्दायमानैः समितैरविक्लवीभवद्भिर्गोपैर्वृतोऽपि देवो गोपीर्विचिन्त्य न तस्ताम अविक्लवीबभूव पीडित एवासीत् । ज्वालेन दीप्तेन तापेन संतापेन चलाः कम्पिताः । जडान्यसमर्थान्यङ्गानि यासां ताः । अटालेन पूर्णेन शोकेनट्वलिता विकलीभूताः प्रलापाः यासां ताः ॥—ध्वनद्भिरिति । ध्वनेः शता । समितैः । ८२९ षम ८३० ष्टम अवैक्लव्ये । समेः कर्तरि क्तः । तस्ताम । स्तमेर्लिट् । ज्वालेन । ८३१ ज्वल दीप्तौ । 'ज्वलितिकसन्तेभ्यः' इति णः । चलाः । ८३२ चल कम्पने । पचाद्यच् जडेति । ८३३ जल घान्ये[1] । घान्यमतैक्ष्ण्यम् । अच् । लडयो रभेदाङ्गः । अटालेति । ८३४ टल ८३५ ट्वल वैकल्ये । टलेर्णः । ट्वलेः कर्तरि क्तः ॥

स्थलीर्हली सन्नलिनीश्च तीर्त्वा पलन्हरिश्चात्मबलप्रपोलः ।
कुलीरशालह्वलिताम्बुपूरह्मलत्पतङ्गां यमुनामवाप्तौ ॥ २२ ॥

पलन् हरिर्हली चोभौ स्थलीः सन्नलिनीश्च तीर्त्वा यमुनामवाप्तौ । पलन् गच्छन् । स्थलीरकृत्रिमदेशान् । अवाप्तौ प्राप्तौ । आत्मबलेन स्वबलेन प्रपोलो महान् कुलीराणां कर्कटकानां शालेन गमनेन ह्वलिते चलिते अम्बुपूरे जलपूरे ह्मलन्तो गच्छन्तः पतङ्गाः पक्षिणो यस्यां तां यमुनाम् ॥—स्थलीरिति । ८३६ ष्ठल[2] स्थाने । अस्मादचि स्थलम् । स्थलशब्दात् 'जानपदकुण्डगोणस्थल–' इत्यादिना अकृत्रिमार्थे ङीषि स्थली । हलीति ८३७ हल विलेखने । कर्षणं तत् । अचि हलं तस्मात् 'अत इनि' इतीनिः । नलिनीरिति । ८३८ णल गन्धे । बन्धन इत्येके । अस्मात् 'बहुलमन्यत्रापि' इति कठिनवदिनचि नलिनम् । तस्मादिनौ ङीप् । पलन् । ८३९ पल गतौ । शता बलमिति । ८४० बल प्राणने धान्यावरोधने च । धान्यावरोधनं कुसूलादिव्यापारः । अस्मादचि बलम् । प्रपोल इति । ८४१ पुल महत्त्वे । ज्वलादिणः । कुलीरेति । ८४२ कुल संस्त्याने बन्धुषु च । संतान इत्येके । संस्त्यानं संघातः । अस्मात् संघाती भवतीति कुलेश्च भोजः।' इतीरक् । शालेति । ८४३ शल [ह्वल ह्मल][3] ८४४ हुल ८४५ पत्ऌ गतौ । शलेर्घञ् । ह्वलितेति । ह्वलेः कर्तरि क्तः । ह्मलदिति । ह्मलेः शतः पतङ्गेति । 'पतेरङ्गच् पक्षिणि' इत्यङ्गच् ॥

यमुनां वर्णयति षड्भिः—

अह्रोलसत्त्वा रविरश्मिजालेऽप्यविक्कथन्ती तटपाथिपाथाः ।
तापं मथन्ती कणिका वमन्ती भ्राम्यत्तरङ्गा क्षरति स्फुटं या ॥ २३ ॥

१. धातुपाठे तु 'घातने' इति पाठः. २. स्थलेति धातुपाठपाठः. ३. 'ह्वलतेर्ह्मलतेश्च घटादिपठितस्येह पाठो णविकल्पार्थः. घटादिपाठस्त्वर्थविशेषे मित्वार्थः इति बोद्धव्यम्' इति माधवग्रन्थानुराधेने ह्वलह्मलौ पठितौ इति बोध्यम्.

या भ्राम्यत्तरङ्गा स्फुटं क्षरति । भ्राम्यन्तश्चलन्तस्तरङ्गा यस्यां सा क्षरति प्रवहति । अहोल-सत्त्वा अहोलान्यहिंसकानि सत्त्वानि जलजन्तवो यस्यां सा रविरश्मिजालेऽप्यविकथन्त्यपच्य-मानानुष्णीभवन्तीत्यर्थः । तटपाथिपाथः तटं पथितुं गन्तुं शीलं यस्य तादृशं पाथो यस्याः सा । तापं मथन्ती क्षोभयन्ती त्यजन्ती । कणिकाः बिन्दून् वमन्ती उद्गिरन्ती ॥—अहोलेति । हुल हिंसासंवरणगतिषु इत्येके । अस्माण्णः । अविकथन्ती । ८४६ कथे निष्पाके । शतरि ङीप् । तटपाथि । ८४७ पथे गतौ । णिनिः । असुन्नपि । मथन्ती ८४८ मथे विलो-डने । शतरि ङीप् । वमन्ती । ८४९ टुवम् उद्गिरणे । भ्राम्यदिति । ८५० भ्रमु चलने । 'वा भ्राशभ्लाश–' इति श्यनि शता । क्षरति । ८५१ क्षर संचलने । गलनं तत् । 'क्षर संचये' इति चैके । चलने च द्रुमे । स्यमादय उदात्ता उदात्तेतः ॥

सेहे च रामाजनखेलनं या कुचोरुसीदत्परिशद्रुतोया ।
क्रोशैर्जनाः कोचगलान्मरालान्बोधन्ति यत्राम्बुरुहां विकासे ॥ २४ ॥

या रामाजनखेलनं सेहे च । खेलनं क्रीडा । भगवत्क्रीडासुखमनुभूतवती । चेति चकारस्या [पिर]र्थः । कुचोरुसीदत्परिशद्रुतोया कुचोरुभिः स्तनसक्थिभिस्तदाघातेन सीदत् पीड्यमानं परिशद्रु विशरणशीलं तोयं यस्यां सा इति लीलाया असह्यत्वे हेतुः । जना यत्राम्बुरुहां पद्मानां विकासे क्रोशैः रोदनैः सख्याह्वानशब्दैर्वा मरालान् हंसान् कोच-गलान् कुटिलीभवत्कण्ठान् बोधन्ति जानन्ति ॥—सेहे इति । ८५२ षह मर्षणे । उ-दात्तोऽनुदात्तेत् । लिट् । रामेति ८५३ रमु क्रीडायाम् । उदित्त्वमस्यानार्षम् । अ-नुदात्तोऽनुदात्तेत् । अस्माण्णे टाप् । सीददिति । ८५४ षद्लृ विशरणगत्यवसादनेषु । शतरि 'पाघ्राध्मा–' इति सीदादेशः । परिशद्रु इति । ८५५ शद्लृ शातने । तीक्ष्णीभावस्तत् । विशीर्णतायामित्येके । गतावप्यस्ति । 'दाधेट्सिशदसदः' इति रुः क्रोशैः । ८५६ क्रुश आह्वाने रोदने च । घञ् । सदादयोऽनुदात्ता उदात्तेतः । कोचेति । ८५७ कुच-संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । अस्माण्णः ८५८ बुध अवगमने । उद्बोधज्ञाने अस्यार्थावित्ययमकर्मकः सकर्मकश्च । अस्माल्लट् । अम्बुरुहामिति । ८५९ रुह बीजज-न्मनि । अस्मात् क्विप् । विकास इति । ८६० कस गतौ । विपूर्वत्वात् स्फुटनार्थता । अस्माद् घञ् ॥ कुचादय उदात्ता उदात्तेतो रुहिवर्जम् ॥

हिक्कद्भिर्ऋक्षैः सुखमञ्चमानैर्भृङ्गैरचद्भिर्मधु याचमानैः ।
रेटत्तटा या खलु चातकैश्च चाय्यं जलं प्रोथति दातुमुर्व्याम् ॥ २५ ॥

या खलु चातकैरपि चाय्यं प्रार्थनीयं जलं कणरूपं दातुमुर्व्यां प्रोथति पर्याप्नोति स-मर्था भवति । हिक्कद्भिर्जातिस्वभावप्राप्तमव्यक्तशब्दं कुर्वाणैः सुखं यथा तथाञ्चमानै-स्ततस्ततः संचरद्भिश्च । एतद्द्वयमृक्षविशेषणम् । अचद्भिर्डयमानैः मधु पुष्परसं याच-मानैरिव च । एतद्द्वयं भृङ्गविशेषणम् । तादृशैर्ऋक्षैर्भृङ्गैश्च रेटत्तटा शब्दायमानतीरा । अनेन यमुनायाः सर्वजन्तूनां सुखकरत्वमुपकारित्वं चोक्तम् ॥—हिक्कद्भिरिति । ८६१

हिक्क अव्यक्ते शब्दे । शता । अञ्चमानैः । अचद्भिः । ८६२ अञ्चु गतौ याचने च । अचु इत्येके । अचु गतावित्यन्ये । अञ्चेः शानच् । अचेः शता । याचमानैः । ८६३ टु याचृ याच्ञायाम् । डु याचृ इत्येके । शानच् । रेटदिति । ८६४ रेटृ परिभाषणे । याचने च द्रुमे । शता । चातकैः । ८६५ चते ८६६ चदे याचने । चतेर्ण्वुल् । चाद्यम् । चदेर्ण्यत् । प्रोथति । ८६७ प्रोथृ पर्याप्तौ । अयं शब्दार्थोऽपि । अपपूर्वस्तु मारणे हुंकरणे वा । अस्माल्लट् ॥

यमुनाया अतिपुण्यत्वं शैत्यातिशयं चाह—

नित्यं प्रमोहामिदितोरुमेदैः प्रमेधिता सद्भिरनिद्यमानैः ।
या नेदितोर्वींपरिशर्धिवीचीविमृद्धवृक्षादिविबोध्यशैत्या ॥ २६ ॥

या सद्भिर्नित्यं प्रमेधिता संगता । प्रमोहेणामिदितोऽपीडित उरुमेदो मेघा येषां तैः सद्भिः । अनिद्यमानैरकुत्स्यमानैः । नेदितोर्वीं नेदितां समीपभूतामुर्वीं भुवं परिशर्धितुमुन्दितुं सेक्तुं शीलं यासां ताभिर्वीचीभिर्विमृद्धैरुन्दितैर्वृक्षादिभिर्विबोध्यं शैत्यं यस्याः सा ॥— अमिदितेति । ८६८ मिदृ ८६९ मेदृ मेधाहिंसनयोः । मिथृ मेथृ इत्येके । मिधृ मेधृ इत्यन्ये । ८७० मेधृ संगमे च । मिदेः कर्मणि क्तः । अनिद्यमानैः । ८७१ णिदृ ८७२ णेदृ कुत्सासंनिकर्षयोः । निदेः कर्मणि शानच् । नेदितेति । नेदेः कर्तरि क्तः । परिशर्धि, विमृद्ध इति । ८७३ शृधु ८७४ मृधु उन्दने । शृधेर्णिनिः । मृधेः कर्तरि क्तः । विबोध्येति । ८७५ बुधिर् बोधने । तत्तु ज्ञानमेव । अस्माण्ण्यत् ॥

प्रवुन्द्यवेणीजववेनमाना खातान्तिका चीवरिभिर्निषादैः ।
चाय्या व्ययद्दाशविलोकभेषभ्रेषज्झषा यासदघं स्पशन्ती ॥ २७ ॥

या अघं स्पशन्ती परिहरन्ती आसदशोभत । प्रवुन्द्येन दर्शनीयेन वेणीजवेन प्रवाहवेगेन सह वेनमाना गच्छन्ती । चीवरिभिः पटच्चरवद्भिर्निषादैः खातान्तिका । चाय्या पूज्या । दर्शनीया वा । व्ययतां गच्छतां दाशानां विलोकेन यो भेषो भयं तेन भ्रेषन्तः संचरन्तश्चलन्तो झषा यस्यां सा—प्रवुन्द्येति । ८७६ उवुन्दिर् निशामने । दर्शनं तत् । ण्यत् वेणीति । ८७७ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु । वेनृ इत्येके । वादित्रग्रहणं वाद्यानां वादनार्थमादानम् । अस्मादौणादिके इनि 'कृदिकारादक्तिनः' इति ङीष् । वेनमाना । वेनेः शानच् । खातेति । ८७८ खनु अवदारणे । कर्मणि क्तः । चीवरिभिः ८७९ चीवृ आदानसंवरणयोः । अनृदिदित्येके । अस्मादुणादौ 'चित्वरच्छत्वर–' इत्यादिना निपातितश्चीवरशब्दः । अत इनिः । चाय्या ८८० चायृ पूजानिशामनयोः । ण्यत् । व्ययदिति । ८८१ व्यय गतौ । शता । वित्तत्यागे त्वस्य नित्यं तङ्ङेव । दाशेति । ८८२ दाशृ दाने । 'दाशगोघ्नौ संप्रदाने' इत्यच् । भेषेति । ८८३ भेषृ भये । अगतावित्येके । घञ् । भ्रेषदिति । ८८४ भ्रेषृ गतौ । चलन इत्येके ।

८८५ भ्लेषृ इत्यन्ये । भ्रेषेः शता । आसदिति । ८८६ अस गतिदीप्त्यादानेषु । अ इत्येके । असेर्लङ् । स्पशन्ति । ८८७ स्पश बाधनस्पशनयोः[१] । पशेत्येके । पषेत्यन्ये हिंसार्थं दोषसूचनं स्पशनम् । स्पशेः शतरि ङीप् ॥

लाषेण चाषांश्छषिताञ्झषित्वा प्रभ्लक्ष्य भक्षन्ति यदम्बु नीचाः ।
या दासते मोदममाह्यधाम्नां गूढाशयानामपि तापसानाम् ॥ २८ ॥

नीचाश्छषितान् हिंसितांश्चाषान् वनकाकान् लाषेणेच्छया झषित्वा आदाय संवृत्य च प्रभ्लक्ष्य भक्षयित्वा यदम्बु यस्या जलं भक्षन्ति पिबन्ति । या तापसानामपि मोदं दासते ददाति । अमाह्यममेयं धाम येषां तेषाम् । गूढो गुप्त आशयो येषां तेषाम् । अनेन नीचाना-मुत्तमानां च सुखकरत्वमुक्तम् ॥—लाषेणेति । ८८८ लष कान्तौ । कान्तिरिच्छा । घञ् । चाषान् । ८८९ चष भक्षणे । कर्मणि घञ् । छषितान् । ८९० छष हिंसायाम् । कर्मणि क्तः । झषित्वा । ८९१ झष आदानसंवरणयोः । क्त्वा । प्रभ्लक्ष्य । ८९२ भ्लक्ष अदने । ८९३ भ्रक्ष इत्येके । भक्षेत्यन्ये । भ्लक्षेर्ल्यप् । भक्षन्ति । भक्षेर्लट् । दासते । ८९४ दासृ दाने । लट् । अमाह्येति । ८९५ माहृ माने । ण्यत् । गूढेति । ८९६ गुहू संवरणे । क्तः । हिक्कादय उदात्ताः स्वरितेतः ॥

यमुनायामक्रूरस्य व्यापारं वक्तुमारभते—

अजं तमत्र स्वरथे निवेश्य श्रियं भरन्तीं हरिकान्तितुल्याम् ।
धृतप्रमोदो दुरितापनेत्रीं स्नातुं नदीमाप स गान्दिनेयः ॥ २९ ॥

स्पष्टार्थः श्लोकः । अजन्तधात्वारम्भोऽत्रेति च भाति ॥—श्रियमिति । ८९७ श्रिञ् सेवायाम् । उदात्त उभयतोभाषः । 'क्विब्वचिप्रच्छिश्रिद्रुस्रुकटप्रुजुवां दीर्घोऽसंप्रसारणं च'[२] इति कर्मणि क्विप् । दीर्घश्च । भरन्तीम् । ८९८ भृञ् भरणे । पूरणेऽपीति भट्टिः । शतरि ङीप् । हरीति । ८९९ हृञ् हरणे । प्रापणं स्वीकारः स्तेयं नाशनं वा । अस्मादौणादिक इन् । धृतेति । ९०० धृञ् धारणे । कर्मणि क्तः । अपनेत्रीमिति । ९०१ णीञ् प्रापणे । प्रापणं गमना । तृचि ङीप् । भृञादयोऽनुदात्ता उभयतोभाषाः ॥

धयन्दृशाग्लानरुचिं स कृष्णं म्लानिं त्यजन्ध्यानमले जलान्ते ।
निद्रायदिन्दीवरभाजि मज्जन्नघ्राणधीस्तत्र च तं ददर्श ॥ ३० ॥

स दृशा कृष्णं धयन् पिबन्नघ्राणधीरतृप्तधीरपि म्लानिं त्यजन् । पीडात्यागाद्धेतोः । जलान्ते मज्जन् तत्र च तत्रापि जले तं कृष्णं ददर्श । अग्लानरुचिमक्षीणशोभं ध्यानं न्यक्कृतं निरस्तं मलं यस्मिन् जलान्ते निद्रायन्ति मीलयन्ति मुकुलितानि इन्दीवराणि भजतीति निद्रायदिन्दीवरभाक् तस्मिन् ॥—धयन्निति । ९०२ धेट् पाने । शता । अग्लानेति ।

---

१. 'स्पर्शनयोः' इति धातुपाठे. २. 'क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च' इति औणादिकपाठः.

९०३ग्लै९०४म्लै हर्षक्षये । हर्षक्षयः शक्तिक्षयः । ग्लैधातोः कर्तरि क्तः । 'संयोगादेः -' इति निष्ठानत्वम् । म्लानिम् । म्लायतेः 'ग्लाम्लाज्याहाभ्यो निर्वाच्यः' इति निः । द्या-नेति । ९०५द्यै न्यक्करणे । न्यङ्गविधान इत्येके । कुत्सिताङ्गकरणं तत् । कर्मणि क्तः । प्रागवन्नत्वम् । निद्रायदिति । ९०६ द्रै स्वप्ने । शता । अघ्राणेति । ९०७ घ्रै तृप्तौ । कर्तरि क्तः । धीरिति । ९०८ध्यै चिन्तायाम् । क्विपि 'ध्याप्योः संप्रसारणम्' इती-त्त्वम् ॥

भगवद्दर्शनकौतुकेन जलादुन्मग्नस्यावस्थामाह—

रायद्धयस्त्यानरुचौ रथेऽपि तं भक्तितिष्ट्यापयिषुं स दृष्ट्वा ।
खाताशयोऽक्षाममुदा पुनश्च मग्नोऽन्यथापश्यदजानमीशम् ॥ ३१ ॥

स तं भक्तेः तिष्ट्यापयिषुं संघातीकर्तुं वर्धयितुमिच्छुं सन्तं रथेऽपि दृष्ट्वा । अक्षाम-मुदा पूर्णमोदेन पुनश्च पुनरपि मग्नः सन्नीशमन्यथा अपश्यत् । रायद्धयैः शब्दायमानाश्वैः स्त्यानरुचौ प्रवृद्धशोभे रथे खाताशयः स्थिरीभूतमना अगाधमना वा अजानमक्षयं नित्यम् ॥—रायदिति । ९०९ रै शब्दे । शता । स्त्यानेति । ९१० स्त्यै ९११ ष्ट्यै शब्दसंघातयोः । आद्यात् कर्तरि क्तः । नत्वम् । तिष्ट्यापयिषुम् । द्वितीयाण्णिजन्तात् सन्युः । 'स्तौतिण्योरेव–' इति षत्वम् । तदर्थमेव षोपदेशस्य पाठः । खातेति । ९१२ खै खदने । तच्च स्थैर्यहिंसे । 'खै खनने' इत्येव शंकराचार्यः । तस्मात् कर्तरि क्तः । अक्षामेति । ९१३ क्षै ९१४ जै ९१५ षै क्षये । क्षैधातोः कर्तरि क्ते 'क्षायो मः' इति मत्वम् । अजानन् । जैधातोर्ल्युट् ॥

अन्यथेत्युक्तं रूपं वर्णयति—

प्रसातकातर्यसुरोपगीतं पूज्यं श्रृताम्राणहविर्विशेषैः ।
आपातमाल्यं शयितं सुवानकाशत्विषि स्नाततनौ फणीन्द्रे ॥ ३२ ॥

प्रसातकातर्यैः प्रक्षीणभयैः सुरैरुपगीतं स्तुतं शृताम्राणैः पक्वापक्वैश्चरुपुरोडाशक्षीरनव-नीतादिरूपैर्हविर्विशेषैः पूज्यम् । अपातमशुष्कमम्लानं माल्यं यस्य तम् । सुवानकाशस्य सम्यक्शुष्ककाशमञ्जर्यास्त्विवडिवातिधवला शोभा यस्य तस्मिन् । स्नाता वेष्टिता कुण्ड-लीकृता तनुर्यस्य तस्मिन् । फणीन्द्रे शयितम् । ईदृशमीशमपश्यदिति पूर्वेणान्वयः ॥—प्रसातेति । सायतेः कर्तरि क्तः । कातर्येति । ९१६ कै ९१७ गै शब्दे । कायतेः'का-राभ्यान्तरन्' इति भोजोक्ततरनि कातरः । तस्मात् ष्यञ् । उपगीतमिति । गायतेः श-ब्दविशेषार्थत्वात् सकर्मकात् कर्मणि क्तः । श्रृतेति । ९१८ श्रै[2] ९१९ स्रै पाके । श्रा-यतेः 'श्रृतं पाके' इति निपातः । अम्राणेति । स्रैधातोः कर्तरि क्ते यण्वत्त्वान्नत्वम् ।

---

१. 'ध्यायतेः संप्रसारणं च' इति वार्तिकेनेति सारम्. यथाश्रुतस्य तु क्वनिपि संप्रसार-णविधायकस्योणादिसूत्रस्य 'धीवा' इत्युदाहरणम्. २. 'शै श्रै' इति धातुपाठे.

अपातेति । ९२० पै ९२१ ओ वै शोषणे । पैधातोः कर्तरि क्तः । सुवानेति । वै-धातोः प्रागवत् क्तः । ओदित्वान्नत्वम् । स्नातेति । ९२२ ष्टै वेष्टने । ९२३ ष्णै इत्येके । ष्णै शौच इत्यन्ये । स्नैधातोः कर्तरि क्तः ॥

एतद्रूपं पश्यतोऽक्रूरस्य प्रवृत्तिमाह—

स्नातावदातः स पिबंस्तदाभां जिघ्रन्सुगन्धं विधमन्नघानि ।
तिष्ठन्निहाम्नायगमिष्टदं तमस्तौत्स्फुटेनाह्रुतधी स्वरेण ॥ ३३ ॥

स स्नातावदातः स्नातश्चावदातश्च शुद्धः सन् तदाभां पिबन् सुगन्धं जिघ्रन्नघानि वि-धमंस्त्यजन्निह तिष्ठन् स्फुटेन स्वरेण तमस्तौत् स्तुतवान् । आम्नायगं वेदगतम् । अह्रुता-कुटिला धीर्यस्य सः ॥—स्नातेति । ष्णै शौचे । कर्तरि क्तः । अवदातः । ९२४ दैप् शोधने । पकारः 'अदाप्' इति सामान्यग्रहणार्थः । शोधनं शुद्धिः । अस्मात् कर्तरि क्तः । पिबन् । जिघ्रन् । विधमन् । तिष्ठन् । ९२५ पा पाने । ९२६ घ्रा गन्धोपा-दाने । ९२७ ध्मा शब्दाग्निसंयोगयोः । इह शब्दः शब्दना । अग्निसंयोगश्च सुखवायुना लक्षणया विधूनने, संतापेन पूरणे च । ९२८ ष्ठा गतिनिवृत्तौ । चतुर्णां शतरि 'पाघ्रा-' इत्यादिना पिबाद्यादेशाः । आम्नायेति । ९२९ म्ना अभ्यासे । प्रायेणाङ्पूर्वः । कर्मणि घञ् । इष्टदेति । ९३० दाण् दाने । 'पाघ्रा-' इत्यादिसूत्रे दाणिति विशेषणार्थो णः । अस्मात् 'आतोऽनुपसर्गे कः' । अह्रुतेति । ९३१ ह्वृ[2] कौटिल्ये । कर्तरि क्तः । स्वरेणेति । ९३२ स्वृ शब्दोपतापयोः । अस्मात् 'क्षुब्धस्वान्त-' इति सूत्रे स्वरेति निर्देशादच् ॥

स्मार्यं शुभद्वारमुपासरामि त्वत्पादमृच्छामि न मोहगर्तम् ।
घृणास्तु ते विध्वृतशूरदैत्यसुतास्रसिक्तायुध विश्वसोतः ॥ ३४ ॥

अहं त्वत्पादमुपासरामि प्राप्नोमि मोहरूपं गर्तं न ऋच्छामि न प्राप्नोमि । द्वयोः 'आ-शंसायां भूतवच्च' इति चकारात् प्रार्थनायां लट् । कीदृशं पादम् । स्मार्यं चिन्तनीयम् । शुभद्वारं सुखकरमित्यर्थः । विध्वृतशूरदैत्यसुतास्रसिक्तायुधः विध्वृतेभ्यो हिंसितेभ्यः शूर-दैत्येभ्यः सुतैरास्रैः रक्तैः सिक्तमायुधं यस्य तादृश, हे विश्वसोतः, जगतस्तत्तत्कर्मसु अनुज्ञाकर्तः, ईश्वर इति वा । तव घृणा दया मयि अस्तु ॥—स्मार्यमिति । ९३३ स्मृ चिन्तायाम् । ण्यत् । द्वारमिति । ९३४ द्वृ वरण इत्यप्येके । घञ् । उपासरामि । ९३५ सृ गतौ । लट् । सरतेर्धावादेशस्तु द्रुतगतावेव । ऋच्छामि । ९३६ ऋ गति-प्रापणयोः । लटि ऋच्छादेशः गर्तम् । ९३७ गृ ९३८ घृ सेचने । 'असिमृग्रिण्वाभि-दल्पूधुर्विभ्यस्तन्' इति कर्मणि तन् । तत्र गरतेरपि ग्रहणात् । घृणा । 'हृण भ्रूणस्थूण-घृणादयः' इति भोजोक्तेर्धरतेर्णः । विध्वृतेति । ९३९ ध्वृ हूर्च्छने । कौटिल्यं तत् ।

१. 'आम्ना' इति पाठः. २. 'ह्वृ' इति धातुपाठे.

हिंसार्थेऽप्यस्ति । कर्मणि क्तः । ९४० स्रु गतौ । स्रुतौ च द्रुमे । शु स्रु गताविलेके । 'शुसिचिमिजां दीर्घश्च' इति क्रन् । स्रुतेति । स्रुधातोः कर्तरि क्तः । स्रोतः । ९४१ षु प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञा । तृच् ॥

श्रुत्यन्तवाचा ध्रुवया प्रदूनं घोरद्रवच्चक्रजिताज्ञितारिम् ।
स्मितार्द्रवक्त्रं गवमानभूषं गै त्वां घुताशं कुतशङ्खघोषैः ॥ ३५ ॥

अहं त्वां गै प्राप्तुं प्रार्थये । श्रुत्यन्तवाचोपनिषदा ध्रुवया नित्यया प्रदूनं ज्ञातम् । गत्यर्थाज् ज्ञानार्थता । घोरं यथा तथा द्रवता चक्रेण जिता अभिभूता अज्ञिता अन्यैरनभिभूता अरयो येन तम् । स्मितेन मन्दहासेनार्द्रवक्त्रम् । गवमानाः शब्दायमाना भूषा यस्य तम् । कुतशङ्खस्य शब्दायमानशङ्खस्य घोषैर्घुताशं शब्दितदिशम् ॥—श्रुतीति । ९४२ श्रु श्रवणे । 'श्रुयजषिस्तुभ्यः करणे' इति क्तिन् । ध्रुवया । ९४३ ध्रु स्थैर्ये । बाहुलकात्कः । यद्वा 'ध्रुवमपाये' इति निर्देशात् साधुरिति माधवः । प्रदूनम् । ९४४ दु ९४५ द्रु गतौ । दोः कर्मणि क्तः । 'दुग्वोर्दीर्घश्च' इति निष्ठानत्वदीर्घौ । द्रवदिति । द्रुधातोः शता । जिताज्ञितेति । ९४६ जि ९४७ ज्रि अभिभवे । 'जि ज्रि अभिभवे' इति लीलाशुकः । जिज्र्योः कर्मणि क्तः । धयत्यादयोऽनुदात्ताः परस्मैभाषाः । स्मितेति । ९४८ ष्मिङ् ईषद्धसने । नपुंसके भावे क्तः । गवमानेति । ९४९ गुङ् अव्यक्ते शब्दे । शानच् । गै इति । ९५० गाङ् गतौ । लोट् । घुतकुतेति । ९५१ घुङ् ९५२ कुङ् ९५३ उङ् ९५४ दुङ्[1] शब्दे । कुङ् अव्यक्तशब्दार्थ इति केचित् । द्वयोः कर्तरि क्तः ॥

स्तोत्रावमानैर्दुतवेणुवीणैश्च्युताशुभैर्व्योमचरैर्ज्युतं ते ।
प्रवे भवाब्धिप्लवमारुतानां धृतामयं भक्तिनिमेयमङ्घ्रिम् ॥ ३६ ॥

अहं भक्तिनिमेयं भक्त्या निमेयं व्यत्यसनीयं दानपूर्वं परिग्राह्यं ते अङ्घ्रिं प्रवे प्राप्नोमि । कीदृशमङ्घ्रिम् । व्योमचरैर्दिव्यैर्ज्युतं प्राप्तम् । आरुतानां प्राप्तानां धृतामयं ध्वस्तपीडम् । कीदृशैर्व्योमचरैः । स्तोत्रेणावमानैः शब्दायमानैः । तथा दुताः शब्दिता वेणवो वीणा च येषां तैः । च्युतं गतमशुभं येषां तैः ॥—अवमानैः । उङ्धातोः शानच् । दुतेति । दुङः कर्तरि क्तः । च्युतेति । ९५५ च्युङ् ९५६ ज्युङ् ९५७ प्रुङ् ९५८ प्लुङ् गतौ । क्रुङ्[3] इति चैके । ह्रुङ् इति चान्ये । च्युङः कर्तरि क्तः । ज्युतम् । ज्युङः कर्मणि क्तः । प्रवे । प्रुङो लट् । प्लवम् । प्लुङः पचाद्यच् । आरुतानाम् । ९५९ रुङ् गतिरेषणयोः । रेषणं हिंसा । कर्तरि क्तः । धृतेति । ९६० धृङ् अवध्वंसने । कर्तरि क्तः । निमेयम् । ९६१ मेङ् प्रणिदाने । तच्च विनिमयः । प्रत्यर्पणं वा । अचो यत् ॥

दयस्व मां देव कृपाम्बुशीत प्यानौजसा त्रातजगत्त्रयं त्वाम् ।
पूताखिलं मूतबलिं सुडीतौ तार्क्ष्ये स्थितं प्राप्य तरामि मायाम् ॥ ३८ ॥

---

१. 'ज्रि' इति धातुपाठे. २. 'दुङ्' इति धातुपाठे. ३. 'क्रुङ्' इति पाठः.

हे कृपाम्बुशीत देव, त्वं मां दयस्व रक्ष। अहं त्वां प्राप्य मायां तरामि। प्यानौजः प्रवृद्धबलेन परिपालितजगत्त्रयम्। मूतो बद्धो बलिर्येन तम्। सुडीतौ शोभनडयने ताः स्थितम्॥—दयस्वेति। ९६२ देङ् रक्षणे। लोट्। शीतेति। ९६३ श्यैङ् गतौ कर्तरि क्तः। 'द्रवमूर्तिस्पर्शयोः श्यः' इति संप्रसारणम्। प्यानेति। ९६४ प्यैङ् वृद्धौ प्राग्वत् क्तः। यण्वत्त्वान्नत्वम्। त्रातेति। ९६५ त्रैङ् पालने। कर्मणि क्तः। स्मिङादयोऽनुदात्ता आत्मनेभाषाः। पूतेति। ९६६ पूङ् पवने। शोधनं तत्। कर्मणि क्तः। मूतेति। ९६७ मूङ् बन्धने। प्राग्वत् क्तः। सुडीतौ। ९६८ डीङ् विहायसा गतौ। क्तिन्। पूङादय उदात्ता आत्मनेभाषाः। तरामि। ९६९ तॄ प्लवनतरणयोः। अभिभवे च द्रुमे। प्लवनं जलादावमङ्क्त्वा गमनम्। उदात्तः परस्मैभाषः। अस्माल्लट्॥

अहं त्वां प्राप्य मायां तरामीत्युक्तम्। तत्र त्वत्कृपां विना त्वत्प्राप्तिरपि दुर्लभेत्याह—

जुगुप्सतेऽघाद्व्यसनं तितिक्षुर्मीमांसते ब्रह्म च यो दृढात्मा।
स खल्वबीभत्सितवृत्तिरर्चां तवारभेतापि कृपां लभेत॥ ३८॥

योऽघाज् जुगुप्सते अघं निन्दति। व्यसनं दुःखं तितिक्षुः क्षममाणो दृढात्मा च सन् ब्रह्म मीमांसते विचारयति। स खलु तवार्चामारभेत कृपां लभेत अपि। अबीभत्सितवृत्तिः बीभत्सितमन्येषां चित्तविकारो न यस्यां तादृशी वृत्तिर्व्यापारो यस्य सः॥—जुगुप्सत इति। ९७० गुप गोपने। ९७१ तिज निशाने। ९७२ मान पूजायाम्। ९७३ बध बन्धने। एषां क्रमात् निन्दायाम्, क्षमायाम्, पूजितविचारे, दुर्गन्धादिजचित्तविकारे च सन्नुक्तः। नित्यसन्नन्तत्वसाधनाच्च धातोः पृथक्प्रयोगाभावात् गोपनाद्यर्थपाठो व्यर्थ इति हरदत्तादयः। 'गुप्तिज्किद्भ्यः सन्' इति सन्। एषामनुदात्तेत्वात् सन्नन्तस्यापि तङ्। ईदृशात् गुपेर्लट्। तितिक्षुरिति। तिजः सन्युप्रत्ययः। मीमांसत इति। मानेः 'मान्वध—' इति सनि लट्। अबीभत्सितेति। बधेः सनि नपुंसके भावे क्तः। आरभेत। ९७४ रभ राभस्ये। उपक्रमस्तत्। तत्रायं प्रायेणाङ्पूर्वः। लभेत। ९७५ डु लभष् प्राप्तौ। द्वयोः संभावने लिङ्॥

त्वत्कृपया जितेन्द्रियाणां त्वं सुलभ इत्याह—

असक्तयोषैः पशुहन्नशुद्धक्ष्वेदन्मृगास्कन्दवनान्तवासैः॥
याभाद्यकामैर्नमनादृताद्यैः सृप्योऽसि विष्णो यमिभिर्वितापैः॥ ३९॥

हे विष्णो, त्वं यमिभिः सृप्योऽसि प्राप्योऽसि। असक्तयोषैरनालिङ्गितस्त्रीकैः। तदिच्छाभावात् पशूनां हन्नेन पुरीषोत्सर्गेण शुद्धैः क्ष्वेदद्भिः अव्यक्तशब्दं कुर्वाणैः मृगैः क्रूरमृगैरस्कन्नोऽप्राप्तः, अनभिभूतो वा, वनान्ते वासो येषां तैः। याभादिषु रतादिष्वकामैः॥—असक्तेति। ९७६ षञ्ज परिष्वङ्गे। कर्मणि क्तः। हन्नेति। ९७७ हद पुरीषोत्सर्गे। 'नपुंसके भावे क्तः'। रभादयोऽनुदात्ता अनुदात्तेतः। क्ष्वेददिति। ९७८

ञिक्ष्विदा[1] अव्यक्ते शब्दे । उदात्त उदात्तेत् । शता । अस्कन्नति । **९७९ स्कन्दिर्** गतिशोषणयोः । कर्मणि क्तः । याभेति । **९८० यभ** विपरीते मैथुने । तच्च पुरुषायितम् । यभ मैथुन इत्येवैके । घञ् । नमनात् । **९८१ णम** प्रह्वत्वे शब्दे च द्रुमे । ल्युट् । गतेति । **९८२ गम्लृ ९८३ सृप्लृ** गतौ । गमेः कर्तरि क्तः । सृप्यः । सृपेः 'ऋदुपधाद्–' इति क्यप् । यमिभिः । **९८४ यम** उपरमे । उदिदिति केचित् । 'यमः समुपनिविषु च' इति अबन्तान्मत्वर्थीय इनिः । वितापैः । **९८५ तप** संतापे । घञ् ॥

अक्रूरस्य कृत्यशेषमाह—

त्यक्तार्तिरेवं तमसङ्गचेताः स्तुवन्नदृष्ट्वा च पुनः क्षणात्तम् ।
कृत्वा स कृत्यं दशनांशुगौरं कृष्णं ययौ दैत्यनिदाघमेघम् ॥ ४० ॥

स तमेवं स्तुवन् पुनस्तं क्षणादृष्ट्वा च कृत्यमवश्यं कर्तव्यं कृत्वा, दशनांशुगौरं मन्दस्मितसितात्मानं कृष्णं रथस्थं श्रीकृष्णं ययौ प्राप । त्यक्ता आर्तिर्येन सः । असङ्गं चेतो यस्य सः । दैत्यरूपस्य निदाघस्य ग्रीष्मर्तोः मेघं वर्षर्तुम् । तन्नाशकमित्यर्थः ॥—त्यक्तेति । **९८६ त्यज** हानौ । कर्मणि क्तः । असङ्गेति । **९८७ षञ्ज** सङ्गे । घञ् । अदृष्ट्वा । **९८८ दृशिर्** प्रेक्षणे । क्त्वा । दशनेति । **९८९ दन्श** दशने । दशनशब्देन दन्तार्थेन तत्क्रिया लक्ष्यते । 'दंशेः करणे ल्युटि नलोपो वाच्यः' इति नलोपः । कृष्णमिति । **९९० कृष** विलेखने । विलेखनमिहाकर्षणम् । 'कृषेर्वर्णे' इति नक् । निदाघेति । **९९१ दह** भस्मीकरणे । घञि । न्यङ्क्वादित्वात्कुत्वम्[2] । मेघमिति । **९९२ मिह** सेचने । अचि प्राग्वत् कुः । स्कन्धादयोऽनुदात्ता उदात्तेतः ॥

भगवतोऽक्रूरानुग्रहमाह—

मोहं चिकित्सन्वचसास्य कृष्णो दीदांसुचित्तस्य सुविस्मितस्य ।
जगाम शीशांसितशस्त्रहस्तैर्गोपैः सहासौ परिपक्वपुण्यैः ॥ ४१ ॥

असौ कृष्णो वचसास्य मोहं चिकित्सन्नपनयन् गोपैः सह जगाम । दीदांसुचित्तस्य दीदांसु ऋजूभवनशीलं चित्तं यस्य तस्य । शीशांसितशस्त्रहस्तैः । शीशांसितं तीक्ष्णीकृतं शस्त्रं हस्ते येषां तैः ॥—चिकित्सन्निति । **९९३ कित** निवासे रोगापनयने च । अयमुदात्तेत् । सन्नन्तः । उदात्तेत्वात् सन्नन्तस्य परस्मैपदमेव । अत्र निवासार्थो व्यर्थः । रोगापनयने हि सन्नुच्यते । संशयनिग्रहापनयननाशनादयश्चास्यार्थाः । अस्मात् 'गुप्तिज्किद्भ्यः' इति सनि शता । दीदांसु इति । **९९४ दान** अवखण्डने[3] । **९९५ शान** तेजने । इमावपि नित्यसन्नन्तौ स्वरितेतौ । दानेरार्जवे सन्नुक्तेः अवखण्डनोक्तिर्व्यर्था । दानेः 'मान्बध–' इति सनि उः । शीशांसितेति । शानेः निशातने प्राग्वत्सनि कर्मणि क्तः । परिपक्वेति । **९९६ डु पचष्** पाके । कर्तरि क्तः । 'पचो वः' इति निष्ठावत्वम् ॥

---

१. 'ञिष्विदा' इति धातुपाठे. २. 'न्यङ्क्वादित्वा' इत्यादर्शे. ३. 'खण्डने' इति धातुपाठे.

ते संसचन्तो धृतभक्तिरागाः कृष्णेन कंसं मनसा शपन्तः ।
त्वेषन्मुखा इष्टिनिवापहीनां कष्टां पुरीं प्रापुरुदूढदर्पाः ॥ ४२ ॥

ते कृष्णेन संसचन्तः संबध्नन्तः पुरीं प्रापुः । त्वेषत दीप्यमानं मुखं येषां ते । इष्टिनिवापहीनाम् । इष्टिर्देवपूजा निवापः पितृक्रिया ताभ्यां हीनाम् । अत एव कष्टां निन्दिताम् । संसचन्त इति । ९९७ षच समवाये । स च संबन्धः । शता । भक्तीति । ९९८ भज सेवायाम् । विभजने च द्रुमे । क्तिन् । रागेति । ९९९ रन्ज रागे । घञ् । 'घञि च भावकरणयोः' इति नलोपः । शपन्तः । १००० शप आक्रोशे । शता । त्वेषदिति । १००१ त्विष दीप्तौ । शता । इष्टीति । १००२ यज देवपूजासंगतिकरणदानेषु । क्तिन् । 'वचिस्वपि–' इति संप्रसारणम् । निवापेति । १००३ डुवप् बीजसंताने । तच्च क्षेत्रे बीजानां विकरणम् । अयं केशखण्डनेऽपि । निपूर्वत्वात् पितृक्रियार्थता । घञ् । उदूढेति । १००४ वह प्रापणे । कर्मणि क्तः । यजादित्वात् संप्रसारणम् । पचादयोऽनुदात्ताः स्वरितेतः । षचिस्तूदात्तः ।

ततो निवत्स्यन्दिवसोर्ध्वभागे चारूतकीर्त्यम्बरवीतलोकः ।
हरिः समाहूय वदन्सहायान्पुरस्य बाह्योपवनं शुशाव ॥ ४३ ॥

ततो हरिर्दिवसोर्ध्वभागे निवत्स्यन् निवासं करिष्यन् सहायान् समाहूय वदन् पुरस्य बाह्योपवनं शुशाव प्राप । कीदृशः हरिः चारूतकीर्त्यम्बरवीतलोकः । चारु यथा तथा उतेन विस्तारितेन कीर्तिरूपेण वस्त्रेण वीतश्छदितो लोको येन सः । निवत्स्यन्निति । १००५ वस निवासे । अनुदात्त उदात्तेत् । 'लृटः सद्वा' इति शता । उतेति । १००६ वेञ् वन्तुसंताने । व्याप्तौ छादने चाह भट्टिः । कर्मणि क्तः । वीतेति । १००७ व्येञ् संवरणे । प्राग्वत् क्तः । समाहूय । १००८ ह्वेञ् स्पर्धायां शब्दे च । शब्दः शब्दनं चाह्वानम् । ल्यप् । वेञादयोऽनुदात्ता उभयतोभाषाः । वदन् । १००९ वद व्यक्तायां वाचि । उदात्त उदात्तेत् । शता । शुशावेति । १०१० टु ओश्वि गतिवृद्ध्योः । उदात्तः परस्मैभाषः । लिट् । 'लिट्यभ्यासस्योभयेषां' इति संप्रसारणम् । वृत् । यजादयो वृत्ताः । भूवादयस्त्ववृत्कृताः । तेन चुलुम्पादीनां शप्सिद्धिः । शब्विकरणभूवादयो गताः ॥

अथ मधुरोपवनप्राप्त्यनन्तरं राजमार्गयानादितद्दिनशेषभाविनीमवस्थामाह—

अदन्मधुघ्नो द्विषते विसृज्य श्वल्कजं विश्वमुदं दुहानः ।
मालेयदिग्धो जनदृष्टिलेह्यश्चक्षीमहीमां पुरमित्युपैर्त ॥ ४४ ॥

मधुघ्नः श्रीकृष्णः श्वल्कजमक्रूरं द्विषते द्विषन्तं बोधयितुं विसृज्य अदन् भुञ्जानः सन् वयमिमां पुरं चक्षीमहि पश्येम इति । एवम्—सहायान् उक्त्वोपैर्त समीपमगच्छत् । कीदृशः श्रीकृष्णः । मालेयेन चन्दनेन दिग्धो लिप्तः । अनेन निसर्गकमनीयस्यापि तस्य तदानीमनन्यसाधारणशोभातिशयमाह । अत एव जनदृष्टिलेह्य आस्वाद्यः, न तु दृश्य एव ।

अत एवानुक्तसिद्धामपि सर्वमनस्तुष्टिं स्पष्टयति—विश्वेषां सर्वेषां मुदं दुहानः पूरयन् । तद्रूपममृतं क्षारयन् वा ॥—अदन्निति । १०११ अद भक्षणे । 'व्यत्यदन्ति वृका मेषान्' इत्यादौ हिंसार्थोऽपि । अस्माच्छता । मधुघ्न इति । १०१२ हन हिंसागत्योः । अमनुष्यकर्तृके च' इति टक् । अनुदात्तावुदात्तेतौ । द्विषते । १०१३ द्विष अप्रीतौ । शता । दुहानः । १०१४ दुह प्रपूरणे । प्रपूरणं पात्रादिपूरणार्थं क्षारणम् । तस्मात् शानच् । दिग्ध इति । १०१५ दिह उपचये । उपचयो लेपनम् । कर्मणि क्तः । लेह्य इति । १०१६ लिह आस्वादने । ण्यत् । द्विषादयोऽनुदात्ताः स्वरितेतः । चक्षीमहि । १०१७ चक्षिङ् व्यक्तायां वाचि । तत्र प्रायेणाङ्पूर्वोऽयं दर्शनार्थोऽपि । निमन्त्रणे लिङ् । उपैर्त । १०१८ ईर गतौ । कम्पने च द्रुमे । अस्माल्लङ् ॥

पुरावलोकनव्याजेन भक्तानुग्रहार्थं प्रस्थितस्य तस्य प्रवृत्तिमाह—

ईड्योऽयमीशः समुपास्तिशीलैराशासितः पीतपटीं वसानः ।
स्वीयैश्चकंसे कशनीयकासी रमोष्ठनिंसी नतचित्तनिञ्जी ॥ ४५ ॥

अयमीशः पीतपटीं वसानस्तदानीं विशेषरम्यां परिदधानः सन् स्वीयैः चकंसे संचरितवान् । पीतपटीं वसान इत्यनेन मनोहरत्वमुक्तम् । कीदृशः । ईड्यः स्तुत्यः । समुपास्तिशीलैराशासितः । समीचीनामुपास्तिं ध्यानं शीलयन्ति अभ्यस्यन्ति ये तैराशासित इष्टः । कशनीयान् शासनीयान् कसितुं शासितुं शीलं यस्य सः । रमाया ओष्ठं निंसितुं चुम्बितुं शीलं यस्य सः । नतानां चित्तं निञ्जयितुं शोधयितुं शीलं यस्य सः ॥—ईड्य इति । १०१९ ईड स्तुतौ । ण्यत् । ईश इति । १०२० ईश ऐश्वर्ये । पचाद्यचि ईशः । समुपास्तीति । १०२१ आस उपवेशने । उपपूर्वत्वात् सेवार्थत्वम् । क्तिन् । आशासितः । १०२२ आङ् शासु[2] इच्छायाम् । उदित्येके । कर्मणि क्तः । वसानः । १०२३ वस आच्छादने । शानच् । चकंसे । १०२४ कसि गतिशासनयोः । कशेत्येके । कसेत्यन्ये । कंसेर्लिट् । कशनीयकासी । कशेरनीयर् । कसेर्णिनिः । रमोष्ठनिंसी । १०२५ णिसि चुम्बने । णिनिः । चित्तनिञ्जी । १०२६ णिजि शुद्धौ । अस्माण्ण्यन्ताण्णिनिः ॥

भगवद्दर्शनेन पौराणां स्वस्ववासनानुरूपं विकारं वक्तुमाह—

शिञ्जानपिञ्जानसुवर्णभूषासंपृञ्जितो वृज्यविवृञ्जिसेव्यः ।
पृक्ताग्रजः पृञ्जितगोपसूनुर्दृष्टोऽब्धिशायी स जनैर्युवद्भिः ॥ ४६ ॥

अब्धिशायी स पृक्ताग्रजः संयुक्ताग्रजः पृञ्जितगोपसूनुः संयुक्तगोपबालश्च सन् युवद्भिः कौतुकातिशयात् तत्र मिश्रीभवद्भिर्जनैर्दृष्टः । आसीदिति शेषः । कीदृगित्याह—शिञ्जानाभिरव्यक्तशब्दं कुर्वाणाभिः पिञ्जानाभिर्वर्णाधिक्येन पिङ्गलीभवित्रीभिः सुवर्णभूषाभिः संपृञ्जितः पिङ्गलीभूतो वृज्यविवृञ्जिसेव्यः वर्जनीयवर्जनशीलैः सद्भिः सेव्यः ॥—शिञ्जानपिञ्जानेति । १०२७ शिजि अव्यक्ते शब्दे । १०२८ पिजि वर्णे । पिङ्गलत्वं तत् ।

१. 'मद्रूप' इति पाठः. २. 'आङःशस इच्छायाम्' इति पाठः.

संपर्चन इत्येके । अवयव इत्यन्ये । अव्यक्ते शब्द इत्यपरे । पृजि इत्यप्येके शिञ्जिपिञ्ज्योः शानच् । पृञ्जेः कर्तरि क्तः । वृज्यविवृञ्जीति । **१०२९ वृजी** वर्जने । इदिदिति केचित् । तस्मात् क्यप् । इदित्त्वपक्षे णिनिः । पृक्तेति । पृञ्जितेति । **१०३० पृजी** संपर्चने । इदिदिति केचित् । द्वयोः कर्मणि क्तः । ईरादय उदात्ता अनुदात्तेतः । सूनुः । **१०३१ षूङ्** प्राणिगर्भविमोचने । 'सुवः कित्' इती नुः । अग्धिशायी । **१०३२ शीङ्** स्वप्ने । उदात्तावात्मनेभाषौ । शीङो णिनिः । युवद्भिः । **१०३३ यु** मिश्रणे । अमिश्रणेऽप्येके । शता ॥

अत्यन्तभक्तानामवस्थामाह—

केऽप्यल्परावं नुनुवुः खलेषु क्षुरक्ष्णुतात्मानममुं स्नुतास्राः ।
सोऽनूर्णुतोऽद्यौज्जनसुत्कुवत्या काञ्च्येव कामं स्तुवतां ब्रुवाणः ॥ ४७ ॥

केऽप्यमेयभाग्या अमुं स्नुतास्राः स्नुतो भक्तिक्लिन्नहृदयतया स्नुतो बाष्पप्रवाहो येषां तादृशाः । अत एव गद्गदेनाल्पो रावो यस्मिंस्तथा नुनुवुस्तुष्टुवुः । कीदृशम् । खलेषु दुर्जनेषु क्षुरवत् क्ष्णुतस्तेजितस्तीक्ष्णः आत्मा मनो यस्य तम् । भगवतो भक्तेषु कृपातिशयमाह—सोऽनूर्णुतोऽनाच्छन्नस्वरूप एवात्मानं प्रकाशयन् । कुवत्या क्वणन्त्या काञ्च्या स्तुवतां काममिष्टं युष्माकं भवत्विति ब्रुवाण इवाद्यौत् तेषामभिमुखमगच्छत् । जनान् तत्तत्कर्मसु सौति प्रेरयतीति जनसुत् । ईश्वर इति वा ॥—रावेति । **१०३४ रु** शब्दे । 'कृत्यल्युटो बहुलम्' इति बाहुलकात् घञ् । नुनुवुः । **१०३५ णु** स्तुतौ । लिट् । क्षुरेति **१०३६ टुक्षु** शब्दे । 'ऋज्रेन्द्र–' इत्यादिना रनि निपातितः । क्षौति वपनकाले कृदिति स्वनतीति क्षुरः । क्ष्णुतेति । **१०३७ क्ष्णु** तेजने । कर्मणि क्तः । स्नुतेति । **१०३८ ष्णु** प्रस्रवणे । कर्तरि क्तः । यौत्यादय उदात्ताः परस्मैभाषाः । अनूर्णुत इति । **१०३९ ऊर्णुञ्** आच्छादने । उदात्त उभयतोभाषः । कर्तरि क्तः । 'वाच्य ऊर्णोर्णुवद्भावः' इति णुधातुवेदकाच्वादनिट्त्वम् । अद्यौत् । **१०४० द्यु** अभिगमने । लङ् । 'उतो वृद्धिः–' इति वृद्धिः । जनसुत् । **१०४१ षु** प्रसवैश्वर्ययोः । प्रसवोऽनुज्ञा । 'या पीडा श्रवसापि सौति महतीमौत्सुक्यदुःखासिकाम्' इति प्रयोगादुत्पादनमपि प्रसवः । तस्मात् क्विप् । कुवत्या । **१०४२ कु** शब्दे । शतरि ङीप् । अनुदात्ताः परस्मैभाषाः । स्तुवताम् । **१०४३ ष्टुञ्** स्तुतौ । शता । ब्रुवाणः । **१०४४ ब्रूञ्** व्यक्तायां वाचि । शानच् । अनुदात्तावुभयतोभाषौ ॥

पुरान्तर्भागं गतस्य महामार्गप्राप्त्या सर्वसुकृतिजनानुग्रहमाह—

इत्यः स्वधीतोपनिषद्भिरेषामधीत्यरूपः स वियन्क्रमेण ।
इयञ्जनं राजपथं समायाद्वाताकुलोद्धातपताकमीशः ॥ ४८ ॥

स ईशो वियन् संचरन् क्रमेण राजपथं समायात् प्राप । कीदृशः । स्वधीतोपनिषद्भिर्वेदान्तपारगैरित्यः प्राप्तुं शक्यः । एषां ज्ञानिनामधीत्यं स्मरणीयं रूपं यस्य सः । कीदृशं राजपथम् । इयञ्जनमियन्त इतस्ततो[1] गच्छन्तो जना यस्मिंस्तम् । तथा वातेन आकुला

१. 'ततस्ततः' इति पाठः.

उद्धाताः पताका यस्मिंस्तम् ॥—इत्य इति । १०४५ **इण्** गतौ । 'एतिस्तु–' इति क्यप् । स्वधीतेति । १०४६ **इङ्** अध्ययने । कर्मणि क्तः । अधीत्येति । १०४७ **इक्** स्मरणे । 'इण्वदिक इति वाच्यम्' इति क्यप् । वियन् १०४८ **वी** गतिव्याप्तिप्रजनकान्त्यसनखाद-नेषु[1] । जन्मोपक्रमत्वात् गर्भग्रहणं प्रजनः । शता । इयदिति । वी ई इति प्रश्लेषादीधातोः शता । सामायात् । १०४९ **या** प्रापणे । इह प्रापणं गतिः । लङ् वातेति । १०५० **वा** गतिगन्धनयोः । 'गन्धनं सौरभ्यकरणम्' इति सहस्रनामभाष्ये । 'अर्दनं हिंसनं च गन्धनम्' इति लीलाशुकः । उद्धातेति । १०५१ **भा** दीप्तौ । द्वयोः कर्तरि क्तः ॥

भगवद्दर्शनोत्सुकानां नारीणामवस्थामाह चतुर्दशभिः—

स्नान्त्यस्तदा श्राणमुपाश्य चान्नं निद्रां गताः प्सातिपरास्तथान्याः ।
पान्त्यः शिशून्धान्यधनानि रान्त्यो लान्त्यश्च काश्चित्कुसुमानि दान्त्यः ४९
ख्यान्त्यः कथाः प्राणमुदां पतीनां निर्मान्त्य इष्टानि चटून्वचत्यः ।
नार्यो विदित्वोपगमं मुरारेरासन्गता राजपथं सुमृष्टम् ॥ ५० ॥

तदा नार्यो मुरारेरुपगमं विदित्वा सुमृष्टं सम्यक्शोधितं राजपथं गता आसन् । स्नान्त्यः स्नानं कुर्वत्यः । अन्याः श्राणं पक्वमन्नमुपाश्य भुक्त्वा निद्रां गताः । तथा—प्साति-परा भोजनपराः । शिशून् पान्त्यो रक्षन्त्यः । धान्यधनानि रान्त्यः तत्तज्जनेभ्यो यच्छन्त्यः । लान्त्यः तान्येव तेभ्य आददानाश्च । काश्चित् कुसुमानि दान्त्यः लुनत्यः । कथाः ख्यान्त्यः कथयन्त्यः । प्राणमुदां पूर्णहर्षाणां पतीनामिष्टानि नीर्मान्त्यः कुर्वाणाः । चटून् प्रियवाक्यानि वचत्यः भाषमाणाश्च । एवं तत्तत्प्रवृत्तिं कुर्वाणाः ॥—स्नान्त्य इति । १०५२ **ष्णा** शौचे । शतरि ङीप् । 'आच्छीनद्योर्नुम्' इति नुम् । श्राणम् । १०५३ **श्रा** पाके । पाकोऽत्र विक्लित्तिः । कर्तरि क्ते यण्वत्त्वान्नत्वम् । निद्राम् । १०५४ **द्रा** कुत्सायां गतौ । सा च पलायनस्वापौ । स्वापे निपूर्वः । 'आतश्चोपसर्गे इत्यङ् । प्साति । १०५५ **प्सा** भक्षणे । क्तिन् । पान्त्यः । रान्त्यः । लान्त्यः । दान्त्यः । ख्यान्त्यः । १०५६ **पा** रक्षणे । १०५७ **रा** दाने । १०५८ **ला** आदाने । द्वावपि दानार्थावित्येके । १०५९ **दाप्** लवने । १०६० **ख्या** प्रकथने । क्ला इत्यपि केचित् । एभ्यः शतरि ङीप् । प्राणेति । १०६१ **प्रा** पूरणे । कर्तरि क्ते नत्वम् । निर्मान्त्यः । १०६२ **मा** माने । मानमिहा-न्तर्भावः । निष्पूर्वत्वादर्थभेदः । शतरि ङीप् । वचत्यः । १०६३ **वच** परिभाषणे । शतरि ङीपि सत्यकाराभावाद् 'आच्छीनद्योः' इति नुम् न । इणादयोऽनुदात्ताः परस्मैभाषाः । इङ् त्वात्मनेपदी । विदित्वा । १०६४ **विद** ज्ञाने । क्त्वा । आसन् । १०६५ **अस** भुवि । लङ् । सुमृष्टम् । १०६६ **मृजू** शुद्धौ । शोधना सा । कर्मणि क्तः ॥

विलम्बहेतोः समरोददन्या विलोक्य सुप्ता इव तस्थुरन्याः ।
उदश्वसन्प्राणमिवाप्य काश्चिद्दृष्ट्वा सलीलं मृदु जक्षतं तम् ॥ ५१ ॥

---

1. 'गतिप्रजनकान्त्यशनखादनेषु' इति पाठः.

अन्या मृदु मन्दं जक्षतं हसन्तं सलीलं तं दृष्ट्वा विलम्बहेतोः पूर्वमेव दर्शनाभावेन हेतुना समरोदत् । अन्या विकोक्य सुप्ता इव तस्थुः स्तब्धाः सत्य इव तस्थुः । काश्चित् प्राणमाप्य लब्ध्वा इव उदश्वसन् । उच्छ्वासमकुर्वन् ॥—समरोददिति । १०६७ रुदिर् अश्रुविमोचने । लङि 'अड् गार्ग्यगालवयोः' इत्यडागमः । विदादय उदात्ता उदात्तेतः । सुप्ताः । १०६८ ञि ष्वप् शये । 'हलन्त्यम्' इतीत्त्वप्रसङ्गात् 'ञि ष्वप् शये' इत्यपपाठः। अस्मात् कर्तरि क्ते 'वचिस्वपि–' इत्युत्वम् । उदश्वसन् । १०६९ श्वस प्राणने । लङ्। प्राणम् । १०७० अन च प्रपूर्वत्वाल्ल्युट्[1] । जक्षतम् । १०७१ जक्ष भक्षहसनयोः । शतरि 'नाभ्यस्ताच्छतुः' इति नुमभावः । रुदादि पञ्चकं गतम् ॥

तं जाग्रतं दीनदरिद्रपोषे चकासतं शासतमप्रशान्तान् ।
देवं स्फुरद्दीधितिमम्बुजाक्ष्यो वेव्यानमालोक्य विमोहमापुः ॥ ५२ ॥

अम्बुजाक्ष्यो वेव्यानं गच्छन्तं तं देवमालोक्य विमोहमापुः । कीदृशम् । दीनदरिद्रपोषे जाग्रतम् । दीनानामनाथानां दरिद्राणां च पोषणे वर्धने च जाग्रतमुन्निद्रम् । चकासतं स्वतः शोभमानम् । अप्रशान्तान् । पर्युदासे नञ् । शासतं शिक्षयन्तम् । स्फुरद्दीधितिं प्रसरत्कान्तिम् ॥—जाग्रतमिति । १०७२ जागृ निद्राक्षये । शता । दरिद्रेति ।१०७३ दरिद्रा दुर्गतौ । कः । चकासतम् । १०७४ चकासृ दीप्तौ । शासतम् ।१०७५ शासु अनुशिष्टौ । विविच्य ज्ञापनं तत् । द्वयोः शता । प्राग्वन्नुमभावः । श्वसादय उदात्ताः परस्मैभाषाः । दीधितिम् । १०७६ दीधीङ् दीप्तिदेवनयोः । देवनं क्रीडाविजिगीषादि। अस्मात् क्तिनि ग्रहादित्वादिट् । वेव्यानम् । १०७७ वेवीङ् वेतिना तुल्ये । 'वी गतिप्रजनकान्त्यसनखादनेषु' इत्युक्तेन वेतिना तुल्येऽर्थ इत्यर्थः । अस्माच्छानच् ॥

कदा न्वहं सस्मि समं रतान्ते प्रसंस्ततानेन वशानुगेन ।
इत्यादि संबोभुवतोऽभिलाषांस्ता निह्नुवाना ददृशुस्तमीशम् ॥ ५३ ॥

ताः 'अहं रतान्ते प्रसंस्तता निद्रां गतेन वशानुगेन स्वाधीनतां प्राप्तेनानेन सह कदा नु सस्मि स्वपिमि' इत्यादि संबोभुवत एवमाद्यहमहमिकया पुनः पुनर्जायमानानभिलाषान् निह्नुवानाश्छादयन्त्यः सत्यः तमीशं ददृशुः ॥—सस्मीति । १०७८ षस १०७९ संस्ति[2] स्वप्ने । ससेर्लट् । प्रसंस्तता । संस्तेः शता । इदित्त्वात् सकारात्पूर्वं नुम् । वशेति । १०८० वश कान्तौ । कान्तिरिच्छा । 'वशिरण्योरुपसंख्यानम्' इत्यप् । षसादय उदात्ता उदात्तेतः । संबोभुवत इति । १०८१ चर्करीतं च इति भुवो यङ्लुकि शब्लुक् । परस्मैपदे ततः शता । निह्नुवानाः । १०८२ ह्नुङ् अपह्नवे[3] । शानच् । अनुदात्त आत्मनेभाषः । लुग्विकरणं समाप्तम् ॥

---

१. ''प्रपूर्वाल्ल्युडर्थे 'हलश्च' इति घञ्'' इति पाठो भवेत्. २. 'षस्ति' इति पाठः. ३. 'अपनयने' इति धातुपाठस्थपाठः.

एवं रागाकुलासु स्त्रीषु भगवतो वृत्तिमाह—

जुह्वत्प्रियो भीरुजनं ह्रियार्तं पिप्रत्कृपाभारभृतैरपाङ्गैः ।
अमेयधामा स जहेऽघहानिं ददज्जनेभ्यो मुदमादधानः ॥ ५४ ॥

जुह्वत्प्रियः स जहे । जुह्वतामग्निकर्मानुष्ठातृणां प्रियः स कृष्णो राजमार्ग एव किंचित् संचरितवान् । कीदृशः । कृपाभारेण भृतैः पूर्णैरपाङ्गैर्भीरुजनं स्त्रीजनं पिप्रत् संकटात् पालयन् ह्रिया लज्जया आर्तं व्याकुलं स्त्रीजनं जनेभ्यो भक्तजनेभ्योऽघहानिं दुरितक्षयं ददत् प्रयच्छन् । मुदमानन्दातिशयमादधानश्च ।।—जुह्वदिति । १०८३ हु दानादनयोः । प्रीणनेऽपीति भाष्ये । दानमग्न्यादौ प्रक्षेपः तन्त्रेण । शतरि 'नाभ्यस्ताच्छतुः' इति नुमभावः । भीरु इति । **१०८४ ञिभी** भये । 'भियः क्रुक्लुकनौ' इति क्रुः । ह्रिया । **१०८५ ह्री** लज्जायाम् । भावे क्विप् । ह्रादयोऽनुदात्ताः परस्मैभाषाः । पिप्रत् । **१०८६ पॄ** पालनपूरणयोः । ह्रस्वान्त इत्येके । उदात्तः परस्मैभाषः । ह्रस्वान्तस्त्वनुदात्तः शता । भारभृतैः । **१०८७ डुभृञ्** धारणपोषणयोः । डु भृञ् इति द्वमे । कर्मणि घञ् । क्तश्च । अनुदात्त उभयतोभाषः । अमेयेति । **१०८८ माङ्** माने शब्दे च । 'अचो यत्' । जहे ।१०८९ ओहाङ् गतौ । लट् । भृञादित्रयं गतम् । अनुदात्तावात्मनेभाषौ । हानिम् । **१०९० ओ हाक्** त्यागे । 'ग्लाम्ला–' इति निः । अनुदात्तः परस्मैभाषः । ददत् । **१०९१ डु दाञ्** दाने । शता । आदधानः । **१०९२ डु धाञ्** धारणपोषणयोः । दानेऽपीत्येके । शानच् ॥

मथुरां प्राप्तस्य भगवतः स्वज्ञातीनां यदूनां प्रथमसंगममाह—

प्रणेनिजद्भिर्मतिमर्थतत्त्वं सुवेविजानैर्यदुभिः स विष्णुः ।
घर्मोष्मभिस्तत्र समारताग्रे नभस्तुरैस्तैः प्रधने प्रवीणैः ॥ ५५ ॥

स विष्णुस्तत्र तस्मिन्देशे तैर्यदुभिरग्रे समारत संगतोऽभूत् । कीदृशैर्यदुभिः । मतिं प्रणेनिजद्भिः शुद्धां परिपुष्टां च कुर्वाणैः । अर्थतत्त्वं पुरुषार्थानां सारासारतत्त्वं सुवेविजानैः सुतरां विभजद्भिः । घर्मोष्मभिर्ग्रीष्मसदृशप्रतापैर्नभस्तुरैर्मेघवद्वेगवद्भिः । प्रधने युद्धे प्रवीणैः ॥—प्रणेनिजद्भिः । **१०९३ णिजिर्** शौचपोषणयोः । शता । सुवेविजानैः ।**१०९४ विजिर्** पृथग्भावे । शानच् । विष्णुः । **१०९५ विष्लृ** व्याप्तौ । उदिदित्येके । इरिदिति द्वमे । 'विषेः किच्च' इति नुप्रत्ययः । निजादयोऽनुदात्ताः स्वरितेतः । घर्मेति । **१०९६ घृ** क्षरणदीप्त्योः । समारतेति । **१०९८ ऋ** गतौ । संपूर्वात् 'समो गम्यृच्छि–' इति तङ् । अनुदात्ताः परस्मैभाषाः । नभ इति । **११०० भस** भर्त्सनदीप्त्योः । उदात्त उदात्तेत् । नञ्पूर्वात् क्विप् । तुरैरिति । **११०२ तुर** त्वरणे । उदात्त उदात्तेत् । 'इगुपध–' इति कः । प्रधनेति । **११०४ धन** धान्ये । अन्यमरणार्थादस्माद्घञर्थे कः । अयमप्युदात्त उदात्तेत् । वृत् । जुहोत्यादयो वृत्ताः । श्लुविकरणं समाप्तम् ॥

---

१. अत्र '**१०९७ हृ** प्रसह्यकरणे' **१०९९ 'सृ** गतौ' एतौ धातू नोदाहृतौ. २. अत्र '**११०१ कि** ज्ञाने' नोदाहृतः. ३. अत्र '**११०३ धिष** शब्दे **११०५ जन** जनने **११०६ गा** स्तुतौ' एतेऽपि नोदाहृताः.

अथ रजकवधप्रसङ्गमाह—

दीव्यन्देवो विचित्रस्युवमथ रजकं प्रैक्षतास्यूतमग्रे
ष्ठीव्यन्तं तत्रतत्र स्नुसितफलगणान्क्रोव्युषः प्योसहीनम् ।
तं प्लुष्यद्दृष्टिनृत्यद्रुषमपि च गतत्रासमुत्कुथ्यदङ्गं
पोथ्यं प्रोचे स्वरेण स्वजनविगुधितं क्षिप्यता पुष्पमाध्वीम् ॥ ५६ ॥

अथ दीव्यन् गच्छन् देवः क्रीडादि कुर्वन् हरिरग्रे आस्यूतमागतं रजकं प्रैक्षत। कीदृक् देवः । क्रोव्युषः क्रसां कुटिलीभवतां व्युषः दाहकः । कीदृशं रजकम् । विचित्रस्युवम् । नानारूपं सूचिकर्म कुर्वन्तम् । स्नुसितान् भक्षितान् फलगणान् प्योसहीनं विभागशून्यं यथा तथा तत्र तत्र ष्ठीव्यन्तं ष्ठीवनं कुर्वन्तम् । प्योसहीनमिति रजकविशेषणं वा । अपि च पुष्पमाध्वीं क्षिप्यता निरस्यता स्वरेण तं प्रोचे । कीदृशं तम् । प्लुष्यन्त्यां ज्वलन्त्यां दृष्टौ नृत्यन्ती रुट् यस्य तम् । उत्कुथ्यत् पूतीभवदङ्गं यस्य तम् । पोथ्यं हिंसनीयम् । स्वजनेन विगुधितं परिवृतम् ॥—दीव्यन्निति । ११०७ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिगतिषु[1] । व्यवहार उक्तिक्रियादिश्च । विदि (दिवि) रैश्वर्यार्थ इति देवतान्तादिसूत्रे प्राह हरः । अस्मात् गत्यर्थे शता । देव इति । क्रीडादौ पचाद्यच् । विचित्रस्युवम् । ११०८ षिवु तन्तुसंताने । क्विपि ऊठ् । आस्युतम् । ११०९ स्निवु गतिशोषणयोः । कर्तरि क्त 'ज्वरत्वरस्रिव्य–' इत्यूठ् । ष्ठीव्यन्तम् । १११० ष्ठिवु निरसने । आस्यान्निःसरणं तत् । शता । स्नुसितेति । ११११ ष्णुसु अदने । कर्मणि क्तः । १११२ ष्णुसु निरसने इति केचित् । क्र इति । १११३ क्नसु ह्वरणदीप्त्योः । क्विप् । व्युषः ।१११४ व्युष दाहे । 'इगुपध–' इति कः । प्योसेति । प्युस विभाग इत्येके । घञ् । प्लुष्यदिति । १११५ प्लुष च । दाहे इति शेषः । शता । नृत्यदिति । १११६ नृती गात्रविक्षेपे । शता । त्रासेति । १११७ त्रसी उद्वेगे । घञ् । उत्कुथ्यदिति । १११८ कुथ पूतीभावे । दुर्गन्धीभावस्तत्(?) । शता । पोथ्यम् । १११९ पुथ हिंसायाम् । ण्यत् । विगुधितम् । ११२० गुध परिवेष्टने । कर्मणि क्तः । क्षिप्यता । ११२१ क्षिप प्रेरणे । तच्च निरसनम् । शता । पुष्पेति । ११२२ पुष्प विकसने । घञर्थे कः ॥

तिम्यन्मते स्तिम्यति नाम मन्मनः स्तीम्यत्सु तद्व्रीलमृते वदाम्यहम् ।
देहि प्रभोः प्रेष्य सुसोहनाय मे जीर्णांशुकायः त्वमझीर्णमंशुकम् ॥ ५७ ॥

हे तिम्यन्मते आर्द्रीभवद्बुद्धे रजक, मन्मनः स्तीम्यत्सु आर्द्रीभवत्सु स्तिम्यति आर्द्रीभवति नाम । तत् तस्मादहं व्रीलं लज्जामृते वदामि । हे प्रभोः प्रेष्य (सुसोहनाय मे) जीर्णांशुकाय भिन्नाम्बराय मे मह्यं सुसोहनाय सम्यक्तृप्त्यर्थमझीर्णं नवमंशुकं देहि । जीर्णांशुः क्षीणशोभः कायो यस्य तस्य संबुद्धिर्वा ॥—तिम्यदिति । ११२३ तिम ११२४

१. 'स्तुतिमोदमदस्वप्नकान्तिगतिषु' इति धातुपाठस्थपाठः.

ष्टिम ११२५ ष्टीम आर्द्रीभावे । तीम इत्यप्येके । तिमेः शता । स्तिम्यति । ष्टिमेर्लट् । स्तीम्यत्सु । [१]संधिसाम्यात् तीम्यत्स्विति वा छेदः । ष्टीमितीम्योः शता । व्रीलम् । **११२६ व्रीड** चोदने[२] । चोदनं लज्जा । प्रेरणे च द्रुमे । घञ् । प्रेष्यः । **११२७ इष** गतौ । ण्यत् । सुसोहनाय[३] । **११२९ षुह** चक्यर्थे । स च तृप्तिः । ल्युट् । सहेत्यप्येके । जीर्ण इति । झीर्ण इति । **११३० जॄष् ११३१ झॄष्** वयोहानौ । द्वयोः कर्तरि क्तः । दिवादय उदात्ता उदात्तेतः क्षिपिवर्जम् ॥

रजकवाक्यमाह—

> किं सूयसे गिरमदून नितान्तदीना-
> मुड्डीनकाकसम भूपतिधीनमेतत् ।
> मीयस्व रीणनय मा क्षितिपालयेऽस्मि-
> न्त्रीयस्व धार्ष्ट्यमिति दुर्मतिरीशमूचे ॥ ५८ ॥

हे अदून अपीडित, उड्डीनकाकसम, त्वं नितान्तदीनां गिरं सूयसे उत्पादयसि । एतत् त्वया याच्यमानमंशुकं भूपतिधीनं भूपाधारं तदायत्तम् । हे रीणनय गतविनय । अस्मिन् क्षितिपालये राजगृहे मा मीयस्व मृतो भव । धार्ष्ट्यं व्रीयस्व च्छादय । दुर्मतिरिति ईशमूचे ॥—सूयसे इति । **११३२ षूङ्** प्राणिप्रसवे । प्राणिग्रहणमतन्त्रम् । अयमसूयार्थोऽपि । अस्माल्लट् । अदून । **११३३ दूङ्** परितापे । स्वादय ओदित इति ओदित्त्वान्निष्ठानत्वम् । दीनाम् । **११३४ दीङ्** क्षये । उड्डीनेति । **११३५ डीङ्** विहायसा गतौ । गतिमात्रे च । धीनम् । **११३६ धीङ्** आधारे । एषु कर्तरि क्तः । मीयस्व । **११३७ मीङ्** हिंसायाम् । हिंसात्र मृतिः लोट् रीणेति । **११३८ रीङ्** स्रवणे । प्राग्वत् क्तः । आलये **११३९ लीङ्** श्लेषणे । 'एरच्' । व्रीयस्व । **११४० व्रीङ्** । वृणोत्यर्थे । छादनं परिग्रहो वा तत्। लोट् । स्वादय ओदितः ॥

> आपीय तद्गिरममाननिरीतरोषः
> प्रीतिं श्यतोऽस्य स करेण शिरोधिमच्छात् ।
> धर्मावसायजनदः खलु योऽजनिष्ट
> दीप्तोष्मपूर्णभुजतूर्णविघूर्णवैरी ॥ ५९ ॥

स तद्गिरमापीय श्रुत्वा अमाननिरीतरोषोऽमानमनवधि यथा तथा निरीतो निर्गतो रोषो यस्य तादृशः सन् स्वस्य प्रीतिं श्यतस्तनूकुर्वतो वासोदानाभावेन नाशयतोऽस्य रजकस्य शिरोधिं करेणाच्छात् चिच्छेद । यः खलु धर्मावसायजनदो धर्मनाशकजनानामवखण्डिता सन् अजनिष्ट । दीप्तोष्मपूर्णेन भुजेन तूर्णं यथा तथा विघूर्णा हिंसिता वैरिणो येन सः ॥—आ-

---

१. 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति विसर्गलोपे 'मनः स्तीम्य' इति छेदः. पक्षान्तरे 'मनःतीम्य' इति बोध्यम्. २. 'चोदने लज्जायां च' इति धातुपाठः. ३. अत्र ११२८ षह चक्यर्थे नोपयुक्तः.

पीयेति । ११४१ **पीङ्** पाने । ल्यप् । अमानेति । ११४२ **माङ्** माने । ल्युट् । निरीतेति । ११४३ **ईङ्** गतौ । कर्तरि क्तः । प्रीतिमिति । ११४४ **प्रीङ्** प्रीतौ । क्तिन् । अकर्मकोऽयम् । षूङादय आत्मनेपदिनः । षूङ् दूङ् डीङ्वर्जमनुदात्ताः । श्यतः । ११४५ **शो** तनूकरणे । शता । 'ओतः श्यनि' इति लोपः । अच्छात् । ११४६ **छो** छेदने । लुङि 'विभाषा घ्राधेट्शा–' इति सिज्लुक् । अवसायेति । ११४७ **षो** अन्तकर्मणि । जनदिति । ११४८ **दो** अवखण्डने । क्विप् । श्यत्यादयोऽनुदात्ताः परस्मैपदिनः । अजनिष्ट । ११४९ **जनी** प्रादुर्भावे । अयमुत्पादनायामपि । लुङ् । दीप्तेति । ११५० **दीपी** दीप्तौ । पूर्णेति । ११५१ **पूरी** आप्यायने । अकर्मकोऽयम् । द्वयोः कर्तरि क्तः । तूर्णेति । ११५२ **तूरी** गतित्वरणहिंसनयोः । त्वरणमात्रे च द्रुमे । अस्मात् क्तः । विधूर्णेति । ११५३ **धूरी** ११५४ **गूरी** हिंसागत्योः । धूरेः कर्मणि क्तः ॥

गूर्णेऽस्मिन्बहुजन्तुघूरिणि खले जूर्णैः शशंसे नृभिः
शौरिः शूरकगर्वचूरणपरः संतप्यमानः सताम् ।
देवौघस्य तपन्भुवं च पतितावावृत्तभूमाप्यसौ
वृत्तक्लेशलवैरकाश्यत समं संवाश्यमानैः स्वकैः ॥ ६० ॥

शौरिरस्मिन्खले गूर्णे हिंसिते सति जूर्णैर्वृद्धैर्विद्यादिवृद्धैर्नृभिर्जनैः शशंसे स्तुतः । बहुजन्तुघूरिणि सर्वजन्तुघूरिणि सर्वजन्तुहिंसाशीले । कीदृशः शौरिः । शूरकगर्वचूरणपरः शूरकाणां हिंसकानां स्तम्भनकर्तॄणां च दर्पस्य दाहपरः । सतां संतप्यमान ईश्वरो देवौघस्य तपन् ईश्वरो भवन् भुवश्च पतिता ईशिता । इत्थंभूतोऽसौ(साव)वावृत्तभूमा अविच्छादितैश्वर्योऽपि सन् वृत्तक्लेशलवैश्छादितक्लेशलेशैः । अत एव संवाश्यमानैः 'जय केशवाच्युत' इति शब्दायमानैः स्वकैः सममकाश्यत दीप्तोऽभूत् ॥—गूर्णेति । गूरेः कर्मणि क्तः । जन्तुघूरिणि । ११५५ **घूरी** ११५६ **जूरी** हिंसावयोहान्योः । घूरेर्णिनिः । जूर्णैः । जूरेः कर्तरि क्तः । शूरकेति । ११५७ **शूरी** हिंसास्तम्भनयोः । ण्वुल् । चूरणेति । ११५८ **चूरी** दाहे । ल्युट् । संतप्यमानः । ११५९ **तप** ऐश्वर्ये वा । तपिरस्मिन्नर्थे वा तङ्श्यनौ प्राप्नोतीत्यर्थः । कोपे च द्रुमे । शानच् । तपन् । तङ्श्यनोरभावेऽपि शता । पतिता । पत ऐश्वर्ये वा इत्येके । तस्मिन् पक्षे तृच् । वावृत्तेति । वृत्तेति । ११६० **वृतु** वरणे । केचित् पूर्वत्र [पठितं] वाग्रहणमस्यादिं कृत्वा 'वावृतृ वरणे' इत्याहुः । द्वयोः कर्मणि क्तः । क्लेशेति । ११६१ **क्लिश** उपतापे । घञ् । अकाश्यत । ११६२ **काशृ** दीप्तौ । लङ् । संवाश्यमानैः । ११६३ **वाशृ** शब्दे । शानच् । जन्यादय उदात्ता अनुदात्तेतः । तपिस्त्वनुदात्तः ॥

तन्मृष्यमाणास्त्वथ शुच्यदङ्कका भृत्याः सुनद्धं बहुरक्तमंशुकम् ।
विसृज्य शप्यन्त इमं प्रदुद्रुवुः कृष्णः प्रपेदे वसनान्यखेदवान् ॥ ६१ ॥

अथ भृत्यास्तत्स्वामिवधादिकं मृष्यमाणाः सहमानाः सुनद्धं भस्त्रायां निधाय[1] सम्य-

1. 'विधाय' इति पाठः.

गबद्धं बहु अनल्पमंशुकं विसृज्य त्यक्त्वा इमं शप्यन्तो निन्दन्तः प्रदुद्रुवुः । शुच्यदङ्गकाः स्वेदादिभिः पूतीभवत्कुत्सिताङ्गाः । रक्तं कुसुम्भादिभिः कृतनानावर्णम् । कृष्णो वसनान्यंशुकानि प्रपेदे उद्धृतवान् ॥—मृष्यमाणा इति । ११६४ मृष तितिक्षायाम् । शानच् । शुच्यदिति । ११६५ ई शुचिर्[1] पूतीभावे । दुर्गन्धीभावस्तत् । शौचविशरणक्लेशेषु च द्रुमे शता । द्वावुदात्तौ । सुनद्धम् । ११७६ णह बन्धने । कर्मणि क्तः । रक्तम् । ११६७ रन्ज रागे । कर्तरि क्तः । शप्यन्तः । ११६८ शप आक्रोशे । शता । त्रयोऽनुदात्ताः । मृषादयः पञ्च स्वरितेतः । प्रपेदे । ११६९ पद गतौ । लिट् । खेदेति । ११७० खिद दैन्ये घञ् ॥

प्राग्विद्यमानवसनेष्वधृतैकमीशो
बुद्ध्वा ददौ च रिपुयोधजयी निजेभ्यः ।
कंसानुरोध्यणनहृन्मतिमद्युगर्च्यः
शेषं व्यसृज्यत पटौघमलिश्यमानम् ॥ ६२ ॥

ईशो विद्यमानवसनेष्वनर्घवस्त्रेष्वेकं प्राक् अन्येभ्यः पूर्वमधृत परिहितवान्, बुद्ध्वा निजेभ्यो ददौ च । स्वीयानां तारतम्यमवगम्य दत्तवांश्च । शेषं पटौघं व्यसृज्यत त्यक्तवान् कंसानुरोध्यणनहृत् कंसानुवर्तिनामणनहृत् प्राणहृत् । मतिमद्युगर्च्यो मतिमतां ज्ञानिनां युजां समाधिकर्तृणामर्च्यः । अलिश्यमानमनल्पीभवन्तं पटौघम् ॥—विद्यमानेति । ११७१ विद सत्तायाम् । शानच् । बुद्ध्वा । ११७२ बुध अवगमने । ज्वलादिगतबोधतिवद्बोधो ज्ञानं चार्थः । तस्मात् क्त्वा । योधेति । ११७३ युध संप्रहारे । अच् । कंसानुरोधीति । ११७४ अनो रुध कामे । अनुपूर्वो रुधिः कामेऽर्थे तङ्श्यनौ भजते । तस्मादत्र तु णिनिः । अणनेति । ११७५ अण प्राणने । अन इत्येके । ल्युट् । मतीति । ११७६ मन ज्ञाने । क्तिन् । युगिति । ११७७ युज समाधौ । अकर्मकोऽयमिति माधवः । क्विप् । व्यसृज्यत । ११७८ सृज विसर्गे । स चोत्पादनत्यागौ । लङ् । अलिश्यमानम् । ११७९ लिश अल्पीभावे । शानच् । पदादयोऽनुदात्ता अण्यतिवर्जमनुदात्तेतः ॥

राध्यद्द्वेषगुणोऽथ वायकवराद्दैत्याविदेषोऽपुष-
च्छोषं तोषकृतोऽस्य दोषवितताराश्लिष्टलक्ष्मीस्तनः ।
शक्यन्गर्वमशक्यमानमनसामास्विद्यदास्योऽक्रुधं
क्षुध्यद्भक्तदमाप मालिकवरं शुद्धं स सिद्धेप्सितम् ॥ ६३ ॥

अथैष दैत्याविद् दैत्यच्छेत्ता वायकवरात् सौचिकश्रेष्ठात् तद्दत्तोष्णीषादिभी राध्यद्द्वेषगुणः सिध्यन्मनोज्ञवेषः सन् तोषकृतोऽस्य दोषविततेर्नाशमपुषदवर्धयत् । तदनन्तरं च स मालिकवरं मालाकारश्रेष्ठमाप । कीदृशः । अशक्यमानमनसामसहमानमनसां गर्वं शक्यन्

---

1. 'शुचिर्' अनादिद् धातुपाठे.

सहमानः। आस्विद्यदास्य ईषत् स्विद्यन्मुखः कीदृशं मालिकवरम्। अक्रुधं क्रोधहीनम्। क्षुध्यतां बुभुक्षमाणानां भक्तदमन्नप्रदम्। शुद्धं सिद्धप्रार्थितं च॥—राध्यदिति। ११८० राधोऽकर्मकाद्वृद्धावेव। वृद्ध्यर्थ इव। अकर्मकादेव राधेः श्यन्। अस्य तु सिद्धिद्रोहदैवपर्यालोचनादयोऽर्थाः। शता। दैत्याविद्। ११८१ व्यध ताडने। तच्च प्रायेण विदारणपर्यन्तम्। क्विपि 'नहि वृतिवृषि–' इत्यादिना दीर्घः। अपुषत्। ११८२ पुष पुष्टौ। अयमकर्मकोऽपि। इतो गणान्ताः पुषादयः। तेन 'पुषादिद्युतादि–' इत्यङ्। शोषतोषदोषेति। ११८३ शुष शोषणे। ११८४ तुष प्रीतौ। ११८५ दुष वैकृत्ये। वैकृत्यं विकृतता। त्रयाणां घञ्। आश्लिष्टेति। ११८६ श्लिष आलिङ्गने। कर्मणि क्तः। शक्यन्। अशक्यमानेति। ११८७ शक विभाषितो मर्षणे। विभाषित इत्युभयपदीनां पूर्वाचार्यसंज्ञा। शतृशानचौ। आस्विद्यदिति। ११८८ ञि ष्विदा गात्रप्रक्षरणे। शता। अक्रुधम्। ११८९ क्रुध कोपे। भावे क्विप्। क्षुध्यदिति। ११९० क्षुध बुभुक्षायाम्। शता। शुद्धम्। सिद्धेति। ११९१ शुध शौचे। ११९२ षिधु संराद्धौ। संसिद्धिः सा। द्वयोः कर्तरि क्तः॥

रद्धारये सोऽयमनश्वराय तृप्यन्मना दृप्तजनद्रुहेऽस्मै।
मुग्धस्मितस्नोहिमुखाय मालां स्निह्यन्ददौ सादरमस्तवीच्च॥ ६४॥

सोऽयमस्मै स्निह्यन्सादरं मालां ददौ अस्तवीच्च। कीदृशाय। अनश्वराय नित्याय। मुग्धस्मितस्नोहिमुखाय मुग्धस्मितोद्गिरणशीलं मुखं यस्य तस्मै। रद्धारये निहतशत्रवे। दृप्तजनद्रुहे दुष्टजनहन्त्रे। तृप्यन्मनाः प्रीणितान्तरात्मा॥—शब्देति। ११९३ रध हिंसासंराध्योः। संराद्धिः पाकः। कर्मणि क्तः। अनश्वराय। ११९४ णश अदर्शने। 'इणनश–' इति क्वरप्। तृप्यदिति। ११९५ तृप प्रीणने। तच्च तृप्तिस्तर्पणं च। शता। दृप्तेति। ११९६ दृप हर्षमोहनयोः। मोहनं गर्वः। मोचनयोरित्येके। कर्तरि क्तः। द्रुह इति। ११९७ द्रुह जिघांसायाम्। क्विप्। मुग्धेति। ११९८ मुह वैचित्ये। अविवेकस्तत्। कर्तरि क्तः। स्नोहीति। ११९९ ष्णुह उद्गिरणे। णिनिः। स्निह्यन्। १२०० ष्णिह प्रीतौ। शता। वृत् विकल्पितेट उदात्तेतो रधादयो वृत्ताः॥

अशाम्यदात्मापि तमी नमामि दमिप्रियं श्रान्तिहरं भवन्तम्।
श्राम्यामि भोः क्षाम्य ममापराधं क्लान्तं मनो माद्यति दर्शनात्ते॥ ६५॥

अहमशाम्यदात्मा अशान्तमना अपि त्वां नमामि। तमी त्वयि काङ्क्षाशीलः। संसारेण पीडाशीलो वा। दमिप्रियं दमशीलानामिष्टम्। अहं श्राम्यामि अनवस्थितो भवामि। भवाब्धाविल्यर्थात्। भो मम अनादरादिकमपराधं क्षाम्य क्षमस्व। क्लान्तं तवादर्शनात् पीडितं मनस्ते दर्शनान् माद्यति। श्रान्तिहरं संसरणदुःखनिरासकम्॥—अशाम्यदिति। १२०१ शमु उपशमे। शतरि 'शमामष्टानाम्–' इति दीर्घः। तमीति १२०२ तमु

१. 'गरण' इति पाठः.

काङ्क्षायाम् । ग्लानावेव प्रयोगः । मुरारिस्तु 'द्रष्टुं बहूत्ताम्यति' इति काङ्क्षायामेवाह । 'शमित्यष्टाभ्यः' इति घिनुण् । दमीति । १२०३ दमु उपशमने । अयमकर्मकोऽपि । प्रागवत् घिनुण् । श्रान्तीति । १२०४ श्रमु तपसि खेदे च । क्तिन् । भ्राम्यामि । १२०५ भ्रमु अनवस्थाने । अयमकर्मकः सकर्मकश्च लट् । क्षाम्येति । १२०६ क्षमू सहने । अयमषित् । लोट् । क्लान्तम् । १२०७ क्लमु ग्लानौ । कर्तरि क्तः । माद्यति । १२०८ मदी हर्षे । हर्षोऽत्र गर्वः । वृत् । शमादयो वृत्ताः ॥

अस्तायासविजस्तविश्वतसनो निर्दस्तवासैर्नुतो
वेदव्योषकृदप्लुषो बिसितधीकुस्यज्जनांहोबुसम् ।
मुस्तामोष्र्यमसः किटिस्त्वमसमो लुठ्यन्खलानोकसो
भृश्यभ्रंशनवर्शकाक्कृशदयस्तृष्णाहरो हृष्य मे ॥ ६६ ॥

त्वं बिसितधीकुस्यज्जनांहोबुसमप्लुषः । बिसितया प्रेरितया धिया कुस्यतां संश्लिष्यतां जनानामंहोरूपं बुसमप्लुषो दग्धवानसि । कीदृशः।अस्तायासं त्यक्तप्रयासं यथा तथा विजस्तविश्वतसनः मोक्षितलोकक्षयः । निर्दस्तवासैर्निर्दस्त उपक्षीणो वासः स्तम्भो नम्रताभावो येषां तैः। नुतः। वेदव्योषकृद् व्यासरूपेण वेदानां विभागकृत् । अमसोऽपरिमाणः परिमाणहीनो वा त्वं मुस्तामोषी मुस्ताखण्डी किटिर्वराहरूपो असमः परिणतवानसि। खलान् ओकसः स्थानात् लुठ्यन् क्षोभयन् । भृश्यद्भ्रंशनवर्शकाक्कृशदयो भृश्यतामधःपततां स्वभक्तानां भ्रंशस्याधःपतनस्य वर्शका छादयित्री अक्कृशा दया यस्य स तादृशस्त्वं मे हृष्य तुष्टो भव ॥—अस्तेति । १२०९ असु क्षेपणे । कर्मणि क्तः । आयासेति । १२१० यसु प्रयत्ने । घञ् । विजस्तेति । १२११ जसु मोक्षणे । कर्मणि क्तः । तसनेति । १२१२ तसु उपक्षये । ल्युट् । निर्दस्तेति । १२१३ दसु च । कर्मणि क्तः । वासेति । १२१४ वसु स्तम्भे । बस्वित्येके । वसेर्घञ् । शमादयः क्षसिदसि(मदि)वर्जमुदितः । व्योषेति । १२१५ व्युष विभागे । व्युसेति ।चैके । व्युषेर्घञ् । अप्लुष इति । १२१६ प्लुष दाहे । लुङि पुषाद्यङ् । बिसितेति । १२१७ बिस प्रेरणे । कर्मणि क्तः । कुस्यदिति । १२१८ कुस संश्लेषणे । शता ।बुसम्।१२१९ बुस उत्सर्गे । इगुपधात् कः । मुस्तेति । १२२० मुस खण्डने । 'व्रातालातसुतपुतचित्तनिमित्तमुस्त–' इत्यादिना भोजेन क्तं निपातितः । मोषी । मुष इत्येके । णिनिः । अमसः । १२२१ मसी परिणामे । परिमाणे इति द्रुमे । असम इति । 'समी परिणामे' इति दन्त्यादिरित्येके । तस्माल्लुङि पुषाद्यङ् । लुठ्यन् । १२२२ लुठ विलोडने । शता । ओकसः । १२२३ उच समावाये । 'ओक उचः के' इति निपातितः । भृशद्भ्रंशनेति । १२२४ भृशु १२२५ भ्रन्शु अधःपतने । द्वयोः शतृल्युटौ । वर्शकेति । १२२६ वृश वरणे । ण्वुल् । अक्कृशेति । १२२७ कृश तनूकरणे । 'अनुपसर्गात्फुल्लक्षीबकृश–' इति निपातितः ।

१. 'घिराण्' इति पाठः. २. 'उपशमे' इति धातुपाठे. ३. 'विलोटने' इति पाठः.

तृष्णेति । **१२२८ तृष** पिपासायाम् । 'तृषिशुषिरसिभ्यः कित्' इति नन् प्रत्ययः । हृष्य । **१२२९ हृष** तुष्टौ । लोट् ॥

रुष्यद्रिष्यदरातिडेपक विभो कोपादिगोपो न ते
किं चायोप्यविरोपिलोपक न वा लोभादिसंक्षोभिता ।
नभ्यांस्तुभ्य विभो जयेति नुवते क्लियन्प्रमेद्यद्रुजं
क्ष्विद्यन्नृद्धिमगृध्नवेऽपि स विमृश्याक्षीयमाणां ददौ ॥ ६७ ॥

वृष्यतां कुप्यतां परान् रिष्यतां हिंसतां च रिपूणां डेपक क्षेपक हे विभो, ते तव कोपादिभिर्गोपो व्याकुलत्वं न । किंच । अयोप्यविरोपिलोपक अयोप्यविरोपिनाममोह्यमोहयितॄणां लोपक मोहक, ते लोभादिसंक्षोभिता वा न । त्वं नभ्यान् हिंस्यान् तुभ्य हिंसय । विभो त्वं जयेति नुवते तस्मै क्लियन् कृपया आर्द्रीभवन् । प्रमेद्यद्रुजं वर्धमानां पीडां क्ष्विद्यन् मोचयंश्च स विमृश्य स्वयमेव विचिन्त्य अगृध्नवेऽनिच्छवेऽक्षीयमाणामक्षीणामृद्धिं ददौ ॥—रुष्यद्रिष्यदिति । **१२३० रुष**[1] रोषे । **१२३१ रिष** हिंसायां चेत्येके । द्वयोः शता । डेपक इति **१२३२ डिप** क्षेपे । ण्वुल् । कोपादिगोप इति । **१२३३ कुप** क्रोधे । **१२३४ गुप** व्याकुलत्वे । द्वयोर्घञ् । अयोप्यविरोपिलोपकेति । **१२३५ युपु १२३६ रुपु १२३७ लुपु** विमोहने । क्रमेण ण्यणिनिण्वुलः । लोभादिसंक्षोभितेति । **१२३८ लुभ** गार्ध्ये । **१२३९ क्षुभ** संचलने । द्वयोर्घञ् णिनिश्च(?)। नभ्यान् तुभ्य । **१२४० णभ १२४१ तुभ** हिंसायाम् । यल्लोट् च । क्लियन् प्रमेद्यन् क्ष्विद्यन्निति । **१२४२ क्लिदू** आर्द्रीभावे ।**१२४३ ञिमिदा** स्नेहने । **१२४४ ञिक्ष्विदा** स्नेहनमोचनयोः । त्रयाणां शता । मिदेस्तु मिदेर्गुणः' इति गुणः । ऋद्धिम् । **१२४५ ऋधु** वृद्धौ । क्तिन् । अगृध्नवे । **१२४६ गृधु** अभिकाङ्क्षायाम् । 'त्रसिगृधि-' इति क्नुः । वृत् । वृषादयो दिवादयश्च वृत्ताः । दिवादयस्त्ववृत्कृता इत्येके । तेन मृश्यति क्षीयते इत्याद्यपि । तत्र मृशेर्ल्यप् । क्षीयतेः शानच् । शमादय उदात्ता उदात्तेतः[2]॥

अथ कुब्जानुग्रहकथामाह—

सुन्वत्प्रियं तमथ रागसिताशिताग्र-
मारोन्मितास्त्रनिचयास्तृतमानसान्ता ।
कुब्जा कृतारिबलमैक्षत वृण्वती सा
पात्रं समीरधुतसौरभधूतभृङ्गम् ॥ ६८ ॥

अथ सा कुब्जा सैरन्ध्री सुन्वत्प्रियं सुन्वन्तो यज्ञं कुर्वन्तो द्विजाः प्रिया यस्य तं श्रीकृष्णमैक्षत । कीदृशी कुब्जा । रागसिता रागेण बद्धा । शिताग्रेण मारोन्मितेन कामक्षिप्तेनास्त्रनिचयेनास्तृतं छादितं मानसान्तं यस्याः सा । तथा—समीरधुतेन वायुचलि-

---

१. 'रुष रिष हिंसायाम्' इति धातुपाठे. २. त्रयोऽप्यनुदिताः पुस्तके.

तेन सौरभेण धूताः संभ्रान्ता भृङ्गा यस्मिंस्तत् तादृशं पात्रं वृण्वती स्वीकुर्वती । कीदृशं हरिम् । कृतारिबलं कृतं हिंसितमरिबलं येन तम् ॥—सुन्वदिति । **१२४७ षुञ्** अभिषवे । अभिषवो निष्पीडनस्नपनसुरासंधानस्नानादिः । शता सिता । **१२४८ षिञ्** बन्धने । कर्मणि क्तः । शितेति । **१२४९ शिञ्** निशाने[1] । प्राग्वत् क्तः । उन्मितेति । **१२५० डुमिञ्** प्रक्षेपणे । प्राग्वत् क्तः। निचयेति । **१२५१ चिञ्** चयने । 'एरच्' । आस्तृतेति । **१२५२ स्तृञ्** छादने । लक्षणया विक्षेपे । प्राग्वत् क्तः । कृतमिति । **१२५३ कृञ्** हिंसायाम् । प्राग्वत् क्तः । वृण्वती । **१२५४ वृञ्** वरणे । स्वीकारश्छादनं वा तत् । शतरि ङीप् । धुतेति । धूतेति । **१२५५ धुञ्** कम्पने । धूञ् इत्येके । द्वयोः कर्मणि क्तः । स्वादय उभयतोभाषाः अनुदात्ता धुञ्वर्जम् ॥

> कन्दर्पेण दुता विलेपकुशला सा चान्तिकं हिन्वता
> पृष्टा तेन पृता विलेपनमदात्स्पार्याय लोकस्मृते ।
> संप्राप्यो निजशक्तिराद्धतपसः साधोः स देवोऽपि ता-
> मृज्वीकर्तुमुपानशे सुकृतिनीं प्रस्तिघ्नुवानः खलान् ॥ ६९ ॥

कन्दर्पेण दुता पीडिता सा च विलेपे तत्संपादने कुशला अन्तिकं हिन्वता प्राप्नुवता तेन पृष्टा पृता प्रीणिता स्पार्याय प्रीणनीयाय लोकस्मृते लोकपालकाय भगवते विलेपनं कलभमदात् । निजशक्तिराद्धतपसो निजशक्त्या स्वस्य सेवाशक्त्या राद्धं सिद्धफलं तपो यस्य तस्य साधोः संप्राप्यः स देवोऽपि तामृज्वीकर्तुमृजुदेहां कर्तुमुपानशे समीपं प्राप । यतः—सा सुकृतिनी । कीदृशो देवः । खलान्प्रस्तिघ्नुवान् आस्कन्दन्नभिभवन् ॥—दुतेति । **१२५६ टु दु** उपतापे । कर्मणि क्तः । हिन्वता । **१२५७ हि** गतौ वृद्धौ च । शता । पृता । **१२५८ पृ** प्रीतौ । कर्मणि क्तः । स्पार्याय । **१२५९ स्पृ** प्रीतिपालनयोः । ण्यत् । लोकस्मृते । स्मृ इत्येके । क्विप् । संप्राप्यः । **१२६० आप्लृ** व्याप्तौ । ण्यत् । शक्तीति । **१२६१ शक्लृ** शक्तौ । क्तिन् । राद्धेति । **१२६२ राध १२६३ साध** संसिद्धौ । राधेः कर्तरि क्तः । साधोः । 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' इति साधेरुण्प्रत्ययः । द्वादयोऽनुदात्ताः परस्मैभाषाः । उपानशे । **१२६४ अशू** व्याप्तौ संघाते च द्रुमे । 'अश्नोतेश्च' इति नुट् । प्रस्तिघ्नुवानः । **१२६५ ष्टिघ** आस्कन्दने । शानच् ।

ऋज्वीकर्तुमित्युक्तम् । ऋज्वीकृतिप्रकारमाह—

> तामातिक्य पदे पदेन चिबुके चातिघ्नुवन्पाणिना
> चक्रे सघ्नुवतां वधे दधृगसावृज्वीं मनोज्ञाकृतिम् ।
> किं चादभ्नुवतीमिमां मम गृहानेहीति याच्ञापरा-
> मेष्यामीत्यमुचत्समृद्धकरुणः क्षिण्वन्कटाक्षैर्घृतिम् ॥ ७० ॥

---

1. 'निशातने' इति पाठः.

असौ तां पदे चरणे पदेनातिक्याक्रम्य चिबुके पाणिना चातिग्नुवन्नाक्रमन्नृज्वीमवक्रदेहां मनोज्ञाकृतिं चक्रे । कीदृशः । सघ्नुवतां हिंसतां वधे दधृक् प्रगल्भः । किं च 'मम गृहानेहि' इति याच्ञापरामदभ्नुवतीं व्याजमकुर्वाणामव्याजभक्तामिमामेष्यामीत्युक्त्वा अमुचत् । अत्र हेतुः—समृद्धकरुणः । कटाक्षैर्धृतिं धैर्यं क्षिण्वन् नाशयन् ॥—आतिक्येति । **१२६६ तिक १२६७ तिग** च[१] । एतावप्यास्कन्दने । आद्याल्ल्यप् । अतिग्नुवन् । तिगेः शता । सघ्नुवताम् । **१२६८ षघ** हिंसायाम् । शता । दधृक् । **१२६९ ञिधृषा** प्रागल्भ्ये । 'ऋत्विग्दधृक्—' इति क्विप् । अदभ्नुवतीम् । **१२७० दन्भु** दम्भे[२] । दम्भो लोकरञ्जनार्थं कर्मानुष्ठानम् । शतरि ङीप् समृद्धेति । **१२७१ ऋधु** वृद्धौ । अयमकर्मकः सकर्मकश्च । कर्तरि क्तः । क्षिण्वन् । ***१२७३ रि १२७४ क्षि १२७५ चिरि १२७६ जिरि १२७७ दाश १२७८ दृ[३]** हिंसायाम् । 'एषु छान्दसेषु क्षिधातुः सर्वथा लोकेऽस्ति' इत्युक्तस्य क्षेः शता ॥

कुब्जावैरूप्यहरणानन्तरं केऽपि भाग्यवन्तो भगवन्तं ज्ञातवन्त इत्याह—

> क्ष्मां दघ्नुवन्मखचमिव्यसनानि रिण्व-
> न्नृक्षिण्वतां चिरयणैरपथं जिरिण्वन् ।
> कंसं प्रदाश्यमतिदुर्द्रवमुद्दुदूषु-
> श्छन्दः श्रुतोऽपि स हि कैश्चिदबोधि लोके ॥ ७१ ॥

छन्दःश्रुतश्छन्दसि वेदे एव श्रुतः प्रसिद्धोऽपि स लोके मनुष्याणां मध्ये कैश्चित् भाग्यवद्भिरबोधि ईश्वरत्वेन ज्ञात आसीत् । कीदृशः । क्ष्मां महीं दघ्नुवन् पालयन् मखचमिनां क्रतुगसहष्या(रा)शिनां देवानां व्यसनानि दुःखानि रिण्वन् नाशयन् ऋक्षिण्वतां हिंसकानां चिरयणैर्वधैरपथं कुमार्गं जिरिण्वन् नाशयन् । प्रदाश्यं हिंस्यमतिदुर्द्रवमन्येषामत्यन्तं हिंसितुमशक्यं कंसमुद्दुदूषुरुच्चैरधिकं हिंसितुमिच्छुः ॥—दघ्नुवन्निति । **१२७९ दघ** घातने पालने च शता । मखचमीति । **१२८० चमु** भक्षणे । णिनिः । रिण्वन् । रि क्षि इत्यत्रादौ धातोः शता । ऋक्षिण्वताम् । 'आद्य ऋक्षीत्येके' इत्युक्तस्य धातोः शता । चिरयणैः । चिरिधातोर्ल्युट् । जिरिण्वन् । जिरेः शता । दुर्द्रवम् । द्रुधातोः खल् । उद्दुदूषुः । दुङ् इत्यपि केचित् । इत्यस्य सन्युः । केचित् 'छन्दस्यह व्याप्तौ' इति पठित्वा दघादि लोकेऽप्याहुः । एतदेव छन्दःश्रुतोऽपीतिवादेन द्योतितम् । तिकादय उदात्तेतः । रिक्षिद्रुदुङ्वर्जमुदात्ताः । दुङ् त्वात्मनेभाषः । वृत् । स्वादयो वृत्ताः ॥

---

१. 'गतौ च' इति धातुपाठे. २. 'दम्भने' इति धातुपाठे. ३. धातुपाठे तु 'दृ' इत्येवोपलभ्यते. तथाच 'दुर्दवम्' इत्येव पाठः स्यात्. *. १२७२ अह व्याप्तौ' नोदाहृतः.

एवं राजमार्गसंचारेण तत्रत्यभक्तानन्दमुक्त्वा गोपुरान्तर्गतानां सुकृतातिशयेन तत्प्राप्तिमाह—

तुदन्कुचरिताञ्शुभे प्रणुदमान इष्टं दिश-
न्प्रभृष्टपललान्क्षिपन्नरिमतिं कृषन्माधवः ।
ऋषन्नजुषत क्रमान्नगरगर्भमुद्वेजय-
न्नलग्नमनसः खलानवशलज्जमानाङ्गनम् ॥ ७२ ॥

माधवः क्रमात् तत्र तत्र विलम्बमान ऋषन् गच्छन् नगरगर्भमभ्यन्तरप्राकारान्तर्भागमजुषतासेवताश्रितवान् । तत्रत्यजनं प्रीणितवानिति वा । कीदृशं कुर्वन्नित्यत्राह—कुचरितान् रजकादींस्तुदन् । मालाकारादीञ्शुभे प्रणुदमानः प्रेरयन् । तेषामेव इष्टं ददन्(त्) । प्रभृष्टं पक्वं पललं मांसं यैस्तान् दुष्टान् क्षिपन् प्रेरयन् निरस्यन् । अत एव अरिमतिं कृषन् विलिखन् विदारयन् । अलग्नमनसो दुर्व्यापारेषु अलग्नमलज्जितं मनो येषां तान् खलान् उद्वेजयन् भीषयन् कम्पयन् वा । एतानि षट् तत्कालविशेषणानि । कीदृशं नगरगर्भम् । भगवत्प्रेम्णा अवशा व्याकुला लज्जमानाः सलज्जा अङ्गना यस्मिंस्तम् ॥—तुदन्निति । १२८१ **तुद** व्यथने । शता । प्रणुदमानः । १२८२ **णुद** प्रेरणे शानच् । दिशन् । १२८३ **दिश** अतिसर्जने । दानं तत् । शता । प्रभृष्टेति । १२८४ **भ्रस्ज** पाके । कर्मणि क्तः । कित्त्वात् संप्रसारणम् । 'स्कोः—' इति सलोपः । क्षिपन् । १२८५ **क्षिप** प्रेरणे । निरसननिन्दादयोऽपि प्रेरणभेदा एव । कृषन् । १२८६ **कृष** विलेखने । तदत्र हलकर्म । द्वयोः शता । तुदादयोऽनुदात्ताः स्वरितेतः । ऋषन् । १२८७ **ऋषी** गतौ । शता उदात्त उदात्तेत् । अजुषत । १२८८ **जुषी** प्रीतिसेवनयोः । लङ् । उद्वेजयन् । १२८९ ओ **विजी** भयचलनयोः । प्रायेणोत्पूर्वः । अस्माण्णिचि शता । १२९० **ओलजी** १२९१ **ओलस्जी** व्रीडने[1] । लजेः कर्तरि क्तः । लज्जमानेति । लस्जेः शानच् । सस्य जश्त्वम् । 'ओनजी ओनस्जी व्रीलने' इति चान्द्रमतं माधवदूषितम् । जुषादय उदात्ता अनुदात्तेतः ॥

नगरगर्भं वर्णयति पञ्चभिः—

वृक्णव्याचरसोञ्छती फलगणानव्युच्छितायां निशि
स्नान्ती नर्च्छति मिच्छिता सुजनता यस्मिन्हितं जर्जती ।
चर्चन्ती कटु झर्झती बुधजनं दोषं त्वचित्वर्चती
नित्यं भूपतिमुब्जनोज्झितमना यत्रास्त खल्या सुखम् ॥ ७३ ॥

सुजनता सज्जनसमूहः । 'ग्रामजन—' इति तल् । 'सामूहिकेषु तदन्तविधिरिष्यते' इति जनान्तादपि । मिच्छिता क्लेशिता यस्मिन् न ऋच्छति प्राप्नोति । कीदृशी सुजनता ।

---

1. 'व्रीलने' इति पाठः.

वृक्णव्याचरसा । वृक्णश्छिन्नो व्याचे व्याजे रस आग्रहो यस्याः सा । फलगणान् उञ्छती पृथक्पृथगाददाना । निशि अव्युच्छितायामनतिक्रान्तायां प्रत्यूषे एव स्नान्ती । एतैरत्युत्तमत्वमुक्तम् । हितं श्रेय एव जर्जती सर्वतो वदन्तीति कंसस्यानिष्टत्वे हेतुः । खल्या खलसमूहो यत्र सुखं यथा तथा आस्त स्थितवती । कीदृशी खल्या । कटु क्रूरं चर्चन्ती परिभाषमाणा । बुधजनं झर्झती संतर्जयन्ती । भूपतिं राजानं दोषं त्वचित्वा आच्छाद्य नित्यं सर्वदा ऋचती प्रशंसन्ती । उब्जनोज्झितमनाः । उब्जनेनार्जवेनोज्झितं त्यक्तं मनो यस्याः साः ॥—वृक्णेति । १२९२ ओ **व्रश्चू** छेदने । कर्मणि क्तः । व्याचेति । १२९३ **व्यच** व्याजीकरणे । घञ् । उञ्छती । १२९४ **उछि** उञ्छे । शतरि ङीप् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः । अव्युच्छितायाम् । १२९५ **उछी** विवासे । अतिक्रमवन्धनवर्जनेषु च द्रुमे । कर्तरि क्तः । ऋच्छति १२९६ **ऋछ** गतीन्द्रियप्रलयमूर्तिभावेषु । इन्द्रियप्रलयो मोहः । मूर्तिभावः काठिन्यम् । अस्माल्लट् । मिच्छिता । १२९७ **मिछ** उत्क्लेशे । स च पीडा । कर्मणि क्तः । जर्जती । चर्चती । झर्झती । १२९८ **जर्ज** १२९९ **चर्च** १३०० **झर्झ** परिभाषणसंतर्जनयोः । आद्यान्त्यावपि चान्तावित्येके । एषां शतरि ङीप् । त्वचित्वा । १३०१ **त्वच** संवरणे । क्त्वा । ऋचती । १३०२ **ऋच** स्तुतौ । शतरि ङीप् । उब्जनेति । १३०३ **उब्ज** आर्जवे[2] । ल्युट् । उज्झितेति । १३०४ **उज्झ** उत्सर्गे । दस्य चुत्वम् । कर्मणि क्तः ॥

> शत्रूल्लोभकरेफरीढितृपिता तृम्फाय तोपार्थिनो
> राज्ञो नित्यमतुम्पकान्वितुफती बन्धूंश्च संतुम्फती ।
> युद्धेषूदृपिता हितेष्वदृफिता यस्मिन्नृफन्ती सुरा-
> नृम्फार्हा पृतना स्थिता सुगुफितैर्माल्यैः कचान्गुम्फती ॥ ७४ ॥

यस्मिन् पृतना स्थिता । पृतनां विशिनष्टि—शत्रूल्लोभकरेफरीढितृपिता । शत्रूणामुल्लोभकस्य मोहकस्य रेफस्य युद्धस्य रीढ्या कथनेनास्माभिरेवं शत्रूनाकुलीकृत्य युद्धं कृतमिति परस्परोक्त्या तृपिता सदा संतुष्टा । तोपार्थिनो हिंसेच्छो राज्ञस्तृम्फाय संतोषाय अतुम्पकान् अहिंसकान् सदा वितुफती हिंसती बन्धूंश्च संतुम्फती हिंसती । उदृपिताः उच्चैः क्लेशिताः शत्रवो येषु तेषु युद्धेषु अदृपिता अक्लेशिता अप्रयत्ना । सुरान् ऋफन्ती हिंसती । एवंरूपत्वात् ऋम्फार्हा भगवत्कृतं वधमर्हतीति ऋम्फार्हा । सुगुफितैः सम्यग्बद्धैर्माल्यैः कचान् गुम्फती बध्नती । अनेन तस्या जितशत्रुत्वमुक्तम् ॥—उल्लोभकेति । १३०५ **लुभ** विमोहने । विमोहनं व्याकुलीकरणम् । ण्वुल् । रेफेति । १३०६ **रिफ** कत्थनयुद्धनिन्दाहिंसादानेषु । अस्माद् घञि रेफः । रीढीति । रिह इत्येके । क्तिन् । तृपिता । १३०७ **तृप** १३०८ **तृन्फ** तृप्तौ । प्रीणने द्रुमे । आद्यः तृफेत्येके । तृपेः

१. 'भर्त्सनयोः' इति धातुपाठे. २. अयं च धातुर्दकारोपधः. दकारस्य भत्वं भवति श्रुसंनिधाने ततो जश्त्वम्. तेन 'उब्जिजिषति' इतीष्टसिद्धिरिति स्पष्टं हयवरट्सूत्रे भाष्ये.

कर्तरि क्तः । तृम्फाय । तृम्फेर्घञ् । तोपेति । **१३०९ तुप १३१० तुन्प १३११ तुफ १३१२ तुन्फ** हिंसायाम् । तुपेर्घञ् । अतुम्पकान् । तुम्पेर्ण्वुल् । वितुफती । संतुम्फती । तुफितुम्फ्योः शतरि ङीप् । उद्दृपितेति । **१३१३ दृप १३१४ दृन्फ** उत्क्लेशे । आद्योऽपि फान्त इत्येके । दृपेः कर्मणि क्तः । अदृफिता । दृम्फेः कर्मणि क्तः । नकारलोपः । ऋफन्ती । **१३१५ ऋफ १३१६ ऋन्फ** हिंसायाम् । ऋफेः शतरि ङीप् । ऋम्फेति । ऋम्फेर्घञ् । सुगुफितैः । **१३१७ गुफ १३१८ गुन्फ** ग्रन्थे । गुफेः कर्मणि क्तः । गुम्फतीति । गुम्फेः शतरि ङीप् ॥

पीयूषोभितहेमकुम्भविशुभद्वक्षोजशुम्भत्तमा
दृब्धस्रग्धरचृत्तकैश्यविधितां शोभां जुडन्त्योऽजुनन् ।
नार्यः संमृडदालिकेलिपृडिता यस्मिन्पृणन्त्यः प्रिया-
न्नित्यं तैर्वृणितामृणालकमनीयाङ्ग्यो वितोणाशयाः ॥ ७५ ॥

यस्मिन्नार्योऽजुनन्समचरन् । कीदृश्यः । पीयूषेणोभितः पूरितो यो हेमकुम्भस्तद्वद्विशुभद्भ्यां शोभमानाभ्यां वक्षोजाभ्यां शुम्भत्तमा अत्यन्तं शोभमानाः । दृब्धस्रजो ग्रथितायां मालाया धरं धारकं चृत्तं भङ्ग्यनुरूपं बद्धं च यत्कैश्यं केशसमूहस्तेन विधितां विहितां शोभां जुडन्त्यः प्राप्नुवत्यः । संमृडदालिकेलिपृडिता संमृडन्तीनां सुखायमानानामालीनां केल्यां पृडिताः सुखिताः । प्रियान्पृणन्त्यः । तैर्नित्यं वृणिताः प्रीणिताः । मृणालकमनीयाङ्ग्यो मृणालवत्कोमलमङ्गं यासां ताः । वितोणाशयाः । वितोणो विगतकौटिल्य आशयो यासां ताः । अनेन नगरगर्भस्य सुखकरत्वमुक्तम् ॥—उभितेति । **१३१९ उभ १३२० उन्भ** पूरणे । उभेः कर्मणि क्तः । कुम्भेति । केन जलेन उभ्यते इति कुम्भः । उम्भेः कर्मणि घञ् । पृषोदरादित्वादकारलोपः । विशुभत् । शुम्भदिति । **१३२१ शुभ १३२२ शुन्भ** शोभार्थे । हिंसायां च द्रुमे । द्वयोः शता । दृब्धेति । **१३२३ दृभी** ग्रन्थे । कर्मणि क्तः । चृत्तेति । **१३२४ चृती** हिंसाग्रन्थनयोः । प्रागवत् क्तः । विधिताम् । **१३२५ विध** विधाने । प्रागवत् क्तः । जुडन्त्यः । **१३२६ जुड** गतौ । जुन इत्येके । जुडेः शतरि ङीप् । अजुनन् । जुनेर्लङ् । संमृडदिति । **१३२७ मृड** सुखने । शता । पृडितेति । **१३२८ पृड** च । कर्मणि क्तः । पृणन्त्यः । **१३२९ पृण** प्रीणने । शतरि ङीप् । वृणिताः । **१३३० वृणे**ति च भाष्ये । कर्मणि क्तः । मृणालेति । **१३३१ मृण** हिंसायाम् । 'तमिबिडिमृणिकुलिपलिपञ्चिभ्यश्च' इति भोजोक्तेः कालन् । तोणेति । **१३३२ तुण** कौटिल्ये । घञ् ॥

चाणूरादयोऽपि पुरे सुखं स्थिता इत्याह—

ईशस्य पुण्यसुगमस्य वधं मुणन्तो
मल्लाश्च यत्र चुकुणुः शुनका इवोच्चैः ।

विद्रोणनेष्वघुणिता मदघूर्णदक्षा
युद्धे सुरानपि खरोत्कुरिताः खुरन्तः ॥ ७६ ॥

यत्र मल्लाश्च शुनकाः श्वान इव उच्चैश्चुकुणुः शब्दमकुर्वन् । कीदृशः । पुण्यसुगमस्य ईशस्य वधं मुणन्तः प्रतिजानानाः । विद्रोणनेषु हिंसासु अघुणिता असंभ्रान्ताः । मदेन घूर्णन्ति भ्रमन्ति अक्षीणि येषां ते मदघूर्णदक्षाः । युद्धे सुरानपि खरोत्कुरिताः खरं परुषमुत्कुरितमुच्चैस्तरशब्दो येषां तादृशाः । खुरन्तश्छिन्दन्तः । अनेन पुरस्य दुःसेव्यत्वं द्योतितम् ॥—पुण्येति । १३३३ पुण कर्मणि शुभे । 'जनिकृतिपुणिभ्यः क्यप्' इति भोजोक्तेः क्यप् । मुणन्तः । १३३४ मुण प्रतिज्ञाने । शता । चुकुणुः । १३३५ कुण शब्दोपकरणयोः । उपकरणं वाद्यवादनसाधनभावः । लिट् । शुनकाः । १३३६ शुन गतौ । क्वुन् । विद्रोणनेषु ।१३३७ द्रुण हिंसागतिकौटिल्येषु । ल्युट् । अघुणिताः । १३३८ घुण १३३९ घूर्ण भ्रमणे । घुणेः कर्तरि क्तः । घूर्णदिति । घूर्णेः शता । सुरान् । १३४० षुर ऐश्वर्यदीप्त्योः । 'इगुपध–' इति कः । उत्कुरितेति । १३४१ कुर शब्दे । 'नपुंसके भावे क्तः' । खुरन्तः । १३४२ खुर छेदने । शता ॥

कंसस्य सुखासनस्थानमिदमित्याह—

मुरादिबन्धुः क्षुरघोरचेताः पुरन्खलानां जनजीवबर्ही ।
कंसः स्थितो यत्र ततर्ह लोकं स्तृढामरस्तृंहकरानभीच्छन् ॥७७॥

कंसो यत्र स्थितो लोकं ततर्ह । हिंसितवान् । कीदृशः कंसः । मुरादयो बन्धवो यस्य सः । क्षुर इव घोरं चेतो यस्य सः । खलानां पुरन् अग्रे गच्छन् । श्रेष्ठ इत्यर्थः । जनजीवबर्ही जनजीवमुन्मूलयितुं त्यक्तुं शीलं यस्य सः । स्तृढा अर्दिता अमरा येन सः । तृंहकरान् हिंसाकरणशीलान् आभीक्ष्ण्येन इच्छन् । एतैः कंसस्य लोकहिंसायां सौकर्यमुक्तम् ॥—मुरेति । १३४३ मुर संवेष्टने । कः क्षुरेति । १३४४ क्षुर विलेखने । खनने च द्रुमे । कः । घोरेति । १३४५ घुर भीमार्थशब्दयोः । घञ् । पुरन् । १३४६ पुर अग्रगमने । शता । जनजीवबर्ही । १३४७ वृह्व उद्यमे[1] । स चोन्मूलनम् । णिनिः । ततर्ह । १३४८ तृह्व १३४९ स्तृह्व[2] १३५० तृन्ह्व हिंसार्थाः । ष्ट्रन्ह्व इत्यप्येके । तृहेर्लिट् । स्तृढेति । स्तृहेः कर्मणि क्तः । तृंहेति । तृंहेर्घञ् । अभीच्छन् । १३५१ इष इच्छायाम् । केचिदुदितं पठन्ति । शता ॥

तत्रापि भाग्यवन्तो भगवन्तमतृप्तदृष्ट्यो दृष्टवन्त इत्याह—

गतनिमेषमुदैक्षि किलन्विभुः सुकृतिभिः स जगत्तिलकाकृतिः ।
चिलितपीतपटेन चलन्निलन्नविलितोरुकृपां परितो दृशम् ॥ ७८ ॥

किलन् क्रीडन् स विभुः सुकृतिभिर्गतनिमेषं यथा तथा उदैक्षि उच्चैरधिकं दृष्टः ।

---

१. 'उद्यमने' इति धातुपाठः. २. षोपदिष्टोऽयं पुस्तकद्वयेऽपि.

विभुं विशिनष्टि—चिलितपीतपटेन वेष्टितेन पीताम्बरेण चलन् विलसन् । जगत्तिलकाकृतिर्लोकालंकारभूतश्रीदेहः । अविलितोरुकृपामविलिता असंवृता प्रकाशिता उर्वी कृपा यस्यां तां दृशं परित इलन् प्रेरयन् । एतैर्भक्तानन्दकरत्वमुक्तम् ॥—निमेषेति । **१३५२ मिष** स्पर्धायाम् । अयमुन्मीलनार्थोऽपि । अस्माद्धञ् । किलन् । **१३५३ किल** श्वैत्यक्रीडनयोः [श्वत्य इत्येके ।] शता । तिलकेति । **१३५४ तिल** स्नेहने । इगुपधात् केति कः । अस्मादिवार्थे कन् । चिलितेति । **१३५५ चिल** वसने । कर्मणि क्तः । चलन् । इलन् । **१३५६ चल**विलसने । **१३५७ इल** स्वप्नप्रेरणयोः[1] । द्वयोः शता । अविलितेति । **१३५८ विल** संवरणे । कर्मणि क्तः ॥

भक्तमनोनन्दाय अतिक्रूरेऽप्यत्र क्रीडितवानित्याह—

बिलशयप्रतिमैर्निलिते पुरे स हि सुहृत्सु हिलन्नचरत्सुखम् ।
शिलितधान्यसिलप्रणतो हरिः प्रमिलतां हृदये लिखिताकृतिः ॥ ७९ ॥

स हरिः । हि प्रसिद्धौ । बिलशयप्रतिमैः सर्पसमैर्दुष्टैर्निलिते गहनीभूते पुरे सुहृत्सु अक्रूरादिषु हिलन् स्वाभिप्रायं प्रकाशयन् यथा तथा अचरत् । कीदृशः । शिलितधान्यसिलप्रणतः शिलितं कणश आत्तं धान्यानां सिलं क्षेत्रविकीर्णवीजं यैस्तैः प्रणतः । प्रमिलतां स्वस्मिन् सम्यक् संश्लिष्यतां हृदये लिखिता तद्वत्स्थिरीभूता आकृतिः श्रीमूर्तिर्यस्य सः ॥—बिलेति । **१३५९ बिल** भेदने । अस्याकर्मकत्वं स्वाम्याह । अस्मादिगुपधात् कः । निलिते । **१३६० णिल** गहने । कर्तरि क्तः । हिलन् । **१३६१ हिल** भावकरणे । अभिप्रायसूचनं तत् । शता । शिलितेति । **१३६२ शिल १३६३ षिल** उञ्छे । शिलेः कर्मणि क्तः । सिलेति । उञ्छ्यत इति सिलः । घञर्थे कः । प्रमिलताम् । **१३६४ मिल** श्लेषणे । शता । लिखितेति । **१३६५ लिख** अक्षरविन्यासे । कर्मणि क्तः ।

अथ कंसस्यातिभयेन दृढध्यानसिद्धये धनुर्भञ्जनं कृतमित्याह—

ततोऽतिकुटिलाशयैः प्रपुटितैः कुचज्जीवितै-
र्गुजद्भिरपि सैनिकैः सुगुडितां डिपद्भिर्जनान् ।
सुधाच्छुरितविस्फुटस्सितरुचैव धैर्यं मुट-
न्धनुस्त्रुटनतो मनाक्प्रतुटनाय शालामगात् ॥ ८० ॥

ततो धनुस्त्रुटनतश्चापच्छेदनेन मनाक् प्रतुटनाय कंसस्य कलहं कर्तुं शालां धनुःशालामगात् प्राप्तः । कथमगात् । सुधया छुरिता लिप्ता विस्फुटा विकसिता प्रकाशिता या सितरुक् तयैव धैर्यं मुटन् प्रमर्दयन् नाशयन् । कीदृशीं शालाम् । सैनिकैर्भटैर्योद्धृभिः । सुगुडितां सम्यग्रक्षिताम् । कीदृशैर्भटैः । अतिकुटिलाशयैर्वक्रचित्तैः । प्रपुटितैः सम्यगेकत्र संघातीभूतैः । जनान् डिपद्भिः क्षिपद्भिर्निरस्यद्भिः । गुजद्भिः सदा क्रन्दद्भिः ।

1. 'क्षेपणयोः' इति धातुपाठः.

कुचज्जीवितैः कुचत् संकुचितं गतप्रायं जीवितं प्राणा येषां तैः ॥—कुटिलेति । १३६६ **कुट** कौटिल्ये । इतः कुङन्ताः कुटादयः । अस्मात् 'गुपादिभ्यः कित्' इतीलच् । अत्र कित्त्वं वृथा । ङित्वेनैव गुणाभावात् । प्रपुटितैः । १३६७ **पुट** संश्लेषणे । कर्तरि क्तः । कुचदिति । १३६८ **कुच** संकोचने । शता । गुजद्भिः । १३६९ **गुज** शब्दे । अव्यक्त इत्येके । शता । सुगुडिताम् । १३७० **गुड** रक्षायाम् । कर्मणि क्तः । डिपद्भिः । १३७१ **डिप** क्षेपे । शता । छुरितेति । १३७२ **छुर** छेदने । लेपनेऽपि दृष्टः । कर्मणि क्तः । विस्फुटेति । १३७३ **स्फुट** विकसने । कः । मुटन् । १३७४ **मुट** आक्षेपमर्दनयोः । शता । त्रुटनतः । १३७५ **त्रुट** छेदने । प्रायोऽस्य द्वैधीभावे वृत्तिः । ल्युट् । प्रतुटनाय । १३७६ **तुट** कलहकर्मणि । ल्युट् ॥

पोड्योऽयं चुडतेति केऽपि जुडतेत्यन्ये कडन्तोऽलुठ-
न्देवे स्वैर्लुलिते क्रुडत्विषि कुडद्गात्रे पुडित्वादरम् ।
ईशश्चाघुटितस्तुडन्खलमुदं रोषं थुडन्प्रस्फुड-
न्धाम स्वं स्फुरितो जगाम धनुषः पार्श्वं क्षणादस्फुलन् ॥ ८१ ॥

केऽपि भटाः 'अयं पोड्यश्छेद्यः । एनं सर्वे चुडत छिन्त' इत्येवं वदन्तः, अन्ये 'जुडत बध्नीत' इति वदन्तः, कडन्तो माद्यन्तः सन्तः स्वैरात्मीयैर्लुलिते संश्लिष्टे क्रुडत्विषि घनीभवच्छोभे कुडद्गात्रे शिशुभवद्देहेऽपि देवे आदरं बहुमानं पुडित्वा त्यक्त्वा अलुठन् संश्लिष्टाः संघातीभूता आसन् । ईशश्च ईशोऽपि अघुटितोऽप्रतिहतः खलमुदं तुडन् दारयन् नाशयन् रोषं थुडन्नाच्छादयन् स्वमसाधारणं धाम तेजः प्रभावं प्रस्फुडन् तिरोहितं कुर्वन् स्फुरितः शोभमानः अस्फुलन्नकम्पमानश्च सन् क्षणाच्छीघ्रं धनुषः पार्श्वं समीपं जगाम ॥—पोड्य इति । १३७७ **पुंड**[1] १३७८ **चुड** छेदने । पुडेर्ण्यत् । चुडत । चुडेर्लोट् । जुडत । १३७९ **जुड**[2] बन्धने । लोट् । कडन्तः । १३८० **कड** मदे । शता । अलुठन् । १३८१ **लुठ** संश्लेषणे । लुडेत्येके । लुठेर्लङ् । लुलितेति । लुडेः कर्तरि क्तः । क्रुडदिति । १३८२ **क्रुड** घनत्वे । सान्द्रता तत् । शता । कुडदिति । १३८३ **कुड** बाल्ये । संघात इत्येके । भक्षणे च द्रुमे । शता । पुडित्वा । १३८४ **पुड** उत्सर्गे । क्त्वा । अघुटितः । १३८५ **घुट** प्रतिघाते । कर्तरि क्तः । तुडन् । १३८६ **तुड** तोडने । तच्च भेदनम् । शता । थुडन् । प्रस्फुडन् । १३८७ **थुड** १३८८ **स्फुड**[3] संवरणे । कुड छुड इत्येके । आद्ययोः शता । स्फुरितः १३८९ **स्फुर** १३९० **स्फुल** संचलने । स्फुर स्फुरणे । स्फुर संचलने इति केचित् । तत्र स्फुरणं शोभा । स्फुरेः कर्तरि क्तः । अस्फुलन् । स्फुलेः शता ॥

क्षौभेण स्फुडितं स्रजा निचुलितं चात्रोड्यशोभं धनु-
र्गेहक्रोडतले स मोदकुलितो दृष्ट्वागुरिष्ट क्षणात् ।

१. 'चुट छुट' इति धातुपाठे. २. 'जुट' इति धातुपाठे. ३. स्थुड' इति धातुपाठे.

नूत्या किं भयधूतविद्रुतगुवल्लोकं तदा तद्ध्रुव-
त्कोणदडं कुवमानमैक्षि दलितं भोजेश्वराकूतवत् ॥ ८२ ॥

स क्षौमेण स्फुडितं छादितं स्रजा निचुलितं संवृतं चैवंरूपमप्यव्रोड्यशोभमनाच्छादनीयप्रभं धनुर्गेहक्रोडतले गृहस्य संवृतप्रदेशेऽन्तर्भागे दृष्ट्वा मोदे निमग्नः सन् क्षणात् शीघ्रमगुरिष्टोद्धृतवान् । नूत्या किं बहुप्रशंसया किम् । न किंचित् कार्यम् । तदा ध्रुवत् स्थिरीभवत् तत् कोदण्डं भयधूतविद्रुतगुवल्लोकं भयेन धूतो वेपितो विद्रुतो धावितो गुवत् पुरीषमुत्सृजंश्च लोको जनो यस्मिञ्शब्दे तथा कुवमानं शब्दायमानं भोजेश्वरस्य कंसस्याकूतमभिप्राय इव दलितं खण्डितमैक्षि सर्वैर्दृष्टम् ॥—स्फुडितमिति । **१३९१ स्फुड १३९२ चुड १३९३ व्रुड** संवरणे । कुडेत्यप्येके । स्फुडेः कर्मणि क्तः । निचुलितम् । चुडेः प्राग्वत् क्तः । अव्रोड्येति । व्रुडेर्ण्यत् । क्रोडेति । क्रुडेर्घञ् । कुलितः ।**१३९४ कुड**[1] **१३९५ रुड** निमज्जने इति चैके । कुडेः कर्तरि क्तः । व्रश्चादय उदात्ता उदात्तेतः । अगुरिष्ट । **१३९६ गुरी** उद्यमने[2] । उद्धरणं तत् । अयमुदात्तोऽनुदात्तेत् । लुङ् । नूत्या । **१३९७ णू** स्तवने । क्तिन् । धूतेति । **१३९८ धू** विधूनने । क्तः । गुवदिति । **१३९९ गु** पुरीषोत्सर्गे । उवङ् । शता । ध्रुवत् । **१४०० ध्रु** गतिस्थैर्ययोः । ध्रुव इत्येके । द्वयोः सह शता । अनजन्तस्य सेट्त्वं भेदः । गुध्रू अनुदात्तौ । ध्रुव उदात्तः । णूप्रभृतयः परस्मैभाषाः । कुवमानम् । **१४०१ कुङ्** शब्दे । शानच् । आकूतेति । कूङित्येके । क्तः । वृत् । कुटादिर्वृत्तः ॥

अनेन धनुर्भङ्गेन कंसस्य महद् भयं जातमित्याह—

व्यापारेऽत्र तदामरानपि रियन्नाशा पियन्नाधित-
क्रौर्योत्क्षीणधनुष्प्रसूतनिनदः कंसे व्यकारीद्गरम् ।
येनानादरवान्धृतोऽपि स चलन्पृच्छन्किमित्युत्सृज-
न्धैर्यं मग्नमनाश्च हृद्रुजि चिरं भुग्नाननस्तस्थिवान् ॥ ८३ ॥

तदा अत्रेदृशे व्यापारेऽमरानपि रियन्प्राप्नुवन्नाशा दिशः पियन्व्याप्नुवन्नाधितक्रौर्योत्क्षीणधनुष्प्रसूतनिनदः । आधितक्रौर्यः सम्यग्धारितक्रौर्यः, उत्क्षीण उद्गतः धनुषा प्रसूतः प्रेरितश्च यो निनदः स कंसे गरं विषं व्यकारीत्क्षिप्तवान् । अत्यन्तपीडामकरोदित्यर्थः । येन सोऽनादरवान्निरस्तबहुमानः सन् धृतोऽवस्थितोऽपि चलन्वेपमानः किमिदमिति पृच्छन्धैर्यमुत्सृजंस्त्यजन्हृद्रुजि मग्नमनाश्च चिरं भुग्नाननोऽवनतमुखस्तस्थिवान्स्थितोऽभूत्॥—व्यापार इति । **१४०२ पृङ्** व्यायामे । स च प्रवृत्तिमात्रम् । प्रायेण व्याङ्पूर्वोऽयम् । घञ् । अमरान् । **१४०३ मृङ्** प्राणत्यागे । अच् । कुङादय आत्मनेभाषा अनुदात्ताः । कुङ्वर्जम् । रियन् । पियन् । **१४०४ रि १४०५ पि** गतौ । द्वयोः शता । आधितेति । **१४०६ धि** धारणे । गताविति द्रुमे । कर्मणि क्तः । उत्क्षीणेति । **१४०७ क्षि** निवास-

---

१ 'क्रुड भृड निमज्जने' इति धातुपाठे. २. 'उद्यमे' इति पाठः.

गत्योः । कर्तरि क्तः । 'निष्ठायामण्यदर्थे' इति दीर्घः । 'क्षियो दीर्घात्' इति नत्वम् । प्रसूतेति । १४०८ षू प्रेरणे । कर्मणि क्तः । व्यकारीत् । १४०९ कॄ विक्षेपे । लुङ् । गरम् । १४१० गॄ निगरणे । अच् । रियत्यादयः परस्मैभाषाः । अनादरेति । १४११ दृङ् आदरे । अत्रैव निपातनात् घञ्यवृद्धिः । धृतः । १४१२ धृङ् अवस्थाने । धारणे च द्रुमे । अनुदात्तावात्मनेभाषौ । पृच्छन् । १४१३ प्रच्छ ज्ञीप्सायाम् । तुक् । शता । 'ग्रहिज्या–' इति संप्रसारणम् । वृत् । किरादिर्वृत्तः । उत्सृजन् । १४१४ सृज विसर्गे । विसर्गः उत्पादनं त्यागश्च । शता । भग्नेति । १४१५ टु मस्जो शुद्धौ । कर्तरि क्तः । रुजि । १४१६ रुजो भङ्गे । भावे क्विप् । भुग्नेति । १४१७ भुजो कौटिल्ये । कर्तरि क्तः ॥

चापरक्षकेषु हतेषु कंसः पर्याकुलचित्तोऽपि मल्लयुद्धोद्योगमकरोदित्याह—

रोषच्छुप्तधियाथ रोष्टुमभितो योधान्द्विषद्रेशका-
नालिष्टानजितो जघान धनुषः खण्डेन मर्मस्पृशा ।
ते विच्छायदघा दिवं प्रविविशुः कंसो विमर्शाकुलो
मल्लादीननुदत्परेद्यवि हरेरुत्सन्नशत्रोर्वधे ॥ ८४ ॥

अथ अजितो रोषच्छुप्तधिया रोषेण छुप्तया स्पृष्टया धिया हेतुभूतया रोष्टुं हन्तुमभितः सर्वत आलिष्टानागतान् योधान् भटान् मर्मस्पृशा मर्मवेधिना धनुषः खण्डेन जघान । कीदृशान् योधान् । द्विषतां रेशकान् हिंसकान् । ते योधाः विच्छायदघा गच्छदघाः सन्तः दिवं भगवल्लोकं प्रविविशुः । कंसो विमर्शाकुलश्चिन्तया व्याकुलोऽपि मल्लादीन् परेद्यवि ऊर्ध्वदिने उत्सन्नशत्रोरपि हरेर्वधेऽनुदत् प्रेरितवान् ॥— छुप्तेति । १४१८ छुप स्पर्शे[1] । कर्मणि क्तः । रोष्टुम् । १४१९ रुश १४२० रिश हिंसायाम् । रुशेस्तुमुन् । रेशकान् । रिशेर्ण्वुल् । आलिष्टान् । १४२१ लिश गतौ । कर्तरि क्तः । मर्मस्पृशा । १४२२ स्पृश संस्पर्शने । 'स्पृशोऽनुदके–' इति क्विन् । विच्छायदिति । १४२३ विच्छ गतौ । 'गुपूधूपविच्छि–' इत्यायान्ताच्छता । प्रविविशुः । १४२४ विश प्रवेशने । लिट् । विमर्शेति । १४२५ मृश आमर्शने । स्पर्शनं तत् । घञ् । अनुदत् । १४२६ णुद प्रेरणे । लङ् । उत्सन्नेति । १४२७ षद्लृ विशरणगत्यवसादनेषु । कर्मणि क्तः । शत्रोः । १४२८ शद्लृ शातने[2] । अस्माण्णिजन्तात् 'शादे ह्रस्वश्च' इति भोजोक्तेः क्रुन् । प्रच्छादय उदात्तेतः । अनुदात्ता विच्छिवर्जम् ॥

मित्रैः संमिलमान एत्य नगरोद्यानं विमुञ्चन्भियं
गोपानां भयलोपिवाग्भिरबलाविन्नानुलेपं वहन् ।

---

१. 'स्पर्शने' इति पाठः. २. 'शातेः' इति पाठः. कौमुद्यां तु 'रुशातिभ्यां क्रुन् । शातयतीति शत्रुः । प्रज्ञादौ पाठाद्ध्रस्वत्वम्' इत्युक्तम्.

भुक्त्वा गोरससिक्तमन्नमजितः कंसस्य कृन्तन्मुदं
तं खेत्स्यन्पिशिताशदारुणमसौ मोदेन निन्ये निशाम् ॥ ८४ ॥

असावजितो मित्रैः संमिलमानो नगरोद्यानमेत्य भयलोपिवाग्भिर्भयनिरासकैर्वचनैर्गोपानां भयं विमुञ्चंस्त्यजन्[१] अवलाविन्नं कुब्जाया लब्धमनुलेपं वहन् धारयंश्च गोरससिक्तमन्नं भुक्त्वा कंसस्य मुदं कृन्तंश्छिन्दन् निरस्यन् तं कंसं खेत्स्यन् निहनिष्यन् । हेतौ शता । मोदेन निशां निन्ये ॥—संमिलमान इति । १४२९ मिल संमेग । उदात्तः स्वरितेत् । शानच् । विमुञ्चन् । [१४३० मुच्लृ मोक्षणे ।] इतः परं मुचादित्वान्नुम् । शता । भयलोपीति । १४३१ लुप्लृ छेदने । णिनिः । विन्नेति । १४३२ विद्लृ लाभे । कर्मणि क्तः । अनुलेपम् । १४३३ लिप उपदेहे । अस्य दहनार्थत्वमप्याह शंकराचार्यः । अस्माद्धञ् । सिक्तम् । १४३४ षिच क्षरणे । तच्चेहार्द्रीभावनम् । कर्मणि क्तः । मुचादयोऽनुदात्ताः स्वरितेतः । विन्दिः सेडिति[२] केचित् । कृन्तन् । १४३५ कृती छेदने । उदात्त उदात्तेत् । छता । खेत्स्यन् । १४३६ खिद परिघाते । अनुदात्त उदात्तेत् । लृडन्ताच्छता । पिशितेति । १४३७ पिश अवयवे । अयं दीपनायामपि । उदात्त उदात्तेत् । भक्षणार्थमवयवशः क्रियते इत्यर्थे 'पिशिपृषिभ्यां कित्' इति भोजोक्तेरितच् । वृत् । तुदादयो मुचादयश्च वृत्ताः । शविकरणं समाप्तम् ॥

इति सव्याख्याने धातुकाव्ये द्वितीयः सर्गः ।

तृतीयः सर्गः ।

अथानन्ताभारहरणोद्यतस्यानन्तस्य भगवतः श्रीकृष्णस्य तृतीयदिवसवृत्तं सप्रपञ्चं वर्णयिष्यन् प्रथमतो रङ्गप्रवेशं वक्तुं पीठिकां प्रतिष्ठापयति—

रुन्धन्दिशो दिनमुखेऽथ जगन्ति भिन्द-
न्प्रच्छिन्नसंशयमतिर्मुदमाशु रिञ्चन् ।
भेरीरवश्चतुरघातविविक्तताल-
श्चुक्षोद कर्णमुदयुङ्क्त च मल्ललोकः ॥ १ ॥

अथ दिनमुखे भेरीरवः कर्णं चुक्षोद श्रोत्रपुटं चूर्णीचकार । कीदृशो भेरीरवः । दिशो रुन्धन् पूरयन् । जगन्ति लोकान् भिन्दन् विभिद्य बहिर्गच्छन् । प्रच्छिन्नसंशया कंसव्यवसायबोधिनी मतिर्येन(?)सः । अत एव सर्वेषां मुदं रिञ्चन् त्यजन् चतुरेण विदग्धेन घातेनाभिहननेन विविक्ताः स्पष्टीकृतास्ताला यस्मिन् सः । मल्ललोक उदयुङ्क्त चोद्युक्तोऽभूच्च ॥—रुन्धन्निति ।१४३८ रुधिर् आवरणे । भिन्दन् । १४३९ भिदिर् विदारणे । द्वयोः शता । प्रच्छिन्नेति । १४४० छिदिर् द्वैधीकरणे । कर्मणि क्तः । रिञ्चन् । १४४१ रि-

---

१. 'त्याजयन्' इति भवेत्. २. 'सेडिसि' इति पाठः.

चिर् विरेचने । शता । विविक्तेति । १४४२ **विचिर्** पृथग्भावे । कर्मणि क्तः । चुक्षोद । १४४३ **क्षुदिर्** संपेषणे । लिट् । उदयुङ्क्त । १४४४ **युजिर्** योगे । लङ् । 'अजादेरप्यजन्तादप्युपसर्गात्तङ्इष्यते' इति तङ्केव । रुधादयोऽनुदात्ताः [स्वरितेत उभयतोभाषाः] ॥

संच्छृण्णगात्रमथ शात्रवतर्दिनस्ते
चाणूरमुष्टिकमुखा वसनान्यकृन्तन् ।
इन्धानखेदमुदविन्त विशिष्टलोकः
पेक्ष्यत्सु माधवमभङ्गभुजेषु तेषु ॥ २ ॥

अथ ते चाणूरमुष्टिकमुखाः संच्छृण्णगात्रं सम्यक् दीप्तं गात्रं यस्मिन् तथा वसनानि मल्लयुद्धोचितानि अकृन्तन्नवेष्टन्त । शात्रवाणां शत्रूणां तर्दनं हिंसनमनादरो वा शीलं येषां ते मल्लाः । विशिष्टलोकः सज्जनस्तेषु माधवं पेक्ष्यत्सु संचूर्णयिष्यत्सु । हेतौ शता । इन्धानखेदं वर्धमानं दुःखं यस्मिन् तथा उदविन्त उच्चैर्विचारमकरोत् । अभङ्गभुजेषु भङ्गरहितः शक्तिक्षयरहितो भुजो येषां तेषु ॥—संच्छृण्णेति । १४४५ **उच्छृदिर्** दीप्तिदेवनयोः । देवनं क्रीडाविजिगीषादि । 'दीप्तिवमनयोः' इत्येके । अस्मिन् कर्तरि क्तः । शात्रवतर्दिनः । १४४६ **उतृदिर्** हिंसानादरयोः । णिनिः द्वावुदात्तौ । रुधादयः स्वरितेतः । इरितश्च । अकृन्तन् । १४४७ **कृती** वेष्टने । उदात्त उदात्तेत् । लङ् । इन्धानेति । १४४८ ञि **इन्धी** दीप्तौ । दीपनायामपि । उदात्तोऽनुदात्तेत् । अस्माच्छानच् । खेदम् । १४४९ **खिद** दैन्ये । घञ् । उदविन्त । १४५० **विद** विचारणे । लङ् । अनुदात्तावनुदात्तेतौ । विशिष्टेति । १४५१ **शिष्लृ** विशेषणे । उत्कर्षार्थत्वात् । अकर्मकादस्मात् कर्तरि क्तः । पेक्ष्यत्सु । १४५२ **पिष्लृ** संचूर्णने । लृटि हेतौ शता । अभङ्गेति । १४५३ **भन्जो** आमर्दने । घञ् । भुजेति । १४५४ **भुज** पालनाभ्यवहारयोः । अनुभवेऽपि । 'भुजन्युब्जौ पाण्युपतापयोः' इति निपातितः । शिषादयोऽनुदात्ता [उदात्तेतः] ॥

को नस्तृणेढि हिनसाम समुत्तमास्रै-
स्तं गोपसूनुमिति तैलवाक्तगात्राः ।
संतक्तनद्धवसनाः परिवेगवृक्ता
रङ्गं समेत्य पपृचुः स्वजनांश्च मल्लाः ॥ ३ ॥

को नोऽस्मांस्तृणेढि निहन्ति । न कोऽपि तं गोपसूनुनास्रै रुधिरैः समुत्तं सिक्ताङ्गं कृत्वा वयं हिनसाम मारयाम । मल्ला इति एवमुक्त्वा रङ्गं समेत्य स्वजनान् पपृचुर्योजितवन्तः । कीदृशा मल्लाः । संतक्तं संकोचितं यथा तथा नद्धं बद्धं वसनं यैस्ते । परिवेगेन भयेन कम्पेन वा वृक्ता हीनाः ॥—तृणेढीति । १४५५ **तृह** १४५६ **हिसि** हिंसायाम् ।

तृहेर्लेट् । हिनसाम । हिंसेर्लोट् । समुत्तम् । **१४५७ उन्दी** क्लेदने । कर्मणि क्तः । 'नुद-विदोन्द–' इति नत्वाभावे रूपम् । अक्तेति । **१४५८ अन्जू** व्यक्तिम्रक्षणगतिषु । व्यक्तिः प्रकाशनम् । म्रक्षणं मिश्रीकरणम् । अस्मात्कर्मणि क्तः । संतक्तेति । **१४५९ तन्चू** संकोचने । तन्जू इत्येके । द्वयोस्तन्त्रेण कर्मणि क्तः । परिवेगेति । **१४६० ओ विजी** भयचलनयोः । घञ् । वृक्ताः । **१४६१ वृजी** वर्जने । वृतौ च द्रुमे । 'वृची वरणे' इति केचित् । कर्मणि क्तः । पपृचुः । **१४६२ पृची** संपर्के । सकर्मकोऽयं भट्टिनोक्तः । तस्माल्लिट् । तृहादय उदात्ता उदात्तेतः । वृत् रुधादयो वृत्ताः । इति श्नम्-विकरणम् ॥

तन्वन्स मञ्चभुवि सातरसः स्वबन्धू-
नक्षण्वतां क्षितिकरो मुदमर्णवानः ।
कंसस्तृणीकृतरिपुर्घृणिमान्वतार्प्तिं
मन्वान एकमथमञ्चमलंचकार ॥ ४ ॥

अथ स कंसः स्वबन्धून् मञ्चभुवि तन्वन् विस्तारेण निवेशयन् तत्तत्स्थानेषु कुर्वन् वा । वतार्प्तिं प्रार्थितप्राप्तिं मन्वानः एकं मञ्चमलंचकार अलंकृतवान् । सातरसो दत्त-रसः । बन्धूनामित्यर्थात् । अक्षण्वतामहिंसकानां क्षितिकरः हिंसनकृत् । मुदमर्णवानः प्राप्नुवन् । घृणिमाञ्शोभावान् ॥—तन्वन् । **१४६३ तनु** विस्तारे । अयं कृञर्थेऽपि । अस्माच्छता । सातेति । **१४६४ षणु** दाने । कर्मणि क्ते । 'जनसन–' इति आत्वम् । अक्षण्वताम् । **१४६५ क्षणु** हिंसायाम् । **१४६६ क्षिणु** च । क्षणेः शता । क्षितीति । क्षिणेः क्तिन् । 'अनुदात्तोपदेश–' इति नलोपः । अर्णवानः । **१४६७ ऋणु** गतौ । शानच् । तृणीकृतेति । **१४६८ तृणु** अदने । घञर्थे कः । तृणम् । तस्मात् अभूततद्भावे इति च्विः । घृणीति । **१४६९ घृणु** संदीपने । घण इत्येके । 'इकृषादिभ्यः' इति घृणेरिक् । तनादय उदात्ताः स्वरितेतः । वतेति । **१४७० वनु** याचने । वनेः कर्मणि क्तः । मन्वानः । **१४७१ मनु** अवबोधने । शानच् । उदात्तावनुदात्तेतौ । वनुः परस्मैपदीति चान्द्राः । अलंचकार । **१४७२ डु कृञ्** करणे । अनुदात्त उभय-तोभाषः । अस्माल्लिट् । उविकरणं समाप्तम् ॥

अथ भगवतो रङ्गप्रवेशमाह—

क्रीणन्गुणैर्जनमतिं प्रियरूप ईशो
मांसश्रियां प्रमयकृत्सितपीतचेलः ।

---

१. 'अवृतकृता इत्येके । तेन छुनत्तीति सिद्धम्' इति क्वचिदधिकः पाठः. २. 'दीप्तौ' इति धातुपाठे.

मोदस्कुतोऽथ कबरीं प्रयुनन्सरामः
क्रूनन्मृदङ्गमिह रङ्गमगादरिद्रूः ॥ ५ ॥

अथेशः कबरीं प्रयुनन् बध्नन् सरामो रामेण सहित इह अस्मिन् काले रङ्गमगात् । कीदृशः । गुणैर्जनमतिं क्रीणन् विनिमयन् वशीकुर्वन् मांसश्रियां मांसपाचकानां तद्भक्षिणां प्रमयकृत् हिंसनकृत् सितपीतचेलो बद्धपीताम्बरो मोदे स्कुत आप्लुतः । अरिद्रूः शत्रुहिंसकः । क्रूनन्मृदङ्गम् । क्रूनन् शब्दायमानो मृदङ्गो यस्मिंस्तं रङ्गम् ॥—क्रीणन्निति । १४७३ डु क्रीञ् द्रव्यविनिमये । शता । प्रियेति । १४७४ प्रीञ् तर्पणे कान्तौ च । कान्तिः कामना । 'इगुपधज्ञाप्रीकिरः कः' इति कः । मांसश्रियाम् । १४७५ श्रीञ् पाके । क्विप् । प्रमयेति । १४७६ मीञ् हिंसायाम् । 'एरच्' । सितेति । १४७७ षिञ् बन्धने । कर्मणि क्तः । स्कुतेति । १४७८ स्कुञ् आप्रवणे । आप्लवनं तत् । आवरण इत्येके । उद्धृताविति द्रुमे । अस्मात्कर्तरि क्तः । युनन् । १४७९ युञ् बन्धने । शता । क्र्यादयोऽनुदात्ता उभयतोभाषाः । क्रूनदिति । १४८० क्नूञ् शब्दे । शता । अरिद्रूः । १४८१ द्रूञ् हिंसायाम् । इत्यप्येके । क्विप् ॥

द्वारं पुनन्पदतलेन स लूनवैरी
स्तीर्णाननं मदजलेन करीतुकामम् ।
नागं ददर्श पटवूर्णमुखं धुनानं
कर्णौ शृणन्तमखिलानभिपूर्तरोषम् ॥ ६ ॥

स श्रीकृष्णः पदतलेन द्वारं पुनन् श्रीपादारविन्दं रङ्गद्वारि निदधानः सन् । तत्र करीतुकामं हिंसितुमिच्छुं नागं कुवलयापीडाख्यं गजश्रेष्ठं ददर्श । लूनवैरी छिन्नशत्रुः । कीदृशं नागम् । मदजलेन स्तीर्णाननं छन्नवक्त्रम् । पटवूर्णमुखं पटच्छादितं मुखं यस्य तम् । कर्णौ धुनानं कम्पयन्तम् । अखिलान् शृणन्तं हिंसयन्तम् । अभिपूर्तरोषं संपूर्णरोषम् ॥—पुनन्निति । १४८२ पूञ् पवने । पवनं शोधना । शतरि 'प्वादीनां ह्रस्वः' इति ह्रस्वः । लूनेति । १४८३ लूञ् छेदने । कर्मणि क्ते 'ल्वादिभ्यः' इति नत्वम् । स्तीर्णेति । १४८४ स्तॄञ् छादने । कर्मणि क्तः । करीतुकामम् । १४८५ कॄञ् हिंसायाम् । तुमुनि 'तुमः कामे मनस्यपि' इति मलोपः । वूर्णेति । १४८६ वॄञ् वरणे । भरण इत्यप्येके । धुनानम् । १४८७ धूञ् कम्पने । शानच् । क्र्यादय उदात्ता उभयतोभाषाः । शृणन्तम् । १४८८ शॄ हिंसायाम् । शता । अभिपूर्तेति । १४८९ पॄ पालनपूरणयोः । कर्तरि क्ते 'न ध्याख्यापॄमूर्छिमदाम्' इति नत्वाभावः ॥

तत्र स्परीतुमनसं रुषमावृणन्त-
मम्बष्ठमुन्मदभरं स भृणन्बभाषे ।

त्वामेष संप्रति मृणामि दृणामि नागं
नो चेज्जृणत्तम नरानकृणन्नृणीहि ॥ ७ ॥

स तत्राम्बष्ठं हस्तिपकं भृणन् भर्त्सयन् बभाषे। कीदृशं हस्तिपकम्। स्परीतुमनसं हन्तुकामम्। रुषभान्नृणन्तं स्वीकुर्वन्तं छादयन्तं वा। उन्मदभरमुद्धूतदर्पातिशयम्। एषोऽहं त्वां संप्रति मृणामि हिंसयामि। नागं गजं दृणामि विदारयामि। हे जृणत्तम वृद्धतम, नो चेत् एतन्नेच्छसि चेत्। त्वं नरान् अकृणन् अहिंसन् ऋणीहि मार्गात् अपगच्छ ॥— स्परीतुमनसामिति। १४९० स्पृ हिंसायाम्। तुमुन्। प्राग्वन्मलोपः। आनृणन्तम्। १४९१ वृ वरणे। शता। वृ वरणभरणयोरित्येके। भरम् भृणन्। १४९२ भृ भर्त्सने। भरणे इति केचित्। 'ॠदोरप्'। शता च। मृणामि। १४९३ मृ हिंसायाम्। दृणामि। १४९४ दृ विदारणे। भये च। द्रुमे। द्वयोर्लट्। जृणदिति। १४९५ जृ वयोहानौ। झृ इत्येके। जृणातेः शता। नरान्। १४९६ नृ नये। पचाद्यच्। अकृणन्। १४९७ कृ हिंसायाम्। शता। ऋणीहि। १४९८ ऋ गतौ। लोट् ॥

इत्थं हरौ गृणति हस्तिपकोऽपि कोपी
जीनोऽप्यहं न तु रिणामि भियेति वादी।
पार्श्वे लिनन्गजमचोदयदुन्मदान्ध-
मव्लीनशक्तिमतिघोरजवं प्लिनन्तम् ॥ ८ ॥

हरौ इत्थं गृणति वदति सति, हस्तिपकोऽपि कोपी सन् अहं जीनो वृद्धोऽपि भिया न तु नैव रिणामि गच्छामीति वादी वदनशीलो गजं पार्श्वे लिनन् श्लिष्टो भवन् अचोदयत् हन्तुं प्रेरितवान्। उन्मदान्धमुद्धूतेन मदेनान्धम्। अव्लीनशक्तिमव्लीना आच्छादिता शक्तिर्यस्य तादृशं सन्तम्। अतिघोरजवं यथा तथा प्लिनन्तं गच्छन्तम् ॥— गृणतीति। १४९९ गृ शब्दे। शता। शॄप्रभृतय उदात्ताः परस्मैभाषाः। जीनः। १५०० ज्या वयोहानौ। कर्मणि क्ते 'ग्रहिज्या—' इति संप्रसारणे 'हलः' इति दीर्घे ल्वादित्वान्नत्वम्। रिणामि। १५०१ री गतिरेषणयोः। रेषणं वृकशब्दः। लट्। लिनन्। १५०२ ली श्लेषणे। शता। अव्लीनेति। १५०३ व्ली वरणे। गतौ श्लेषणे च द्रुमे। कर्मणि क्तः। प्लिनन्तम्। १५०४ प्ली गतौ। शता। वृत्। प्वादयो वृत्ताः। ल्वादिस्तु गणान्तः ॥

त्रीताशबृंहितजुषाभ्रिणता गजेन
प्रक्षेतुमज्ञमनसा समनुद्रुतेन।
बद्धः करेण भगवान्विहृतिं वृणानः
श्रश्नन्निबद्धममुमाशु तलैरमश्नात् ॥ ९ ॥

---

१. अधातुपाठस्थोऽयम्.

प्रक्षेतुं हन्तुं समनुद्रुतेन वेगादनुगतेन गजेन करेण बद्धो भगवान् विहृतिं वृणानः स्वीकुर्वन् निबद्धं श्रथ्नन् विमोचयन्नमुं गजं तलैराशु अमथ्नात् ताडयामास । कीदृशेन गजेन । व्रीताशवृंहितजुषा व्रीताशं छादितदिक्तटं वृंहितं गर्जितं कुर्वता । अभ्रिणता अभीतेन ॥—व्रीतेति । १५०५ व्री वरणे । गतौ च द्रुमे । कर्मणि क्तः । अभ्रिणता । १५०६ भ्री भये । भरणे इति केचित् । शता । अस्य ल्वादित्वमप्यस्ति द्रुमे । प्रक्षेतुम् । १५०७ क्षीष् हिंसायाम् । तुमुन् । अज्ञेति । १५०८ ज्ञा अवबोधने । 'इगुपधज्ञाप्रीकिरः कः' इति कः । बद्धः । १५०९ बन्ध बन्धने । कर्मणि क्तः । ज्यादयोऽनुदात्ताः परस्मैभाषाः । वृणानः । १५१० वृङ् संभक्तौ । संभक्तिः स्वीकारः । उदात्त आत्मनेभाषः । शानच् । श्रथ्नन् । १५११ श्रन्थ विमोचनप्रतिहर्षयोः । प्रतिहर्षो न ज्ञातः । अस्माच्छता । अमथ्नात् । १५१२ मन्थ विलोडने । लङ् ॥

तद्ग्रन्थनं परिहरन्गतिभिर्विकुथ्य
पृष्ठे करोन्मृदितपुच्छमकर्षदेनम् ।
भूयो निपात्य मृडितस्वजनः स गुध्न-
न्दन्तौ विकुष्य गजमुत्क्षुभितं व्यनभ्नात् ॥ १० ॥

स श्रीकृष्णो गतिभिः संचारभेदैस्तद्ग्रन्थनं तस्य बन्धनं परिहरन् वर्जयन् । एनं पृष्ठे विकुथ्य संश्लिष्य निलीय करोन्मृदितपुच्छं हस्तसंचूर्णितलाङ्गूलं सन्तमकर्षत् । क्रियाविशेषणं वा । भूयो गुध्नन् कुप्यन्नुत्क्षुभितं गजं निपात्य दन्तौ विकुष्य उन्मील्य व्यनभ्नात् अहिंसीत् । मृडितस्वजनः सुखितबन्धुजनः ॥—ग्रन्थनमिति । १५१३ ग्रन्थ संदर्भे । श्रन्थमपि केचित् पठन्ति । ग्रन्थेर्ल्युट् । विकुथ्य । १५१४ कुन्थ संश्लेषणे । संक्लेशे इति केचित् । कुथ इत्येके । द्वयोस्तन्त्रेण ल्यप् । उन्मृदितेति । १५१५ मृद क्षोदे । संचूर्णनं तत् । कर्मणि क्तः । १५१६ मृड च । क्षोदे इति शेषः । सुखे चेति केचित्। सुखने इत्यन्ये । अस्मात् कर्मणि क्तः । गुन्धन् । १५१७ गुध रोषे । शता । विकुष्य । १५१८ कुष निष्कर्षे । स च बहिर्निःसारणम् । ल्यप् । उत्क्षुभितम् । १५१९ क्षुभ संचलने । कर्तरि क्तः । व्यनभ्नात् । १५२० णभ १५२१ तुभ हिंसायाम् । लङ् ॥

आधोरणानपि च दन्तवरेण तुभ्नन्
क्लिश्नन्मतिं पलसुरादिकमश्नतां सः ।
भ्रस्तं फलप्रकरमुध्रसितांश्च शाली-
न्प्राददद्भिरैष्यत गिरा परिविष्टपापैः ॥ ११ ॥

आधोरणान् हस्तिपकान् अपि च दन्तवरेण तुभ्नन् हिंसन् स श्रीकृष्णः ध्रस्तमुञ्छनेनार्जितं फलप्रकरमुध्रसितान् उञ्छनार्जितान् शालींश्च प्राददद्भिर्भक्षयद्भिः सद्भिर्गिरा ऐष्यत पुनः पुनः भृशं वा स्तुतोऽभूत् । कीदृशः श्रीकृष्णः । पलसुरादिकं मांसमद्यादिकम-

श्नतां दुष्टानां मतिं क्लिश्नन् पीडयन्। परिविष्टं विप्रयुक्तमपगतं पापं येषां तैः सद्भिः॥— तुभ्नन्निति। तुभेः शता। क्लिश्नन्। १५२२ क्लिशू विबाधने। अश्नताम्। १५२३ अश भोजने। द्वयोः शता। ध्रस्तम्। उध्रसितान्। १५२४ उध्रस उञ्छे। उकार इदित्येके। मतद्वये कर्मणि निष्ठा। ऐष्यत। १५२५ ईष आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम्। तच्च प्रकरणादिप्राप्तायाः क्रियाया इत्यौचित्याज्ज्ञेयम्। अस्मात्कर्मणि लङ्। परिविष्टेति। १५२६ विष विप्रयोगे। कर्तरि क्तः॥

प्रुष्णन्सतां प्रियमयं प्लुषिताङ्गरागः
पुष्णन्मुदं मृगदृशां रिपुधाम मुष्णन्।
वक्त्रारविन्दखचितस्मितखौनदाभो
रङ्गं गतोंऽसभुवि दन्तवरं प्रगृह्णन्॥ १२॥

अयं भगवान् अंसभुवि दन्तवरं प्रगृह्णन् रङ्गं गतः प्राप्तः। कीदृशः। सतां प्रियं प्रुष्णन् पूरयन्। प्लुषितः स्निग्धो निबिडो अङ्गरागो यस्य सः। रिपूणां धाम प्रतापं मुष्णन्। मृगदृशां मुदं पुष्णन्। वक्त्रारविन्दात् खचितेन नितान्तोत्पन्नेन स्मितेन खौनती नितान्तं उत्पद्यमाना आभा यस्य सः॥—प्रुष्णन्। १५२७ प्रुष १५२८ प्लुष स्नेहनसेचनपूरणेषु। मोहनदाहनयोरप्याह शंकरः। प्रुषेः शता। प्लुषितेति। प्लुषेः कर्तरि क्तः। पुष्णन्। १५२९ पुष पुष्टौ। मुष्णन्। १५३० मुष स्तेये। द्वयोः शता। खचितेति। १५३१ खच भूतप्रादुर्भावे। भूतप्रादुर्भावो नितान्तोत्पत्तिः। खव इत्येके। हेठ इत्यप्येके। खचेः कर्तरि क्तः। खौनदिति। खवेरनुनासिकादौ श्नि परे ऊठ्। तस्य शता। श्रन्थादय उदात्तेतः। क्लिशिविषिवर्जमुदात्ताश्च। प्रगृह्णन्। १५३२ ग्रह उपादाने। उदात्तः स्वरितेत्। अस्माच्छता। इति श्नाविकरणम्॥

अथ मल्लरङ्गं गते भगवति कंसस्यावस्थामाह—

संचोरयन्तमरिगर्वमशेषभद्रं
चिन्तन्तमन्तकमिवाप्तमयन्त्र्यवीर्यम्।
प्रस्फुण्डयन्नपि तमप्युपलक्ष्य कंस-
स्तत्रास कुन्दकसुलालितमिन्दितश्रीः॥ १३॥

प्रस्फुण्डयन् परिहसन्नपि कंस आप्तं प्राप्तं तं श्रीकृष्णमन्तकमिवाभ्युपलक्ष्य दृष्ट्वा तत्रास भीतवान्। कुन्दकैः अनृतभाषिभिः सुलालिता मिन्दिता प्रवृद्धा श्रीर्यस्य सः। कीदृशं तम्। अरिगर्वं संचोरयन्तम्। अशेषभद्रमशेषाणां मङ्गलम्। चिन्तन्तं निरूपयन्तम्। अयन्त्र्यमसंकोच्यमनिवारणीयं वीर्यं यस्य तम्॥—संचोरयन्तमिति। १५३३ चुर स्तेये। अकार उक्त्यर्थः। 'णिचश्च' इति तङ् चुरादेर्नेति मतं माधवदूषितं ते-

१. 'सेवन' इति धातुपाठः.

नोभयपदित्वमेव । अस्माच्चुरेर्णिचि शता । 'केचित्सर्वचुरादीनामनित्यण्यन्ततां जगुः । येषां विकल्पचिह्नं स्यात्तेषामेवेति माधवः ॥' चिन्तन्तम् । १५३४ **चिति** स्मृत्याम् । णिचि 'अनिदितां हल–' इति नलोपाप्रसङ्गात् तन्निषेधार्थमिदित्त्वानुपयोगादिदितां णिजनित्यः । तेन णिजभावे शपि शता । अयन्त्रयेति । १५३५ **यत्रि** संकोचने । णिजन्ताद्चो यत् । प्रस्फुण्डयन् । १५३६ **स्फुडि** परिहासे । स्फुटि इत्येके । स्फुण्डेः शता । अभ्युपलक्ष्य । १५३७ **लक्ष** दर्शनाङ्कनयोः । ल्यप् । कुन्दकेति । १५३८ **कुदि** अनृतभाषणे । कुद्र इत्येके । कुन्देर्ण्वुल् । सुलालितेति । १५३९ **लड** उपसेवायाम् । कर्मणि क्तः । मिन्दितेति । १५४० **मिदि** स्नेहने । मिद इत्येके । मिन्देः कर्तरि क्तः ॥

ओलण्डिताद्रिरपि जालितदिव्यधामा
निष्पीडितारिरनुनाटितमर्त्यभावः ।
अश्राथबाधितमनाः स निरीक्षकाणा-
मानन्दमन्तरपरत्परमूर्जयन्तम् ॥ १४ ॥

निरीक्षकाणामश्राथबाधितमना अप्रयत्नवशीकृतचित्तः सन् स भगवान् अन्तर्मनसि परमधिकमानन्दमपरत् पूरयामास । कीदृशः । ओलण्डिताद्रिः उत्क्षिप्तगोवर्धनोऽपि जालितदिव्यधामा छादितामानुषप्रभावः । अनुनाटितमर्त्यभावः अनुकृतमनुष्यस्वभावः । ऊर्जयन्तं बलीभवन्तमानन्दम् ॥—ओलण्डितेति । जालितेति । निष्पीडितेति । अनुनाटितेति । १५४१ **ओलडि** उत्क्षेपणे । ओकार इदित्येके । १५४२ **जल** अपवारणे । १५४३ **पीड** अवगाहने । तच्च बाधनम् । बाधगाहनयोरिति द्रुमे । १५४४ **नट** अवस्यन्दने । तच्च नाट्येनार्थप्रकाशनम् । एषां कर्मणि क्तः । अश्राथेति । १५४५ **श्रथ** प्रयत्ने[1] । प्रस्थाने इति केचित् । 'एरच्' । 'एरजण्यन्तानाम्' इति मते घञ् । बाधितेति । १५४६ **बध** संयमने । बन्धे इति केचित् । बाधेः कर्मणि क्तः । अपरत् । १५४७ **पॄ** पूरणे । दीर्घोक्तिफलं परितेतीडणिच्येव स्यादिति णिज्विकल्पः । णिजभावे शपि घञ् । ऊर्जयन्तम् । १५४८ **ऊर्ज** बलप्राणनयोः । शता ॥

श्रीकृष्णदर्शनसंजातानन्दानां संभाषणमाहाष्टभिः श्लोकैः—

संपक्ष्य तन्निजदृशैवमवर्णि लोकै-
रेषोऽजनिष्ट किल दुष्टविचूर्णनार्थम् ।
अप्रार्थितो व्रजगृहेऽपि च पर्थिभूतोऽ-
दासम्बयञ्जनमतिं निजशाम्बरीभिः ॥ १५ ॥

लोकैर्निजदृशा तं संपक्ष्य परिगृह्य दृष्ट्वा एवमवर्णि कथितम् । एष दुष्टविचूर्णनार्थमजनिष्ट किल । अपि च व्रजगृहेऽप्रार्थितोऽप्रख्यातः सन् पर्थितः प्रक्षिप्तोऽभूत् । निज-

1. 'अयत्ने' इति पाठः.

शाम्बरीभिः स्वमायाभिर्जनमतिमासम्बयन् स्वसंबन्धां कुर्वन् ॥—संपक्ष्येति । १५४९ पक्ष परिग्रहे । ल्यप् । अवर्णि । १५५० वर्ण वर्णने । प्रेरणेऽपीति केचित् । भावे विण् । विचूर्णनेति । १५५१ चूर्ण प्रेरणे । अस्य क्षोदनमप्यर्थः । तदेव वा प्रेरणमित्युक्तम् । अस्माल्ल्युट् । अप्रार्थितः । १५५२ प्रथ प्रख्याने । क्षेपे च द्रुमे । कर्तरि क्तः । पार्थितः । १५५३ पृथ प्रक्षेपे । पथ इत्येके । कर्मणि क्तः । आसम्बयन् । १५५४ षम्ब संबन्धने । १५५५ शम्बेत्येके । साम्बेत्यन्ये । साम्बेः शता । शाम्बरीभिः । शम्बेर्बाहुलकादरप्रत्यये शम्बरः । तस्येयं शाम्बरी ॥

सा पूतना च शिशुभक्षणकुट्टनोत्का
जघ्ने प्रपुट्टितकृपेण विचुट्टिताघा ।
वात्यासुरः पुनरनट्ट्यविषुट्टकः स-
न्नेतेन लुण्ठितबलोऽजनि शाठितात्मा ॥ १६ ॥

एतेन सा पूतना जघ्ने । प्रपुट्टिताल्पीभूता कृपा यस्य तेन । शिशूनां भक्षणे कुट्टने छेदने चोत्कोत्सुका विचुट्टितमल्पीभूतं गतमघं यस्याः सा । पुनः—वात्यासुर एतेन लुण्ठितबलो मुषितबलोऽजनि जनितः । अनट्ट्यविषुट्टकः आदरणीयानामनादरकृत् सन् भवन् शाठितात्मा असंस्कृतचित्तः ॥—भक्षणेति । कुट्टनेति । १५५६ भक्ष अदने । १५५७ कुट्ट छेदनभर्त्सनयोः पूरणे इत्येके । द्वयोर्ल्युट् । प्रपुट्टितेति । विचुट्टितेति । १५५८ पुट्ट १५५९ चुट्ट अल्पीभावे । द्वयोः कर्तरि क्तः । अनट्ट्यविषुट्टकः । अट्ट १५६० षुट्ट १५६१ अनादरे । अल्पीभावे च द्रुमे । क्रमात् 'अचो यत्' इति यत्, ण्वुल् च । लुण्ठितेति । १५६२ लुण्ठ स्तेये । अनादरे च द्रुमे । शाठितेति । १५६३ शठ १५६४ श्वठ असंस्कारगत्योः । श्वठि इति केचित् । संस्कारे च द्रुमे । आद्य आलस्ये च । लुण्ठिशाठ्योः कर्मणि क्तः ॥

आश्वाठितारिकुलतुञ्जविपिञ्जशीलः
संपेसयन्गृहमसान्त्वयदेष गोपीः ।
सुश्वल्कनाः सुमधुरप्रियवल्कनाभिः
प्रस्नेहयन्न च कदाचिदसिस्मिटत्ताः ॥ १७ ॥

एष गृहं संपेसयन् प्राप्नुवन् गोपीरसान्त्वयत् । आश्वाठितस्यागतस्यारिकुलस्य तुञ्जविपिञ्जशीलो हिंसाग्रहणशीलः । हननशील इति यावत् । ताः सुमधुरप्रियवल्कनाभिः सुमधुरैः प्रियभाषणैः प्रस्नेहयन् स्निग्धाः कुर्वन् कदाचिदपि नासिस्मिटदनादृतवान् । सुश्वल्कनाः शोभनोक्तीर्गोपीः ॥—आश्वाठितेति । श्वठेः कर्तरि क्तः । तुञ्जविपिञ्जेति । १५६५ तुजि १५६६ पिजि हिंसाबलादाननिकेतनेषु । दाने च द्रुमे । तुज पिज इत्येके । लजि लुजि इत्यन्ये । तुजिपिज्योर्घञ् । संपेसयन् । १५६७ पिस गतौ ।

शता। असान्त्वयत् **१५६८ षान्त्व** सामप्रयोगे। लङ्। सुश्वल्कनेति। **१५६९ श्वल्क १५७० वल्क** परिभाषणे। श्वल्केर्ल्युट्। वल्कनाभिः। वल्केः 'ण्यासश्रन्थः–' इति युच्। प्रस्नेहयन्। **१५७१ ष्णिह** स्नेहने। शता। असिस्मिटत्। **१५७२ स्मिट** अनादरे। लुङि चङ्॥

कः स्माययेत विभुमेनमशिश्लिषद्यः
पन्थन्व्रजेऽत्र भवपिच्छनभाग्भिरेव।
छन्दञ्छुचं वरमशिश्रिणदाश्रितानां
संताडनैर्वृषभदैत्यमखाडयच्च॥ १८॥

योऽत्र व्रजे पन्थन् संचरन् भवपिच्छनभाग्भिः संसारच्छेदभाग्भिरासन्नमुक्तिभिरेवाशिश्लिषत् संपक्षं प्राप्तवान्। एनं विभुं कः स्माययेतानाद्रियेत। आश्रितानां शुचं छन्दन् नाशयन् वरं प्रार्थितमशिश्रिणत् दत्तवान्। संताडनैः प्रहारैः वृषभदैत्यमखाडयत् विदारितवांश्च॥—स्माययेत। **१५७३ स्मिङ्** अनादरे इत्येके। ङित्वात्तङेव। अस्माक्लिङ्। अट स्मिट गतावित्यप्यन्ये। अशिश्लिषत्। **१५७४ श्लिष** श्लेषणे। लुङि चङ्। पन्थन्। **१५७५ पथि** गतौ। शपि शता। पिच्छनेति। **१५७६ पिच्छ** कुट्टने। ल्युट्। छन्दन्। **१५७७ छदि** संवरणे। शपि शता। अशिश्रणत्। **१५७८ श्रण** दाने। प्रायेण विपूर्वः। अस्माल्लुङि चङ्। संताडनैः। **१५७९ तड** आघाते। शोभार्थश्च द्रुमे। ल्युट् अखाडयन्। **१५८० खड १५८१ खडि १५८२ कडि** भेदने। अन्त्यो रक्षणे च द्रुमे। खडेर्लङ्॥

अश्वं व्यखण्डदचकण्डदघासुरादी-
न्धेनूरकुण्डदभिगुण्डितपीतचेलः।
किंच स्वगात्रमवकुण्ठयतो महाहे-
र्दर्पं चुखुण्ड विषमेष मुखाद्विवण्टन्॥ १९॥

किं च। अश्वं व्यखण्डत्, अघासुरादीन् अचकण्डत्। द्वयोरखण्डयदित्यर्थः। धेनूरकुण्डत् रक्षितवान्। अभिगुण्डितं वेष्टितं पीतचेलं येन सः। स्वगात्रमवकुण्ठयतश्छादयतः। महाहेः कालियस्य मुखात् विषं विवण्टन् विभाजयन् छर्दयन् दर्पं चुखुण्ड खण्डितवान्॥—व्यखण्डदिति। खण्डेः शपि लङ्। अचकण्डत्। कण्डेर्णिचि चङ्। अकुण्डत्। **१५८३ कुडि** रक्षणे। शपि लङ्। अभिगुण्डितेति। **१५८४ गुडि** वेष्टने। रक्षणे चैके। कुठि इत्यन्ये। गुण्डेः कर्मणि क्तः। अवकुण्ठयतः। कुण्ठेः शता। चुखुण्ड। **१५८५ खुडि** खण्डने। णिजभावे लिट्। विवण्टन्। **१५८६ वटि** विभाजने। वडि इत्येके। वण्टेः शपि शता॥

---

१. 'छेदनादाभिः' पाठः. २. 'संपर्कं' पाठः.

बर्हादिमण्डितसुभण्डितविग्रहोऽसौ
प्रच्छर्दितः किल बकेन च पुस्तितार्तिः ।
संबुस्तिते गिरिमखे परिचोद्य गोपा-
न्प्रानक्कयद्धरिमखं मदधक्कनार्थी ॥ २० ॥

बर्हादिमण्डितः सुभण्डितो भृशं कल्याणीभूतो विग्रहो यस्य सः । असौ बकेन प्रच्छर्दितः किल । पुस्तिता दत्ता बकस्यार्तिर्येन सः । संबुस्तिते आदृते गिरिमखे गोपान् परिचोद्य प्रेरणं कृत्वा मदधक्कनार्थी इन्द्रस्य दर्पनाशनार्थी सन् हरिमखं प्रानक्कयदनाशयत्॥— मण्डितेति । १५८७ **मडि** भूषायां हर्षे च । सुभण्डितेति । १५८८ **भडि** कल्याणे । कर्तरि क्तः । प्रच्छर्दितः । १५८९ **छर्द** वमने । कर्मणि क्तः । पुस्तितेति । १५९० **पुस्त** १५९१ **बुस्त** दानादरयोः[1] । अनादरे च द्रुमे । कर्मणि क्तः । संबुस्तितेति । प्राग्वत् क्तः । परिचोद्य । १५९२ **चुद** संचोदने । संचोदनं प्रश्नः प्रेरणा च । ल्यप् । प्रानक्कयत् । १५९३ **नक्क** १५९४ **धक्क** नाशने । नक्केर्लङ् । धक्कनेति । धक्केर्ल्युट् ॥

दुर्दान्तचक्पशुपचुक्कनमप्यैरात्सी-
त्प्रक्षालितक्षितितलातुलवर्षरोधी ।
संदोलयन्नधिकपोलितमद्रिराजं
संचोलितं सुबहुमूलितशाखिवृन्दैः ॥ २१ ॥

अद्रिराजं गोवर्धनं संदोलयन्नुत्क्षिपन् प्रक्षालितक्षितितलं मार्जितभूतलमतुलं वर्षं रोद्धुं शीलं यस्य तादृशः सन् । पशुपानां चुक्कनं व्यथामरौत्सीत् निवारितवान् । दुर्दान्तचक् अशान्तपीडकः । अधिकपोलितमतिमहान्तं सुबहुभिर्मूलितैः प्ररूढैः शाखिवृन्दैः संचोलितमत्युच्छ्रितं चाद्रिराजम् ॥—दुर्दान्तचगिति । १५९५ **चक्क** १५९६ **चुक्क** व्यथने । चिक्क इति चैके । चक्केः क्विप् । चुक्कनम् । चुक्केर्ल्युट् । प्रक्षालितेति । १५९७ **क्षल** शौचकर्मणि । कर्मणि क्तः । तलेति । १५९८ **तल** प्रतिष्ठायाम् । अच् । अतुलेति । १५९९ **तुल** उन्माने । कः । चुरादिणिचोऽनित्यत्वात् तदभावः । संदोलयन् । १६०० **दुल** उत्क्षेपे । शता । पोलितम् । संचोलितम् । मूलितम् । १६०१ **पुल** महत्वे । १६०२ **चुल** समुच्छ्राये । १६०३ **मूल** रोहणे । त्रिभ्यः कर्तरि क्तः ॥

काल्यप्रवेलनकरोऽयमबेलयद्वा-
गन्यांश्च तेलितकृपः खलु कंसचाल्यान् ।
संपालयेद्भिमतलूष्यपशुल्बभूमा
क्ष्मामेष राम इव शूर्पनखाविचोटी ॥ २२ ॥

---

[1] 'आदरानादरयोः' इति धातुपाठे.

काल्यप्रवेलनकरो निरसनीयानां निरासको अयमन्यांश्च कंसचाल्यान् कंसभृत्यान् द्राक् शीघ्रमवेलयत् खलु विदारितवान्। तेलितक्रपः निबिडीभूतदय एष शूर्पनखावि-चोटी शूर्पनखाङ्गच्छेदी राम इव क्ष्मां संपालयेत्। विमतलूषी शत्रुघाती । अपशुल्वभूमा अमानमहिमा ॥—काल्येति । प्रवेलनेति । १६०४ **कल** १६०५ **विल** क्षेपे । द्वयो-र्ण्यल्युटौ । किल इत्यप्येके । अवेलयत् । १६०६ **बिल** भेदने । लङ् । तेलितेति । १६०७ **तिल** स्नेहने । कर्तरि क्तः । चाल्यान् । १६०८ **चल** भृतौ । ण्यत् । संपाल-येत् । १६०९ **पाल** रक्षणे । लिङ् । विमतलूषी । १६१० **लूष** हिंसायाम् । णिनिः । शुल्वेति । १६११ **शुल्ब** माने । घञ् । शूर्पनखेति । १६१२ **शूर्प** चेत्येके । तस्माद् घञि शूर्पः । शूर्पसदृशं नखमस्या इति शूर्पनखा । 'नखमुखात्संज्ञायाम्' इति [न] ङीष् । 'पूर्वपदात्संज्ञायामगः' इति णत्वं च संज्ञायामेवेति [1]णत्वाभावष्टाप् च । विचोटी । १६१३ **चुट** छेदने । णिनिः ॥

इत्यादिवादिषु जनेषु विमोटितारिः
पापप्रपण्डिपदपांसुरवाज्यधामा ।
सुव्राजितेन मनसा परिमार्ग्य एषां
तोषं व्यशुल्कयदसौ नयनप्रचम्पैः ॥ २३ ॥

जनेषु इत्यादिवादिषु सत्सु असौ नयनप्रचम्पैः कटाक्षसंचारैरेषां तोषं व्यशुल्कयत् संपादितवान् । कीदृशः । विमोटितारिः संचूर्णितशत्रुः । पापप्रपण्डिपदपांसुः पापना-शिपादरजः । अवाज्यधामा अज्ञेयस्वरूपः सुव्राजितेन सम्यक् संस्कृतेन मनसा परि-मार्ग्यः प्राप्यः ॥—विमोटितेति । १६१४ **मुट** संचूर्णने । कर्मणि क्तः । प्रपण्डि इति । १६१५ **पडि** १६१६ **पसि** विनाशने । पण्डेर्णिनिः । पांसुरिति । 'अजिदृशिक-म्यमिपसिवाध–' इत्यादिना पंसेः कुप्रत्ययो दीर्घश्च । अवाज्येति । १६१७ **वज** मार्गसंस्कारगत्योः । व्रज इत्येके । वाजेर्ण्यत् । व्राजितेनेति । व्राजेः कर्मणि क्तः । परि-मार्ग्यः । मार्गेर्ण्यत् । मार्गसंस्कारो धात्वर्थ इत्येके । व्यशुल्कयत् । १६१८ **शुल्क** [2]सर्जने । आर्जनं तत् । [3]वर्जनभाषणयोश्च द्रुमे । लङ् । प्रचम्पैः । १६१९ **चपि** ग-त्याम् । घञ् ॥

क्षम्पद्धियामभिमतः स च कंसपीडा-
प्रक्षञ्जितस्वजनचिन्तनजातरोषः ।

---

१. 'शूर्पणखा' इति णत्वविशिष्टस्यैव संज्ञात्वाण्णत्वाभावकथनं चिन्त्यम्; अतः स्त्री-प्रत्ययसिद्धान्तकौमुद्यामस्य णत्वविशिष्टत्वमेवाङ्गीकृतम्. २. 'अतिस्पर्शने' इति धातु-पाठे. ३. 'वर्णन' इति पाठः.

आश्वर्तितो रणभुवं सबलोऽत्र रेजे
विश्वभ्रिताभ्रकुहरे सति तूर्यनादे ॥ २४ ॥

तूर्यनादे विश्वभ्रिताभ्रकुहरे व्याप्ताकाशे सति स च सबलः रणभुवमाश्वर्तितः प्राप्तोऽत्र रेजे । क्षम्पद्भियामभिमतः । क्षम्पन्ती क्षाम्यन्ती धीर्येषां तेषामिष्टः । कंसपीडया प्रक्षञ्जितानां कृच्छ्रेण जीवतां स्वजनानां चिन्तनेन जातरोषः ॥—क्षम्पदिति । **१६२० क्षपि** क्षान्त्यम् । शपि शता । प्रक्षञ्जितेति । आश्वर्तितेति । विश्वभ्रितेति । **१६२१ क्षंजि**[1] कृच्छ्रजीवने । **१६२२ श्वर्त** गत्यां[2] च । **१६२३ श्वभ्र**[3] च । आद्ययोः कर्तरि क्तः । श्वभ्रेः कर्मणि क्तः । श्वभ्रि बिलार्थे च द्रुमे ॥

चाणूर एनमथ विज्ञपयन्नृपाज्ञां
चण्डातकं सुयमयंश्चहको बभाषे ।
युध्यस्व भीतिरहितो बलयन्खलु त्वं
कीर्तिं चयस्व चपयापि नृपप्रसादम् ॥ २५ ॥

चाणूर एनं नृपाज्ञां विज्ञपयन् बोधयन् बभाषे । हेतौ शता । चण्डातकं मल्लयुद्धोचितं वासः सुयमयन् दृढं वेष्टमानो बध्नन् । चहकः शाठ्यकर्ता । बलयन् शक्तो भवन् । त्वं भीतिरहितो युध्यस्व कीर्तिं चयस्व नृपप्रसादमपि चपय । द्वयोरार्जयेत्यर्थः ॥—इतः परं सप्त मितः । ज्ञप मिच्च । अस्य ज्ञानज्ञापने अर्थाविति स्थितम् । विज्ञपयन्निति [**१६२४ ज्ञप** ज्ञानज्ञापनमारणतोषणनिशाननिशामनेषु ।] ज्ञपेः शता । सुयमयन् । **१६२५ यम** च परिवेषणे । तच्चात्र वेष्टनम् । चकारान्मिदित्यनुषङ्गः । अस्माच्छता । चहकः । **१६२६ चह** परिकल्कने । ण्वुल् । चप इत्येके । तस्य वा मित्त्वं द्रुमे । रहितः । **१६२७ रह** त्यागे । कर्तरि क्तः । बलयन् । **१६२८ बल** प्राणने । शता । चयस्वेति । चपयेति । **१२२९ चिञ्** चयने । णिच्युभयपदित्वेन ञित्वफलाभावादस्य णिज्विकल्पः । तत्र णिचि 'चिस्फुरोर्णौ' इति वा आत्वे पुक् । अन्यत्र वृद्धिः । उभयत्र मित्वाद्ध्रस्वः । अणिचि णिचि च लोट् । मितो गताः । 'नान्ये मितोऽहेतौ' । अहेतुमण्ण्यन्तेषु एभ्योऽन्ये मितो न स्युः । तेन चुरादिषु अमन्तादीनां मित्त्वं न ॥

बुद्धिर्न घट्टयतु तेऽस्तयतां जनानां
मध्ये न खट्टय बलं गजसट्टकोऽसि ।
न स्फिट्टयामि किमु चुम्बभिया स्थितोऽसि
किं पूलितान्नकृतपुंसनयात्र पुंसाम् ॥ २६ ॥

अस्तयतां संघातीभवतां जनानां मध्ये ते बुद्धिर्न घट्टयतु न चलतु । बलं न खट्टय

---

१. 'छजि' इति धातुपाठे. २. 'गत्याम्' इति धातुपाठे. ३. 'श्वभ्र' इति धातुपाठे.

न छादय । त्वं गजसट्टको गदहिंसकोऽसि । अहं त्वां न स्फिट्टयामि न हिनस्मि । त्वं चुम्बभिया हिंसनभिया किमु स्थितोऽसि । अत्र लोके पुंसां पूलितान्नेन संघातीभूतेन अन्नेन कृतया पुंसनया देहाभिवर्धनेन स्वशक्त्यप्रकाशने किं फलम् । न किंचित् ॥— घट्टयत्विति । १६३० घट्ट चलने । लोट् । अस्तयताम् । १६३१ अस्त[1] संघाते । शता । खट्टय । १६३२ खट्ट संवरणे । लोट् । सट्टकः । १६३३ षट्ट १६३४ स्फिट्ट १६३५ चुबि हिंसायाम् । आद्यो बलादाननिवासेषु च द्रुमे । अन्त्यश्चुम्बने च । सेट्टः ण्वुल् । स्फिट्टयामि । स्फिट्टेर्लट् । चुम्बेति । चुम्बेर्घञ् । व्यय व्यवक्षये इति चैके । आद्यः प्रेरणे च द्रुमे । पूलितेति । १६३६ पूल[2] संघाते । कर्तरि क्तः । पुंसनया । १६३७ पुंस अभिवर्धने । युच् ॥

सौधे विटङ्कजुषि पश्यति धूसितोऽयं
राजारिकीटबलचूर्णनयातिपूज्यः ।
अर्क्येण तेन समरेष्वविशोठितस्त्वं
संशुण्ठिताहितमदेन विजोटितोऽसि ॥ २७ ॥

अयं राजा सौधे स्थितः पश्यति । विटङ्कजुषि कपोतफ (पा) लकादिशिल्पशालिनि सौधे धूसितोऽलंकारैः कृतकान्तिः । अरिकीटानां दुर्बलशत्रूणां चूर्णनया संकोचनेनातिपूज्यः । तेन त्वं समरेषु विजोटितः प्रेरितोऽसि । समरेष्विति सर्वत्र योज्यम् । अर्क्येण स्तुत्येन । संशुण्ठितः शोषितो नाशितोऽहितमदो येन तेन समरेष्वविशोठित आलस्यहीनस्त्वम् ॥— विटङ्केति । १६३८ टकि बन्धने । वीन् पक्षिणष्टङ्कयति शिलेन बध्नाति इति विटङ्कः । पचाद्यच् । धूसितः । १६३९ धूस कान्तिकरणे । धूष इत्येके । धूश इत्यन्ये । धूसेः कर्तरि क्तः । कीटेति । १६४० कीट वर्णे । नानावर्णो भवतीत्यच् । चूर्णनया । १६४१ चूर्ण संकोचने । युच् । अतिपूज्यः । अर्क्येण । १६४२ पूज पूजायाम् । १६४३ अर्क स्तवने । तापगत्योश्च द्रुमे । द्वयोर्ण्यत् । अविशोठितः । १६४४ शुठ आलस्ये । कर्तरि क्तः । संशुण्ठितेति । विजोडितेति । १६४५ शुठि शोषणे । १६४६ जुड प्रेरणे । द्वयोः कर्मणि क्तः ॥

इत्थं सुगाजितमृदङ्गविमार्जनानि
संवार्य मर्चयति घारितशङ्कमस्मिन् ।
कृष्णः प्रपञ्चरहितां धृततेजितास्त्रै-
र्वीरैः स्तुतां गिरमकीर्तदरातिवर्धी ॥ २८ ॥

सुगाजितानां सम्यग्वादितानां मृदङ्गानां विमार्जनानि शब्दान् संवार्य अस्मिन् चाणूरे इत्थं घारितशङ्कं त्यक्तशङ्कं मर्चयति भाषमाणे सति कृष्णो धृततेजितास्त्रैर्धृतनिशातीकृ-

1. 'मुस्त' इति धातुपाठे. २. 'पुल' इति धातुपाठे.

ताम्रैर्वीरैः स्तुतां प्रपञ्चरहितां मिताक्षरां गिरमकीर्तदभाषत। अरातिवर्धी शत्रुच्छेदी ॥— सुगाजितेति । १६४७ गज १६४८ मार्ज शब्दार्थौ । १६४९ मर्च चेत्येके । मार्जिः शुद्धौ च द्रुमे । गर्जेः कर्तरि क्तः । विमार्जनानि । मार्जैर्ल्युंट् । मर्चयति । मर्चेः शता । घारितेति । १६५० घृ प्रस्रवणे । स्रावणे इत्येके । छादने च द्रुमे । अस्मात् कर्मणि क्तः । प्रपञ्चेति । १६५१ पचि विस्तारवचने । विस्तारमात्रे च द्रुमे । घञ् । तेजितेति । १६५२ तिज निशाने[1] । कर्मणि क्तः । अकीर्तत् । १६५३ कृत संशब्दने । 'ऋदुपधाच्चाक्लृपिचृतेः' इत्यत्र तपरत्वेन ऋदुपधस्य व्यावर्त्यत्वाण्णिचि त्वृदुपधत्वफलाभावादस्य णिज्विकल्पः । तत्र णिजभावे शपि लङ् । अरातिवर्धी । १६५४ वर्ध छेदनपूरणयोः । णिनिः ॥

> किं कुम्ब्यते सदसि लुम्बितवैभवोऽहं
>
> बालोऽस्मि तुम्बितविरोधिभयाश्च यूयम् ।
>
> प्रह्लापये किमपरं परिचुण्टितारि-
>
> र्भूयोऽयमेलयति चेदिह को निषेद्धा ॥ २९ ॥

मया सदसि किं कुम्ब्यते आच्छाद्यते । अत्र राजसदसि सर्वं प्रत्यक्षमेव वक्तव्यम्, न किंचिद्गूहनीयमस्ति । अहं लुम्बितवैभवोऽदृष्टसामर्थ्यो बालोऽस्मि । यूयं तुम्बितविरोधिभया नाशितशत्रुभयाश्च भवथ । अतोऽहमपरं किं प्रह्लापये । व्यक्तं वदामि । एतावदेव वदामि । परिचुण्टितारिश्छिन्नशत्रुरयं भूप एलयति युद्धार्थं प्रेरयति चेदिह लोके को निषेद्धा निषेद्धयति । न कोऽपि ॥—कुम्ब्यते इति । १६५५ कुबि आच्छादने । कुभि इत्येके । कुम्बेः कर्मणि लट् । लुम्बितेति । [तुम्बितेति] १६५६ लुबि १६५७ तुबि अदर्शने । अर्दन इति केचित् । कर्मणि क्तः । प्रह्लापये । १६५८ ह्लप व्यक्तायां वाचि । क्लप इत्येके । [लट् ।] परिचुण्टितारिः । १६५९ चुटि छेदने । कर्मणि क्तः । एलयति । १६६० इल प्रेरणे । लट् ॥

> यद्वा भियात्र किमम्लक्षकसूरिसेव्यो
>
> धर्मेतरम्यगनयम्रगयं हि राजा ।
>
> अम्लेच्छलोकसहिते सदसीह तस्मा-
>
> त्को ब्रूसयिष्यति शिशूननिबर्हणीयान् ॥ ३० ॥

यद्वा अत्र भिया किम् । न किंचित् भेतव्यम् । अयं राजा धर्मेतरम्यक् अधर्मच्छेत्ता । अनयम्रक् अनयच्छेत्ता च । हि यस्मात्—अम्लक्षकाणां साधुशब्दभाषिणां सदाचाराणां सूरीणां सेव्यश्च । तस्मादम्लेच्छलोकसहिते सज्जनपूर्णेऽस्मिन् सदसि अनिबर्हणीयान् हन्तुमयोग्यान् शिशून् को ब्रूसयिष्यति हनिष्यति । न कोऽपि । अतो न भेत्त-

1. 'शातने' इति पाठः.

व्यम् ॥—अमृक्षकेति । १६६१ **मृक्ष** म्लेच्छने । अपशब्दनं तत् । ण्वुल् । धर्मेतरम्यक् । अनयम्रक् । म्यक्ष म्रक्ष छेदने इति चैके । द्वयोः क्विपि संयोगान्तलोपः । अम्लेच्छेति । १६६२ **म्लेछ** अव्यक्तायां वाचि । अपशब्दोक्तिः सा । अच् । ब्रूसयिष्यति । १६६३ **ब्रूस** १६६४ **बर्ह** हिंसायाम् । ब्रूसेर्लृट् । अनिबर्हणीयान् । बर्हेरनीयर् ॥

खेदस्त्वियान्पटहगर्दनगर्जिताशे
रङ्गे सगर्धनसुगुर्दितवीरलोके ।
मञ्चाग्रपूर्वितनृपे शिशुना रणं वः
स्यादेव मानपरिजंसकमीड्यधाम्नाम् ॥ ३१ ॥

अस्माकमियांस्तु खेदः । पटहानां गर्दनेन शब्देन गर्जिताशे शब्दितदिक्के सगर्धनं साकाङ्क्षं सुगुर्दिताः पूर्वमेव स्थिताः वीरलोका यस्मिन् । मञ्चाग्रपूर्वितः पूर्वनिषण्णो नृपो यस्मिन् । ईदृशे रङ्गे ईड्यधाम्नां स्तुत्यप्रभावानां वो युष्माकं शिशुना रणं मानपरिजंसकं मानक्षयकरं स्यादेव ॥—गर्दनेति गर्जितेति । गर्द गर्ज शब्दे । द्वयोर्ल्युट् कर्मणि क्तश्च । गर्धनेति । गर्ध अभिकाङ्क्षायाम् इति चैके । ल्युट् । गुर्दितेति । १६६५ **गुर्द** पूर्वनिकेतने । पूर्वनिकेतनं पूर्वव्यवहार इत्येके । निवासपूर्वभाव इत्यन्ये । अस्य दीर्घविकल्पः । क्रीडार्थश्चास्ति द्रुमे । अस्मात् कर्तरि क्तः । पूर्व पूर्वनिकेतने इति केचित् । अर्थः प्रागुक्त एव । प्राग्वत् क्तः । 'उपधायां च' इति दीर्घः । परिजंसकम् । १६६६ **जसि** रक्षणे । मोक्षणे इति केचित् । ण्वुल् । ईड्येति । १६६७ **ईड** स्तुतौ । ण्यत् ॥

इत्थं वदत्यसुरजासिनि पिण्डिताय-
स्थेमाथ रोषितमतिः प्रतिमल्लडेपी ।
प्रस्तूपितेन वपुषा हरिमाससाद
चाणूर आशु हलिनं खलु मुष्टिकोऽपि ॥ ३२ ॥

असुरजासिनि असुरहिंसके इत्थं वदति सति अथ चाणूरो रोषितमतिर्हरिमाससाद । हलिनं मुष्टिकोऽपि । कीदृशः । पिण्डितायस इव स्थेमा स्थैर्यं यस्य सः । प्रतिमल्लडेपी प्रतिमल्लनिरासी । प्रस्तूपितेनातितुङ्गेन वपुषोपलक्षितः ॥—असुरजासिनीति । १६६८ **जसु** हिंसायाम् । क्त्वायामिड्विकल्पार्थादुदित्करणादस्य णिज्विकल्पः । तस्माण्णिनिः । पिण्डितेति । १६६९ **पिडि** संघाते । हेतुमण्ण्यन्तात् कर्मणि क्तः । रोषितेति । १६७० **रुष** रोषे । रुट इत्येके । रोषेः कर्तरि क्तः । प्रतिमल्लडेपी । १६७१ **डिप** क्षेपे । णिनिः । प्रस्तूपितेति । १६७२ **स्तूप** समुच्छ्राये । कर्तरि क्तः ॥

---

१. 'म्रक्ष' इति धातुपाठे. २. 'नर्दन' इत्युभयपुस्तकस्थपाठो व्याख्यानुसारं 'गर्दन' इति कृतः. ३. ह्रस्वोपधोऽयं धातुपाठे.

लोको हरेर्बलमचेतयमान एत-
द्युद्धं मृगेन्द्रशशदंशनवत्प्रदंसन् ।
संडापितः सदसि डेपितवृष्णिवीरे
भोजेन्द्रतन्त्रणविनिन्द्यममन्त्रतैवम् ॥ ३३ ॥

हरेर्बलमचेतयमानो जानल्लोक एतद् युद्धं मृगेन्द्रशशयोरन्योन्यदंशनवत् अतिविषमं प्रदंसन् पश्यन् । सदसि संडापितः संघातीभूतः सन् भोजेन्द्रतन्त्रणविनिन्दी कंसराज्यकार्यनिन्दाशील एवममन्त्रत गूढमभाषिष्ट । डेपिताः संघातीभूता वृष्णिवीरा यस्मिन्॥—आकुस्मादात्मनेपदिनः । कुस्मधातुपर्यन्तं णिच्यात्मनेपदिन एव । अचेतयमान इति । १६७३ **चित** संचेतने । तच्च ज्ञानम् । अस्माच्छानच् । दंशनेति । १६७४ **दशि** दंशने । ल्युट् । प्रदंसन् । १६७५ **दसि** दंसनदर्शनयोः[1] । दस इत्येके । दंसनं वर्मग्रहणम् । दंशनदर्शनयोरित्यन्ये । अत्राकुस्मीयस्तङ्णिज्योग एवेति इदित्वाण्णिजभावे तङ् न । तेन दंसेः शपि शता । संडापितः । १६७६ **डप** १६७७ **डिप** संघाते। डापेः कर्तरि क्तः । डेपितेति । डिपेश्च पूर्ववत् क्तः । तन्त्रणेति । १६७८ **तन्त्रि** कुटुम्बधारणे । कुटुम्ब इति पृथक् धातुरित्येके । तन्त्रेर्ल्युट् । अममन्त्रत । १६७९ **मन्त्रि** गुप्तभाषणे । लुङि चङ् ॥

प्रस्पाश्य मुष्टिमभितर्जयते प्रभर्त्स्यो[2]
मल्लो बितस्तयिषुरेनमग[4]न्धनीयम्[3] ।
क्ष्किष्क्येत निष्कृपमनिष्कितकान्तिरेष
बालोऽमुना नृपतिलालनयाद्य कष्टम् ॥ ३४ ॥

मल्लो मुष्टिं प्रस्पाश्य दृढं गृहीत्वा एनं विबस्तयिषुः पीडयितुमिच्छुरभितर्जयते भर्त्सयते । अगन्धनीयं पीडयितुमयोग्यम् । अद्य नृपतिलालनया राजेच्छया अमुना एष बालो निष्कृपं किष्क्येत हिंस्येत कष्टम् । अनिष्कितकान्तिरपरिमितकान्तिः । कीदृशो मल्लः । प्रभर्त्स्यस्तर्जयितुं योग्यः ॥—प्रस्पाश्येति । १६८० **स्पश** ग्रहणश्लेषणयोः ल्यप् । अभितर्जयते । १६८१ **तर्ज** १६८२ **भर्त्स** तर्जने । तर्जेर्लट् । प्रभर्त्स्यः । भर्त्सेर्ण्यत् । विबस्तयिषुः । १६८३ **बस्त** १६८४ **गन्ध** अर्दने । बस्तेः सन्युः । अगन्धनीयम् । गन्धेरनीयर् । किष्क्येत । १६८५ **किष्क**[5] हिंसायाम् । हिष्क इत्येके । किष्केः कर्मणि लिङ् । अनिष्कितेति । १६८६ **निष्क** परिमाणे । कर्मणि क्तः । लालनया । १६८७ **लल** ईप्सायाम् युच् ॥

आकूणिताक्षमपि च स्मिततूणितास्यं
भ्रूणस्य शाठ्यजनयक्ष्यमवेक्ष्य गात्रम् ।

---

१. 'दर्शनदंशनयोः' इति धातुपाठे. २. 'प्रभर्त्स्यो' इति पाठः ३. 'रेतम' इति पाठः. ४. 'गर्धनीयं' इति पाठः. ५. 'विष्क' इति धातुपाठे.

अस्या मनः क इव गूरयतेऽत्र मुष्टिं
नो खल्वशाम्यमिह लक्षयितुं क्षमाः स्मः ॥ ३५ ॥

अपि च गुणस्यार्भकस्य बालस्य गात्रमवेक्ष्य क इव अस्या मनोऽविचारः सन् मुष्टिं गूरयते प्रहरणार्थमुन्नमयति। न कोऽपि। कीदृशं गात्रम्। आकूणिताक्षं स्वरूपानन्दानुभवादीषत्संकोचितनेत्रम्। स्मिततूणितास्यं मन्दहासपूरितमुखम्। शाठ्यजनयक्ष्यं श्लाघ्यजनैर्यक्ष्यं पूज्यं च। तस्माद् वयमशाम्यं द्रष्टुमयोग्यं कर्म इह लक्षयितुं द्रष्टुं नो नहि क्षमाः स्मः शक्ता भवामः ॥—आकूणितेति। तूणितेति। १६८८ **कूण** संकोचने। १६८९ **तूण** पूरणे। द्वयोः कर्मणि क्तः। भ्रूणस्य। १६९० **भ्रूण** आशंसायाम्[1]। आशंस्यते प्रार्थ्यते इति घञर्थे कः। शाठ्येति यक्ष्येति। १६९१ **शठ** श्लाघायाम्। १६९२ **यक्ष** पूजायाम्। द्वयोर्ण्यत्। स्यामनेति। १६९३ **स्यम** वितर्के। ल्युट्। गूरयते। १६९४ **गूर** उद्यमने। लट्। अशाम्यम्। १६९५ **शाम** १६९६ **लक्ष** आलोचने। शामेर्ण्यत्। लक्षयितुम् लक्षेस्तुमुन् ॥

कुत्स्या हि गालनपटा इव कष्टमेते
दुष्कीर्तिभालनपराः खलु कूटवृत्त्या।
तद्वञ्चनं निरसितुं नहि वर्षिताः स्मः
किं कुर्महे खलजना इह मादयन्ताम् ॥ ३६ ॥

एते गालनपटा इव दोषग्रहणात् कुत्स्या हि कष्टम्। कूटवृत्त्या व्याजव्यापारेण दुष्कीर्तिभालनपरा दुर्यशःसंपादने तत्पराः खलु वयम्। तेषां वञ्चनं व्याजेन शिशुवधरूपं व्यापारं निरसितुं नहि वर्षिताः शक्तिसंबद्धाः स्मो भवामः। अतो वयं किं कुर्महे। इह खलजनाः मादयन्तां तृप्ता भवन्तु ॥—कुत्स्या इति। १६९७ **कुत्स** अवक्षेपणे। ण्यत्। गालनेति। भालनेति। १६९९[2] **गल** स्रवणे। १७०० **भल** आभण्डने। आभण्डनं मार्जनम्। द्वयोर्ल्युट्। कूटेति। १७०१ **कूट** अप्रदाने[3]। अप्रसादे इत्यन्ये। अप्रसादकृत्त्वाद्व्याजः। कूटेरप्। १७०२ **कुट्ट** प्रतापने। इत्यन्ये। वञ्चनेति। १७०३ **वञ्चु** प्रलम्भने। ल्युट्। ऊदिदित्येके। तत्र णिजभावे सर्वत्रेड्विकल्पः। वर्षिताः। १७०४ **वृष** शक्तिबन्धने। तच्च गर्भाधानसामर्थ्यं शक्तिसंबन्ध इति केचित्। अस्मात् कर्तरि क्तः। मादयन्ताम्। १७०५ **मद** तृप्तियोगे। लोट् ॥

इत्यादि वाद्यशतदेवनमध्य एव
लोकः समालपदगारितकृष्णवीर्यः।

---

१. 'आशाविशङ्कयोः' इति धातुपाठे. २. '१६९८ त्रुट छेदने' नोदाहृतः. ३. 'आप्रदाने' इति धातुपाठे.

कंसस्त्ववेदयमतिर्भयमानितोऽपि
निर्यावनः कुयुधि कुस्मयमान आस्त ॥ ३७ ॥

लोकोऽगारितकृष्णवीर्योऽज्ञातकृष्णवीर्यः सन् वाद्यशतदेवनमध्ये एव वाद्यशतस्य घोषमध्ये एव इत्यादि समालपत् । अवेदयमतिरज्ञमनाः कंसस्तु भयेन मानितः स्तब्धोऽपि कुयुधि कुत्सितयुद्धे निर्यावनो जुगुप्साहीनः कुस्मयमानः कुत्सितं स्मयमान आस्त ॥—देवनेति । १७०६ दिवु परिकूजने । ल्युट् । अगारितेति । १७०७ गृ विज्ञाने । विज्ञापने इति द्रुमे । कर्मणि क्तः । वेदयेति । १७०८ विद वेदनाख्याननिवासनेषु । परिवादे चैके । वेदनं ज्ञानम् । 'अनुपसर्गाल्लिम्प–' इति शः । मानितः । १७०९ मान स्तम्भे । कर्तरि क्तः । यावनेति । १७१० यु जुगुप्सायाम् । ल्युट् । कुस्मयमानः । १७११ कुस्म नाम्नो वा कुत्सितस्मयने । कुत्सितस्मयनार्थो धातुरत्र पठितव्यः । तस्माण्णिचि शानचि कुस्मयमानः । कुस्ममिति नामपदाद्वा तत्करोतीति णिचि तत्सिद्धिरित्यर्थः । कुस्ममिति दृष्टं कुस्मयतिः (?) कारितमिति चेत् कोर्नित्यसमासत्वात् उपसर्गस्य च बाह्यत्वात् कारितमेव । एषामर्थो धातुखण्डे एव द्रष्टव्यः ॥

संचर्चयन्नपनयानथ बुक्कयिष्णुः
श्वेवोग्रशब्दनपरः कररुद्धकाणः ।
मल्लो जिजम्भिषुरसूदितवीर्यमीशं
मुष्ट्या जजास बहु पाशतवांश्च दोष्णा ॥ ३८ ॥

अथ मल्ल ईशं जिजम्भिषुर्नाशयितुमिच्छुर्मुष्ट्या जजास प्रहतवान् । दोष्णा बहु बहुकृत्वः पाशितवान् बद्धवांश्च । कीदृशः । अपनयान् संचर्चयन्नावर्तयन् । श्वा इव बुक्कयिष्णुर्भषणशीलः । असूदितवीर्यमक्षीणवीर्यम् ॥—इतःपरं विकरणान्तरोक्ता एवोच्यन्ते । संचर्चयन्निति । १७१२ चर्च अध्ययने । अस्माच्छता । लक्षणया आवर्तनार्थता । बुक्कयिष्णुः । १७१३ बुक्क भषणे । श्वरवस्तत् । इष्णुच् । शब्दनेति । १७१४ शब्द शब्दक्रियायाम् । ल्युट् । सोपसर्गस्त्वयमाविष्कृताविति द्रुमे । काणः । १७१५ कण निमीलने । एकनेत्रनिमीलने चेदम् । अस्मादच् । जिजम्भिषुः । १७१६ जभि नाशने । णिजभावे सन्युः । असूदितेति । १७१७ सूद क्षरणे । कर्तरि क्तः । जजास । १७१८ जसु ताडने । णिजभावे लिट् । पाशितवान् । १७१९ पश बन्धने । पाशेः क्तवतुः ॥

द्रागामयन्विचटदस्थिकयाथ मुष्ट्या
प्रास्फोटयत्तमजितोऽपि स घाटिताङ्गम् ।
दिष्ट्यैष हिंसयति देव्यममुं युधीति
संमोदमर्जयति घोषति नाकिलोके ॥ ३९ ॥

---

१. 'चेतना' इति धातुपाठे. २. 'विवासेषु' इति धातुपाठे. ३. 'णः' इत्युभयत्र पाठः.

अथ नाकिलोके 'एष देव्यं मर्दयितव्यं अमुं युधि हिंसयति हिनस्ति दिष्ट्या' इति घोषति स्वाभिप्रायं प्रकाशयति संमोदमर्जयति वर्धयति सति अजितोऽपि विचटदस्थिकया भिद्यमानास्थिसंघया मुष्ट्या द्राग् आमयन् पीडयंस्तं प्रास्फोटयत् भिन्नाङ्गामकरोत् । घाटिताङ्गं घनीभूताङ्गं प्रहारभेदेन संकुचिताङ्गं वा ॥—आमयन्निति । १७२० अम रोगे । शता । विचटदिति । १७२१ चट १७२२ स्फुट भेदने । चटेर्गणोक्तत्वेन चुरादिणिचोऽनित्यत्वात् शपि शता । प्रास्फोटयत् । स्फुटेर्लङ् । घाटितेति । १७२३ घट संघाते । भेदने चेत्येके । कर्तरि क्तः । हिंसयति । 'हन्त्यर्थाश्च' । एते च स्वार्थे णिचं भजन्तीत्यर्थः । तेन हिंसेर्णिचि लट् । चटस्फुटघटानामपि हन्त्यर्थत्वमिष्यते । दीप्त्यर्थानामपि स्वार्थिकणिजस्ति द्रुमे । देव्यम् । १७२४ दिवु मर्दने । परिकूजने । इति । केचित् । ण्यत् । अर्जयति । १७२५ अर्ज प्रतियत्ने । सेतो गुणान्तराधानं तत् (?) । आर्जनेऽप्यस्ति । अस्माच्छता । घोषति । १७२६ घुषिर् विशब्दने । शब्देन स्वाभिप्रायप्रकाशनं तत् । स्तुतौ च द्रुमे । अस्य णिज्विकल्पो भाष्योक्तः । तेन शपि शता ॥

आक्रन्दयत्सु निभृतं नृपु लासिताशे-
षोत्तंसभूषणविमोक्षणयार्हिताभौ ।
आज्ञापनामिह विभाज्य नृपेण दृष्टौ
तौ शर्धनाय समयातयतां नियुद्धम् ॥ ४० ॥

नृषु निभृतं आक्रन्दयत्सु सततं रुदत्सु सत्सु तौ चाणूरकृष्णौ (?) आज्ञापनां विभाज्य दत्त्वा नृपेण दृष्टौ । शर्धनाय अन्योन्याभिभवार्थं नियुद्धं बाहुयुद्धं समयातयतां संस्कृतवन्तौ सविशेषं कृतवन्तौ । लासिताशेषाणां स्वकौशलालंकृतसर्वाङ्गाणामुत्तंसस्य च । अन्यालंकाराणां च युद्धार्थं त्यागेन अर्हिताभौ पूजनीयसविशेषशोभौ ॥—आक्रन्दयत्स्विति । १७२७ आङः क्रन्द सातत्ये । आङ्पूर्वः क्रन्दिः सातत्ये णिचं भजते । शता । शबु(व्यु)क्तयाराह्वानरोदनयोः सातत्यं चेदम् । लासितेति । १७२८ लस शिल्पयोगे । शिल्पोपयोगे इति केचित् । अस्मात् कर्मणि क्तः । उत्तंसेति । १७२९ तसि १७३० भूष अलंकारे[1] । तंसेर्घञ् । भूषणेति । भूषेर्ल्युट् । विमोक्षणया । १७३१ मोक्ष[2] असने । युच् । अर्हितेति । १७३२ अर्ह पूजायाम् । कर्मणि क्तः । आज्ञापनाम् । १७३३ ज्ञा नियोगे । आङ्पूर्व एवायम् । अस्माद्युच् । विभाज्येति । १७३४ भज विश्राणने । दानं तत् ल्यप् । शर्धनाय । १७३५ शृधु प्रसहने । अभिभवस्तत् । ल्युट् । समयातयताम् । १७३६ यत निकारोपस्कारयोः परिभवसंस्कारौ तौ । खेदे च द्रुमे । अस्माल्लङ् ॥

निर्यातितप्रहृतिमीशमतिप्रहृत्य
मल्लोऽथ वासितविचारमचुच्यवत्सः ।

---

१. 'अलंकरणे' इति धातुपाठे. २. अतन्त्रोयं धातुः. धातुपाठे नोपलभ्यते.

रोषान्ध्यभावितमसृग्भिरकल्पयत्तं
कृष्णोऽपि नाकिजनराकितलाग्यवीर्यः ॥ ४१ ॥

अथ स मल्लो निर्यातितप्रहृतिं कृतप्रतीहारमीशमतितरां प्रहृत्य वासितविचारं छिन्नसंशयं यथा तथा अचुच्यवत् जहास । कृष्णोऽपि रोषान्ध्येन रोषकृतेन मूढत्वेन भावितं मिश्रीकृतं तमसृग्भिरकल्पयत् मिश्रीकृतवान् । नाकिजनेन सुरजनेन राकितमास्वादितं लाग्यमास्वादनीयं वीर्यं यस्य सः श्रीकृष्णः ॥—निर्यातितेति । निसश्च धान्यादिप्रतिदाने । अस्मात् कर्मणि क्तः । वासितेति । **१७३७ वस** स्नेहनच्छेदापहरणेषु[1] । 'उपहरणेषु' इति वा पाठः । तस्मात् प्रागवत् क्तः । विचारेति । **१६३८ चर** संशयने[2] । असंशये च द्रुमे । घञ् । अचुच्यवत् । **१७३९ च्यु** हसने । सहने इति केचित् । च्युस इत्यन्ये । च्यावयतेर्लुङि चङ् भावितम् । **१७४० भुवोऽवकल्कने** । अस्यावकल्कने णिच् स्यात् । तच्च मिश्रीकरणम् । अन्ये तु चिन्तने विपाचनेऽवकल्कने चेत्याहुः । विपाचनम् । विपक्वीकरणम् । अस्मात् कर्मणि क्तः । अकल्पयत् । **१७४१ कृपेश्च** । मिश्रीकरणे णिच् स्यात् । अस्माल्लङ् । राकितेति । लाग्येति । **१७४२ रक १७४३ लग** आस्वादने । आद्योऽपि गान्त इत्येके । रक लघ इत्यन्ये । राकेः कर्मणि क्तः । लागेर्ण्यत् ॥

शौर्याञ्चितेन धृतलिङ्गितचेलकेन
संमोदितो हलधरोऽपि च मुष्टिकेन ।
मुष्ट्या तुदन्मुहुरतित्रसदाशु दोर्भ्या-
मुध्रासयज्जननुतस्तममोचयच्च ॥ ४२ ॥

हलधरोऽपि च मुष्टिकेन संमोदितः संसर्गं प्राप्तो मुहुर्मुष्ट्या तुदन् दोर्भ्यामाशु अतित्रसत् गृहीतवान् वारितवान् वा अमोचयच्च । कीदृशेन मुष्टिकेन । शौर्येणाञ्चितेनान्येभ्योऽधिकेन । धृतं लिङ्गितं मिश्रीकृतं चेलं येन तेन । उध्रासयद्भिरुञ्छवृत्तिभिर्जनैर्नुतः ॥—अञ्चितेनेति । **१७४४ अन्चु** विशेषणे । व्यावर्तनं तत् । कर्मणि क्तः । लिङ्गितेति । **१७४५ लिगि** चित्रीकरणे । प्रागवत् क्तः । संमोदितः । **१७४६ मुद** संसर्गे । कर्तरि क्तः । अतित्रसत् । **१७४७ त्रस** धारणे । तच्च ग्रहणं वारणं वा । लुङि चङ् । उध्रासयदिति । **१७४८ उध्रस** उञ्छे । उकार इदित्येके । उध्रसेः शता । अमोचयत् । **१७४९ मुच** प्रमोचने । लङ् ॥

दोर्भ्यां ग्रासयतां प्रपोषितरुषां निर्दालनोद्योगिनां
तेषां विक्रमणैरपाटि पटिमा शिक्षाप्यपोटि स्फुटम् ।

---

१. 'स्नेह' इति धातुपाठे. २. 'संशये' इति धातुपाठे.

स्थेमालोटि जवोप्यतुञ्जि लघिमा चाभिञ्ज्यपिञ्ज्यश्रमो
रोषोऽलुञ्जि रसो व्यभञ्जि बलवत्तालङ्घि चात्रस्यभीः ॥ ४३ ॥

दोर्भ्यां ग्रासयतां तत्तन्मर्मस्थानेषु गृह्णतां प्रपोषितरुषां सम्यग्धारितकोपानां परस्परं निर्दोलनोद्योगिनां मुष्टिविदारणोद्योगिनां तेषां श्रीकृष्णरामचाणूरमुष्टिकानां विक्रमणैः पराक्रमैः पटिमा युद्धसामर्थ्यं अपाटि कथितम् । शिक्षा अभ्यासोऽपि स्फुटमपोटि उक्ता । स्थेमा देहस्थैर्यमलोटि । जवः प्रहारवेगोऽपि अतुञ्जि । लघिमा शीघ्रकारित्वं चाभिञ्जि । अश्रमः पीडाभावोऽपिञ्जि । रोषः कोपपौष्कल्यमलुञ्जि । रसो युद्धकौतुकं व्यञ्जि । बलवत्ता एतावत् बलमिति अलङ्घि । अभीर्भयाभावोऽत्रसि च । सर्वत्रापि भाषितं स्पष्टं प्रकाशितमित्यर्थः । एषां भाषार्थस्यापि सद्भावात् प्रकाशितमित्येव वार्थः ॥—'आ स्वदः सकर्मकात्' । अतः परं स्वि(स्वद)पर्यन्तेभ्यः कर्मसंभवे एव णिच् स्यात् । ग्रासयतामिति । **१७५० ग्रस** ग्रहणे शता । प्रपोषितेति । **१७५१ पुष** धारणे । [कर्मणि क्तः ।] निर्दोलनेति । **१७५२ दल** विदारणे । युच् । अपाटि । अपोटि । अलोटि । अतुञ्जि । अभिञ्जि । अपिञ्जि । अलुञ्जि । व्यभञ्जि । अलङ्घि । अत्रसि । इति । **१७५३ पट १७५४ पुट १७५५ लुट १७५६ तुजि १७५७ भिजि १७५८ पिजि १७५९ लुजि १७६० भजि १७६१ लघि १७६२ त्रसि १७६३ पिसि १७६४ कुसि १७६५ दशि १७६६ कुशि १७६७ घट १७६८ घटि १७६९ बृहि १७७० बर्ह १७७१ बल्ह १७७२ गुप १७७३ धूप १७७४ विच्छ १७७५ चीव १७७६ पुथ १७७७ लोकृ १७७८ लोचृ १७७९ णद १७८० कुप १७८१ तर्क १७८२ वृतु १७८३ वृधु** भाषार्थाः एते एकविंशत् । भासार्था इत्येके । पुटिश्चूर्णनेऽपि द्रुमे । पटादिदशानां कर्मणि लुङि चिण् ॥

कश्चित्कष्टमविंसयद्रणमिमं कुंस्यं त्वया दंश्यतां
नाकुंश्यं परिघाटयेति च परेणोद्घण्टितोऽबृंहयत् ।
नाहं बर्हयितास्म्यवल्ह्यमपि भोः सर्वैरिदं गोप्यते
तांस्त्वं धूपय विच्छयन्क इव न त्वच्चीवनात्पोथयेत् ॥ ४४ ॥

तत्र प्रेक्षकेषु कश्चिदिमं रणं कष्टमसह्यमयोग्यमविंसयदकथयत् त्वया कुंस्यं दंश्यतां वक्तुं योग्यमुच्यताम् । अकुंश्यं न परिघाटय । अवक्तव्यं न वद इति परेणोद्घण्टित उक्तः । पूर्ववादी अबृंहयत् अकथयत । अहं न बर्हयितास्मि न वदिष्यामि । भोः हे भवन् अवल्ह्यमवाच्यमपि इदं सर्वैर्गोप्यते कथ्यते । त्वं तान् सर्वान् धूपय कथय । विच्छयन् कः इव त्वच्चीवनात् न पोथयेत् । एषु वदत्सु वदन् कान्वदुक्त्या न वदेत् । सर्वोऽपि वदेदेव ॥—अविंसयदिति । विंसेर्लङ् । कुंस्यम् कुंसेर्ण्यत् । दंश्यताम् । दंशेः कर्मणि लोट् । अकुंश्यम् । कुंश्येर्ण्यत् । परिघाटय । घाटेर्लोट् । उद्घण्टितः घण्टेः क-

र्मणि क्तः। अवृंहयत्। वृंहेर्लङ्। वर्हयितास्मि। वर्हेर्लुट्। वल्ह्यम्। बल्हेर्ण्यत्। गोप्यते। गोपेः कर्मणि लट्। धूपय। धूपेर्लोट्। विच्छयन्। विच्छेः शता। चीवनेति। चीवेर्ल्युट्। पोथयेत्। पोथेर्लिङ्॥

अलोचि चान्यैः समरेऽत्र कष्टतामलोकयन्दुष्यति नादयन्नपि।
कोपः प्रभोः कोपयति प्रतर्क्यते पापश्च ही वर्त्यमवर्धयज्जनः॥ ४५॥

अन्यैश्चालोचि अन्यैरपि एवमुक्तम्। अत्र समरे कष्टतामलोकयन् अकथयन् नादयन् कथयन् अपि दुष्यति। कुतः। कोपयति वदति जने, प्रभोः कोपः प्रतर्क्यते सर्वैः प्रकाश्यते ऊह्यते वा वर्त्यमवर्धयन् वक्तव्यमवदन् पापश्च भवति। ही का वात्र गतिः। खेदार्थो हीशब्दः॥—अलोचीति। लोचेः कर्मणि लुङि चिण्। अलोकयन्। नादयन्। कोपयति। लोकेर्नादेः कोपेश्च शता। प्रतर्क्यते। तर्किरूहेऽपि। तस्मात्कर्मणि लट्। वर्त्यम्। वर्तेर्ण्यत्। अवर्धयन्। वर्धेः शता॥

भीतिं रोटय लञ्जयानयमसत्स्वाद्यञ्ज्यतां दंसय
क्रौर्यं भ्रंशय रुंसयाल्पमतितां भाग्यक्षयं रुंशय।
मानं शीकय नाटयाकरुणतां दुर्वासनां घुण्टय
भ्रान्तिं जुञ्जय(?) भूपतेरिति जना गूढं मिथोऽरङ्घयन्॥ ४६॥

भीतिं रोटय। अनयं नयाभावं लञ्जय। असत्सु आद्यञ्ज्यतां प्रथमगण्यतां दंसय। क्रौर्यं भ्रंशय। अल्पमतितां रुंसय। भाग्यक्षयं रुंशय। मानं शीकय। अकरुणतां नाटय। दुर्वासनां घुण्टय। भ्रान्तिमन्यथा प्रतिपत्तिं जुञ्जय(?)। सर्वत्रापि अकथयन्नित्यर्थः। प्रकाशितवन्त इति वा। जना भूपतेर्भूपतिमधिकृत्य इति एवं गूढं अरङ्घयन् अकथयन्॥—रोटय। लञ्जय। अञ्ज्यताम्। दंसय। भ्रंशय। रुंसय। रुंशय। शीकय। नाटय। घुण्टय। जुञ्जय। इति। **१७८४ रुट १७८५ लजि १७८६ अजि १७८७ दसि १७८८ भ्रशि १७८९ रुंसि[1] १७९० रुशि १७९१ शीकृ[2] १७९२ नट १७९३ घुटि १७९४ जिचि[3] १७९५ रघि १७९६ लघि १७९७ अहि १७९८ रहि १७९९ महि चेति** पञ्चदश चैके पठन्ति। **१८०० लडि १८०१ तड १८०२ नड[4]** चेत्यन्ये। अर्थः प्राग्वत्। तत्र रोट्याद्येकादशानां 'समुच्चयेऽन्यतरस्याम्' इति सर्वलकारस्थाने विहितो लोट्। अञ्ज्येस्तु ण्यत्। अरङ्घयन्निति। 'समुच्चये सामान्यवचनस्य' इति अनुप्रयुक्तस्य रङ्घेर्लङ्। तेन लोडन्तनामपि भूतार्थता। अन्येषां भाषणीयविशेषवाचित्वात् रङ्घेस्तदभावात् सामान्यार्थता॥

वीर्यं दुरंहमभिरंहय मंहयाभां
मौग्ध्यं प्रलण्डय च तोडय निर्भयत्वम्।

---

१. 'रुशि शीक रुसि' इत्ययं क्रमो धातुपाठे. २. 'शीकृ' इत्ययमनृदिद्धातुपाठे.
३. 'जि चि' इति द्वौ भिन्नौ धातू धातुपाठे. ४. 'नल' इति धातुपाठे.

संनाडयन्त्य इति पूरितरोजशङ्का
नार्यो हरेः समरकेलिमसिष्वदन्त ॥ ४७ ॥

दुरहं वक्तुं दुष्करं वीर्यमभिरंहय । आभामत्यद्भुतानङ्गशोभां मंहय । मौग्ध्यं युद्धेऽपि मनोहरत्वं प्रलण्डय च । निर्भयत्वम् । अतिक्रूरमल्लगणावृतत्वेऽपि भयराहित्यम् । तोडय । चतुर्षु कथयतीत्यर्थः । हरेः हरिसंबन्धं इति संनाडयन्त्यः कथयन्त्यः पूरितरोजशङ्काः पूरितहरिहिंसाशङ्काः च सत्यः समरकेलिमनायासयुद्धमसिष्वदन्त आस्वादितवत्यः ॥—दुरंहमिति । अंहेः खल् । अभिरंहय । मंहय । प्रलण्डय । तोडय । रंह्यादिचतुर्णां प्राग्वल्लोट् । संनाडयन्त्यः । नाडेः शतरि ङीप् । एते भाषार्थाः समुदिता एकोनपञ्चाशत् ॥ —पूरितेति । **१८०३ पूरी** आप्यायने । ईदित्त्वेन निष्ठायामनिट्त्वस्याणिच्येव संभवाणिज्विकल्पः । अस्मात् कर्मणि क्तः । रोजेति । **१८०४ रुज** हिंसायाम् । घञ् । असिष्विदन्त । **१८०५ ष्वद** आस्वादने । संवरणे इत्येके । स्वादे इत्यन्ये । स्वदेश्चङ् । आष्वदीया गताः ॥

कृष्णोऽथ बाहुयुगलैर्बहु योजयन्तं
दोष्णा प्रपर्च्य रिपुमार्चत मुष्टिघातैः ।
तच्चासहन्तममुमैरदलायितायः
स्थैर्यं सुदूरमपवृक्तवृतिप्रभावः ॥ ४८ ॥

अथ कृष्णोऽपि बाहुयुगलैर्बहु अधिकं योजयन्तं बध्नन्तं रिपुं दोष्णा प्रपर्च्य बद्ध्वा मुष्टिघातैरार्चतोपचारं कृतवान् । समरे ह्यौचितत्वात् । प्रहार एवोपचारः । तत्प्रहरणमसहन्तममुं सुदूरमैरत् क्षिप्तवान् च । अलायितम् अविलापितमतिकठिनमय इव स्थैर्यं यस्य तम् । अपवृक्तवृतिरवर्जितावृतिस्त्यक्तावरणः प्रकाशितः प्रभावो येन सः ॥—**आ धृषाद्वा ।** इतः परं सु(यु)जादीनां धृषिपर्यन्तानां वा णिच् स्यात् । योजयन्तमिति । **१८०६ युज १८०७ पृच** संयमने । आद्यो योगे च द्रुमे । अन्त्यः संपर्चने च । योजेः शता । प्रपर्च्य । पचेर्ल्यप् । आर्चत **१८०८ अर्च** पूजायाम् । अस्माण्णिचि तङेवेत्येके । तेन तङि लङ् । असहन्तम् । **१८०९ षह** मर्षणे । अणिचि शपि शता । ऐरत् । **१८१० ईर** क्षेपे । गतौ च द्रुमे । शपि लङ् । अलायितेति । **१८११ ली** द्रवीकरणे । णिचि कर्मणि क्तः । अपवृक्तेति । **१८१२ वृजी** वर्जने । वृजेः कर्मणि क्तः । वृतीति । **१८१३ वृञ्** आवरणे । क्तिन् ॥

अजरद्वृषवद्विरिक्तपीडः पुनरभ्येत्य विशिष्टचित्ततापि ।
प्रजहार हरिं रणेष्वतर्पन्सुदृढं छर्दितमन्युरप्रदर्भन् ॥ ४९ ॥

भगवता दूरे प्रक्षिप्तः स चाणूरो रणेषु अतर्पन् तृप्तिहीनः छर्दितमन्युः दीप्तकोपः । अप्रदर्भन् भीतिहीनः । अजरद्वृषवत् यौवनयुक्तो वृष इव विरिक्तपीडो गतपीडः सन् ।

पुनरभ्येत्य हरिं सुदृढं प्रजहार ॥—अजरदिति । १८१४ जॄ वयोहानौ । १८१५ ज्रि इत्येके । जॄधातोः शता । विरिक्तेति । १८१६ रिच वियोजनसंपर्चनयोः । कर्तरि क्तः । विशिष्टेति । १८१७ शिष असर्वोपयोगे । विपूर्वोऽतिशये । तस्मात् कर्तरि क्तः । तापी । १८१८ तप दाहे । णिनिः । रिच्यादयस्त्रयो णिजभावेऽनिटः । अतर्पन् । १८१९ तृप तृप्तौ । प्रीणने च द्रुमे । शपि शता । छर्दितेति । १८२० छृदी संदीपने । ईदित्त्वं नेति केचित् । अस्मात् कर्मणि क्तः । चृप छृप तृप दृप संदीपने इत्यन्येके । अप्रदर्भन् । १८२१ दृभी भये । शता ॥

कृष्णोऽविश्रथितारिभीरभिमयन्दोष्णा ग्रथन्भ्रामय-
न्क्राथ्यं प्रोथितवानशीकितमतिं भूमावचीकन्नमुम् ।
मल्लोऽर्ध्यः स च हिंसितः पदमुपासात्सीद्धरेः शुन्धितः
तावत्स्वं बलमच्छदज्जुषितवान्मुष्ट्या हली मुष्टिकम् ॥ ५० ॥

कृष्णोऽविश्रथितारिभीस्त्यक्तशत्रुभयः सन्नभिमुखमयन् गच्छन् अमुं दोष्णा ग्रथन् बध्नन् भ्रामयंश्च भूमौ प्रोथितवान् अभिहतवान् । क्राथ्यं हिंस्यमशीकितमतिमसहनबुद्धिमचीकन्नसहमानोऽर्ध्यो हिंसनीयः स मल्लश्च हिंसितः । शुन्धितः शुद्धः सन् हरेः पदं श्रीविष्णुलोकमुपासात्सीत् प्राप्तवान् । तावत् तस्मिन्नवसरे हली स्वं निजं बलमच्छदन् मुष्ट्या मुष्टिकं जुषितवान् हिंसितवान् ॥—श्रथितेति । १८२३[1] श्रथ मोक्षणे । बन्धे च द्रुमे । हिंसायामिति केचित् । कर्मणि क्तः । अभिमयन् । १८२४ मी गतौ । शता । ग्रथन् । १८२५ ग्रथ बन्धने । शता । क्राथ्यम् । क्रथ हिंसायामिति स्वरितेतं केचिदाहुः । तस्माण्ण्यत् । अशीकितेति । १८२६ शीक आमर्षणे । १८२७ चीक च । आद्यः सेचने । शीकेः कर्तरि क्तः । अचीकन् । चीकेः शता । अर्ध्यः । १८२८ अर्द हिंसायाम् । स्वरितेत् । तस्माण्ण्यत् । हिंसितः । १८२९ हिसि हिंसायाम् । इदितोऽस्य युजादिफलं चिन्त्यम् । कर्मणि क्तः । उपासात्सीत् । १८३१[2] आङः षद पद्यर्थे । पद्यर्थो गतिः । लुङि सिचि वृद्धिः । शशपोः सदेः ऌदित्वाल्लुङ्यङेवेति भेदः । शुन्धितः । १८३२ शुन्ध शौचकर्मणि । कर्माविवक्षया कर्तरि क्तः । अच्छदन् । १८३३ छद अपवारणे । स्वरितेदित्येके । शता । जुषितवान् । १८३४ जुष परितर्कणे । ऊहो हिंसा वा तत् । परितर्पणे इत्येके । अस्मात् क्तवतुः । अस्येदित्त्वाभावादिट् ॥

कूटाद्येषु हतेषु धावितमतिष्वन्येषु धावत्सु च
स्वैरं तत्र जनान्प्रयन्विगलितश्रन्थान्कचान्ग्रन्थयन् ।
आपन्खेदमरिं तनञ्जनहितं चिक्रीड गोपैर्हरि-
स्तूर्योत्थो वितनन्ध्वनिर्दिवमगाद्धूतो यथा वादितः ॥ ५१ ॥

---

१. अत्र '१८२२ दृभ संदर्भे' इत्ययं धातुर्नोदाहृतः. २. अत्र '१८३० अर्ह पूजायाम्' नोदाहृतः.

कूटाद्येषु हतेषु अन्येषु धावितमतिषु भिया कम्पितचित्तेषु धावत्सु तत्सु हरिर्गोपैः सह तत्र स्वैरं चिक्रीड । कथंभूतः । जनान् प्रयन् । विगलितश्रन्थान् कचान् ग्रन्थयन् । अरिं खेदं आपन् लम्भयन् । जनहितं तनन् श्रद्दधानः इच्छन् । तूर्योत्थो ध्वनिर्वितनन् दीर्घीभवन् वादितः संदेशेन प्रेरितो दूत इव देवान् प्रति वक्तुं दिवमगात् ॥—धावितेति । **१८३५ धूञ्** कम्पने । कर्माविवक्षया अकर्मकत्वात् कर्तरि क्तः । प्रयन् **१८३६ प्रीञ्** तर्पणे । शता । श्रन्थेति । **१८३७ श्रन्थ १८३८ ग्रन्थ** संदर्भे । आद्यो हिंसायां च द्रुमे । श्रन्थेर्घञ् । ग्रन्थयन् । ग्रन्थेः शता । आपन् । तनन् । वितनन् । रिच्यादिवदनिट् । **१८३९ आप्लृ** लम्भने । **१८४० तनु** श्रद्धोपकरणयोः । उपहतौ श्रद्धोपघाते च द्रुमे । 'उपसर्गाच्च दैर्घ्ये' । त्रिभ्यः शता । **१८४१ चन** श्रद्धोपहननयोरिति चैके । वादितः । **१८४२ वद** संदेशवचने । स्वरितेत् । वचने च द्रुमे । अस्मात् कर्तरि क्तः ॥

वचन्तो मानन्तो हरिविभवमानन्दमखिला
बभूवुर्गर्हन्तो मनसि नृपतिं मार्गितखलम् ।
स्त्रियश्चोत्कण्ठन्त्यो ददृशुरजितं मृष्टतनवः
नृपस्त्वेतन्नामर्षत रिपुजनाधर्षितबलः ॥ ५२ ॥

अखिलाः सर्वे जनाः हरेर्विभवं प्रभावं वचन्तः कथयन्तो बहुमान्यमानाश्चानन्दं बभूवुः प्रापुः । नृपतिं मनसि गर्हन्तो निन्दन्तो मार्गितखलमन्विष्टदुष्टजनं स्त्रिय उत्कण्ठन्त्यो रागविवशा अजितं ददृशुः । मृष्टतनवः स्वच्छीकृताङ्गाश्च अलंकृताङ्गाश्च । नृपस्तु एतत् श्रीकृष्णप्रशंसादिकं न अमर्षत न सोढवान् । रिपुजनैरधर्षितबलोऽनभिभूतपराक्रमः ॥—वचन्तः । मानन्तः । **१८४३ वच** परिभाषणे । अनिट् । **१८४४ मान** पूजायाम् । द्वयोः शता । बभूवुः । **१८४५ भू** प्राप्तौ । आत्मनेपदी । भूधातुः प्राप्त्यर्थे वा णिज्वान् । णिजणिचोरात्मनेपदी च स्यात् । अणिच्यात्मनेपदं नेत्येके । तस्माल्लिट् । गर्हन्तः । **१८४६ गर्ह** निन्दने[1] । शता । मार्गितेति । **१८४७ मार्ग** अन्वेषणे । कर्मणि क्तः । उत्कण्ठन्त्यः । **१८४८ कठि** शोके । प्रायेणोत्पूर्व उत्कण्ठार्थः । अस्माच्छतरि ङीप् । मृष्टेति । **१८४९ मृज** शौचालंकारयोः । कर्मणि क्तः । अमर्षत् । **१८५० मृष** तितिक्षायाम् । स्वरितेत् । लङ् । अधर्षितेति । **१८५१ धृष** प्रसहने । कर्मणि क्तः । 'वष बन्धने' इति केचिदाधृषीयेषु इच्छन्ति । आधृषीया गताः ॥

क्रुद्धेनाकथि चाप्यवर्यगणने शठ्येन भोः श्वठ्यतां
मन्त्री तौ प्रपटय्य पाशवटनैः पापौ विरह्यौ पुरात् ।
के मूढाः स्तनयित्नुनिर्गदनवत्तूर्यध्वनिं कुर्वते
मल्लौघोऽपतयद्रिपुं न तु पतां चक्रे स पातोचितः ॥ ५३ ॥

---

१. 'विनिन्दने' इति धातुपाठे.

क्रुद्धेन तेन अकथि अपि कथितम् । अपिशब्दः पूर्ववाक्यार्थसमुच्चये । न केवलं नामर्षत् इत्येतावत् एवमुक्तं च । अवर्यगणने अनीप्सितव्यानां गणने । शठ्येन प्रथममेव कथनीयेन भोः परिजनाः, मन्त्री श्वठ्यतां सम्यक् भाष्यताम् । पापौ तौ कृष्णरामौ पाशानां वटनैर्वेष्टनैः प्रपटय्य सम्यग्बद्ध्वा पुरात् विरह्यौ त्याज्यौ । न तु हननपरिश्रमो मा भूत् बहूनां संतोषातिदर्शनेन सविशेषवाद्यघोषश्रवणात् । कुपित आह । के मूढाः स्तनयित्नुनिर्गदनवत् मेघघोषवत् तूर्यध्वनिं कुर्वते । मल्लौघ एव अपतयत् परिपातोचितः वधयोग्यः । तु रिपुर्न पतांचक्रे न पतितः ॥—इतः परमदन्ताः । अकथि । **१८५२ कथ** वाक्यप्रबन्धे । णिजन्तात् कर्मणि चिण् । अतोलोपस्य स्थानिवत्त्वान्न वृद्धिः । अवर्येति । **१८५३ वर** ईप्सायाम् । ण्यत् । गणने । **१८५४ गण** संख्याने । तच्च संख्याविज्ञानं । भागशोऽवस्थानं च । अस्माल्ल्युट् । शठ्येन । **१८५५ शठ १८५६ श्वठ** सम्यगवभाषणे । शठेरचो यत् । श्वठ्यताम् । श्वठेः कर्मणि लोट् । प्रपटय्य । **१८५७ पट १८५८ वट** ग्रन्थे । 'वट वेष्टने' इत्येके । पटेर्ल्यप् । 'ल्यपि लघुपूर्वात्' इत्ययादेशः । वटनैः वटेर्ल्युट् । विरह्यौ । **१८५९ रह** त्यागे । यत् । स्तनयित्नु इति । **१८६० स्तन १८६१ गदी** देवशब्दे । ईकारो द्विवचनकृतः । न त्वीदित्वार्थः । 'स्तनिहृषिपुषिगमिमदिभ्यो णेरित्नुच्' इति स्तनेरित्नुचि 'अयामन्ता' इत्ययादेशः । निर्गदनेति । गदेर्ल्युट् । अपतयत् । **१८६२ पत** गतौ वा । अयं गतौ वा णिज्वान् । तत्र णिचि लङ् । पतांचक्रे । णिजभावेऽप्यदन्तत्वेन अनेकाच्त्वादाम्प्रत्ययः । पातेति । पत गतौ वेत्यदन्तत्वं विकल्प्यत इति मते अनदन्तत्वे घञ् । 'पत ऐश्वर्यगत्योः' इति द्रुमे ॥

झटिति पषयन्त्वस्माद्गोपाः स्वरापयताधिकं
रचयत मुहुर्दण्डाघातं वनं कलयन्त्वमी ।
चहकमहितं नन्दं बद्ध्वास्य सारयतो धनं
हरत कृपकस्यारेस्तातं हत श्रथयत्तमम् ॥ ५४ ॥

गोपा झटिति अस्मात् पुरात् पषयन्तु गच्छन्तु । एतान् अधिकं स्वरापयत भर्त्सयत । [मुहुर्दण्डाघातं रचयत ।] अमी वनं कलयन्तु गच्छन्तु । नन्दं बद्ध्वा अस्य धनं हरत । चहकैः शाठ्यवद्भिर्महितं पूजितम् । सारयतो दुर्बलीभवतः । कृपकस्य दुर्बलस्य अरेः श्रीकृष्णस्य तातं वसुदेवं हत विगतप्राणं कुरुत । श्रथयत्तममतिदुर्बलम् ॥—पषयन्त्विति । **१८६३ पष** अनुपसर्गात् । अयमनुपसर्गो गतावदन्तः । बन्ध बाधास्पर्शेषु च द्रुमे । अस्मात् प्राप्तकाले लोट् । स्वरापयत । **१८६४ स्वर** आक्षेपे । 'कथादिपाति स्पायो(?)णौ पुग्लुक्त्वम्' इति शाकटायनसूत्रेण पुकि वृद्धिः । प्राग्वल्लोट् । रचयत । कलयन्तु । **१८६५ रच** प्रतियत्ने । कृत्यर्थे च द्रुमे । **१८६६ कल** गतौ संख्याने च । द्वयोर्लोट् । चहकेति । **१८६७ चह** परिकल्कने । ण्वुल् । महितम् । **१८६८ मह** पू-

जायाम् । कर्मणि क्तः । सारयतः । **१८६९ सार १८७० कृप १८७१ श्रथ** दौर्बल्ये । दीर्घवतां पाठोऽग्लोपित्वार्थः । सारेः शता । कृपकस्य । कृपेर्ण्वुल् । श्रथय-दिति । श्रथेः शता ॥

यो मत्क्षयं स्पृहयते मयि भामितेऽपि
संसूचयत्यरिगुणांश्च मदन्नखेटी ।
तं क्षोटितौजसमगोमितभूमिबधं (द्धं)
शत्रौ कुमारयति मारयतोग्रसेनम् ॥ ५५ ॥

तमुग्रसेनं शत्रौ कुमारयति क्रीडति मारयत विगतप्राणं कुरुत । यो मम क्षयं स्पृहयते । मयि भामिते कुपिते अपि अरिगुणान् संसूचयति च । मदन्नखेटी मद्दत्तान्नभक्षी । कीदृशम् । क्षोटितौजसं क्षीणबलम् । अगोमितायां अनुपलिप्तायां असंस्कृतायां भूमौ बद्धम् ॥—स्पृहयत इति । **१८७२ स्पृह** ईप्सायाम् । लट् । भामितेति । **१८७३ भाम** क्रोधे । कर्तरि क्तः । संसूचयति । **१८७४ सूच** पैशुन्ये । लट् । अन्नखेटी । **१८७५ खेट** भक्षणे । खेड इत्येके । खोट इत्यपरे । खेटेर्णिनिः । अयं क्षेपे च द्रुमे। क्षोटितेति । **१८७६ क्षोट** क्षेये[1] । कर्तरि क्तः । अगोमितेति । **१८७७ गोम** उपलेपने । कर्मणि क्तः । कुमारयति । **१८७८ कुमार** क्रीडायाम् । शता ॥

शील्यं न सामनममीष्विह वेलयामि
पल्यूल्यतां यदुजनो मम वातकोऽपि ।
छिद्रं गवेषयितुमेव तु वासयन्ते
ये ते निवासितधियो ह्यसुभिर्विभाज्याः ॥ ५६ ॥

अहममीषु यदुष्विहेदानीं सामनमनुसरणं शील्यमभ्यसनीयं न वेलयामि प्राप्तकालतया नोपदिशामि । यदूनामनुसरणाभ्यासकालो न भवतीति वदामीत्यर्थः । मम वातकः सेवको यदुजनोऽपि पल्यूल्यतां छिद्यताम् । ये छिद्रं गवेषयितुमन्वेष्टुमेव वासयन्ते सेवन्ते तेऽसुभिर्विभाज्याः पृथक्कर्तव्या मारयितव्याः । यस्मात् पल्यूल्यतां निवासितधिय आच्छादिताभिप्रायाः ॥—शील्यमिति । **१८७९ शील** उपधारणे । अभ्यासस्तत् । 'अचो यत्' । सामनम् । **१८८० साम** सान्त्वप्रयोगे । ल्युट् । वेलयामि । **१८८१ वेल** कालोपदेशे । लट् । कालेत्यपि धातुरित्येके । पल्यूल्यताम् । **१८८२ पल्यूल** लेवनशोधनयोः[2] । कर्मणि लोट् । वातकः । **१८८३ वात** सुखसेवनयोः । गतिसुखेत्येके । ण्वुल् । गवेषयितुम् । **१८८४ गवेष** मार्गणे । तुमुन् । वासयन्ते **१८८५ वास** उपसेवायाम् । लट् । निवासितेति । **१८८६ निवास** आच्छादने । कर्मणि क्तः । विभाज्याः । **१८८७ भाज** पृथक्कर्मणि । यत् ॥

---

१. 'क्षेपे' इति धातुपाठे. २. 'लवनपवनयोः' इति धातुपाठे.

ते मामद्य सभाजयन्ति भुवने यैरून्यते सत्पथो
न क्वापि ध्वनयन्तु वेदमुखरास्ते कूटनीया द्विजाः ।
इत्यूचे स हि केतयन्परिजनान्सेनापतीन्ग्रामय-
न्स्वामात्यान्कुणयन्भटांश्च गुणयन्नृणां मुदं स्तेनयन् ॥ ५७॥

यैः सत्पथः सन्मार्ग ऊन्यते त्यज्यते ते मामद्य सभाजयन्ति प्रीणयन्ति पश्यन्ति सेवन्ते च । वेदमुखरा न क्वापि ध्वनयन्तु शब्दं कुर्वन्तु । ते वेदाभ्यासशीला द्विजाः कूटनीयाः परितापनीयाश्च । स कंस इति ऊचे । हि किमर्थं परिजनान्केतयन्, सेनापतीन् ग्रामयन्, स्वामात्यान् कुणयन्, भटान् गुणयन् । श्रावयन्निति सर्वत्रार्थः । हेतौ शता । नृणां सर्वजनानां मुदं स्तेनयन्नपहरन् ॥—सभाजयन्तीति । १८८८ **सभाज** प्रीतिदर्शनयोः । प्रीतिसेवनयोरित्येके । लट् । ऊन्यते । १८८९ **ऊन** परिहाणे । कर्मणि लट् । ध्वनयन्तु । १२९० **ध्वन** शब्दे । लोट् । कूटनीयाः । १८९१ **कूट** परितापे । परिदाहे इति केचित् । कूड दाहे इति हरदत्तः । कूटेरनीयर् । केतयन् । ग्रामयन् । कुणयन् । गुणयन् इति । १८९२ **केत**[1] १८९३ **ग्राम** १८९४ **कुण** १८९५ **गुण** चामन्त्रणे । चकारात् कूटेति च । केतादेः शता । १८९६ **केत** श्रावणे निमन्त्रणे च । श्रावणं समयोद्घोषणम् । निमन्त्रणमाज्ञा । १८९७ **कुण** संकोचने च । भासने च द्रुमे । स्तेनयन् । १८९८ **स्तेन** चौर्ये । शता ॥

तच्चाकर्ण्य सरोषमुत्पदयते स्मोत्तुङ्गमञ्चं हरिः
प्रोत्तिष्ठन्नसिचर्मणी गृहितवान्कंसोऽपि मृग्योऽसताम् ।
द्रष्टॄणां कुहकोऽथ शूरयितृभिः स्तुत्योऽसिना वीरयां-
चक्रे स्थूलितभीतिरर्थितवधाः सत्रा शनैर्गर्वितैः ॥ ५८ ॥

हरिश्च तत् कंसवाक्यमाकर्ण्योत्तुङ्गमञ्चं सरोषमुत्पदयते स्म उत्पतितवान् । कंसोऽपि प्रोत्तिष्ठन्नसिचर्मणी गृहीतवान् । असतां जरासंधादीनां मृग्योऽन्वेष्यः । अथ द्रष्टॄणां कुहको विस्मापकः सन्नसिना वीरयांचक्रे पराक्रमं चकार । शूरयितृभिः पराक्रमकृद्भिः स्तुत्यः । स्थूलितभीतिः परिवृद्धभयः सत्रा शनैर्यज्ञहविर्भागभुग्भिर्देवैरर्थितवधः । गर्वितैरिदानीमेव कंसनाशात् स्वेष्टसिद्धिः स्यादिति अहंकृतैः ॥—आ गर्वादात्मनेपदिनः । उत्पदयते । १८९९ **पद** गतौ । लट् । गृहीतवान् । १९०० **गृह** ग्रहणे । क्तवतुः । मृग्यः । १९०१ **मृग** अन्वेषणे । यत् । कुहकः । १९०२ **कुह** विस्मापने । ण्वुल् । शूरयितृभिः । १९०३ **शूर** १९०४ **वीर** विक्रान्तौ । शूरेस्तृच् । वीरयांचक्रे । वीरेर्लिट् । स्थूलितेति । १९०५ **स्थूल** परिबृंहणे । कर्तरि क्तः । अर्थितेति । १९०६ **अर्थ** याच्ञायाम्[2] । कर्मणि क्तः । सत्रेति १९०७ **सत्र** संतानक्रियायाम् । संततं दीर्घकालतया क्रियत इति सत्रः । घञ् । गर्वितैः । १९०८ **गर्व** माने । कर्तरि क्तः । आगर्वीया गताः ॥

---

१. 'सङ्केत' इति पठितोऽयं धातुपाठे. २. 'उपयाच्ञायाम्' इति धातुपाठे.

आसूत्रयत्स हि तथाङ्गमसिप्रचारै-
र्मोमुत्रितारिरतीरुक्षणया रणेषु।
दुष्पारदुश्चरिततीरणकृद्यथेशो
नो चक्षमे पुटयितुं तमकत्रितोष्मा ॥ ५९ ॥

ईशः पुटयितुं संसर्गं प्राप्तुं स्प्रष्टुं यथा नो नहि चक्षमे शक्तोऽभूत्, स तथा असिप्रचारैः खड्गभ्रमणैरङ्गमासूत्रयत् वेष्टितवान्। कीदृगीशः। दुष्पारदुश्चरिततीरणकृदपारदुरिताब्धिपारकः। अकत्रितोष्मा अकत्रितोऽशिथिलः पूर्ण ऊष्मा यस्य सः। कीदृशः कंसः। अतिरूक्षणया अतिक्रूरत्वेन मोमूत्रितारिः पुनः पुनः भृशं वा भीषितशत्रुवर्गः॥—आसूत्रयदिति। **१९०९ सूत्र** वेष्टने। लङ्। मोमूत्रितेति। **१९१० मूत्र** प्रस्रवणे। अस्मात् 'सूचिसूत्रि' इति यङन्तात् कर्मणि क्तः। रूक्षणया। **१९११ रूक्ष** पारुष्ये। युच्। निष्पारेति। **१९१२ पार १९१३ तीर** कर्मसमाप्तौ। पारेर्घञ्। तीरणेति। तीरेर्ल्युट्। पुटयितुम्। **१९१४ पुट** संसर्गे। तुमुन्। अकत्रितेति। **१९१६ कत्र** शैथिल्ये। कर्तरि क्तः॥

त्वां खड्गयामि खलयन्त्वमुना जना मां
त्वं विष्टपं गरुडयन्हरिरेव चेत्किम्।
लोकोऽद्य घातयतु कृष्णमिति प्रलापि
तं[सं]पतन्नपि न खड्गयितुं स लेभे ॥ ६० ॥

अहं त्वां खड्गयामि खड्गं करोमि। जना अमुना मां खलयन्तु खलमाचक्षताम्। त्वं विष्टपं सर्वलोकं गरुडयन् गरुडेनातिक्रामन् साक्षात् श्रीहरिरेवासि चेत् मम तेन किम्। न शङ्कालेशोऽपि। लोकोऽद्य कृष्णं घातयतु कृष्णस्य वधं कथयतु। इति प्रलापी संपतन् स कंसः तं श्रीकृष्णं खड्गयितुं खड्गेन छेत्तुमपि न लेभे। उपायं न लब्धवान्॥—खड्गयामीति। 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्टवच्च'। एतदेव विवृणोति। 'तत्करोति तदाचष्टे'। खड्गयामि करोत्यर्थे णिचि लट्। खलयन्तु। आख्यानार्थे णिचि लोट्। गरुडयन्निति। 'तेनातिक्रामति'। अस्मिन्नर्थे णिचि शता। 'धातुरूपं च'। कृदन्ताण्णिचि धातुरूपं भजन्ते। अनेन 'आख्यानात्कृतस्तदाचष्टे' इति णिच्। 'कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' इत्येतदुक्तम्। तेन कृष्णस्य कर्मत्वम्, वधभावनिवृत्त्या हनेर्णिजूपत्वं च। तस्माल्लोट्। घातयतु। खड्गयितुमिति। 'कर्तृकरणाद्धात्वर्थे'। कर्तुर्यानि करणानि परश्वधादीनि तेभ्यस्तद्धात्वर्थे णिच् स्यात्। इति खड्गशब्दाण्णिचि तुमुन्॥

लोके बष्कयतीह चित्रितमहामञ्चे स्वयं चित्रय-
न्दोष्णा खड्गमुदस्य तस्य वटयन्हस्तादगृह्णादमुम्।

१. 'निष्पार' इति पाठः. २. '१९१५ धेक दर्शने' इत्येके. नायमुदाहृतः.

धाम्नोच्चैर्लजयन्विमिश्रितजने रङ्गे निपात्याथ तं
द्राक्सङ्ग्रामयमाणशस्त्रजकिणस्तोम्ये पपातोरसि ॥ ६१ ॥

इह चित्रिते कृतचित्रलेखने महामञ्चे स्थितः श्रीकृष्णः लोके वष्कयति पश्यति दोष्णा स्वयं चित्रयन्नाश्चर्यं कुर्वन् उदंस्य उच्चैराहत्य तस्य हस्तात् खड्गं वटयन् पृथक्कुर्वन्नमुमगृह्णात्। अथ तं विमिश्रितजने रङ्गे निपात्य तस्योरसि द्राक् पपात। धाम्नोच्चैर्लजयन् प्रकाशमानः। सङ्ग्रामयमाणशस्त्रजकिणस्तोम्ये सङ्ग्रामयमाणानां युद्धकर्तॄणां शस्त्रजकिणैः स्तोम्ये श्लाघनीये वक्षसि ॥—वष्कयतीति। १९१७ वष्क[1] दर्शने। शता। चित्रितेति। १९१८ चित्र चित्रीकरणे। आलेख्यकरणं तत्। कर्मणि क्तः। चित्रयन्। 'कदाचिद्दर्शने'। अद्भुतदर्शने चार्थे चित्रधातोर्णिच्। क्षणिकदर्शने। अस्माच्छता। उदंस्य। १९१९ अंस समाघाते। विभाजने च द्रुमे। ल्यप्। वटयन्। १९२० वट विभाजने। वटीत्येके। वटेः शता। लजयन्। १९२१ लज प्रकाशने। लजीत्येके। वण्टिलञ्ज्योरिदित्त्वेऽप्यत्र पाठाददन्तकार्यं पुगादि स्यादेवेति माधवः। मिश्रितेति। १९२२ मिश्र संपर्के। कर्तरि क्तः। सङ्ग्रामयमाणेति। १९२३ सङ्ग्राम युद्धे। अयमात्मनेपदी। शानच्। स्तोम्ये। १९२४ स्तोम श्लाघायाम्। यत् ॥

यो ह्यच्छिद्रित एव वीर्यशतकृत्तस्मिन्पतत्यन्धय-
न्पिष्टाङ्गः स ममार दण्डितखलस्येशस्य पादाङ्कितः।
कृष्णोऽप्यश्रुजलाङ्कितेऽतिसुखयत्यामुच्य पुष्पोत्करं
देवौघे हृतदुःखने रसयति व्याकर्षदेनं क्षितौ ॥ ६२ ॥

योऽच्छिद्रित एवाविद्धकर्ण एव तस्मात् पूर्वमेव पूतनावधादिवीर्यशतकृत् हि। तस्मिन् पतति पिष्टाङ्गोऽन्धयन् मोहं प्राप्तः स कंसो ममार। दण्डितखलस्य पीडितदुष्टजनस्य श्रीकृष्णस्य पादे अङ्कितो मुद्रितः। तदा च कृष्णोऽपि देवौघे अश्रुजलेन अङ्किते चिह्निते पुष्पोत्करमामुच्य अतिसुखयति भृशं सुखमनुभवति हृतदुःखने हृतदुःखानुभवे रसयति भगवद्व्यापारमास्वादयति सति च। एनं कंसं क्षितौ व्याकर्षत्। कंसद्विष्टानां निजभक्तानां यदूनां पीडानिवृत्त्यर्थमेतत् ॥—अच्छिद्रितेति। १९२५ छिद्र कर्णभेदने। कर्णेति पृथग्धातुरित्येके। [कर्मणि क्तः।] अन्धयन्। १९२६ अन्ध दृष्ट्युपघाते। शता। दण्डितेति। १९२७ दण्ड दण्डनिपातने। कर्मणि क्तः। अङ्कित इति। अङ्कितेति। १९२८ अङ्क पदे लक्षणे च। १९२९ अङ्ग च। द्वयोः कर्मणि क्तः। अतिसुखयति। १९३० सुख १९३१ दुःख तत्क्रियायाम्। तत्क्रिया तदनुभवः। सुखेः शता। दुःखनेति। दुःखेर्ल्युट्। रसयति। १९३२ रस आस्वादनस्नेहनयोः। शता ॥

नित्यं व्ययापितमलो हृदि रूपयंस्तं
प्रच्छेदितप्रकृतिरच्छदितस्वरूपम्।

---

1. 'वल्क' इति धातुपाठे.

ब्रह्माविशत्सुकृतलाभित एष कंस-
स्तत्पादसंव्रणितमूर्तिरवर्ण्यभाग्यः ॥ ६३ ॥

सुकृतलाभितः पूर्वजन्मान्ते भगवदवलोकनजातेन सुकृतेन प्रेरित एष कंसस्तं नित्यं हृदि रूपयन् तत्स्वरूपं हृदि स्थिरीकुर्वन् व्ययापितमलः क्षपितसर्वदोषः। तेनैव प्रच्छेदितप्रकृतिः प्रक्षीणमायाजनितवासनालेशः सन्नच्छदितस्वरूपमनावृतानन्दात्मकं ब्रह्माविशदैक्यमनुभूतवान्। यतः तदापि तत्पादसंव्रणितमूर्तिर्भगवच्छ्रीपादपरिक्षुण्णशरीरः। अवर्ण्यभाग्य इतरजनदुष्करकथनभाग्यविशेषः॥—व्ययापितेति। १९३३ व्यय वित्तसमुत्सर्गे। कर्मणि क्तः। रूपयन्। १९३४ रूप रूपक्रियायाम्। सा च रूपस्य करणं दर्शनं वा। हेतौ शता। प्रच्छेदितेति। १९३५ छेद द्वैधीकरणे। अच्छदितेति। १९३६ छद अपवारणे इत्यप्येके। लाभितेति। १९३७ लाभ प्रेरणे। संव्रणितेति। १९३८ व्रण गात्रविचूर्णने। चतुर्णां कर्मणि क्तः। अवर्ण्येति। १९३९ वर्ण वर्णक्रियाविस्तारगुणवचनेषु। यत्॥

प्रपर्णितदिशं रुचा क्षपितभूभृतोऽस्यानुजाः
सदोनिवसितं हरिं ययुरतूत्थिताङ्गाः क्रुधा।
अमूनधिकमोजयन्नखिलरङ्गमन्दोलय-
न्बलः स्फुटितदोर्बलान्समवधीरयञ्जघ्निवान् ॥ ६४ ॥

अस्य कंसस्यानुजाः कङ्कन्यग्रोधादयः सदोनिवसितं सदसि स्थितं हरिं क्रुधा अतूत्थिताङ्गा अनादृतवर्मावरणा आययुः। रुचा निजदेहकान्त्या प्रपर्णिता हरितीकृता दिशो येन तं हरिं क्षपिता बहुकृत्वो हता भूभृतो नृपा यैस्ते। बलोऽमून् समवधीरयन् अनादरं कुर्वन् जघ्निवान् हतवान्। कथंभूतः। अधिकमोजयन् बाहुबलं प्रकाशयन्। अखिलरङ्गं रङ्गस्थान् अखिलजनान् अन्दोलयन् क्षोभयन्। अधीरान् कुर्वन्नित्यर्थः। स्फुटितदोर्बलान् विशीर्णबाहुबलान् ॥—प्रपर्णितेति। 'बहुलमेतन्निदर्शनम्'। एतच्चुरादावदन्तधातुप्रदर्शनं बहुलं ज्ञेयम्। तेनैतान्यपि सिद्धानीत्याह। १९४० पर्ण हरितभावे। अस्य हेतुमण्णिजन्तात् कर्मणि क्तः। क्षपितेति। १९४२[1] क्षप प्रेरणे। नाशनार्थोऽप्ययम्। अस्मात्कर्मणि क्तः। निवसितेति। १९४३ वस निवासे। कर्तरि क्तः। अतूत्थितेति। १९४४ तुत्थ आवरणे। कर्मणि क्तः। ओजयन्। अन्दोलयन्। शता। स्फुटितेति। कर्तरि क्तः। समवधीरयन्। शता। एते बहुलत्वात्सिद्धाः। ओजेर्बलदीप्ती। अन्दोलेश्चलनम्। स्फुटेः प्रकाशनविशरणे। अवधीरेरवज्ञा इति द्रुमे। एवं गन्धयतीति हिंसार्थः। अर्थयतीत्यतङ् तेन साध्य इति हरः। अपानयतीत्यपान इत्यादौ आनयतिर्धात्वन्तरमिति योगशास्त्रे॥

१. अत्र '१९४१ विष्य दर्शने' नोदाहृतः.

अथ स्ववर्ग्यभुतेन केनचिदमानुषकर्मणि कृते गोपकुमाराणां प्रहर्षातिशयं वर्णयति—

हस्तयमानाः पादयमाना गोपकुमारा नृत्तमकुर्वन् ।
श्वेतयमानाश्वाश्वयमानास्तत्पुरमायन्केशवपक्ष्याः ॥ ६५ ॥

गोपकुमाराः हस्तयमानाः पादयमानाश्च हस्तं पादं हर्षातिशयेन विक्षिपन्तः सन्तः नृत्तं अकुर्वन् । केशवपक्ष्याः कंसभयात् देशान्तरं गता गताः(?)केचित् केचित् (?)श्वेतयमानाः श्वेताश्वेन चरन्तः । अन्ये अश्वयमानाः अश्वतरेण गच्छन्तश्च तत् पुरं मधुरापुरं आयन् आगतवन्तः ॥—हस्तयमानाः । पादयमाना इति । 'णिङ्ङ्गान्निरसने' इति द्वयोर्णिङ् । श्वेतयमानाः । अश्वयमाना इति । 'श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च' इति श्वेताश्वाश्वतरशब्दाभ्यां णिङ् । अश्वशब्दतरशब्दयोर्लोपश्च ॥

खला विपुत्कुक्कुरवद्भयार्ता ययुश्च संभाण्डयमानभृत्याः ।
भयेन संचीवरिताः स्थिता ये ते तु प्रविष्टा नगरं प्रहृष्टाः ॥ ६६ ॥

विपुच्छाः कुक्कुरा इव अधःकृतपुच्छाः श्वान इव भयार्ताः खलाः संभाण्डयमानभृत्याः समाचयमानाः उद्धार्य वस्तूनि एकीकृत्य बध्नन्तो भृत्याः येषां ते तथाभूताः सन्तो ययुः । ये सज्जना भयेन संचीवरिताश्चीवरमर्जितवन्तः परिहितवन्तो वा । पूर्वं स्थितास्ते तु प्रहृष्टा नगरं मधुरापुरं प्रविष्टाः ॥—विपुदिति । 'पुच्छादिषु धात्वर्थे इत्येव सिद्धम्। 'पुच्छभाण्डचीवराण्णिङ्' इति न वक्तव्यम् । 'प्रातिपदिकाद्धात्वर्थे' इत्येव णिच्सिद्धेः बहुलोक्त्यात्मनेपदसिद्धेश्च । तत्र 'पुच्छादुदसने पर्यसने व्यसने वा' इति णिङि ततः 'क्विप् च' इति क्विप् । पुतं छादयतीति व्युत्पत्त्या पुच्छशब्दस्य संयोगान्तलोपे तकारशेषाद्विपुदिति स्यात् । संभाण्डयमानेति । 'भाण्डात्समाचयने' इति णिङि शानच् । संचीवरितेति । 'चीवरादार्जने परिधाने वा' इति णिङि कर्तरि क्तः ॥

इति धातुकाव्यव्याख्याने तृतीयः सर्गः ।

निहत्य कंसं मधुरानगर्यां निवेश्य राजानमथोग्रसेनम् ।
संप्रेष्य नन्दं विजहार कृष्णस्तत्रैव रामेण सहात्मगेहे ॥ ६७ ॥

क्वचित्सुयोज्या धात्वर्थाः क्वाप्ययोज्या उणादिषु ।
क्वचित्कथंचिद्योज्याः स्युर्वक्ष्यन्ते तत्र तत्र ते ॥ ६८ ॥

हलन्त्यमुपदेशेऽजित्यादिर्ञिटुडवस्तथा ।
एभिर्धात्वनुबन्धनां लोपे स्यात्प्रत्ययः पुनः ॥ ६९ ॥

हलन्त्यमिति लुप्येते स्वरार्थावन्तिमौ हलौ ।
तरौ लचौ नपौ चेति स्वरार्थाः प्रत्ययेषु षट् ॥ ७० ॥

आरूढो गरुडं भुजान्ततरलश्रीवन्यमालावलिः
क्ष्मामान्दोलितचामरान्तरगतः प्रोद्गीयमानोऽमरैः ।
चञ्चन्मीनसुपर्णकुण्डलधरो धाराधरश्यामलः
काले मे चरमे ममाक्षिपदवीमायातु नारायणः ॥ ७१ ॥

इति धातुकाव्यं समाप्तम् ।

VRITTARATNÂKARA

TOGETHER WITH ITS TIKA

VRITTARATNÂKARAPANCHIKÂ.

Price Rs. 1-0-0. Postage 1 Anna.

Vrittaratnâkara is the most practical and concise work on Samscrit prosody, written by an ancient erudite scholar known as Kedarbhatta on the lines promulgated by the sage Pingala Muni. It has been considered to be a standard work on the subject and many able scholars have written Tikâs on it, among which the VrittaratnâkaraPanchika by the learned Srî Râmachandra Kavi Bhârati of Gauda, India, who received the title of Bouddhâgama Chakkravarti from a Singhalese king, of the old, ranks the highest in merit. The present publication is edited together with the above Tikâ in which the author has given his own illustrations under all the sutras of the text; this is a very important feature peculiar to this Tikâ itself. The Tika was very rare even in Ceylon, the land of its production; however having procured a few manuscripts with considerable difficulty the editor has spared no pains to clear it from the many clerical mistakes mostly being the superfluous additions and omissions. Moreover he has added many explanatory notes where necessary and has completed the work making it a highly useful treatise for the student.

This book consists of 6 parts viz :—

(1) Definitions of different terms.
(2) Arya, Githi, Vaitâliya and Matrâsamaka.
(3) Names of different Chandas which are 26 in number.
(4) Arthasamavarnavritta,
(5) Udgata, Upastita and Pratipeta.
(6) Prastâra.

TUKARAM JAVAJI,
Proprietor, "Nirnaya-sagar Press."
B